श्रीहरिः

# चातुर्वर्ण्य-संस्कृति-विमर्शः

## द्वितीयो भागः

प्रथम भागश्च

धर्मसम्राट्

स्वामी श्री करपात्री जी महाराज

श्रीहरिः

# चातुर्वर्ण्य-संस्कृति-विमर्शः

## द्वितीयो भागः

प्रथम भागश्च

परमहंसपरिव्राजकाचार्यानन्तश्रीविभूषित
स्वामिश्रीहरिहरानन्दसरस्वती
( श्रीकरपात्री स्वामी )
महाराजैः प्रणीतः ।

संपादकौ

**श्रीरामगोविन्दशुक्लः,** न्याय-व्याकरण-साहित्याचार्यः

**स्वामिश्रीसदानन्दसरस्वती** वेदान्तवाचस्पतिः

प्रकाशकः

**स्वामीश्रीसदानन्दसरस्वती [ श्रीवेदान्तीस्वामी ]**

धर्मसंघ, दुर्गाकुण्ड, वाराणसी

प्रकाशकः
स्वामीश्रीसदानन्दसरस्वती [ श्रीवेदान्तीस्वामी ]
धर्मसङ्घ, दुर्गाकुण्ड, वाराणसी ।

प्रथमसंस्करणम्
अनन्तचतुर्दशी २०३६
मूल्यम् पञ्चदश रूप्यकाणि

मुद्रकः
गौरीशंकर प्रेस,
मध्यमेश्वर, वाराणसी ।

प्रथम भागस्य

# किञ्चिन्निवेदनम्

अस्मिन् भूमण्डले सन्ति लोकसंस्थापनार्था अनेका व्यवस्थाः। याः दस्युप्रायान् जनान् लोकमार्गे प्रवर्तयन्ति। किन्तु तासु नास्ति काचित् स्थायिनी व्यवस्था, केवलं वैदिकी व्यवस्थैव स्थायिनीं वर्णव्यवस्थां प्रकाशयति। कति चतुर्युगी न गता, कियन्तः अस्याः विनाशका नोत्पन्नाः, भारतीयजनमनोभिरियं न गता। अद्यापि वैज्ञानिके युगे यत्र समस्तं भूमण्डलं निकटतया प्रतीयते। यावता कालेन पूर्वजैः तीर्थयात्रा कृता। ततोऽपि स्वल्पेन कालेन वयं चन्द्रमण्डलं दृष्ट्वा आगच्छामः, अमेरिकादिदेशानां का कथा। यतः प्रातरासं कृत्वा प्रचलितः मध्याह्नभोजनं रूसदेशे सायकालिकं जापाने शयनं च भारते कर्तुं शक्यते। तत्र भारतीया वर्णव्यवस्था, आचारव्यवस्था, आराधनप्रकारः क्लेशद इवानुभूयते। अत एव बहुभिः अस्या उन्मूलनाय प्रयत्नः महता प्रयासेन आरब्धो वर्तते। भारतीयं धर्मनिरपेक्षं शासनं तु कटिबद्ध एव आस्ते।

तत्र केचन शासनप्रेरिताः, अपरे तस्मात् सहयोगाभिलाषुकाः अन्यथायोजितैः शास्त्रीयैः वचनैः, कथानकैः, अल्पमतीन् वञ्चयन्ति। अस्यां परम्परायां आंग्लाः, तत्सजातीयाः अन्ये, तेभ्यो लब्धभाषापरिचयाः भारतीया अपि अभारतीयासु भाषासु बहोः कालात् किमपि जल्पन्तः आसन्। यत्र भारतीयपरम्परायां परिनिष्ठिताः विद्वांसः अवधानं न दत्तवन्तः।

अधुना शासनात् साहाय्यं प्राप्य तेषां ग्रन्थानां लोकभाषायामनुवादः उपलब्धो वर्तते। तानवलोक्य कोऽपि वर्णेन गौरः संन्यासदीक्षायां दीक्षितः, कर्मणा ब्राह्मण्यमुपगतमात्मानं समर्थयितुं कोपि निबन्धो निबद्धः। यस्य तादृशाएवानेके समर्थकाश्च जाताः। ये लोकान् वर्णव्यवस्थातो शिथिलादरान् विदधति।

इमामनर्थपरम्परामवलोक्य वैदिकमार्गप्रतिष्ठापनाचार्यैः **श्रीकरपात्र** स्वामीत्याख्यया प्रसिद्धैः पदवाक्यप्रमाणपारावारीणैः **स्वामिश्रीहरिहरानन्दसरस्वतीमहाराजैः** पुराणानि सम्यगवलोक्य युक्तिप्रमाणाभ्यां विचार्य

'चातुर्वर्ण्यसंस्कृतिविमर्शो' नाम रुचिरो ग्रन्थः निरमीयत। यत्र विविधैः प्रकारैरुपक्षिप्तानाक्षेपान् अनेकैः प्रकरणैः विचरितं यस्यायं प्रथमोभागः विदुषां करकमलेषु उपायनीकुर्वन् प्रसीदामि।

अयं ग्रन्थः भागद्वयेन मुद्रणीयो वर्तते। तत्र प्रथमे भागे निम्नलिखिताः विषयाः विचारिताः।

**१. जन्मना वर्णवादः**

अत्र वर्णशब्दार्थः, जातिशब्दार्थः, जन्मना जातिवादः, जातिभेदकाः, ब्राह्मणभेदः, कर्मब्राह्मणपक्षे पूर्वपक्षाः तेषामुत्तराणि, तत्र वेदपुराणयोरैकमत्यम्, टीकाकाराणां संगतयः।

**२. वर्णद्वयवादः**

अस्य उपस्थापनम् समाधानं च

**३. एकवर्णवादः**

अस्य उपस्थापनम् समाधानं च

**४. आजीविकावर्णवादः**

अत्र जातिशब्दार्थः वर्णव्यवस्थाकारणविचारः, तस्याः स्थिरत्वपक्षे दोषाः, तेषां समाधानानि, वृद्धविवाहः, तस्य समाधानम्।

**५. वर्णसम्बन्धिनो विचाराः**

अत्र वर्णसम्बन्धे प्रस्तुतानां विचाराणामुपस्थापनम्, समाधानञ्च।

**६. वेदाध्ययनाधिकारः**

अत्र वेदाध्ययने केऽधिकारिणः, स्त्रीशूद्रयोः विद्यासम्बन्धः, तयोरध्यापकत्वम्, वेदमन्त्रार्थः; दयानन्दकृतमन्त्रार्थखण्डनम्, सर्वपक्षाणां समाधानम्।

द्वितीयभागः शीघ्रमेव प्रकाशितो भविष्यति यत्र निम्नलिखिताः विषयाः विचारिताः सन्ति।

१—जातिभेदे वैदेशिकानां विचाराः,

२—जातिपरिष्कारः, तस्याः समर्थनम् स्वरूप परिचयश्च।

३—वेदप्रामाण्यम्।

४—गोत्रप्रवरविमर्शः।

५—पुराणानां प्रामाण्यम्।

इत्थं भागद्वयेन मुद्रापयिष्यमाणस्यास्य ग्रन्थस्य कलेवरं सहस्रपृष्ठपरिमितं भवितुमर्हति।

आसीदयं प्रकाशनस्य मनोरथः यत् प्रयागस्य **'अर्धकुम्भा'** वसरे समग्रः ग्रन्थः प्रकाशितो भवेत् किन्तु मुद्रणशैथिल्यात् तथा नाभवत्। अधुना अस्य प्रथमोभागः पाठकानां करकमलेषु समर्पयन् सन्तोषमनुभवामि। अशासे च शीघ्रमेव द्वितीयो भागः हस्तगतो भविष्यति।

अस्य ग्रन्थस्य प्रकाशनकर्मणि साहाय्यमुपरचयन्तः **श्रीमार्कण्डेयब्रह्मचारि** महोदयः, **श्रीवासुदेवब्रह्मचारिणः**, **श्रीसन्तशरणवेदान्तिनः**, **ब्रह्मचारिश्रीब्रह्मचैतन्य (प्रबल)** महोदयाः सादरं स्मरणीयाः। येषां सहयोगेनायं ग्रन्थः प्रकाशमायातः।

अस्य ग्रन्थस्य गोवर्धनपीठसम्बद्धैः अधिकारिभिः महता हर्षेण प्रकाशनभारो गृहीत इति सर्वथा धन्यवादार्हाः।

अन्ते भगवन्तं विश्वनाथं प्रार्थये यत् अस्मिन् कर्मणि बलमुत्साहञ्चादधातु इति।

**रामगोविन्दशुक्लस्य**

जन्माष्टमी
२०३० विक्रमे।

# विषय-सूची

❀०❀

॥ श्रीहरिः ॥

# चातुर्वर्ण्य-संस्कृति-विमर्शः

●

यच्छक्तयो वदतां वादिनां वै विवाद-संवादभुवो भवन्ति ।
कुर्वन्ति चैषां मुहुरात्ममोहं तस्मै नमोऽनन्तगुणाय भूम्ने ॥

श्रौतस्मार्त-सकलधर्मोपासन-विज्ञानानामाश्रमव्यवस्थायाश्च वर्णव्यवस्थामूलकत्वात् वर्णस्वरूपस्य तद्धेतूनाञ्च पूर्वं निर्धारणमत्यावश्यकम् । तत्र 'पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्य' 'ब्राह्मणो यजेत' 'ब्राह्मणेन न म्लेच्छितवै नापभाषितवै' 'वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः' 'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत एकादशवर्षं राजन्यं द्वादशवर्षं वैश्यम्' 'ब्राह्मणो निर्वेदमायात्' 'निषादस्थपतिं याजयेत्' इत्यादिश्रुतिभिः सिद्धान् वर्णानुद्दिश्यैव कर्मविधानाद् यद्यपि सिद्धमेव जन्मजत्वं, तथापि ब्राह्मणादिवर्णस्वरूपमाश्रित्य केचनाधुनिकास्तत्र संशेरते, कर्मनिष्पाद्यमेव च वर्णं मन्वते । अतो वर्णस्वरूपप्रतिपादनाय साम्प्रतमुपक्रम्यते—

## जन्मना वर्णव्यवस्था

'वर्णो द्विजादौ शुक्लादौ' इति कोषोक्त्या वर्णशब्दो द्विजादिजातौ रूढः । जातिशब्दस्तु जन्ममूलक एव । यथा सिंहत्वादिजातयः जन्ममूलिका एव ।

अत एव—

"ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥"

इति मन्त्रेण जन्मना वर्णव्यवस्था निगदव्याख्याता। तथाहि—अस्य महाविराड्रूपस्य भगवतो ब्राह्मणः मुखमासीत् मुखाज्जात इत्यर्थः। अस्य बाहू राजन्यः बाहुभ्यां जातत्वात्। कृतः। अस्य पुरुषस्य यत् यौ ऊरू तद्रूपो वैश्य आसीत्। अस्य भगवतः पद्भ्यां शूद्रः अजायत।

नन्वत्र ब्राह्मणो मुखमिति सामानाधिकरण्यव्यपदेशेन ब्राह्मणोऽस्य मुखमिति काल्पनिकमेव ब्राह्मणस्य तन्मुखरूपत्वम्। एवमेव राजन्यादीनामपि सम्बन्धे प्रतिपत्तव्यमिति चेन्न, 'पद्भ्यां शूद्रो अजायते'ति वाक्यशेषेण शूद्रस्य पज्जत्ववत् ब्राह्मणादीनामपि मुखजत्वमेव प्रतिपत्तव्यम्। न चैवं सामानाधिकरण्यमनुपपन्नमिति वाच्यम्; 'मृद्घटः', 'सुवर्णकुण्डलमित्यादौ तज्जत्वेन सामानाधिकरण्यवत्, तदुपपत्तेः। अतएव महर्षिणा शौनकेन 'तदस्योत्पन्नत्वादिति' तदुत्पन्नत्वेनैव ब्राह्मणादीनां मुखादिरूपतोक्ता। 'स मुखतस्त्रिवृतं निर्मिमीत' इत्यादितैत्तिरीयश्रुत्यापि निर्माणोक्त्या जन्मजत्वमेव ब्राह्मणत्वादीनामुक्तम्। मुखबाहूरुपज्जत्वादेव भगवता मनुना प्रतिपादितम्।:

'लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्तयत्॥'

अत्र कुल्लूकभट्टः—'भूरादीनां बाहुल्यार्थं मुखबाहूरुपादेभ्यो ब्राह्मणक्षत्रियवैश्यशूद्रान् यथाक्रमं निर्मितवान्। ......दैव्या च शक्त्या मुखादिभ्यो ब्राह्मणादिनिर्माणम्।" मुखादिभ्यो जायमानानामेव ब्राह्मणत्वादिजातित्वसिद्ध्या जन्मनैव जातिरिति लोकप्रसिद्धः सिद्धान्तोऽप्यत्र सङ्गच्छते। लोके सिंहादीनां जन्मनैव जातित्वस्य प्रसिद्धेः। जातित्वादेव यथा सिंहादयो न गुणकर्मादिमूलका, एवं ब्राह्मणादयोऽपि।

ननु—"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" इति गीतासु गुणकर्मभिरेव चातुर्वर्ण्यस्य सृष्टिर्ज्ञायत इति चेन्न; तात्पर्याज्ञानविजृम्भितत्वात्। तथाहि—घटोत्पत्तौ दण्डादीनामिव चातुर्वर्ण्यसृष्टौ गुणकर्मादीनां निमित्तत्वमुक्तम्। यथोत्पन्ने घटे न दण्डादिभिस्तदवस्थितिः किन्तु घटोत्पत्तेः प्रागेव विद्यमानानां दण्डादीनां घटहेतुत्वम्, तथैव ब्राह्मणादियोनिषु

तत्तद्ब्राह्मणादिशरीरप्राप्तौ गुणकर्मादीनां हेतुत्वम्। तेन यैर्गुणैः, कर्मभिश्चेश्वरेण ब्राह्मणादिदेहनिर्माणं कृतं तेषामेवात्र चातुर्वर्ण्यनिमित्तत्वमुक्तम्। तच्च सनातनधर्मानुयायिभिः सर्वत्रैव कार्यमात्रस्य गुणकर्ममूलकत्वादिष्यत एव। अत एवेश्वरेण मया वियत्सोमसूर्य्यादिवत् चातुर्वर्ण्यमित्युक्तम्। यथा वियदादयो न सर्वैर्निर्मातुं पार्यन्ते तथैव ब्राह्मणादयोऽपि। गुणकर्ममूलकचातुर्वर्ण्यव्यवस्थावादिभिस्तु तत्तच्छरीरोत्पत्यनन्तरं तद्देहादिगतैः गुणकर्मभिः ब्राह्मण्यादिनिर्धारणम्-इष्यते, तच्च नानेन वाक्येन सिद्ध्यति।

विश्वामित्रवृत्तान्तः

न च शास्त्रप्रसिद्धानां जात्यन्तरविशिष्टानां विश्वामित्रवसिष्ठादीनां स्वकीयतपःप्रभावाज्जातिपरिवर्तनं सम्पन्नमतः गुणकर्मादिमूलकत्वमेव तदिति मन्तव्यमिति वाच्यम्; तेषां मूलतः ब्राह्मणादीनां सतामेव तपःप्रभावात्प्रतिबन्धकावरणापनयनेन ब्राह्मणत्वादीनामभिव्यक्तेः। तथाहि विश्वामित्रस्य वाल्मीक्युक्तवृत्तान्ते ऋचीकमहर्षिनिर्मितब्राह्मचरुविपर्यासेन विश्वामित्रशरीरोपादानत्वेन ब्राह्मणत्वेऽपि क्षेत्रजदोषापाकरणायैव तप आदीनामुपयोगः। वसिष्ठस्य तु ब्रह्मपुत्रत्वेन ब्राह्मणत्वमेव। निमिशापानन्तरं कुम्भनिष्ठोर्वशीनिमित्तसंक्षुब्धमित्रावरुणतेजोजातत्वेन देवजत्वमेव। तच्च न ब्राह्मणत्वापनोदकम्। देवापिसम्बन्धे तूपरिष्टाद्वक्ष्यते।

भगवता भाष्यकारेणापि कर्मभिस्तदपोद्वलितैः सत्त्वादिगुणप्रभेदैस्तारतम्योपेतैर्ब्राह्मणादीनामुत्पत्तय उक्ताः।

'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥' (भ. गी० ४।१३)

'चातुर्वर्ण्यं चत्वार एव वर्णाः चातुर्वर्ण्यं मया ईश्वरेण सृष्टं उत्पादितं 'ब्राह्मणोऽस्य मुखमासीत्' इत्यादिश्रुतेः। गुणकर्मविभागशः, गुणविभागशः कर्मविभागशश्च। गुणाः सत्त्वरजस्तमांसि। तत्र सात्त्विकस्य सत्त्वप्रधानस्य शमो दमस्तप इत्यादीनि कर्माणि। सत्त्वोपसर्जनरजःप्रधानस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि। तम उपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। रज उपसर्जनतमःप्रधानस्य शूद्रस्य शुश्रूषा एव कर्म, इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टमित्यर्थः। तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेषु अतो मानुषे लोके इति विशेषणम्' इति तत्रत्यं शाङ्करभाष्यम्।

अत्र गीतोक्ताः शमादमादयो गुणास्तु ब्राह्मणादीनां स्वाभाविका एवोक्ताः। नतु तन्मूलकम् ब्राह्मण्यादिकम्, भगवद्वचसां तात्पर्य्यगोचरः। तस्माद्यथा-सिंहात् सिंह्यां जातः शौर्यक्रौर्यादिभिर्गुणैरुपेतः मुख्यः सिंहो भवति तथैव ब्राह्मण्यादिषु ब्राह्मणादिभ्यो जाताः शमदमादिभिस्तत्तद्वर्णोचितैर्गुणैरुपेता एव मुख्या ब्राह्मणादयः स्वाभाविकगुणरहिता जन्ममात्रनिबन्धना ब्राह्मणादयो जातिब्राह्मणादय एव, तादृशजन्मविहीनाः शमदमादिगुणोपेतास्तु गुणकृताः गौणा एव ब्राह्मणादयः। यथा शौर्यादिगुणहीनः सिंहो जातिसिंहः, जातिहीनः शौर्यादिगुणोपेतस्तु देवदत्तादिर्गौणसिंहस्तद्वदत्रापि बोध्यम्। तदुक्तम्-महाभाष्यकारैः—

"तपःश्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारकम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥" (म० भा० २।२।६)

## पुराणसम्मतिः

अत्र कैश्चिदुच्यते—यत् परमेश्वरस्य मुखात्केषाञ्चिदपि ब्राह्मणानामुत्पत्तयः पुराणेषु न श्रूयन्ते प्रत्युत भागवतादिपुराणेषु 'अङ्गुष्ठान्नारदो जज्ञे' इत्येवमादिभिः प्रजापतेरङ्गुष्ठादिभ्योऽङ्गान्तरेभ्य एव तेषां तेषां ब्राह्मणानामुत्पत्तिः श्रूयते। तत्तुच्छम्। महाभारतादिषु ब्राह्मणादियुग्मसहस्राणां मुखादिभ्य उत्पत्तिवर्णनात्। मूलब्राह्मणेषु तथात्वेऽप्यन्यत्र मुखादिशक्तिजत्वस्यैव विवक्षणात्।

ब्राह्मणानां शतं श्रेष्ठं मुखादेवासृजत् प्रभुः।
बाहुभ्यां क्षत्रियशतं वैश्यानामूरुतः शतम्॥ ३१॥
पद्भ्यां शूद्रशतञ्चैव केशवो भरतवर्षभ॥३२॥(म०भा०शा २०७।

तत्र 'ब्राह्मणोऽस्य मुखम्' इत्यादौ मुखादिपदेन तत्तत्प्रधानशक्तीनामेव निर्देशात्। तथा च मुखशक्तेर्ब्राह्मणोत्पत्तिः बाहुशक्तेः क्षत्रियोत्पत्तिः। सङ्कल्पवशात्तेषां तेषामुत्पत्तौ वृक्षादीनाञ्चोत्पत्तौ प्रत्यक्षेण योनिजत्वाभावेऽपि योनिशक्तिजत्वस्य सर्वत्रानपायात्सर्वेषां योनिजत्वोपपत्तिः। योनिशब्देनोपादानभूता प्रकृतिशक्तिरेव गृह्यते। अत एव शिवशक्त्यात्मकं सर्वं जगत् शिवशक्त्योर्योनिलिङ्गादिरूपेण क्वचिद्योगाभावेऽपि व्यापकशिवशक्त्यात्मना अङ्कुरादावपि तत्सत्त्वमव्याहतम्। अत एव ब्राह्मणादिदेहारम्भकेषु तत्तत्परमाण्वाद्युपादानेषु

मुखात्मिकाया ब्राह्मयाः शक्तेः प्राधान्याद् ब्राह्मणत्वम्। यत्रेश्वरस्य देवानां सत्यसङ्कल्पानामृषीणाञ्च वचनबलात् क्षत्रदेहाद्यारम्भकोपादानपरमाण्वादिविघटनं ब्राह्मणादिदेहारम्भकब्राह्मीशक्तिसमन्वितपरमाण्वादि सङ्घटनं जायते। तत्र तस्मिन्नेव जन्मनि जातिपरिवर्तनं सम्पद्यते। अन्यथा जन्मपरिवर्तनमन्तरा सिंहादीनामिव जातिपरिवर्तनमशक्यमेव। यथा जन्मान्तरमन्तरा सिंहात्सिंह्यां समुत्पन्नस्य सिंहशरीरस्य जातिपरिवर्तनं न भवति। मृते रुग्णे शौर्यादिगुणहीनेऽपि सिंहे च सिंहत्वव्यवहारदर्शनात्, तथैव प्रकृतेऽपि बोध्यम्।

## वरशापाभ्यां जातिः

यत्र च महर्षीणां वरेण शापेन वा सिंहस्य देवत्वं सूकरत्वं वा सम्पद्यते। तत्र पूर्वोक्तया प्रक्रियया शक्तिवरणभेदेन प्रकृत्यापूरात् पूर्वदेहारम्भकोपादानविघटनपुरस्सरं जात्यन्तरारम्भकोपादानसङ्घटनं जायते तत्रैतस्मिन्जन्मनि जातिपरिवर्तनमपवादभूतमेव।

## सांकर्यनिवृत्त्या जात्याप्तिः

क्वचित्स्मृतिषु प्रकारान्तरेणापि जातिपरिवृत्तिः स्मर्यते। यथा शूद्रकन्या ब्राह्मणेनोढा सती कन्यां जनयेत् सापि पुनर्ब्राह्मणेनोढा कन्यां जनयेत् एवं रीत्या सप्तमे पर्याये सा कन्या ब्राह्मणत्वं लभते। एतेष्वेव भेदेषु शास्त्रीयाणि सर्वाण्यपि वाक्यानि समन्वितानि भवन्ति।

## गौणशूद्रत्वकथनम्

यत्तु केनचित् 'जन्मना जायते शूद्र' इति सर्वेषामेव जन्मना शूद्रत्वं प्रतिज्ञातं तदपि तुच्छम्, तादृक् प्रामाणिकवचनानुपलम्भात्। 'जन्मना ब्राह्मणो ज्ञेयः' इति 'जन्मना ब्राह्मणः श्रेयान्' इत्यादि विपरीतस्मृत्युपलम्भाच्च। क्वचित्सत्त्वे वा शूद्रसम एव तदर्थः।

'साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।'

नह्यत्र साहित्यसङ्गीतकलाविहीनः साक्षात्पशुरेव सम्पद्यते। किन्तु पशुसदृश इत्येव तदर्थ इतिवत्।

एतेन

'सन्ध्यां नोपासते यस्तु ब्राह्मणो हि विशेषतः ।
स जीवन्नेव शूद्रः स्यात् मृतः श्वा चैव जायते ॥
दक्षस्मृतिः-२।३२ ॥
यो भुङ्क्ते हि च शूद्रान्नं मासमेकं निरन्तरम् ।
इह जन्मनि शूद्रत्वं मृतः श्वा चैव जायते ॥
अङ्गिरास्मृतिः ६ । ७
✓ योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
मनुस्मृतिः २ । १६८

'त्र्यहेण शूद्रो भवति' इत्यादावपि गौणमेव शूद्रत्वं मन्तव्यम् । एवमेव 'क्षत्रियपुत्रा ब्राह्मणा बभूवुः । 'द्वौ वैश्यो ब्राह्मणतां गतौ' इत्यादि वचनेष्वपि ब्राह्मणसाम्यमेव गौणसिंहवज्ज्ञातव्यम् । नचेतैर्वचनैः ब्राह्मणत्वशूद्रत्वादि-प्राप्तिः, जातेर्नित्यत्वेन यावच्छरीरं तद्व्यावृत्तेरसम्भवात् । 'एकादशेऽहनि पिता नाम कुर्यात्' इति श्रुत्या ब्राह्मणादीनामेकादशेऽहन्येव तत्तद्वर्णोचितनाम-करणानि विहितानि । न च तदानीं गुणकर्मानुरोधि ब्राह्मण्यादिकं निर्णेतुं शक्यम् । अतएव शास्त्रेषु ब्राह्मणादीन् तांस्तान् वर्णानुद्दिश्य तानि तानि कर्माणि विहितानि । 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत, एकादशवर्षं राजन्यं, द्वादशवर्षं वैश्यम् । ब्राह्मणो वसन्ते अग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः, 'राजा स्वाराज्यकामो राजसूयेन यजेत्' इत्यादिषु जन्मसिद्धानेव वर्णानुद्दिश्य कर्माणि विहितानि । न तु यो ब्राह्मणो बुभूषेत् स एवं कुर्यात्, य एवं कुर्यात् स ब्राह्मण इत्येवमादिरीत्या तत्तत्कर्मभिर्ब्राह्मण्यादि विधानं श्रूयते । यथा दुहित्रादयो जन्मसिद्धा एव । जन्मसिद्धानामेव दुहित्रादीनां तदुचितानि कर्माणि लोके निर्दिश्यन्ते । न तु या एवं कुर्यात्सा दुहिता या एवं कुर्यात्सा पत्नी, तथात्वे दुहित्रादीनामपि पत्नीकर्मकरणेन पत्नीत्वं स्यात् इति तद्वत्प्रकृतेऽपि ज्ञेयम् । ब्रह्मवित्त्वादि प्रयुक्तं ब्राह्मण्यन्तु ततो भिन्नमेव, तस्य जातिमिर पेक्षत्वादजातिरूपत्वाच्च ।

### ब्राह्मणादियोनिभेदसमर्थनम्

ननु यथा सिंहश्वादीनां योनिभेदेन जातिभेदो न तथा ब्राह्मणक्षत्रियादीनां

योनिभेद इति चेन्न, छान्दोग्ये ब्राह्मणादीनां योनिभेदश्रवणात्। 'तद्य इह रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिं ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा य इह कपूयचरणा अभ्यासो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं शूकरयोनिं चाण्डालयोनिं वा प्रपद्यन्ते' इति (छान्द० ५-१०) इह श्वशूकरादियोनिवदेव ब्राह्मणादियोनिवर्णनम्। तेन यथा श्वशूकरयोर्जातिभेदस्तथैव ब्राह्मणादीनां जातिभेदः। न च वैलक्षण्याभावे कथं जातिभेदः? अश्वभेदहयादीनामिव मनुष्यभेदब्राह्मणादीनामपि जातिभेदोपपत्तेः। 'हयो भूत्वा देवानवहद् वाजी भूत्वा गन्धर्वान्' (बृ· उ· प्र. १।१।२)

अपि च न दृष्टं वैलक्षण्यमेव वैलक्षण्यम्, तथात्वे गन्धादिवैलक्षण्यानुपपत्तेः। आम्रवृक्षाणामवैलक्षण्येऽपि फलैर्वैलक्षण्यप्रतीतेः। अनेकाम्रफलानाम् वैलक्षण्याप्रतीतावपि रसादिभिर्वैलक्षण्यावगमात्। तथैव मनुष्यत्वादिनाऽवैलक्षण्येऽपि मुखादिशक्तिजत्वादिवैलक्षण्येन ब्राह्मणादीनां वैलक्षण्योपपत्तेः। अतएव पित्रादिब्राह्मणत्वोपदेशसापेक्षपुत्रादिब्राह्मणत्वादिकं सकृदाख्यातग्राह्यमेव। तेनैव ब्राह्मणीत्यादौ जातेरस्त्रीविषयादयोपधादिति ङीष् सिद्ध्यति। 'ब्राह्मोऽजातौ' इत्यत्र अजातौ ब्राह्मः निपात्यते जातौ तु ब्राह्मणा एव।

अत एव—"दुःशीलोऽपि द्विजः पूज्यः न शूद्रो विजितेन्द्रियः।
कः परित्यज्य दुष्टां गां दुहेच्छीलवतीं खरीम्॥ इति
(पराशरः अ० ८। श्लो० ३२)

'अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत्।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत्॥' इति मनुश्च।

योन्युत्कर्षमभिप्रेत्य जन्मना वर्णभेदसत्त्वे एव—

माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयुक्तं, शूद्रस्य स्याज्जुगुप्सितम्॥

इत्यादि नामकरणभेदसङ्गतिः।

## गुणकर्मवादव्यवस्था

यदुक्तम्—'सर्वे एते शब्दाः गुणसमुदाये प्रवर्तन्ते। ब्राह्मणः क्षत्रियो वैश्यः शूद्रः (पा· सू० २।२।६) इति पतञ्जल्युक्तरीत्या ब्राह्मणादिशब्दा गुणशब्दा

एव न जातिशब्दाः। तथा च तपःश्रुतादिगुणकर्मसमुदायनिबन्धनैव वर्णव्यवस्था। एवं च ब्राह्मणोऽस्य मुखमासीदिति मन्त्रस्य तदनुगुणैव व्याख्या युक्ता। तेन ब्रह्माण्डविग्रहस्य ब्रह्मणः ब्राह्मणत्वप्रयोजकशमदमादिगुण-विशिष्टो ब्रह्म भवितुकामः सत्त्वगुणबहुलो वेदादिविद्यासम्पन्नः परमेश्वरो-पासको मुखमासीत्। मुखस्थानीयः मुख्यः सर्वोत्तम आसीत्। यथा मुखं ज्ञानप्रधानमितराङ्गापेक्षया श्रेष्ठम्, तथास्यापि ज्ञानप्रधानत्वाच्छमादिगुणैः श्रेष्ठत्वाच्च मुखत्वव्यपदेशः।

'अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः' (बृ. उ. ३। ८। १०) इत्यादि श्रुतिषु ज्ञाननिबन्धनो ब्राह्मण्यव्यपदेशः। राजन्यः शौर्यादिगुणविशिष्टः सत्त्वोपसर्जनरजो बहुलः बाहूकृतः। बाहुस्थानापन्नत्वेन सम्पादितो बाहुवद्बलप्रधानत्वात्। तथास्य पुरुषस्य यत् यौ ऊरू तत्तद्रूपः तत्स्थानापन्नः वैश्यः कृषिवाणिज्यादिकर्मविशिष्टो धनसञ्चयप्रधानः, तम उपसर्जनरजोबहुल ऊरुत्वेन सम्पादितः। यो यत्र तत्र पुनः पुनर्विशति प्रविशति कार्य्यार्थमसौ विट् तदपत्यं वैश्य इति व्युत्पत्तेः। तथास्य पद्भ्यां यौ पादौ विभक्तिव्यत्ययः किमूरू पादा उच्येते इति प्रश्नोपक्रमानुरोधात्। पञ्चमी च प्रथमार्था। पादस्थानीयकः शूद्रः परि-चर्य्याशिल्पकौशल्यः परिश्रमत्वादिगुणविशिष्टो रज उपसर्जनः तमोबहुलः अजायत इत्यकल्पयन्।

एवमेव ब्राह्मणादयः तद्गुणविशिष्टा एव मुखप्रभृतयो अवयवा अस्य ब्रह्माण्डविग्रहस्य प्रजापतेः विद्यन्ते इति कल्प्यते' इति तन्न, यतः ब्राह्मणोऽस्य मुखमासीदित्यस्यापि मुखजत्वादिभिरेव ब्राह्मण्यादि-कमुक्तम्, पद्भ्यां शूद्रोऽजायतेति वाक्यशेषात्। नहि प्रश्नानुरोधेन पञ्चमी प्रथमात्वेन परिणमयितुमर्हा मुख्यार्थविरोधात्; गौणार्थत्वा-पत्तेश्च। ब्राह्मणादीनां मुख्यं गौणं वा मुखत्वादिकम्? सामानाधिकरण्य-ञ्चेदं मुख्यममुख्यं वा? सिंहो देवदत्त इति गौण्या वृत्त्या वा? स्थाणुरेष पुमानितिवत् बाधायां वा? सोऽयं देवदत्त इतिवत् मुख्यं वा सामानाधि-करण्यम्? मृद्घटः इतिवत्कार्यकारणभावमूलकं वा सामानाधिकरण्यमित्यादि विचिकित्सानिवृत्तिपूर्वकप्रतिपित्सितार्थप्रतिपादकत्वेन पञ्चम्या एव श्लिष्ट-

त्वात्। यथा मृज्जत्वाद्घटो मृदित्युच्यते तथैव मुखवत्प्राधान्यादिकमपि सूपपद्यते। अतएवोत्तरत्र 'चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽजायत' इत्यादौ सृष्टिवर्णनं सङ्गच्छते। 'मुखबाहूरुपज्जानामि'ति मनुनापि स्पष्टं तज्जत्वेन ब्राह्मणत्वादिकमुक्तम्।

किञ्च यदि ब्राह्मणत्वप्रयोजकाः शमादयस्तर्हि तद्विशिष्टो ब्राह्मणः सम्पन्न एव कथं तस्य ब्रह्म बुभूषोपपद्यते? यदि ब्रह्मपदेन सर्वाधिष्ठानभूतं परमतत्त्वमेव विवक्षितं तदपि नोपपद्यतेऽब्रह्मणो ब्रह्मत्वानुपपत्तेः, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिविरोधाच्च। अविद्ययाऽब्रह्मभूतस्य विद्यया ब्रह्मत्वमिष्यते चेत्तदपि नोपपद्यते। तस्य विद्यैकसाध्यत्वेन ब्राह्मणत्वाद्यनपेक्षत्वात्। अत एव 'मनुष्येषु देवेषु तथर्षिषु यो ह वै तत्परमं ब्रह्म वेद स एव ब्रह्म भवति।' 'यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामि'त्यादि श्रुतिः।

किञ्च ब्रह्माण्डविग्रहस्य देवा एव मुखस्थानीयास्तेषां मनुष्यापेक्षयापि सत्त्वबाहुल्येन प्राधान्यात्, न मनुष्यास्तेषां मर्त्यत्वात्।

## ब्राह्मणशब्दद्वैविध्यम्

यदुक्तम्—"यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ यदा तदक्षरं विदित्वा अस्माल्लोकात् प्रैति स ब्राह्मण' इत्यादि श्रुतिषु-ज्ञाननिबन्धनब्राह्मण्यव्यपदेशः" इति। तदपि न ब्राह्मणत्वादिजातिबाधकम्, तस्याः श्रुतेस्तु पाणिनीयगुणवृद्ध्यादिवत् पारिभाषिकब्राह्मणविषयकत्वेनादोषात्। अत एव जात्या ब्राह्मणस्यापि ब्रह्मनिष्ठत्वरूपब्राह्मण्यस्य लाभाय प्रयत्नः श्रुतः। 'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थाय भिक्षाचर्य्यां चरन्ति' ······ 'ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यञ्च पाण्डित्यञ्च निर्विद्याथ मुनिरमौनञ्च मौनञ्च निर्विद्याथ ब्राह्मणः।' अत्र पूर्वोक्तो ब्राह्मणशब्दो जातिपरो द्वितीयस्तु ब्रह्मवित्परः, ब्राह्मणस्यैव पारिव्रज्यादावधिकारात्। नात्र ब्रह्मविद् ब्राह्मणः पाण्डित्यबाल्यादावधिक्रियते तस्य कृतार्थत्वात्। अतएव वज्रसूच्युपनिषद्यपि जातिब्राह्मणादन्यस्यैव ब्रह्मवित्त्वलक्षणस्य ब्राह्मण्यस्य प्रतिपादनं न जातेरपलापः। तत एव तत्रोक्तम्—"एतेषां (अगस्त्यादीनां) जात्या विनाऽप्यग्रेज्ञानप्रतिपा-

दिता ऋषयो बहवः सन्ति। तस्मान्न जातिर्ब्राह्मण इति।" मोक्षहेतुत्वात्तदेव तु मुख्यं ब्राह्मण्यम्।

एतेन बाहोबलप्रधानत्वादेव तज्जत्वेन राजन्यस्यापि बलप्राधान्यम्। एवमेव विट्शूद्रयोरप्यूरुपज्जत्वेनैव तत्त्वम्। अतएव स्मृतिषु मुखजत्वादिकं स्पष्टमुक्तम्।

'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्।
बाहुजातोरुजातानां नायं धर्मो विधीयते। भारत-भावदीपे।

मुखबाहूरुपज्जानाम् इत्यादिना मन्वादिभिस्तट्टीकाकारैः कुल्लूकभट्टादिभिश्च तज्जत्वादिकमेवोक्तम्। सर्वथापि श्रुतेरिवार्थं स्मृतिरन्वगच्छदिति महाकविकालीदासोक्तरीत्या श्रुत्यर्थमेव स्मृतिर्वक्ति। तथा च स्मृत्युक्तार्थ एव श्रुत्यर्थ इति मन्तव्यम्। मनुविपरीता याः काश्चन कुदृष्टयस्ता हेया एव।

या वेदबाह्या स्मृतयः याः काश्चन कुदृष्टयः।
सर्वास्ताः निष्फला ज्ञेया तमोनिष्ठा हि ताः स्मृताः।'

'पद्भ्यां शूद्रो अजायत' 'बाहू कृतः' इत्यत्र मुख्यार्थत्यागेन अजायत अकल्पयन् इत्यादि गौणार्थकल्पनमसङ्गतमेव। मुख्यार्थसंभवे भाक्तस्यार्थस्यान्याय्यत्वात्।

### देवापिवृत्तान्तः

यदप्युक्तम् "आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद् वर्ष्या अभि। यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्। देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ( ऋ. सं. १०। ९८। ५-७ )

अनेन मन्त्रेण देवापेः कौरव्यस्य शन्तनुभ्रातुः तपसा प्रतिभातवेदत्वं ब्राह्मणत्वं पुरोहितत्वं च संवृत्तमिति ज्ञायते। यास्केनापि मन्त्रस्तथैव व्याख्यातः। तथाहि—तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः। स शन्तनुः कनीयान् अभिषेचयांचक्रे। देवापिस्तपः ब्राह्मणधर्मं प्रतिपेदे। ततः शन्तनोः राज्ये द्वादशवर्षाणि देवो न ववर्ष। तमूचुर्ब्रह्मविदो ब्राह्मणाः अधर्मस्त्वयाचरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितम् तस्मात्ते देवो न वर्षतीति। स शन्तनुः देवापिं शिशिक्ष राज्येन, तमुवाच

देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति तस्यैतद्वर्षकामसूक्त तस्यैषा भवति। ( नि०२-१० ) मन्त्रार्थसारस्तु-देवापिः शन्तनवे पुरोहितः होत्राय वर्षार्थीये होमकर्मणि वृतः सन् कृपयन् राज्ञेऽदीधेत् वृष्टिर्भवेदिति अन्वध्यायत्। तं देवश्रुतं वृष्टिवनिं वृष्टियाचिनं मत्वा बृहस्पतिः देवापिं वर्षसाधिकां वाचमस्मै अयच्छत्। तया वाचा स्तुतिरूपया देवान् स्तुत्वा तेभ्यो वर्षमलभत। 'निषीद होत्रमृतुथा यजस्व देवान् देवापे हविषा सपर्य्य' ( ऋ० स० १०।६८।४) इत्यनेनापि मन्त्रेण हे देवापे होत्रं निषीद ऋत्विक्कर्म करणायावस्थितो भव। ऋतुथा यथाकालं देवप्रसादाय यजस्व। हविषा ( सपर्य्य ) परिचर इत्यर्थकेन इदमेव समर्थ्यते। तथाहि—

'यत्रार्ष्टिषेणः कौरव्यो ब्राह्मण्यं संशितव्रतः।
तपसा महता राजन प्राप्तवान् ऋषिसत्तम।
सिन्धुद्वीपश्च राजर्षिर्देवापिश्च महातपाः।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रस्तथा मुनिः।
महातपस्वी भगवानुग्रतेजा महातपाः।
( म० भा० शल्य० प० ३९।३६-३८ )

एवमेव विश्वामित्रवृत्तान्तेनाऽपि गुणकर्मादिभिरेव वर्णव्यवस्था समर्थ्यते। तथाहि—

'गाधेरभून्महातेजाः समिद्ध इव पावकः।
तपसा क्षात्रमुत्सृत्य यो लेभे ब्रह्मवर्चसम्॥
म० भा० ६।१६।२८

ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः।
क्षत्रियः सोऽप्यथ तथा ब्रह्मवंशस्य कारकः॥
म० भा० शा० ४।४८

एवमेवैकाशीतिसंख्याकानां ऋषभदेवपुत्राणां गुणकर्मभिर्ब्राह्मण्यं सम्पन्नम्। तथाहि—"यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकराः महाशालीना महाश्रोत्रिया यज्ञशीला कर्मविशुद्धा ब्राह्मणा बभूवुः" भा० ५।४।१३

"कर्मतन्त्र प्रणेतारः एकाशीतिर्द्विजातयः। भा० ११।२।९९

एतेऽपि क्षत्रियाः सन्तः क्षात्रमुत्सृज्य तप आदिभिर्ब्राह्मणाः सञ्जाताः

इति। तदपि न जन्ममूलकब्राह्मणादिवर्णव्यवस्थाबाधकम्। जन्मान्तरमन्तरा न जातिपरिवर्तनमित्यस्यौत्सर्गिकत्वात्।

यत्तु—"आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान्। स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि। यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्॥" (ऋ० १०।९८।५—७) इत्यनेन मन्त्रेण क्षत्रियस्य देवापेः पुरोहितत्वश्रवणेन पुरोहितत्वस्य च ब्राह्मणवृत्तित्वेन देवापेः क्षत्रियस्य सतः तस्मिन्नेव जन्मनि ब्राह्मणोचितकर्मणा तप आदिना ब्राह्मण्यमङ्गीकृतं तेन गुणकर्मादिमूलकमेव ब्राह्मण्यं सिद्ध्यती" ति तत्तुच्छम्; ब्राह्मणेतरस्येडाभक्षप्रतिषेधेनार्त्विज्यप्रतिषेधात्। मन्त्रश्च यास्केनेत्थं व्याख्यातः—तत्रेतिहासमाचक्षते। देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शन्तनुः कनीयान् अभिषेचयाञ्चक्रे। देवापिस्तपः प्रतिपेदे ततः शन्तनो राज्ये द्वादशवर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वयाचरितः, ज्येष्ठं भ्रातरमन्तरित्याभिषेचितम्। तस्मात्ते देवो न वर्षतीति। स शन्तनु र्देवापिं शिशिक्ष राज्येन। तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति। तस्यैतद्वर्षकामसूक्तं तस्यैषा भवति (नि० २।१०)।

ऋष्टिषेणस्य पुत्र आर्ष्टिषेणः शन्तनोर्वर्षार्थीये कर्मणि होतृत्वे वृतो हौत्रं कर्म प्रतिनिषीदन् उपविष्टवान्। ततो देवापिः देवसुमतिं देवानां कल्याणीं मतिमुदकसम्प्रदानाभिमुखीं कर्त्तुं चिकित्वान् जानानः। स हि तथास्तौद्यथा देवानामुदकसम्प्रदानाभिमुखी मतिरभूत। ततः परितुष्टेषु देवेषु स देवापिः उत्तरस्मादधरम् उत्तरस्मादन्तरिक्षाख्यादधरं समुद्रं पार्थिवं प्रति एष विभागः समुद्रयोः। अपो दिव्याः प्रशस्ताः सस्यसंपत्करीः असृजदक्षारयत्। किं लक्षणाः? वर्ष्या वर्षभूताः अभिसर्वभूतानामुपरि। स पुरोहितः सन् देवापिः होत्राय होतृकर्मणे वर्षार्थीये कर्मणी वृतः सन् कृपायमाणो राज्ञेऽदीधेत् अन्वध्यायत वृष्टिर्भवेदिति।

ननु मन्त्रे निरुक्ते भाष्ये च देवापेः क्षत्रियत्वं तस्यैव च पुरोहितत्वमुक्तमेवेति चेन्न, आर्ष्टिषेणो वर्ष्या अभि त्रिष्टुप् एतया देवानस्तौत् इति

देवस्तुतिपरस्य मन्त्रस्यातत्परस्य भक्षप्रतिषेधकतत्परवचनविरोधेन तदविरोधेन नेयत्वात्। अत एव निरुक्तव्याख्यात्रा दुर्गाचार्य्येण अन्यकल्पान्तरीणोऽन्य-कल्पान्तरीणस्यैव शन्तनोर्वर्षार्थीये कर्मणि होतृत्वे वृतो होत्रं कर्मप्रतिषीदन्नि-त्युक्तम्।

## तपसा जन्मान्तरे ब्राह्मण्यम्

तत्र 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्ध' इत्युक्तरीत्या शब्दार्थसम्बन्धानां स्वाभाविकत्वेन नित्यत्वमुक्तम्। जननमरणवतां मनुष्यादीनामनित्यानां नित्यवदेव वर्णनासंभवात्। वैदिकाः शब्दा न व्यक्तिपराः। किन्तु नित्यजाति-परा भवन्ति। यथा इन्द्रशब्द इन्द्रत्वजातिपर एव। व्यक्तीनामनित्यत्वेनाऽपि जातेर्नित्यत्वमेव। अथवा प्राड्विवाकादिवत्स्थानपरा वा। यथा प्राड्विवाको न व्यक्तिविशेषः किन्तु स्थानविशेष एव भवति। य एव तत्स्थानमागच्छति स एव तद्वाच्यो भवति। एवं वैदिकदेवाप्यादि शब्दानामपि जाति-विशेषः स्थानविशेषो वार्थः। तस्माद्देवापिस्तपसा जन्मान्तरे ब्राह्मणो भूत्वै-वार्त्विज्यं चक्रे। अत एव स देवाप्यधिकारे वर्त्तमान एतदकरोत्। अन्यस्मिन्कल्पे देवापिर्ममाप्येतदेवमेवास्त्वित्येवं वर्त्तमानेनाभिसंबध्यते इति समस्तार्थ इत्युक्तं दुर्गाचार्य्येण।

यत्तु रराण रममाणः स्तुतिजपध्यानादिना प्रसीदन् इत्युक्तम्, तत्तु निरुक्तवि-रुद्धम्। रराण रातिरभ्यस्तमिति तद्वचनात्। रातिर्दानार्थ इति दुर्गवचनाच्च। रराणो ददत् इत्येव दुर्गाचार्य्येण तद्व्याख्यातम्।

यथा कल्पान्तरीय एव विश्वामित्रः तपसा परमर्षित्वं प्राप्तो गायत्र्यादि-मन्त्राणां द्रष्टा यज्ञादिषु पौरोहित्यं चकार। तथैवायमपि।

## तपसा जातिप्राप्तिः

अथवा तपसा तपो विशेषेण ब्राह्मणत्वमाप इत्यस्याप्ययमेवार्थः। यथागस्त्येन सिद्धेन महर्षिणा स्ववचनबलेन नहुषस्याजगरत्वमापादितम्। नहुषदेहारम्भकपरमाणुविघटनेन अजगरदेहारम्भकपरमाणुसंघटनेन च तथा सम्पत्तिस्तथैव तपोविशेषेण सिद्धानां स्वीयक्षत्रियदेहारम्भकपरमाणुविघटनेन ब्राह्मणारम्भकपरमाणुसंघटनेन च ब्राह्मणत्वसम्पादनेन तत्र पौरोहित्यमपि संभवत्येव। तच्चेष्यत एव। न च तावता यः मूषिकामपि परिवर्त्तयितुं न शक्नोति सोऽपि क्षत्रियः कर्मणा स्वस्य ब्राह्मण्यं सम्पादयितुं शक्नोति।

तपः प्रभावातिशयाद्वरशापादिप्रभावाच्च जन्मान्तरमन्तरैव नन्दिनो देवत्वप्राप्तिर्नहुषस्य चाजगरत्वप्राप्तिः, अहल्यामेनकादीनां शिलात्व-शैलीत्वादिप्राप्तिरित्यपवादस्तथैव तपः प्रभावादित्ययमपवादः। जन्मनैव वर्णव्यवस्थेत्युत्सर्गः। देवापिविश्वामित्रादीनां तु तपः प्रभावातिशयाज्जन्मान्तरमन्तराऽपि ब्राह्मणत्वप्राप्तिरित्यपवादः। अत एव महत्या तपस्यया सिद्धानामीश्वरस्य वा कर्तुमकर्तुमन्यथा वा कर्तुं समर्थेन वरशापादिलक्षणेन सङ्कल्पेन प्रकृतिप्राकृतपरिवर्तनं नातीव दुष्करम्। विश्वामित्रस्य तपस्यया मेनकायाः शैलीत्वं संवृत्तम्, वासिष्ठाश्च नाशमुपगताः, त्रिशङ्कुश्च सदेहः स्वर्गं प्रेषितः, नवतमसृष्टिश्च विरचिता। तदा तेन क्षत्रियदेहारम्भकसत्त्वोपसर्जनरजोबहुलगुणविशिष्टबाहुशक्तिप्रधानपरमाणुविघटनेन ब्राह्मणदेहारम्भकसत्त्वगुणबहुलमुखशक्तिविशिष्टपरमाणुसंघटनेन ब्राह्मणत्वनिर्माणं न दुःशकम्। एवमेव क्वचित्तादृक् तपसा सङ्कल्पनेन उपसर्जनरजोबहुलवैश्यदेहारम्भकोरुशक्तिसंवलितपरमाणुविघटनेन सत्त्वबहुलमुखशक्तिसंवलितपरमाणुसंघटनेन रज उपसर्जनतमोबहुलपच्छक्तिसंवलितशूद्रदेहारम्भकपरमाणुविघटनपूर्वकब्राह्मदेहारम्भकपरमाणुसंघटनं न दुष्करम्। यथा मृद्घटस्य स्वर्णघटत्वं पूर्वघटारम्भकावयवविघटननवघटारम्भकावयवसंघटनमन्तरा नोपपद्यते तथैव प्रकृतेऽपि ज्ञेयम्।

अत्र गीतासम्मतिः

अत एव—'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः' इति गीतावचनमपि तदनुगुणमेव। गुणकर्मविभागानुरोधेनैव तत्तद्योनिषु जन्मप्राप्त्युपपत्तेः। रमणीय-कपूयकर्मभिर्योनिप्राप्तेः श्रुतिसिद्धत्वोक्तेः। अत एव कर्मफलदात्रा मया परमेश्वरेण गुणकर्मविभागानुरोधेनैव ब्राह्मणादिचातुर्वर्ण्यं सृष्टमित्युक्तं न तु येनकेनचित् तत्स्रष्टुं शक्यम्। जन्मनैव जातिः। जन्म च गुणकर्मानुरोधीति को ह्यनुन्मत्तो ब्रूयात्।

किञ्च यथा घटोपादानादिभूतैर्मृज्जलादिभिरेव घटो निर्मीयते, न घटोत्पत्त्यनन्तरमुपादानादिभिन्नमृज्जलादिकम् तदुत्पत्तावुपयुज्यते तथैव ब्राह्मणादिदेहारम्भकगुणकर्मविशिष्टमुखशक्तिसंवलितपरमाण्वादिभिर्ब्राह्मणादि देहोत्पत्तौ सत्यां तद्भिन्नम् परवर्तिगुणकर्मादिकम् तदुत्पत्तावुपयुज्यत इति संभावयितु-

मपि न शक्यते। परवर्तिभिः गुणकर्मभिः कालान्तरे स्वानुरूपयोनिरवश्यं प्रापयितुं शक्यते, कर्मणां तदनुगुणगुणानाञ्च जात्यायुर्भोगारम्भकत्वस्य सुप्रसिद्धेः। 'अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते' इति रीत्या क्वचित्तेषामस्मिन्नेव जन्मनि जात्यन्तरारम्भकत्वमपवाद एव।

यदुक्तं—"यदीदानीं तादृग्गुणकर्मादयो न भवेयुस्तदा जन्मान्तरीयाणां तेषामस्तित्वमेव कुतो ज्ञायेतेति। तत्तुच्छम्, अन्येषामज्ञातत्वेऽपि कर्मफलदातुरीश्वरस्य तज्ज्ञानसंभवात्। नहि जन्मारम्भकाणि कर्माणि सर्वैर्ज्ञातुं शक्यानि। तथापि तेषामस्तित्वं न संदिग्धम्' फलबलकल्प्यत्वात्। तथैव ब्राह्मणादियोनिप्राप्तिरूपफलबलकल्प्यता तेषां न विरुद्ध्यते। तस्माद् ब्राह्मणादिवर्णदेहप्राप्तिहेतुभूतैरेव गुणकर्मभिर्जन्मप्राप्तिस्तया च वर्णव्यवस्था। देहानन्तरभाविदेहगतैर्गुणकर्मभिर्वर्णव्यवस्थायामभ्युपगम्यमानायां तेषां परिवर्त्तनेन प्रतिदिनं प्रतिक्षणञ्च वर्णस्यापि परिवर्त्तितत्वेऽव्यवस्थैव स्यात्।

### कर्मणोत्कर्षः जातेः

ननु तर्हि ब्राह्मणोचितगुणकर्मणां तद्देहकारणत्वे तत्र सदैव ब्राह्मणोचितगुणकर्मण्येव भवेयुर्न विपरीतानि स्युरिति चेन्न, तेषां योनिप्रापकत्वेनैवोपक्षीणत्वात्। समुचितवातावरणैः पित्रादिनिर्वर्त्यसंस्कारैः योग्याचार्य्यलाभाधीतिबोधाचरणप्रचारणादिभिरेव देहे ब्राह्मणोचितगुणकर्माणि व्यज्यन्ते, 'मातृमान् पितृमानाचार्यवान्' इति श्रुतेः। अन्यथा पित्रादिसाध्यसंस्कारादिविधानवैयर्थ्यापत्तिः स्यात्। तेन, समुचितोपचाराभावेन प्राक्तनशुभगुणकर्मादिभिर्ब्राह्मणयोनिजन्मप्राप्तावपि प्रमादात् दुःसङ्गाद् दुष्टवातावरणप्रसङ्गाच्च ब्राह्मणोचितशमदमादयो गुणा अभिभूयन्ते। विपरीता गुणा कर्माणि च समुद्भवन्ति। तैरन्ते श्वशूकरादियोनिप्राप्तिश्च संभवति। एवमेव शूद्राणां रज उपसर्जनतमोबहुलगुणैः तदुचितैः कर्मभिः शूद्रोचितानि गुणकर्माण्यभिभूयन्ते, स्ववर्णविरुद्धानि कर्माणि भवन्ति, ब्राह्मणोचिता गुणा व्यज्यन्ते। तैश्च क्रमेण जन्मान्तरे ब्राह्मण्यादिप्राप्तिश्च भवति। अतएव जन्मना वर्णः कर्मणा उत्कर्ष इति सिद्धान्तः। अतएव तत्रोत्तममध्यमाधमत्वादिकमपि संगच्छते।

एतेन विरोधाभावाद्वाक्यभेदापाताच्च 'न तु वर्तमानगुणकर्मविभागश' इति

निषेद्धुं न शक्यत इत्यपास्तम्। जात्यायुर्भोगप्रापककर्मभिः प्राक्तनैस्तत्सिद्धौ तदर्थं तन्नैरर्थक्यात्, साध्यसिद्धौ साधननैरर्थक्यध्रौव्यात्। नहि स्वकारण-मृज्जलादेर्घटहेतुत्वं प्रतिपद्यते। जन्मान्तरीयगुणकर्मादिभिर्ब्राह्मणत्वादिसिद्धौ सत्यां तदर्थं गुणकर्माद्युपयोगे सिद्धसाधनम्। गुणकर्मणां जन्मकारणत्वेन जन्मनाश्च चातुर्वर्ण्यहेतुत्वेन चातुर्वर्ण्ये गुणकर्मणां हेतुत्वे कारणकारणत्वेन कुलालपित्रादिवदन्यथासिद्धिरपरिहार्य्यैव।

'चातुर्वर्ण्यं मया सृष्ट' मित्यत्र चातुर्वर्ण्यसृष्टौ गुणकर्मविभागस्य निमित्तत्वमुक्तम्, सृष्टिनिर्माणं जन्मेत्यनर्थान्तरमेव। तथा च भगवता गुणकर्मानुरोधेन ब्राह्मणादियोनिषु जन्मदानेन ब्राह्मणादिः सृज्यत इति स्पष्टमाभाति। जन्मनैरपेक्ष्येण गुणकर्मानुरोधेन वर्णव्यवस्थायामभ्युपगम्यमानायां भगवता सृष्टमिति च विरुद्ध्येत।

यदुक्तम्—"तत्तद्वर्णजातानामपि भूयसां तत्तद्गुणकर्मानुपलब्धेरन्यत्रापि तदुपलब्धेश्च बहुत्रानुभूतव्यभिचारत्वात् जन्मान्तरविद्यमानगुणकर्मविभागश एव चातुर्वर्ण्यविभाग इति नियमो नोपपद्यत" इति तत्तुच्छम्, यतः जन्मान्तरीयगुणकर्मणामिह देहेऽनुपलब्धिर्जन्मान्तरीयत्वेनैवोपपन्ना कार्य्यजन्मनैव कारणस्योपक्षीणत्वात्। शुभाशुभकर्मभिः शुभाशुभदेहोत्पत्तौ सत्यामपि तत्तद्देहविपरीतकर्मारम्भवत् प्रकृतेऽपि तत्संभवस्यादोषत्वात्। देहारम्भककर्मभिरेव शुभाशुभकर्मसंपत्तौ पुरुषार्थस्य दत्तजलाञ्जलित्वप्रसङ्गात, विधिनिषेधशास्त्रवैयर्थ्यापाताच्च। प्राक्तनैः कर्मभिर्लब्धदेहः प्रमादेन निषेधशास्त्रमनपेक्ष्य निषिद्धमाचरति। सावधानः शास्त्रदृष्टिः सन् निषिद्धाद्विरम्य विहितमाचरति। अतएव कश्चित् प्राक्तनैः कर्मभिः शुभाँ योनिं धनधान्यादिसम्पत्तिमापाद्यापि प्रमादात्प्रत्यवैति। कश्चिच्च प्राक्तनैः कर्मभिरशुभावस्थां प्राप्य बहुधा क्लिश्यन्नपि तपस्यया महत्त्वमुपयाति। रावणस्य प्राक्तनैस्तपोभिः परमैश्वर्य्यमवाप्तस्यापि प्रमादात्पतनं स्मर्यते।

'प्राप्तं धर्मफलं तावद्भवता नात्र संशयः।
फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे॥

( वा॰ रा॰ सु॰ ७।५१।२१

परमेश्वरस्य भूतवर्तमानादिसर्वविश्वकारणतयाऽतीतजन्मवर्तमान-

देहाभिव्यक्तगुणकर्माण्यपेक्ष्य सृष्टत्वोपपत्तेश्चे'ति तु निःसारं निरर्थकञ्च, विप्रतिषिद्धत्वात्। तथात्वे सर्वस्यैव तत्सृष्टत्वेन चातुर्वर्ण्यमिति विशिष्योक्तिर्व्यर्थैव स्यात्। अत एव केषाञ्चित् साक्षादीश्वरकर्तृकत्वं केषाञ्चित्तु तत्तद्भावापन्नेश्वरकर्तृकत्वमिति विभागः प्रसिद्धः।

किञ्चातीतजन्मवर्तमानदेहाभिव्यक्तगुणकर्माणीति निरर्थकं वचनम्। यदि चातीतजन्मगतानि गुणकर्माणीति वर्तमानदेहेऽभिव्यक्तानीत्यर्थोऽभिप्रेतस्तथात्वे तथाविधः शब्दः प्रयोक्तव्यः। तत्रापि नोपपत्तिः। सन्तुष्यतु दुर्जनन्यायेन कुलालकृतस्य घटस्येश्वरकर्तृकत्ववदन्यकृतचातुर्वर्ण्यस्येश्वरकर्तृकत्वव्यपदेश इति स्वीक्रियमाणे शक्तिमपहाय भक्तिरेवाङ्गीकृता स्यात्। कुलालस्थानीयोऽप्यत्रावान्तरः कर्त्ताऽनिर्णीत एव। समाजश्चेत्तस्य व्यक्तिसमुदायानतिरेकात्, समुदायस्य व्यक्त्यनतिरेकाच्च। व्यक्तीनामल्पज्ञत्वेन सुसूक्ष्मगुणकर्मादि निर्णयासामर्थ्याच्चानिर्णय एव पर्यवस्यति।

कश्चिद्विद्वान् तत्समितिश्चातुर्वर्ण्यं निर्धारयिष्यतीत्यपि मूढजल्पितमेव-सर्वसंमता विप्रतिपन्नविद्वत्तत्समित्यसिद्धेः।

### कर्मणा वर्णव्यवस्थादोषाः

किञ्च नह्येकस्मिन्जन्मन्येकरूपाण्येव गुणकर्माणि भवन्ति तेषां क्षणविपरिवर्त्तित्वात्। शुभगुणकर्मवानपि प्रमादादशुभेषु गुणकर्मस्वनुरज्यते। अशुभगुणकर्मप्रसक्तोऽपि सतां प्रसङ्गात् पौरुषोपायाच्च गुणकर्मोत्कर्षमवाप्नोति। वाल्मीक्यजामिलादयश्चानेके दृष्टान्ताः सन्ति। गुणानां प्रतिक्षणविपरिणामित्वेन कृतत्रेताद्वापरकलिप्रभेदवदेकैकयुगेष्वपि त एव भेदाः परिलक्ष्यन्ते। एकैकग्रहाणां महादशावन्तर्दशास्तासु प्रत्यन्तरदशा इव प्रतिदिनं प्रतिव्यक्ति च तत्तारतम्यमनुभूयते। तथा च गुणकर्मभेदेन प्रतिदिनमपि वर्णपरिवर्तनं स्यात्। सर्वोऽपि जनः यदा प्रातः सत्त्वसमन्वितः परमेश्वरध्यानपूजनादिकं करोति तदा ब्राह्मणो भविष्यति। यदा श्वादिनिवारणाय दण्डादिकं गृह्णाति तदा क्षत्रियः, यदा लवणादिक्रयणे कृषिपशुपालनादि कार्य्ये प्रवर्तते तदा वैश्यः। यदा गृहपरिष्करणमार्जनादिकार्ये सम्प्रवृत्तः तदा शूद्रः सम्पद्यते। न हीयं व्यवस्था व्यवस्थापदव्यपदेश्या भवितुमर्हति।

किञ्चैवं कदाचिद् ब्राह्मणोऽपि तामसगुणकर्मविशिष्टः शूद्रः सन् सत्त्वादि-

गुणविशिष्टां ब्राह्मणीमभिगच्छन् तस्यां चाण्डालं जनयिष्यति। पातिव्रत्यानुरोधेन दुर्वृत्तमपि पतिं पत्नी न वारयितुं प्रभवति। सत्त्वादिगुणविशिष्टः पुत्रः तामसादिगुणविशिष्टं पितरं शूद्रं मत्वा परिचर्य्यां कारयिष्यति। एवं गुणकर्मानुरोधिन्यां वर्णव्यवस्थायां परमाव्यवस्थैव भविष्यति।

न च गुणाः कर्माणि च जन्मान्तरगतानि जन्मान्तरे स्वेन रूपेण व्यक्तानि भवितुमर्हन्ति। क्षणप्रध्वंसित्वात्तेषामदृष्टापूर्वादिरूपेण तु तेषामारब्धफलानां दैवरूपेणाचिन्त्यत्वेनाभिव्यक्त्यनर्हत्वेन फलवत्कल्प्यस्वरूपत्वात्।

तथा च 'यदचिन्त्यं तु तद्दैवम् भूतेष्वपि न हन्यते' ॥ २० ॥

कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान्।
यस्य तु ग्रहणं किञ्चित्कर्मणोऽन्यत्र दृश्यते ॥' २१ ॥
( वा. रा. अयोध्या । २२। )

इत्यादि रामायणवचनानि। सञ्चितानामपि तेषां नैवाभिव्यक्तिः संभवति। अपूर्वादृष्टादिरूपस्य तस्य प्रत्यक्षानुमानागम्यत्वात्।

स्वभावपदार्थः

किन्तु कर्मज्ञानाभ्यासजन्यसंस्कारप्रचय एव प्रकृतिस्वभावादिपदव्यपदेश्यो भवति। तानि तानि कर्माणि विद्या वा अभ्यस्यन् प्रसुप्तश्छात्रः प्रबुद्ध्यमान एवाभ्यासजन्यसंस्कारवशात् पुनस्तत्र प्रवर्तते। तथैव तानि कर्माणि विद्या वा अभ्यसन् मृतो जन्तुर्जन्मान्तरम्प्राप्य तेनैव पूर्वाभ्यासेन तत्र तत्र प्रवर्तते।

'पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।'
( गी० ६।४४। )

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३।३३॥
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्त्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥
( गीता ॥१८।६०। )

स्वापप्रबोधप्रायमेव मरणजननादिकमन्यत्रोक्तम्।

"जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः।
जन्म त्वात्मतया पुंसः सवभावेन भूरिद ॥
विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथौ"।

इति श्रीमद्भागवतवचनात्।

स्वभाववादे पुरुषार्थावकाशः

नन्वेवं यदि सर्वोऽपि प्रकृतिपरतन्त्र एव कर्माणि करोति तदा पुरुषार्थानवकाशो विधिनिषेधात्मकशास्त्रवैयर्थ्यापत्तिश्चे'ति चेन्न; सत्सङ्गशास्त्राभ्यासजनितैः शास्त्रीयैः रागद्वेषादिभिः स्वाभाविकरागद्वेषनिवारणेन प्रकृतिसहकारी रागद्वेषविघटनेन पुरुषार्थावकाशसंभवात्। तदुक्तम्—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
न तयोर्वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ (गी०।३।३४।)

तेन यद्यपि तत्तज्जात्यायुर्भोगारम्भकाणि कर्माणि जात्यादिफलकान्येव न तानि साक्षात्कर्मान्तरारम्भकाणि तथापि संस्कारद्वारा स्वानुरूपकर्मनिमित्तानि भवन्त्येव। संस्कारद्वारा कर्मान्तरारम्भकाणि तान्येव कर्माणि क्वचित्स्वभावदैवादिशब्देनाख्यायन्ते। प्रमादे सति तानि शुभान्यपि न शुभारम्भकाणि भवन्ति। किन्तु दुःसङ्गादिभिर्निकृष्टकर्माण्यारम्भन्ते। पुरुषार्थप्रभावात् सत्सङ्गादिभिरशुभान्यपि तानि नाशुभारम्भकाणि भवन्ति। किन्तु शुभानि कर्माणि प्रादुर्भवन्ति। यथा कुसूले प्राक्तनानि बीजानि विद्यमानान्यपि न निस्सरन्ति यानि नवानि तत्र निधीयन्ते तान्येव पूर्वं निष्कासनवेलायां निःसरन्ति। तद्वदेव नूतनपौरुषप्रादामादिकर्मजनिताः संस्कारा एव व्यज्यन्त, स्वानुरूपाणि कर्माणि च जनयन्ति। ब्राह्मणादिदेहारम्भकाणि शुभानि प्रारब्धकर्माणि तदैव स्वानुरूपाणि ज्ञानानि कर्माणि च जनयन्ति यदा विरोधिभिः प्रमादप्रसूतैर्ज्ञानकामकर्मभिरभिभूतानि न भवन्ति। पुरुषार्थप्रसूतैः कामकर्मज्ञानादिभिरुपोद्बलितानि स्वानुकूलैः समुचितैर्वातावरणैः सङ्गैः शास्त्रीयसंस्कारैश्च तानि सम्यक् फलन्ति।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।

तदभावे शुभगुणकर्मादिभिः ब्राह्मणदेहारम्भे जातेऽपि विपरीतैर्वातावरणैः सङ्गैश्च, शास्त्रीयसंस्काराभावाच्च जातिब्राह्मण्यसत्त्वेऽपि क्वचिद् व्यवहारेषु तन्निमित्तकपूजादिलाभेऽपि परिणामेऽशुभयोनिप्राप्तिरेव भवति। एवमेव शूद्रदेहारम्भकैस्तामसकर्मभिस्तद्देहप्राप्तौ शुभैः सङ्गैः शास्त्रोक्तैस्तदनुगुणसंस्कारैः कर्मभिस्तद्देहप्राप्तौ शुभैः सङ्गैः शास्त्रोक्तैस्तदनुगुणसंस्कारैः कर्मभिश्च वेदाध्य-

यनतदर्थानुष्ठानतदुचितस्थित्यलाभेऽपि विदुरादिवदादरणीयताऽन्ते सद्गति-लाभश्च सिद्ध्यति ।

### कर्मानुगुणैव ईश्वरकृतिः

तत एव सर्वान्तर्यामिणः परमेश्वरस्य सर्वनियामकत्वेन सर्वकारयितृत्वेऽपि कर्मसापेक्षत्वादेव न वैषम्यनैघृण्यादिकम् । प्राक्तनकर्मसंस्कारैर्यो यथाकरोति तं तथा कुर्वन्तमेव परमेश्वरः प्रेरयित्वा कारयति न स्वतन्त्रः ।

सक्रियस्य च यः प्रैषः स प्रैषो विषयाणि च । इत्याप्तोक्तेः ।

तथा च प्राक्तनः संस्कारप्रचय एव स्वभावः । तत्प्रभवैर्गुणैःप्रविभक्तानि शमदमादीनि ब्राह्मणादीनां विहितानि । ईश्वरेण तदनुगुणकर्मा ब्राह्मणादयो वर्णा निर्मिताः । अतस्तद्गुणानुरोधीन्येव शमदमादीनि कर्माणि तेषां कृते विहितानि । यस्य यद्वर्णे जन्म संवृत्तं तेन तदुचितान्येव कर्माणि कर्तव्यानि न यथेच्छम् ।

किञ्च 'ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परंतप ।
कर्माणि विभक्तानि स्वभावप्रभवैर्गुणैः ॥' ( गी० १८।४१ )

अत्र स्वभावप्रभवैर्गुणैः ब्राह्मणादीनां कर्माणि प्रविभक्तानि । तेन ब्राह्मणादिकर्मविभागस्य प्रयोजकाः स्वभावप्रभवा गुणा एवोक्ता इति मिथ्यैव जल्पितम् । अतएव वर्णभेदमनुसृत्य कर्मभेदविधानमुक्तम् । नतु कर्मभेदमनुसृत्य वर्णभेदविधानम् । 'ब्राह्मणो यजेत' 'राजा स्वाराज्यकामः राजसूयेन यजेत' इत्यादिषु जातिरेव तत्तदधिकारप्रयोजिकेत्युक्तमेव । अत एव नीलकण्ठाचार्य्यव्याख्यानमपि न जन्मना ब्राह्मण्याद्यपनोदकम् । किन्तु तस्य व्याख्यानत्रयमपि प्रायेण शङ्करभगवत्पादव्याख्यानानुसार्य्येव ।

### शङ्कराचार्यमतम्

अथेदानीं सर्वगीताशास्त्रार्थमुपसंहृत्य सर्वसंगशस्त्राप्त्युपायं च प्रदर्शयितुं प्रकरणान्तरमारभते ब्राह्मणेत्यादिना । 'शूद्राणामसमासकरणं एकजातित्वे सति वेदानधिकारात्' (शा० भा) प्रविभक्तान्यसङ्कीर्णानि । तत्र हेतुमाह—स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका सैव प्रभवो हेतुर्येषां गणानां ते स्वभावप्रभवास्तैः । यद्वा । ब्राह्मणस्वभावस्य सत्त्वगुण एव प्रभवः शान्तत्वात् । क्षत्रियस्वभावस्य सत्त्वोपसर्जनं रज ईश्वरस्वभावत्वात् । वैश्य

स्वभावस्य तम उपसर्जनं रजः कृष्यादिस्वभावत्वात्। शूद्रस्वभावस्य रज उपसर्जनं तमः शुश्रूषास्वभावत्वात्।

नीलकण्ठव्याख्यानम्

अथवा। स्वभावः प्राग्भवीयः संस्कारस्तत्प्रभवैर्नतु जातिमात्रप्रभवैः पक्षिणामाकाशगमनवत्। अत एव जात्यन्तरव्यावृत्तानां धर्माणां शमादिषु पाठो न दृश्यते। नहि शूद्राद् व्यावृत्तं त्रैवर्णिकानामध्यापनादिकं वा इतरद्वयाद् व्यावृत्तं ब्राह्मणानामध्यापनादिकं वेह पठ्यते। किन्तु सर्वे सर्वजातीयानां साधारणा-धर्मा शमादयो दृश्यन्ते। यथा हि द्रोणादिषु ब्राह्मणेष्वपि शौर्यादिकं, भरतादिषु क्षत्रियेष्वपि शमादिकं दृष्टम्, एवमितरत्र। तस्मात्—यस्मिन्कस्मिंश्चिद्वर्णे शमादयो दृश्यन्ते स शूद्रोऽप्येतैर्लक्षणैर्ब्राह्मण एव ज्ञातव्यः। यत्र च ब्राह्मणेऽपि शूद्रधर्मा दृश्यन्ते स शूद्र एव। तथा चारण्यके सर्पभूतं नहुषं प्रति युधिष्ठिर वाक्यम्—

सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः॥

तथा च—यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः।
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत्॥ इति।

जातिधर्मास्तु मनुना दर्शिताः—

'अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्॥ ८८॥
प्रजानां रक्षणं दानमिज्याध्ययनमेव च।
विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः॥ ८९॥
पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदञ्च वैश्यस्य कृषिमेव च॥ ९०॥
एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।
एतेषामेव वर्णानां शुश्रूषामनुसूयया॥ ९१॥

(मनु० अ० १)

तस्मात् शमादयो यत्राब्राह्मणे ब्राह्मणे वा दृश्यन्ते स एव ब्राह्मण इत्यत्र विवक्षितम्।

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः'। इत्यत्र तु मनूक्तान्य-

ध्यापनादीन्येव स्वकर्माणि ग्राह्याणि न तु शमदमादीनि। नहि ज्ञानविज्ञानवतोऽन्या संसिद्धिर्लब्धव्याऽस्ति। तस्माच्छमदमादयो ब्रह्मनिष्ठस्यैव ब्राह्मणस्य लक्षणमिति दिक्।

नहि पूर्वोक्ते नीलकण्ठव्याख्याने वृत्तेन गुणेन वा गुणकृतब्राह्मणस्य प्रतिपादनेन जात्यपलापस्तदनुगुणधर्माभिलापो वा संभवति। अतएव 'स्वे स्वे कर्मण्यभिरतः' इत्यत्र मनूक्तान्यध्यापनादीन्येव स्वकर्माणि ग्राह्याणीत्युक्तम्। यदि तस्य ब्राह्मणत्वादयो जन्मसिद्धा जातयो नेष्टा भवेयुस्तदा कथं तत्र जातिविहितानि कर्माणि ग्राह्याणीति कथयेत्। पार्थेन च कथमुच्येत—

'उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वता'। इति।

भगवत्पादास्तु-'स्वे-स्वे कर्मण्यभिरत' इत्यत्रापि प्रकृतत्वाच्छमादीन्येवाभिप्रेतानि। एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठानेन स्वर्गप्राप्तिः। 'स्वभावतः वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुःश्रुतवित्तसुखमेधसो जन्म प्रपद्यन्ते।'

(आपः २-२-२-३)

ब्राह्मणानामेवाधिकारोव्युत्थानेऽतो ब्राह्मणग्रहणम् इति शां० भाष्यम्। एतं वमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणाया × × × × × व्युत्थाय भिक्षाचर्य्यं चरन्ति इति च। बृहदारण्यके कहोलप्रश्ने। परधर्मश्च भिक्षा जीवनादिकं कर्त्तुं प्रववृते। (शां० भा०) अशोच्यानन्वशोचस्त्वं (गीता २।१०) क्षात्रकर्मयुद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यन्तक्रूरमपि स्वधर्म इति कृत्वा नाधर्माय। तदकरणे च ततः स्वधर्मं कीर्त्तिञ्च हित्वा पापमवाप्स्यसि (गी॰ २।३३) इति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां कर्मणां नाधर्मत्वमिति सुनिश्चितमुक्तं भवति। अयमंशो यद्यपि पूर्वपक्षस्तथापि समुच्चयस्यैव तदसदित्यादिना खण्डनम् नास्येत्यखण्डितत्वात् कर्मिणां तन्मान्यमेव अशोच्यानन्वशो…(शा॰ भा॰२।११)

चातुवर्ण्यं मयेश्वरेण सृष्टम्—'ब्राह्मणोऽस्य मुखमासीदिति श्रुतेः…गुणविभागशः कर्मविभागशश्च। गुणाः सत्त्वरजस्तमांसि। तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मणस्य शमो दमस्तपः इत्यादीनि कर्माणि। सत्त्वोपसर्जनरजः प्रधानस्य क्षत्रियस्य शौर्य्यतेजः प्रभृतीनि कर्माणि। तम उपसर्जनरजः प्रधानस्य वैश्यस्य

कृष्यादीनि कर्माणि। रज उपसर्जनतमः प्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशश्चातुर्वर्ण्यं मया सृष्टं। (४।१३) एतानि गुणकर्माणि भगवतश्चातुर्वर्ण्यसृष्टौ निमित्तानि। तेनैव ब्राह्मणदीनां तत्तत्प्राधान्येन तानि-तानि कर्माणि। अत एव

"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परंतप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥" (गी० १८।४१)

इत्यत्र स्वभावप्रभवैरित्यस्य व्याख्याने स्वभाव ईश्वरस्य प्रकृतिस्त्रिगुणात्मिका माया सा प्रभवो येषां गुणानां ते स्वभावप्रभावागुणास्तैः शमदमादीनि कर्माणि विहितानि। अर्थात् प्रकृतिप्रसूतसत्त्वादिगुणानुसारेण तदनुरूपाणि कर्माणि विहितानि।

द्वितीयव्याख्याने स्वभावपदेन ब्राह्मगादीनां स्वभावा गृहीतास्तेषां प्रभवाः कारणानि सत्त्वादयो गुणास्तैः शमादीनि कर्माणि प्रविभक्तानि। ब्राह्मणस्वभावस्य सत्त्वगुणः प्रभवः कारणम्, क्षत्रियस्वभावस्य सत्त्वोपसर्जनतमः प्रभवः प्रशान्त्यैश्वर्य्येहामूढतास्वभावदर्शनाच्चतुर्वर्णानाम्। तेन ब्राह्मणादीनां स्वभाव-कारणैः उक्तैः सत्त्वादिभिस्तदनुगुणानि शमादीनि कर्माणि विहितानि।

तृतीये व्याख्याने स्वभावशब्देन जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमान-जन्मनि स्वकार्य्याभिमुखत्वेनाभिव्यक्तो गृहीतः। स प्रभवो येषां गुणानां ते स्वभावप्रभवा गुणाः। गुणप्रादुर्भावस्य निष्कारणत्वानुपपत्तेः। तैः कर्माणि प्रविभक्तानि तथा च स्वकार्य्योन्मुखत्वेन प्राणिनामभिव्यक्तजन्मान्तरीय-कर्मजसंस्कारप्रसूतैर्गुणैस्तदनुरोधीनि शमादीनि कर्माणि विहितानि। यैर्गुणैः कर्मभिर्ब्राह्मणादियोनिषु जन्मानि भवन्ति। तान्येव प्रायेण वर्तमानजन्मनि फलोन्मुखत्वेनाभिव्यज्यन्ते। तान्येव स्वभावपदवाच्यानि भवन्ति। तदुत्पन्नैः सत्त्वादिभिर्गुणैर्ब्राह्मणादीनां शमदमादीनि कर्माणि प्रविभज्यन्ते।

ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कथमुच्यन्ते सत्त्वादिगुणप्रविभक्तानीति नैष दोषः, शास्त्रेणापि ब्राह्मणादीनां सत्त्वादि-गुणविशेषापेक्षयैव शमदीनि कर्माणि प्रविभक्तानि न गुणानपेक्षया इति शास्त्रप्रविभक्तानि न गुणानपेक्षया इति शास्त्रप्रविभक्तान्यपि कर्माणि गुण-प्रविभक्तानीत्युच्यन्ते। (शां० भा०)

## वातावरणस्य प्रभावः

ननु साम्प्रतं विपरीतमेव दृश्यते। क्वचिद् ब्राह्मणेषु मूढतैव दृश्यते शूद्रेषु च प्रशान्तिर्दृश्यते इति चेन्न; विपरीतैः सङ्गैः वातावरणैः तदनुरूपैः कर्मभिस्तथात्वस्य कादाचित्कत्वात्। अत एव परशुरामस्य द्रोणस्य च शौर्य्येऽपि न क्षत्रियत्वं, भीष्मस्य युधिष्ठिरस्य च शमादिमत्त्वेऽपि न ब्राह्मण्यम्। अत एव युद्धकालेऽर्जुनस्य वैराग्यादिमत्त्वेऽपि 'क्षत्रधर्मो न मुण्डन'मित्याद्यनुरोधेन भिक्षाचर्य्यं निषिद्धमेव भगवता। गुणा अपि सूक्ष्मा दुर्ज्ञेया मानवबुद्ध्यगम्या। तत एव शमदमादीनां रागप्राप्तत्वेन शास्त्रैकगम्यत्वेनैव तद्विधानं युज्यते। 'विधिरत्यन्तमप्राप्तौ' इत्यभियुक्तोक्तेः। अतः भिक्षाचर्य्ये परधर्मे प्रवर्त्स्यमानमप्यवरुध्य क्षात्रधर्मेऽनभीप्सिते भगवान् अर्जुनं प्रवर्तयामास।

'स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि।' इति। ( गी० २।३१ )

स्वो धर्मः क्षत्रियस्य युद्धम् ( शां० भाष्यम् )। नहि रागप्राप्तो विधीयते। न वा रागप्राप्तो धर्मो भवति।

'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।' इति।

'स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्।' इति च।

यथा विषजातस्य कृमेर्विषं न दोषकरं तथा स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्। (शा० भा०) 'स्वभावजमि'ति। ब्रह्मकर्म स्वभावजमित्यादिना। तदुक्तम्—स्वभावनियतमिति' ( शां० भा० )

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥' ४८ ॥

सहजं सहजन्मनैवोत्पन्नम् ( शां० भा० ) तेन ब्राह्मणादि जन्मना सहोत्पन्नं जातिमूलकमेव यस्य यत्कर्म तेन तदेव स्वभावजं कर्मानुष्ठेयं, तदेव कल्याणकरं परधर्मस्य भयावहत्वात्।

किञ्च भगवत्पादानुयायित्वेन ब्रह्मनिष्ठत्वमात्मनः ख्यापयन्नपि यदि तन्मतमपहाय नीलकण्ठीयमतमाश्रयेत्, तथापि तत्साधनाय यत् न सिद्ध्यतीत्युक्तमेव। यस्य मते गुणकर्मानुरोधेन वर्णपरिवर्तनं भवति तस्य स्वभावजं सहजमित्यादि शब्दानां भाष्यकारीयव्याख्यानानुसारी वाक्यार्थः कथं संगच्छते। गुणकर्मणां विपरिवर्तनशीलत्वात्। पुराणे वर्णितानामाश्रमिणाञ्च लोकफलभेदवि-

शेषस्मरणात्। स्वे स्वे यथोक्तलक्षणे कर्मण्यभिरतः संसिद्धिं स्वकर्मानुष्ठानाद्-शुद्धिक्षये सति कायेन्द्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां संसिद्धिं लभते नरः अधिकृतः' (शां० भाष्यम्।) अत्र ब्राह्मणादि कर्मणां शमादीनां जातिविहिता-नामित्युक्त्या ब्राह्मणादीनां जातित्वं स्पष्टं सिद्ध्यति।

अत एव पुराणेषु वेदभाष्येषु सायणादिभाष्येषु च — जन्मनैव वर्णा उक्ताः।

मुखतो वर्त्तत ब्रह्म पुरुषस्य कुरूद्वह।
यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद् ब्राह्मणो गुरुः॥ ३०॥
बाहुभ्योऽवर्त्तत क्षत्रं क्षत्रियस्तदनुव्रतः।
यो जातस्त्रायते वर्णान् पौरुषः कण्टकक्षतात्॥ ३१॥
विशोऽवर्त्तन्त तस्योर्वो लोकवृत्तिकरीर्विभोः।
वैश्यस्तदुद्भवो वार्तां नृणां यः समवर्त्तयत्॥ ३२॥
पद्भ्यां भगवतो यज्ञे शुश्रूषा धर्मसिद्धये।
तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः॥ ३३॥
एते वर्णाः स्वधर्मेण यजन्ति स्वगुरुं हरिम्।
श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सहवृत्तिभिः॥ ३४॥
(श्री० भा० स्क० ३।६)

उव्वट :—'ये शूद्राः ते पद्भ्यां अजायन्त इति कल्प्यन्ते तदस्योत्पन्न-त्वात्।' महीधरः—'ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषोऽस्य प्रजापतेर्मुख-मासीत् मुखादुत्पन्न इत्यर्थः। राजन्यः क्षत्रियत्वजातिविशिष्टो बाहूकृतः बाहु-त्वेन निष्पादितः। तत्तदानीमस्य प्रजापतेः यौ ऊरू तद्रूपो वैश्यः सम्पन्नः ऊरुभ्यामुत्पादित इत्यर्थः। तथास्य पद्भ्यां शूद्रत्वजातिमान् पुरुषोऽजायत उत्पन्नः।' सायणाचार्या अपि ऋग्वेदीये पुरुषसूक्ते-'अस्य प्रजापतेर्ब्राह्मणो ब्राह्म-णत्वजातिविशिष्टः पुरुषो मुखमासीत् मुखादुत्पन्न इत्यर्थ'। योऽयं राजन्यः क्षत्रियत्वजातिविशिष्टः स बाहूकृतः बाहुत्वेन निष्पादितः बाहूभ्यामुत्पादित इत्यर्थः। तत्तदानीमस्य प्रजापतेर्यद्यौ ऊरू तद्रूपो वैश्यः सम्पन्नः ऊरुभ्या-मुत्पन्न इत्यर्थः। तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान् पुरुषोऽजा-यत। इयन्तु मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः याजुषे सप्तमे काण्डे 'स मुखतस्त्रिवृतं निरमिमीत' इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परत्वेनैव योजनीये।

पतञ्जलिमतम्

यदुक्तं महाभाष्येऽपि ब्राह्मणादयो गुणशब्दा उक्तास्तस्माद् गुणकृतमेव ब्राह्मण्यादिकमिति तदेतन्महाभाष्याद्यज्ञानविजृम्भितम्। 'तपः श्रुतञ्च योनिश्चे'ति वचनविरोधात्। अथवा छद्मना मूढजनप्रतारणाय तपः श्रुतञ्चोक्त्वा योनिश्चेति नोक्तम्। तथाहि नञ् (पा० सू० २।२।६) इत्यत्र किं प्रधानोऽयं समास इत्युपक्रान्तः। अत्र प्रदीपे—'इहाब्राह्मणादिना क्षत्रियादेरभिधानं लोके दृश्यते। तत्र प्रक्रियागतगुणदोषनिरूपणाय प्रश्नः। यदा जातौ ब्राह्मणशब्दो वर्तते अविद्यमानं ब्राह्मण्यं यस्य सोऽब्राह्मणः क्षत्रियादिस्तदान्यपदार्थः प्रधानम्। एवमन्यपदपूर्वपदोत्तरपदार्थप्राधान्यपक्षानुत्थाप्यानुपपत्तय उक्ताः। उत्तरपदार्थप्राधान्यपक्षे पुनरपि अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याक्षेपे तत्र राजपुरुषमानयेत्युक्ते पुरुषमात्रस्य कुतो नानयनमिति प्रतिक्षेपे 'यथा तत्र विशेषोऽभ्युपेयते तथैवात्रापि नञ्विशेषको ब्राह्मणः प्रयुक्त इति तस्यैवानयनं नतु ब्राह्मणमात्रस्ये'ति समाहितम्।

'कः पुनरसौ इति' पृष्टे 'निवृत्तिपदार्थकः' इति समाहितमेवं प्रश्नप्रतिवचनपरम्परयाऽन्यदपि बहूक्त्वा 'पश्चादर्थप्रत्यायनाय शब्दः प्रयुज्यते। स चेन्निवृत्तः किमर्थं प्रयुज्यत' इत्युक्तम्। ततः प्रतिषेधविषयप्रदर्शनाय बुद्ध्या ब्राह्मणार्थं निरूप्य तस्य क्षत्रियादौ मुख्यसत्ताविरहप्रतिपादनाय नञ्सहितो ब्राह्मणशब्दः प्रयुज्यत इत्युक्तम्। यस्यैव गुणस्य स्वाभाविकी निवृत्तिः क्षत्रियादौ तस्यैवासौ नञा द्योत्यते। अवशिष्टानां गुणानामर्थात्सद्भावो गम्यते। अस्मिन् प्रसङ्गे महाभाष्यकार आह—'सर्वे एते शब्दा गुणसमुदायेषु वर्त्तन्ते। ब्राह्मणः क्षत्रियो वैश्यः शूद्र' इति।

अत्र प्रदीपोक्तरीत्या गुणशब्दे धर्ममात्रं पराश्रयमुच्यते। अत एव योनिशब्दितं जन्मापि गुणसमुदायान्तर्गतम्। तेन नात्र जन्मनिरपेक्षं मुख्यं ब्राह्मण्यमुक्तम्। तथा च महाभाष्यकृतैवोद्धृतं स्मृतिशास्त्रम्—

'तपः श्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥' इति।

अत्र प्रदीपः—

तपः चान्द्रायणादि कर्म, श्रुतं वेदवेदाङ्गादीनामध्ययनम्, योनिः ब्राह्मणाद्

ब्राह्मण्यां जन्म ब्राह्मणकारकम् ब्राह्मणव्यपदेशस्येतन्निमित्तम्। गुणसमुदायाभावेऽपि तदेकदेशे प्रयोगदर्शनादाह —

तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥' इति

'गौरः शुच्याचारःपिङ्गलः कपिलकेशः इत्येतानप्यभ्यन्तरान् ब्राह्मण्ये गुणान् कुर्वन्ति।' (म० भा०) 'अत्र लोकप्रसिद्धान् बाहुल्येन तथादृष्टान् गुणानाह' इति प्रदोपः। 'तथा चैते गुणा व्यभिचारिण इति भाव' इति उद्योतः। केचिल्लौकिका एतान् बाहुल्येन दृष्टान् व्यभिचारिणो गुणानपि ब्राह्मणशब्दार्थे गुणसमुदाये कुर्वन्ति। 'समुदायेषु च वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते।' (म० भा०) 'अवयवे समुदायारोपाच्छब्दप्रवृत्तिर्विज्ञेया। न तु शब्दः स्वार्थं परित्यज्यार्थान्तरं वक्तुं समर्थः, शब्दार्थसम्बन्धस्यानित्यताप्रसङ्गात्।' (प्रदीपः) 'पूर्वे पाञ्चलाः, उत्तरे पञ्चालाः।··· एवमयं समुदाये प्रवृत्तो ब्राह्मणशब्दोऽवयवेष्वपि वर्तते। जातिहीने गुणहीने च। गुणहीने तावत् अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति। अब्राह्मणोऽयं यो गच्छन् भक्षयति (म० भाष्यम्) प्रदीपानुसारेण तपःश्रुतयोरभावान्निन्दया यत्राब्राह्मणशब्दप्रयोगस्तत्र जातिमात्रेऽवयवे समुदायरूपारोपाद् ब्राह्मणशब्दप्रयोगः। नञा तु स्वाभाविकी तपःश्रुतयोर्निवृत्तिर्द्योत्यते।

'जातिहीने संदेहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। संदेहात्तावद् गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति ब्राह्मणोऽयमिति' (म० भा०) तत्र प्रदीपः–'तत्र स्तुत्या ब्राह्मणशब्दप्रवृत्तिरध्ययनादिगुणसद्भावप्रतिपादनाय।' ततःपश्चादुपलभते नायं ब्राह्मणः अब्राह्मणोऽयम्। तत्र संदेहाद् ब्राह्मणशब्दो वर्तते। जातिकृताचार्थस्य निवृत्तिः।'(म० भा०) प्रदीपानुसारेण अत्र जात्यभावकृतोऽयमर्थः। यथा वर्षाकृतं दुर्भिक्षमित्यत्र वर्षाभावकृतमित्यर्थो भवति तद्वत्। "दुरुपदेशात् दुरुपदिष्टमस्य भवति। अस्मिन्नवकाशे ब्राह्मणस्तमानयेति। स तत्र गत्वा यं पश्यति तमध्यवस्यति ब्राह्मणोऽमिति। ततः पश्चादुपलभते····· अब्राह्मणोऽयमिति। तत्र दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते। जातिकृताचार्थस्य निवृत्तिः।" (म० भा०) एकदेशविगमात्समुदायो निवृत्त उच्यते। एकदेशान्तरसद्भावाच्च तस्य सद्भावोऽभिधीयते। यथैकदेशकरणाभ्यां कृतः सङ्घात उच्यते।' (प्रदीपः) तपःश्रुतयोरभावे जातिमात्रसत्त्वेऽपि ब्राह्मणस्य निन्दितत्वमेव, तपः श्रुतयोः सत्त्वे जातेरभावेऽपि क्षत्रियादेः स्तुत्यत्वमेव, तपःश्रुतयो-

जातेश्च सत्त्वे मुख्यं ब्राह्मण्यं भवति। तेन पूर्वोक्तमेव फलति। यथा सिंहस्य शौर्यक्रौर्यादिगुणैर्जात्या च मुख्यं सिंहत्वं 'गुणाभावे जातिसिंहत्वम्' जात्यभावे गौणं सिंहत्वं, तथैव ब्राह्मणाद् ब्राह्मण्यां जातस्य तपः श्रुताभ्यां सम्पन्नस्य मुख्यं ब्राह्मण्यम्। तद्रहितस्य जातिब्राह्मण्यम्। तत्सहितस्य क्षत्रियात्क्षत्रियायां जातस्य गौणं ब्राह्मण्यम् स्तुत्यर्थमेवोच्यते। यथा देवदत्तः शौर्यादिभिः स्तुत्यर्थं सिंह उच्यते।

१ जातिकृतेति। अनेन जातिब्राह्मणाद् ब्राह्मण्यां जन्म विना नैव ब्राह्मण्यम्। तपःश्रुते तु ब्राह्मण्याश्रयत्वसंपादके त्रीणि यस्यावदातानि'' इति वक्ष्यमाणस्मृतेः। ( महाभाष्ये टिप्पणी )

२ तथा च बौधायनगृह्यसूत्रे प्रथमप्रश्ने सप्तमेऽध्याये— ब्राह्मणेन ब्राह्मण्यामुत्पन्नः प्रागुपनयनाज्जात इत्यभिधीते। उपनीतमात्रो व्रतानुचारी वेदानां किञ्चिदधीत्य ब्राह्मणः ॥२।१॥ एकां शाखामधीत्य श्रोत्रियः॥३॥अङ्गाध्याध्याय्यनूचानः ॥ ४ ॥ कल्पाध्यायी ऋषिकल्पः ॥ ५ ॥ सूत्रप्रवचनाध्यायी भ्रूणः ॥ ६ ॥ चतुर्वेदादृषिः ॥ ७ ॥ अत ऊर्ध्वं देवः ॥ ८ ॥ इति सूत्राणि समुपलभ्यन्ते। यदि भाष्यलिखितस्मृतौ ॥ 'जातब्राह्मण' इति पाठो भवेत्। तदा जातसंज्ञको ब्राह्मण इत्यर्थो भवेत्।

यद्वा जातमात्रो ब्राह्मण इत्युत्तरपदलोपी समासो भवेत्। तथाचोक्तं दक्षेण।

''जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शितः ॥ ४ ॥
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते।
तस्मिन्काले न दोषोऽस्ति स यावन्नोपनीयते ॥ ५ ॥
उपनीतस्य, दोषोऽस्ति क्रियमाणैर्विगर्हितैः।
अप्राप्तव्यवहारोऽसौ यावत् षोडशवार्षिकः ॥६॥'' इति।
(दक्षस्मृतिः अ० १)

राजशब्दार्थः

''राजा स्वाराज्यकामो राजसूयेन यजेत्' इति राजसूययागे पूर्वोत्तरमीमांसकानामैकमत्येन क्षत्रियस्यैवाधिकारः, न ब्राह्मणादीनां राज्ञां सतामपि

क्षत्रियश्च जात्यैव न प्रजापालनादिकर्मणा। तदुक्तम्-'परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः (३।३।५२) इत्यत्र भामत्याम्। 'अस्ति राजसूयः 'राजा स्वाराज्यकामो राजसूयेन यजेत' इति। ते प्रकृत्यामनन्ति अवेष्टिं नामेष्टिम्। आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणेत्येवमादि'तां प्रकृत्याधीयते। यदि ब्राह्मणो यजेत बार्हस्पत्यं चरुमाग्नेयेन्द्रपुराडाशयोर्मध्ये निधायाहुतिमाहुतिं हुत्वाभिधारये-द्यदि वैश्यो वैश्वदेवं, यदि राजन्य ऐन्द्रमिति। तत्र संदिह्यते किं ब्राह्मणादीनां प्राप्तानां निमित्तार्थेन श्रवणमुत ब्राह्मणादीनामयं यागो विधीयते इति। यदि प्रजापालनकण्टकोद्धारणादि कर्म राज्यं तस्य कर्ता राजेति राजशब्दस्यार्थस्ततो राजा राजसूयेन यजेतेति राज्यस्य कर्त्तुः राजसूयेऽधिकारः। तस्मात्संभवन्ति ब्राह्मणक्षत्रियवैश्या राज्यस्य कर्तार इति सिद्धं सर्व एवैते राजसूये प्राप्ता इति। यदि ब्राह्मणो यजेत इत्येवमादयो निमित्तार्थाः श्रुतयः। अथ तु राज्ञः कर्म राज्य-मिति राजकर्तृयोगात्तत्कर्म राज्यं ततः पूर्वं को राजे'त्यवधारणीयम्। तत्र येषां पिकनेमादिशब्दनामार्य्येषु न प्रसिद्धोऽर्थः, तेषां किं निगमादिभ्योऽर्थः कल्पनीयः उत म्लेच्छप्रसिद्ध एवार्थो ग्राह्य इति संदेहे शास्त्रस्थत्वान्निगमादि प्रसिद्ध एवार्थो ग्राह्यो म्लेच्छप्रसिद्धेरार्य्याणामर्थप्रतिपत्तौ विप्लवप्रसङ्गादिति प्राप्ते समुदायप्रसिद्धेरवयवप्रसिद्धितो बलवत्त्वात् पिकनेमादि पदानि यद्रूपाणि वेदे दृश्यन्ते तद्रूपाणामेव तेषां म्लेच्छैरर्थविशेषेषु प्रयुज्यमानत्वात् तदर्थसम्बन्धे च पदानां बाधाभावाद्विप्लुतिशङ्कानुत्थानान्म्लेच्छप्रसिद्ध एवार्थो ग्राह्यः तथाच पिकः कोकिलः, नेमोऽर्धम्, तामरसं पद्ममिति प्रमाणलक्षणे स्थितम्। उक्तस्थलेषु यथा म्लेच्छप्रसिद्ध्या पिकादिशब्दार्थावधारणं तथैवान्ध्रम्लेच्छादीनां क्षत्रियजातौ राजशब्दप्रसिद्ध्या राजशब्दार्थावधारणं युक्तम्। तथा च क्षत्रिय एव राजा तस्यैव राजसूयेऽधिकारो न ब्राह्मणवैश्ययोः प्राप्तिरिति राजसूय-प्रकरणं भित्त्वा ब्राह्मणादि कर्तृकाणि पृथगेव कर्माणि प्राप्यन्ते। न नैमित्ति-कानि। तत्र पूर्वपक्षः—ब्राह्मणादिषु प्रजापालनकर्तृषु कनकदण्डातपत्रश्वेत-चामरादिलाञ्छनेषु राजपदस्यार्य्याणामान्ध्राणाञ्चाविवादेन प्रयोगात् क्षत्रिय-जातावार्य्याणां राजपदप्रयोगाभावात् विप्रतिपत्तेः, राज्यस्य कर्ता राजेत्येवार्थो ग्राह्यः। शास्त्रसहितार्य्यप्रसिद्ध्या तद्विहीनान्ध्रम्लेच्छप्रसिद्धिबाधान्न जाति-मात्रं राजशब्दार्थः।

विप्रतिपत्तौ तु 'यवमयश्चरुर्भवति वाराही उपानहौ, इत्यत्र यववराह-शब्दयोर्म्लेच्छैः प्रियङ्गुवायसयोः प्रयोगादार्यैश्च दीर्घशूकसूकरयोः प्रयोगादुभयोश्च प्रयोगयोरनादित्वेन तुल्यबलत्वाद्विकल्पेनाभिधानं प्राप्तम्। तत्र सिद्धान्त उक्तम् 'शास्त्रस्था वा तन्निमित्तत्वात्' (जै० १।३।६) यवमय इत्यस्य वाक्यशेषे 'यदान्या ओषधयो म्लान्त्यथैते मोदमानास्तिष्ठन्ति' इति श्रूयते।

'यवाश्चान्यौषधिम्लानौ मोदन्ते न प्रियङ्गवः।'

उक्तं हि

'फाल्गुने ह्यौषधीनां हि जायते पत्रशातनम्।
मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः॥
प्रियङ्गवः शरत्पक्वास्तावद् गच्छन्ति हि क्षयम्।
यदा वर्षासु मोदन्ते सम्यग्जाताः प्रियङ्गवः॥
तदा नान्योषधिम्लानिः सर्वासामेव मोदनात्।'

एवमेव 'वाराहो उपानहौ' इत्यस्य वाक्यशेषे 'वराहं गावोऽनुधावन्ती'ति श्रूयते। सूकरञ्च गावोऽनुधावन्ति अनुकुर्वन्ति चतुष्पात्त्वेन न काकम्। तस्माद् यववराहशब्दयोर्दीर्घशूकशूकरावर्थावित्यार्यप्रसिद्धिरेव बलीयसी।

ननु नान्ध्रप्रसिद्धिरेव किन्तु 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे'ति सूत्रे पाणिनिना गणवचनेभ्यः शुक्लादिशब्देभ्यः ब्राह्मणादिशब्देभ्यश्च ष्यञ् प्रत्ययस्मरणाद्राज्ञः कर्म राज्यमिति सिद्ध्यति। ततः स्मृतिसंहिताया आन्ध्रप्रसिद्धेर्बलीयसीत्वेन क्षत्रियजातिरेव राजपदार्थ इति चेन्न; बलवदार्य्यप्रसिद्धिविरोधेत्वतन्मूलायाः पाणिनीयप्रसिद्धेः विरोधेत्वनपेक्ष्यं स्यादसति ह्यनुमानमिति न्यायेन बाधनात्तदनुगुणतया कथञ्चिन्नखनकुलादिवदन्वाख्यानमात्रपरतयानीयमानत्वाद्राज्यस्य कर्ता राजेत्येव युक्तः। तथा च निमित्तार्थाः श्रुतयस्तथात्वे यदि शब्दोऽप्याञ्जसः स्यात्ततः सिद्धान्तः।

रूपतो न विशेषोऽस्ति ह्यार्यम्लेच्छप्रयोगयोः।
वैदिकाद्वाक्यशेषात्तु विशेषस्तत्र दर्शितः॥' इति।

अनादिवृद्धव्यवहारारूढत्वादार्यम्लेच्छप्रयोगयोःस्वरूपतो न विशेषः। यवादिशब्देषु तु वैदिकवाक्यशेषादार्यप्रसिद्धेर्बलवत्वम्। राजशब्दे-

त्वार्य्यप्रसिद्धिर्नास्ति अस्ति च वेदानुग्रह उभयोरिति द्वयोः प्रसिद्धयोरविशेषः। तदिह राजशब्दस्य कर्मयोगाद्वा कर्त्तरि प्रयोगः, कर्तृप्रयोगाद्वा कर्मणीति संशये वैदिकवाक्यशेषवदभियुक्ततरस्यात्रभवतः पाणिनेः स्मृतेर्निर्णीयते। प्रसिद्धि-रान्ध्राणामनादिः, आदिमती चार्य्याणां प्रसिद्धिः, गोगाव्यादिशब्दवत्।

न च संभावितादिमद्भावप्रसिद्धिः। पाणिनिस्मृतिमपोह्यानादिप्रसिद्धिमादि-मतीं कर्त्तुमुत्सहते। गाव्यादिशब्दप्रसिद्धेरनादित्वेन गवादिपदप्रसिद्धेरप्यादि-मत्त्वोपपत्तेः। तस्मात्पाणिनिस्मृत्यनुमतान्ध्रप्रसिद्धिबलीयस्त्वेन क्षत्रियत्वजातौ राजशब्दो मुख्यः। तत्कर्त्तार्य्यतज्जातौ तु गौण इति क्षत्रियस्यैवाधिकाराद्राज-सूये तत्प्रकरणमपोह्यावेष्टेरुत्कर्षः। अन्वयानुरोधी यदि शब्दो नत्वपूर्वविधौ सति तमन्यथयितुमर्हति। अन्वयः प्राप्तिस्तदनुरोधी यदि शब्दो निपातः। निपाताश्चोत्सर्गतः प्राप्तिमपेक्षन्ते। अप्राप्ते चार्थे वाक्याद् गम्यमाने यदि शब्दो भञ्जनीयः।

'यदि शब्दपरित्यागो रुच्यध्याहारकल्पना।
व्यवधानेन सम्बन्धो हेतुहेतुमतोश्च लिङ्।'

यदि रोचयेत फलं मे स्यात्तर्हि 'ब्राह्मणो यजेत' इति रुच्यध्याहारकल्पनान्न विधित्वक्षतिरित्यर्थः। व्यवधानेन सम्बन्धो यदि बार्हस्पत्यं मध्ये निधायाहुतिं हुत्वाऽभिघारयेदभिघारयितुमिच्छेदिति। कामप्रवेदने लिङ्। अर्थात्तु विधिः। एकस्मिन् वाक्ये विधिद्वयायोगात् तर्हि ब्राह्मणो यजेतेति विधिरेव। हेतुहेतुम-तोरिति यदि ब्राह्मणयजनमाहुत्यभिघारणे हेतुस्तदाहुत्यभिघारणमेवं कर्तव्यम्। अत्रैको लिङ्हेतुमत्त्वेऽपरो विधौ। तत्राप्येकस्य विधिरर्थादपरस्य श्रौतः इति भामत्यां कल्पतरौ च स्पष्टम्।

परिमलकारस्तु—राजशब्दस्य क्षत्रियत्वं पालकत्वं वार्थ इत्यत्र बहूनि साधक-बाधकप्रमाणान्युपन्यस्यान्ते राजसूयवाक्ये क्षत्रिय एवार्थो ग्राह्यः, स प्रतियोगिकौ-पाधिकधर्मरूपपालकत्वापेक्षया निष्प्रतियोगिकाखण्डरूपधर्मः क्षत्रियजातेर्लघु-त्वेनासति बाधके लघुप्रवृत्तिनिमित्तकार्थग्रहणौचित्यात्। श्रुतिस्मृतिप्रयोग-वैयाकरणव्यवहाराणामुभयत्र साम्येऽपि क्षत्रियेष्वेव राजशब्दस्य शक्तिः। तेषु क्षत्रियत्वजातेरिव पालकेष्वनुगतानतिप्रसक्तशक्यतावच्छेदकरूपाभावात्। तथाहि न पालनमात्रं निमित्तं सर्वसाधारण्यप्रसङ्गात्। सर्वेषां हि पुत्रदारधनादि-

विषयमन्ततः स्वशरीरविषयं वा पालनम् साधारण्येन वर्तत एव । नापि जनपदपालनं निमित्तम् । राज्ञा नियुक्ते तत्तत्पदाधिकारिणि सत्यपि तस्मिन् राजपदाप्रयोगात् । नापि स्वतन्त्रपालनं निमित्तं सम्राजा देशविशेषे राजभावेनाभिषिक्ते तदभावात् ।

किञ्च विनाऽपि पालकत्वं श्रेष्ठत्वमात्रेण राजपदप्रयोगो मृगराजः, पक्षिराज इति दृश्यते । तस्य राजदन्तादिषु परमित्युपसर्जनपरनिपातविधायकपाणिन्यनुग्रहोऽप्यस्ति । तस्मादनुगतानतिप्रसक्तजातिनिमित्तक्षत्रियार्थ एव राजशब्दः, क्षत्रियेषु प्रायेण पालकत्वस्य तत्कृतस्य श्रैष्ठ्यस्य च सद्भावात् । क्वचित्पालके केनचिद्गुणेन श्रैष्ठ्ये च तस्य निरूढा लक्षणेत्येव युक्तम् । इत्थं यद् राजसूयवाक्ये राजशब्दस्य क्षत्रियार्थत्वव्यवस्थापनम्, तत्तु स्मृत्याद्यनुगृहीतं म्लेच्छप्रसिद्धिप्रसादलभ्यम् ।

शौनकवृत्तान्तः

यदपि "गृत्समदस्य शौनकश्चातुर्वर्ण्यस्य प्रवर्तयिताभूत् ।

(विष्णु० अ० ४-८-१)

'पुत्रोगृत्समदस्यापि शुनको यस्य शौनकाः ।
ब्राह्मणाश्क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च ॥'

हरिवंशे (२६।१५।२०)।

तत्तद्गुण कर्मभिर्व्यवस्थिता ब्राह्मणादयश्चत्वारो वर्णाः ।

'ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥
मरीचेः कश्यपः पुत्रः कश्यपातु इमाः प्रजाः ।

(म. भा. आ. ६५।१०।११)

अत्रापि गुणकर्मानुरोधेन ब्राह्मणाद्याः प्रजाः सम्पन्नाः । अत एव गोत्रविस्मरणे कश्यपगोत्रं मन्तव्यम् । महाभारतस्य शान्तिपर्वणि विश्वकारणान्महादेवात् प्राक् ब्राह्मणा एव सृष्टाः, नान्ये क्षत्रियादयः । पश्चाद्राष्ट्ररक्षादिप्रयोजनायैव तेभ्य एव तन्तुभ्यः पटा इव सुवर्णाद् भूषणानीव क्षत्रियाद्या वर्णाः सृष्टाः । तथाहि "वाक् संयमकाले हि तस्य वरप्रदस्य देवदेवस्य सकाशात् ब्राह्मणाः प्रथमं प्रादुर्भूताः । ब्राह्मणेभ्यश्च शेषाः वर्णाः प्रादुर्भूताः ।" (म० भा० शा० प० ३४९-२१) इति ।

'संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः।' ( म० भा० शां० प० ६०-४२ )
सृष्टयः सन्तानानि। तेन सर्वेषां वर्णानां ब्राह्मणजत्वात् अस्त्येव शूद्रस्यापि यज्ञेऽधिकार इत्यर्थ इति नीलकण्ठः।

'तस्माद्वर्णा ऋजवो ज्ञातिवर्णाः संसृज्यन्ते तस्य विकार एव।
एकं साम यजुरेकमृगेका विप्रश्चैको निश्चये तेषु सृष्टः ॥, इति
( म० भा० शा० पर्व ६०-४७ )"

तन्न, राष्ट्ररक्षणाद्यर्थमपि जातिविशिष्टानामेव क्षत्रियादीनां निर्माणेनापि तदुपपत्तेः। नह्यनेन जात्यपलापः सिद्ध्यति। ब्रह्मकारणकत्वेऽपि यथाऽऽकाश-वाय्वादीनां जातिभेदस्तथैव महादेवकारणकत्वेऽपि ब्राह्मणक्षत्रियादीनां जातिभेदे न काचिद् बाधा। यज्ञाधिकारस्तु सर्वेषां पारम्पर्येणैव न स्वातन्त्र्येण 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' तै० सं० ७।१।१।६ इति प्रत्यक्षश्रुतिविरोधात्, अपशूद्राधिकरणविरोधाच्च। अतएव नीलकण्ठेनापि मानसो यज्ञ इत्युक्तम्।

यदपि 'कर्मैकं कारणञ्चात्र सुगतिं दुर्गतिं प्रति।
कर्मैव प्राक्तनमपि क्षणं किं कोऽस्ति चाक्रियः ॥' ३७ ॥
प्राक्कर्मवशतः सर्वं भवत्येवेति निश्चितम्।
तदोपदेशा व्यर्थाः स्युः कार्य्याकार्य्यप्रबोधकाः ॥ ४७ ॥
प्राक्कर्मफलभोगार्हा बुद्धिः सञ्जायते नृणाम्।
पापे कर्मणि पुण्ये वा कर्त्तुं शक्तो नचान्यथा ॥ ४५ ॥
धीमन्तो वन्द्यचरिता मन्यन्ते पौरुषं महत्।
अशक्ताः पौरुषं कर्त्तुं क्लीबा दैवमुपासते ॥४८॥ इति।
( शुक्रनीतिः-अध्यायः १ )

तदपि न जातिबाधकम्। शास्त्रीयमार्गेणैव पुरुषकारस्याप्युपादेयत्वात्। जातिव्यवस्थासम्मानन्तु निम्नोद्धृतैर्वाक्यैरपि बोध्यम्।

✓ "उत्कृष्टजातिशीलानां गुर्वाचार्य्यतपस्विनाम्।
आरण्यास्तु स्वकैः कुर्य्युः सार्थिकाः सार्थकैः सह ॥"५४६॥
"जातिजानपदान् धर्मान् श्रेणीधर्मांस्तथैव च ॥५६८॥
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपालयेत् ॥
देशजातिकुलानाञ्च ये धर्माः प्राक्प्रवर्तिताः ॥५६६॥

तथैव ते पालनीयाः प्रजा प्रक्षुभ्यतेऽन्यथा ।
उदूह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ॥५७०॥
मध्यदेशे कर्मकराः शिल्पिनश्च गवाशिनः ।
मत्स्यादाश्च नराः सर्वे व्यभिचाररताः स्त्रियः ॥५७१॥
उत्तरे मद्यपा नार्यः स्पृश्या नृणां रजस्वला ।
खशजाताः प्रगृह्णन्ति भ्रातृभार्य्यामभर्त्तृकाम् ॥५७२॥
अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः ।
येषां परम्पराप्राप्ताः पूर्वजैरप्यनुष्ठिताः ॥५७३॥
त एव तैर्न दुष्येयुराचारान्नेतरस्य तु ।" इति ॥

(शुक्रनीतिः अध्यायः ४)

शास्त्राविरुद्धानामेवाचाराणां प्रामाण्यम् । येषामाचाराणां पारम्पार्येण येषां-कृते प्राप्तिस्तेषामेव कृते तदादरणीयतापि ।

यदपि

"शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ॥३६८॥
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ।
पुराणाद्युक्तमन्त्रैश्च नमोऽन्तैः कर्मकेवलम् ॥३६९॥
विप्रवद्विप्रविन्नासु क्षत्रविन्नासु क्षत्रवत् ।
प्रजाताः कर्मकुर्य्युर्वै वैश्यविन्नासु वैश्यवत् ॥३७०॥
वैश्यासु क्षत्रविप्राभ्यां जाताः शूद्रासु शूद्रवत् ।
अधमादुत्तमायां तु जातः शूद्राधमः स्मृतः ॥३७१॥
वेदभिन्नप्रमाणास्ते प्रत्यगुत्तरवासिनः ।
तदाचार्य्यैश्च तच्छास्त्रं निर्मितं तद्धितार्थकम् ॥३७३॥
नीचोत्तमत्वं भवति श्रेष्ठत्वं क्षेत्रबीजतः ।
विश्वामित्रश्च वाशिष्ठो मातङ्गो नारदादयः ॥३७५॥
स्वस्वजात्युक्तधर्मो यः पूर्वैराचरितः सदा ।
तमाचरेच्च सा जातिर्दण्ड्या स्यादन्यथा नृपैः" ॥३७६॥

(शु० नी० अ० ४)

"यदा न कुर्य्यान्नृपतिः स्वयं कार्य्यविनिर्णयम् ।
तदा तत्र नियुञ्जीत ब्राह्मणं वेदपारगम् ॥५३५॥

दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम् ।
यदा विप्रो न विद्वान् स्यात् क्षत्रियं तन्नियोजयेत् ॥
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" ॥५३७॥

( शुक्रनी० अ० ४ )

"माहिष्येण करण्यां तु रथकारः प्रजायते ।
असत्सन्तस्तु विज्ञेयाः प्रतिलोमानुलोमजाः ॥९५॥

( याज्ञ० स्मृति-आचार० )

तथा च दशमेऽध्याये षष्ठं श्लोकमारभ्य षट्षष्टितमं यावत् मूर्धावसिक्तादयो नानाजातयो मनुस्मृतौ वर्णितास्तथान्यैः स्मृतिकारैरपि अभ्युपगताः । जात्युत्कर्षश्च—

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥' ९६

( याज्ञ० स्मृ० आचा० )

जातयो मूर्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्मणत्वादिजातिप्राप्तिर्जात्युत्कर्षो युगे जन्मनि सप्तमे पञ्चमे, अपिशब्दात् षष्ठे वा बोद्धव्यः । व्यवस्थितश्चायं विकल्पः । व्यवस्था च ब्राह्मणेन शूद्रायामुत्पादिता निषादी, सा ब्राह्मणेनोढा दुहितरं काञ्चिज्जनयति, सापि ब्राह्मणेनोढान्यां जनयतीत्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति । ब्राह्मणेन वैश्यायामुत्पादिता अम्बष्ठा, साप्यनेन प्रकारेण पञ्चमो षष्ठं ब्राह्मणं जनयति । मूर्धावसिक्ताप्यनेन प्रकारेण-चतुर्थी पञ्चमं ब्राह्मणं जनयति । एवमुग्रा क्षत्रियेणोढा माहिष्या च यथाक्रमं षष्ठं पञ्चमं क्षत्रियं जनयति । तथा करणी वैश्येनोढा पञ्चमं वैश्यमिति । एवमन्यत्राप्यूह्यम् ।

किञ्च वृत्त्यर्थानां कर्मणां व्यत्यये विपर्यासे ब्राह्मणादयोऽपकर्षं प्राप्नुवन्ति । यथा ब्राह्मणो मुख्यया वृत्त्या अजीवन् क्षात्रेण कर्मणा जीवेदित्यनुकल्पः । तेनाप्यजीवन् वैश्यवृत्त्या तयाप्यजीवन् शूद्रवृत्त्या । क्षत्रियोऽपि स्वकर्मणाजीवनार्थेनाजीवन् वैश्यवृत्त्या, शूद्रवृत्त्या वा । वैश्योऽपि स्ववृत्त्या अजीवन् शूद्रवृत्त्येति कर्मणां व्यत्ययः । तस्मिन् व्यत्यये सति यद्यापद्विमोक्षेऽपि तां वृत्तिं न परित्यजति तदा सप्तमे षष्ठे पञ्चमे वा जन्मनि साम्यम् । यस्य हीनवर्णस्य कर्मणा जीवति तत्समानजातित्वं भवति । तद् यथा ब्राह्मणः शूद्रवृत्त्या जीवन् तामपरित्यजन् यदि पुत्रमुत्पादयति सोऽपि

तयैव वृत्त्या जीवन् पुत्रान्तरमित्येवं पुत्रपरम्परया सप्तमे जन्मनि शूद्रमेव जनयति। वैश्यवृत्त्या जीवन् षष्ठे वैश्यम्। क्षत्रियवृत्त्या जीवन् पुत्रान्तरमित्येवं पुत्रपरम्परया सप्तमे जन्मनि शूद्रमेव जनयति। वैश्यवृत्त्या जीवन् षष्ठे वैश्यम्। क्षत्रियवृत्त्या जीवन् पञ्चमे क्षत्रियम्। क्षत्रियोऽपि शूद्रवृत्त्या जीवन् षष्ठे शूद्रम्। वैश्यवृत्त्या जीवन् पञ्चमे वैश्यम्। वैश्योऽपि शूद्रवृत्त्या जीवन् तामपरित्यजन् पुत्रपरम्परया पञ्चमे जन्मनि शूद्रं जनयतीति। पूर्ववच्चाधरोत्तरम्। अस्यार्थः-वर्णसङ्करे अनुलोमजाः प्रतिलोमजाश्च दर्शिताः वर्णसङ्करजाताश्च रथकारनिदर्शनेन दर्शिताः।

**वर्णसंकरजातयः**

इदानीं वर्णसङ्करजाताः प्रदर्श्यन्ते। अधरे च उत्तरे च अधरोत्तरम्। यथा मूर्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादितस्तथाम्बष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिता अधराः प्रतिलोमजास्तथा मूर्धावसिक्ताम्बष्ठानिषादीषु ब्राह्मणेनोत्पादिताः, माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण चोत्पादिताः, करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिता उत्तरे अनुलोमजाः। एवमन्यत्राप्यूहनीयम्। एतदधरोत्तरम् पूर्ववदसत्सदिति बोद्धव्यम्। वर्णसंकरसृष्ट्या राष्ट्रं विनश्यति।

"यत्र त्वेते परिध्वंसाजायन्ते वर्णदूषकाः।
राष्ट्रियैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति॥"
(म. १०। ६१)

अत एव कौटल्येनापि वर्णव्यवस्थारक्षणमुक्तम्—

'व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति॥"

इति साङ्कर्यविस्तारेण लोकनाशश्चोक्तः।

**ब्राह्मणजातेरेव राष्ट्रियत्वम्—**

"ब्राह्मणो जायमानो हि पृथिव्यामधिजायते।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये॥ ९९॥
सर्वस्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम्।
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति॥१००॥

स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
आनृशंस्याद् ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥
॥१०१॥' (मनु१)

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ।
पितापुत्रौ विजानीयाद् ब्राह्मणस्तु तयोः पिता ॥
(मनु २।१३५)

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥
(मनु ९।३१७)

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ॥
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ।
ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ॥
(मनुः १।९६।८७)

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ॥
(मनुः १।९८)

ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः ।
तस्मान्मेध्यतमन्त्वस्य मुखमुक्तं स्वम्भुवा ॥
उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद् ब्राह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥
तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् ॥
हव्यकव्याभिवाह्याय सर्वस्यैवास्य गुप्तये ।
(मनुः १।९२।९४)

मुखबाहूरुपज्जानां या लोके जातयो बहिः ।
म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः ॥

निम्नोद्धृतवचनेषु तत्तत्कर्मभिः जन्मान्तरेषु वर्णोत्कर्षप्राप्तिरुक्ता ।

अग्निहोत्रमुपासश्च जुह्वानश्च यथाविधि ।
सर्वातिथ्यमुपातिष्ठन् शेषान्नकृतभोजनः ॥ ३३ ॥

०००स वैश्यः क्षत्रियकुले शुचौ महति जायते ।।३४।।
स वैश्यः क्षत्रियो जातः जन्मप्रभृतिसंस्कृतः ।
उपनीतो व्रतपरो द्विजो भवति सत्कृतः ॥ ३५ ॥
अधीत्य स्वर्गमन्विच्छंस्त्रेताग्निशरणः सदा ॥ ३६ ॥
ज्ञानविज्ञानसम्पन्नः संस्कृतो वेदपारगः ॥
विप्रो भवति धर्मात्मा (म० भा० अ० प० १४३) ॥"

कस्यचिदहिंसकस्य तपस्विनः सर्वे सत्त्वाः सिंहव्याघ्रादयः समीपस्था भवन्ति स्म । तस्यर्षेः कश्चित् ग्राम्यः श्वा परमानुरक्तः । तत्र तद्भक्षणाय कदाचिद्द्वीपी समायातः । तं क्रूरं दृष्ट्वा जीवितार्थी श्वा मुनिं शरणमागतः । मुनिस्तद्भयमपनेतुं तमपि द्वीपिनं चकार । एवं क्रमेण व्याघ्रं कुञ्जरं सिंहं शरभञ्च चक्रे । स च शरभो भूत्वा तमृषिमेव भोक्तुं प्रववृते । तदा तेनोक्तम्-

"श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः ॥२०॥
व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमागतः ।
सिंहस्त्वं बलमापन्नो भूयः शरभतां गतः ॥ २१ ॥
मया स्नेहपरीतेन विसृष्टो न कुलान्वयः ।
यस्मादेवमपापं मां पाप हिंसितुमिच्छसि ॥ २२ ॥
तस्मात्स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि ॥ २३ ॥
(म० भा० शा० पर्व० ११६ अ.)

एवं 'भृत्याः ये यत्र योग्याः स्युस्तत्र स्थाप्याः सुरक्षिताः ।'
अकुलीननराकीर्णो न राजा सुखमेधते ।
अकुलीनस्तु पुरुषः प्राकृतः साधुसंश्रयात् ।
दुर्लभैश्वर्यतां प्राप्य निन्दितः शत्रुतां व्रजेत् ।
कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम् ।'
(म० भा० शा० प० ११८)

सचिवं कुर्यात् ।

'शरभः शरभस्थाने सिंहः सिंह इवोर्जितः ।
व्याघ्रो व्याघ्र इव स्थाप्यो द्वीपी द्वीपी यथा तथा ॥ ५ ॥
कर्मस्विहानुरूपेषु न्यस्या भृत्या यथाविधि ॥ ६ ॥

'नाकुलीना नराः सर्वे स्थाप्या गुणगणैषिणा ॥ ८ ॥
साधवः कुलजाः शूरा ज्ञानवन्तोऽनसूयकाः ॥ ६ ॥
न श्वा स्वं स्थानमुत्क्रम्य प्रमाणमभिसत्कृतः ।
आरोप्यः श्वा स्वकात्स्थानादुत्क्रम्यान्यत्प्रमाद्यति ॥ २ ॥
स्वजातिगुणसम्पन्नाः स्वेषु कर्मसु संस्थिताः ।
प्रकर्तव्या ह्यमात्यास्तु नास्थाने प्रक्रिया क्षमा ॥ ३ ॥
( म० भा० शा० प० ११९ )

यदि मनुष्येषु मनुष्यत्वावान्तरजातिरेव न भवेत्तदा कः स्वजातिः, कश्च परजातिः, कश्च श्वस्थानीयः, कः सिंहस्थानीयः, कश्च शरभस्थानीयः ? सर्वमेतदपार्थकमेव वचः स्यात् ।

स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते ॥ ३७ ॥
तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान् स्वयम् ॥
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ॥ ३८ ॥
शूद्रः पैजवनो नाम सहस्राणां शतं ददौ ।
ऐन्द्राग्नेन विधानेन दक्षिणामिति नः श्रुतम् ॥ ३६ ॥
( मा भा. शा० ६० अध्याये )

'अष्टमुष्टिर्भवेत् किञ्चित् किञ्चिदष्टौ च पुष्कलम् ।
पुष्कलानि तु चत्वारि पूर्णपात्रं प्रचक्षते ॥'

ननु 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' ( तै० सं० ७।१।१।६ ) इति श्रुतेः कथं शूद्रस्य यज्ञ इत्याह—

यतो हि सर्ववर्णानां यज्ञस्तस्यैव भारत ।
अग्रे सर्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते ॥४०॥
( म० भा० शा० प० ६० )

श्रद्धया गुर्वग्नीन् परिचरत उपकोशलस्याग्नयो ब्रह्मविद्यां दत्तवन्तः । एवं श्रद्धया ब्राह्मणादीनाराधयतः शूद्रस्यापि ब्राह्मणकृतयज्ञफलभागित्वमस्त्येव इति नीलकण्ठः ।

दैवतं हि महच्छ्रद्धा पवित्रं यजताञ्च यत् ।
दैवतं हि परं विप्राः स्वेन स्वेन परस्परम् ॥

अयजन्निह सत्रैस्ते तैस्तैः कामैः समाहिताः ।
संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः ॥'

(म० भा० शा० प० ६०।४१-४२)

सृष्टयः सन्तानानि । सर्वेषां वर्णानां ब्राह्मणजत्वादस्त्येव शूद्रस्यापि यज्ञेऽधिकार इत्यर्थः इति नीलकण्ठः ।

देवानामपि ये देवा यद्ब्रूयुस्ते परं हितम् ।
तस्माद् वर्णैः सर्व यज्ञाः संसृज्यन्ते न काम्यया ॥४३॥
ऋग्यजुः सामवित्पूज्यो नित्यं स्याद्देववद्द्विजः ।
अनृग्यजुरसामा च प्राजापत्य उपद्रवः ।
यज्ञो मनीषया तात सर्ववर्णेषु भारत ॥४४॥

वर्णैः सशूद्रैः सर्वयज्ञाः श्रौताः स्मार्त्ताश्च न काम्यया स्वभावात्संसृज्यन्ते । द्विजस्त्रैवर्णिकः पूज्यः शूद्रेण । उपद्रवन्तीति तत्समीपगामित्वादुपद्रवो दासः शूद्रः । स वेदहीनोऽपि प्राजापत्यः प्रजापतिदेवताकः । यथाग्नेयो ब्राह्मणः ऐन्द्रः क्षत्रियस्तद्वत् । मानसे ( यज्ञे ) देवतोद्देशेन द्रव्यत्यागात्मके यज्ञे सर्वे वर्णा अधिक्रियन्ते इत्यर्थः इति नीलकण्ठः ।

✓ नास्य यज्ञकृतो देवा ईहन्ते नेतरे जनाः ।
ततः सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते ॥४५॥

(म० भा० शा० ६०)

"स्वं दैवतं ब्राह्मणः स्वेन नित्यं परान् वर्णानयजन्नेव आसीत् ।
अधरो वितानः संसृष्टो वैश्यो ब्राह्मणस्त्रिषु वर्णेषु यज्ञसृष्टः ॥४६॥
तस्माद्वर्णा ऋजवो ज्ञातिवर्णाः संसृज्यन्ते तस्य विकार एव ।
एकं सामयजुरेकमृगेका विप्रश्चैको निश्चये तेषु सृष्टः ॥४७॥

(म० भा० शा० प० ६०)

ब्राह्मणस्त्रयाणामपि वर्णानां स्वयमसाधारणं दैवतमतः कारणात्ते स्वे आत्मीया ब्राह्मणाः परान् वर्णानुद्दिश्य नायजन्निति नैवासीदपि त्वमुककामेनामुकशर्मणाहं वृतोऽमुकयज्ञेन यक्ष्य इत्युद्देशं कृत्वा अयजन्नेव यागं कृतवन्त एव । एवमासीदिति पुराकल्पदर्शनमुखेनायं विधिर्ज्ञेयः । आयजन्निति परस्मैपदप्रयोगस्तु परगामित्वात् क्रियाफलस्य युक्तः । अधरो नीचः

वैवाहिकाच्छ्रौताच्चान्यत्वात् । वितानोऽग्नीनां विस्तारः । तस्याग्नयो लौकिका एव पञ्चकुण्डी विधानादौ ज्ञेयाः । एककुण्डपक्षे त्वेक एव लौकिकः । 'स वाऽथ खलु यत्र कचन होष्यन स्यादित्युपक्रम्य गृह्यकारैर्दर्शितः । तत्रापि मन्त्रसंसर्ग उच्यते । वैश्यो वैश्यगृहादानीतः श्रौतेऽपि विट्कुला द्वित्तवतो वेति वैश्यगृहाद्दक्षिणाग्न्यर्थमग्न्यानयनं दृश्यते । यस्मादेवं तस्माद् ब्राह्मणस्त्रिषु वर्णेषु यज्ञसृष्टः । एवं साम्येऽपि ज्ञातिसाम्यं नास्तीत्याशङ्क्याह-ज्ञातिवर्णा अपि क्षत्रियवैश्यशूद्रास्तस्य ब्राह्मणस्यैव विकारो क्षत्रियादिकन्या-सूत्पन्ने मूर्धाभिषिक्तादौ संसृज्यन्त एव । तेन धर्मतो जन्मतश्च सर्वे वर्णा ब्राह्मणसंसृष्टा इति स्थितम् । तेषु तत्त्वनिश्चये क्रियमाणे एको विप्रो ब्रह्मैव प्रथमो ब्राह्मणः सृष्टो जातः ब्राह्मणसंततित्वात् । सर्वेप्येते ब्राह्मणा एवेत्यर्थः । तत्र दृष्टान्तः एकं साम अकारो वै सर्वा वाक् सैषास्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति श्रुतेरेकमकाररूपमेवाक्षरं यथा सामादिरूपं तथा ब्रह्मैव ब्राह्मणादिरूपमपीत्यर्थ इति नीलकण्ठः ।

अत्र गाथा यज्ञगीता कीर्त्तयन्ति पुराविदः ।
वैखानसानां राजेन्द्र मुनीनां यष्टुमिच्छताम् ॥४८॥
उदितेऽनुदिते वापि श्रद्दधानो जितेन्द्रियः ।
बह्निं जुहोति धर्मेण श्रद्धा वै कारणं महत् ॥४९॥
यत्स्कन्नमस्य तत्पूर्वं यदस्कन्नं तदुत्तरम् ।
बहूनि यज्ञरूपाणि नानाकर्मफलानि च ॥५०॥
(म० भा० शा० प० ६०)

'रौद्रं गवि सद्वायव्यमुपावसृष्ट' मित्यादि ब्रह्वृचब्राह्मणे षोडशकमग्नि-होत्रमुक्तम् । तत्र मारुतं विष्यन्दमानमिति स्कन्नमपि मरुद्दैवत्यं भवतीति तत्पूर्वमाद्यम् ।

अग्निहोत्रं यदस्कन्नं यथाविधिहुतमुत्तरम् सर्वोत्कृष्टं बहूनीति रौद्रादीनि तानि षोडशाग्निहोत्ररूपाणि इति नीलकण्ठः ।

'तानि यः सं प्रजानाति ज्ञाननिश्चयनिश्चितः ।
द्विजातिःश्रद्धयोपेतः स यष्टुं पुरुषोर्हति ॥ ५१ ॥
स्तेनो वा यदि वा पापो यदि वा पापकृत्तमः ।
यष्टुमिच्छति यज्ञं यः साधुमेव वदन्ति तम् ॥ ५२ ॥

ऋषयस्तं प्रशंसन्ति साधुचैतदसंशयम् ।
सर्वथा सर्वदा वर्णैर्यष्टव्यमिति निर्णयः ॥
नहि यज्ञसमं किञ्चित्त्रिषु लोकेषु विद्यते ॥ ५३ ॥
तस्माद्यष्टव्यमित्याहुः पुरुषेणानसूयता ।
श्रद्धापवित्रमाश्रित्य यथाशक्ति यथेच्छया ॥ ५४ ॥

आश्रित्य शास्त्रमिति शेष इति नीलकण्ठः ।

( म० भा० शा० प० ६१ )

छान्दोग्यादिश्रुतिषु तद्भाष्येषु च जन्मनैव ब्राह्मण्यादिकमुक्तम् । तथाहि— 'तद् य इह रमणीचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिंवा वैश्ययोनिं वाथय इह कपूयचरणास्ते अभ्याशोह यत्ते कपूयां योनिं मापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा । "तत्र तत्र तेष्वनुशयिनां य इहलोके रमणीयं शोभनं चरणं शीलं येषां ते रमणीयचरणा रमणीयचरणेनोपलक्षिताः शोभनोऽनुशयः पुण्यं कर्म येषां ते रमणीयचरणा उच्यन्ते । क्रौर्यानृतमायावर्जितानां हि शक्य उपलक्षयितुं शुभानुशयसद्भावः । तेनानुशयेन पुण्येन कर्मणा चन्द्रमण्डले भुक्तशेषेणाभ्याशो ह क्षिप्रमेव यदिति क्रिया विशेषणं ते रमणीयां क्रौर्यादिवर्जितां योनि मापद्येरन् प्राप्नुयुः ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा स्वस्वकर्मानुरूपेण । अथ पुनर्ये तद्विपरीताः कपूयचरणोपलक्षितकर्माणोऽशुभानुशया अभ्याशो यत्त कपूयां यथा कर्म योनिमापद्येरन् ।······श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वा स्वकर्मानुरूपेणैव ।" (शा० भा०) एतेन पूर्वजन्मार्जितकर्मानुशयानुरोधेनैव ब्राह्मणादियोनिजन्मप्राप्तिः । श्वसूकरयोनिभेदवद् ब्राह्मण-क्षत्रियादियोनिभेदोऽपि निगदव्याख्यातः ।

अथेत्यभ्यमन्थत् स मुखाच्च योनेर्हस्ताभ्याञ्चाग्निमसृजत । तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतः ।" ( बृ० उ० १।४।६ ) "स प्रजापतिः मुखे ······ हस्तौ प्रक्षिप्याभ्यमन्थत् आभिमुख्येन मन्थनमकरोत् । मुखाच्च योनेर्हस्ताभ्यां च योनिभ्यामग्निं ब्राह्मणजातेरनुग्रहकर्त्तारमसृजत ।······ तथा ब्राह्मणोऽपि मुखादेव जज्ञे प्रजापतेः । तस्मादेकयोनित्वाज्ज्येष्ठेनेवानुजोऽनुगृह्यतेऽग्निना ब्राह्मणः । तस्माद् ब्राह्मणोऽग्निदैवत्यो

मुखवीर्य्यश्चेति श्रुतिस्मृतिप्रसिद्धम्। तथा बलाश्रयाभ्यां बाहुभ्यां बलभिदादिकं क्षत्रियजातिनियन्तारं क्षत्रियञ्च। तस्मादैन्द्रं क्षत्रं बाहुवीर्य्यञ्चेति श्रुतौ स्मृतौ चावगतम्। तथोरुत ईहा चेष्टा तदाश्रयत्वाद्वस्वादिलक्षणं विशोनियन्तारं विशं च। तस्मात्कृष्यादिपरो पश्वादिदैवत्यश्च वैश्यः। तथा पूषणं पृथ्वीदेवतां शूद्रञ्च पद्भ्यां परिचरणक्षममसृजतेति श्रुतिस्मृतिप्रसिद्धेः। तत्र क्षत्रादिदेवतासर्गमिहानुक्तम् वक्ष्यमाणमप्युक्तवदुपसंहरति सृष्टिसाकल्यानुकीर्त्यै···। (शा· भा·)

एतेन भगवत्पादाः ब्राह्मणादीनां प्रजापतेर्मुखादिभ्यः स्पष्टमुत्पत्तिं व्याचक्षाणा जन्मनैव वर्णव्यवस्थां ब्रह्मणादिजातिञ्चाभ्युपगच्छन्तीति स्पष्टमेव विज्ञायते। 'ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्नव्यभवत्। तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात् क्षत्रात् परं नास्ति। तस्माद् ब्राह्मणःक्षत्रिय मधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति। सैषा क्षत्रस्य योनिर्यद् ब्रह्म। तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्ततः उपनिश्रयति स्वां योनिं य उ एवं हिनस्ति स्वां स योनिमृच्छति स पापीयान् भवति। यथा श्रेयांसं हिंसित्वा' (बृ· उ· १।४।११)

'ब्रह्म वा इदमग्र आसीत् यदग्निं सृष्ट्वाऽग्निरूपापन्नं ब्रह्म ब्राह्मणजात्यभिमानात् ब्रह्मेत्यभिधीयते। वै इदं क्षत्रादिजातं ब्रह्मैवाभिन्नमासीदेकमेव। ······तद्ब्रह्मैकं क्षत्रादिपरिपालयित्रादिशून्यं सन्नव्यभवत् विभूतिवत् कर्मणे नालमासीदित्यर्थः। ततस्तद्ब्रह्म ब्राह्मणोऽस्मि। ममेत्थं कर्तव्यमिति ब्राह्मणजातिनिमित्तं कर्म चिकीर्षवात्मनः कर्मकर्तृत्वविभूत्यै श्रेयोरूपं प्रशस्तरूपमत्यसृजते अतिशयेना सृजतसृष्टवत्। किं पुनस्तद्धेत् सृष्टं क्षत्रं क्षत्रियजातिः' (शा· भा०)

किमद्यापि ब्राह्मणक्षत्रियादिजातिसम्बन्धे शाङ्करमतानुयायिनां संदेहः संभवति। किं वा भ्रान्तिनिमित्तोऽयमाचार्य्यप्रयोगः ?··· इन्द्रो देवानां राजा वरुणो यादसाम् सोमो ब्राह्मणानाम् रुद्रः पशूनाम् पर्जन्यो विद्युदादीनाम् यमः पितृणाम् मृत्यू रोगादीनां ईशानो भासाम्। (शा· भा०)··· तदनु ·····मनुष्यक्षत्राणि सोमसूर्यवेश्यानि सृष्टान्येव द्रष्टव्यानि। (शां· भा·)

'स नैव व्यभवत्। स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ( बृ० १।४।१२ )। 'स नैव व्यभवत्। स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किञ्च (बृ० १।४।१३) तदेतद् ब्रह्म क्षत्रं विट्शूद्रस्तदग्निनैव देवेषु ब्रह्माभवत्। ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते। ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवत्।

( बृ० उ० १।४।१५)

तदेतच्चातुर्वर्ण्यं सृष्टं ब्रह्मक्षत्रं विट्शूद्रः···यत्तत्स्रष्टृब्रह्म तदग्निनैव नान्येन रूपेण देवेषु ब्रह्म ब्राह्मणजातिरभवत् ब्राह्मणस्वरूपेण मनुष्येषु ब्रह्माभवत्। इतरेषु वर्णेषु विकारान्तरं प्राप्य क्षत्रियेण क्षत्रियोऽभवत् वैश्येन वैश्यः शूद्रेण शूद्रः यस्मात् क्षत्रादिषु विकारापन्नमग्नौ ब्राह्मण एव चाविकृतं स्रष्टृब्रह्म तस्मादग्नावेव देवेषु देवानां मध्ये कर्मफलमिच्छन्त्यग्निसम्बद्धं कर्म कृत्वेत्यर्थः। तदर्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितम्। तस्मात्तस्मिन्नग्नौ कर्म कृत्वा तत्फलं प्रार्थयन्त इत्येतदुपपन्नम्। ब्राह्मणे मनुष्येषु मनुष्याणां पुनर्मध्ये कर्मफलेच्छायां नाग्न्यादिनिमित्तक्रियापेक्षा; किं तर्हि जातिमात्रस्वरूपप्रतिलम्भेनैव पुरुषार्थसिद्धिः। यत्र तु देवाधीना पुरुषार्थसिद्धिः तत्रैवाग्न्यादिसंबद्धक्रियापेक्षा। स्मृतेश्च—

"जप्येनैव तु संसिद्ध्येद् ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥"

(मनु० २।८७)

पारिव्राज्यदर्शनाच्च ( शा० भा० )

यदुक्तं दीक्षावशाद्वैश्यक्षत्रिययोरपि ब्राह्मणत्वमुपद्यते। ततः कर्मणैव ब्राह्मणादिकमिति तन्न, भावानवबोधात्।

तथाहि शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके प्रथमब्राह्मणे (३९-४०) ऊनचत्वरिंशतच्चत्वारिंशत्तम कण्डिकयोर्दीक्षितस्य ब्राह्मणत्वं यज्ञरूपाद् ब्रह्मणो जन्यत्वादुक्तम्। तथाहि अथैक उद्वदति दीक्षितोऽयं ब्राह्मणो दीक्षितोऽयं ब्राह्मण इति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्य्यो यो यज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिःकृत्व

आह त्रिवृद्धियज्ञः । इतः पूर्वं ज्योतिष्टोमप्रसङ्गे शालानिर्माणसमन्त्रकशाला प्रवेशमुक्त्वा दीक्षासंस्कारा उक्ताः, दीक्षाहुतयश्चोक्ताः । एवमप्सु दीक्षामुक्त्वा कृष्णाजिनदीक्षा चोक्ता । तत्रैव प्रतिप्रस्थातृकर्तृकं वा दीक्षिता-वेदनमुच्यते ।

तदर्थस्तु एकः अध्वर्युः उद्वदति उच्चैरावेदयति । अयं ब्राह्मणः दीक्षितः दीक्षणीयेष्टिकृष्णाजिनादिदीक्षासंस्कारेण संस्कृतः । एवं निवेदितमेवैनं देवेभ्यो निवेदयति । अयं वीर्य्यः यो यज्ञं प्रापत् युष्माकं मध्ये एकः सम्पन्नः तं गोपायत एवमुच्चैस्त्रिःकृत्वा वदति यतस्त्रिवृद्यज्ञो भवति । तत्रावेदनवाक्य-गतस्य ब्राह्मणशब्दस्य प्रयोजनं स्वयमेव श्रुतिराह-अथ यद्ब्राह्मण इत्याह अनद्धेव वा अस्यातः पुरा जातं भवतीदꣳह्याहू रक्षांसि योषितमनुसचन्ते तदुत रक्षांस्येव रेत आदधतीत्यथात्राद्ध जायते यो ब्राह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा वैश्यं वा ब्राह्मण इत्येव ब्रूयात् । ब्रह्मणो हि जायते यो यज्ञाज्जायते तस्मादाहुर्न सवनकृतः हन्यादेनस्वी हैव सवनकृतेति ।४०।

अतः अस्याः दीक्षायाः पुरा जातं जन्म अनद्धैव अनिश्चितमेव भवति अनाद्धात्वे कारणमाह—इदं वक्ष्यमाणमाहुः यतो राक्षसाः स्त्रियं अनुसचन्त अनु-संश्रयन्ति गर्भाधानसमये रेतश्चादधति । अतो योनितो जन्यते तदनद्धायो यज्ञाद् ब्रह्मणो जायते तस्य ब्राह्मणशब्दव्यवहारः । अत एव दीक्षितयोः राजन्यवैश्ययोरपि दीक्षितोऽयं ब्राह्मणः । ( का० श्रौ० सू० ७।१।१०५) इत्येव ब्रूयात् । यज्ञजन्मप्रशंसार्थं कश्चिन्नियममाह-सवनकृतं अभिषव-कर्त्तारं यष्टारं त्रैवर्णिकेष्वन्यतममपि न हन्यात् । यतः सवनकृतनिमित्तेन तद्धननेन एनस्वीभवति । स्पष्टमेवात्र दीक्षायाः प्रशंसनम् । अत एवात्र केनचि-द्गुणयोगेन गौणमेव ब्राह्मण्यं तादात्विकम् न जातिब्राह्मण्यम् । अत एव दीक्षित-योरपि राजन्यवैश्ययोर्नार्त्विज्यं भवति । जाति ब्राह्मणस्यैवार्त्विज्यविधानात् ।

मनुनापि ब्राह्मणस्यैव—'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः' । ( म. २।१४० ) इत्यादिभिराचार्योपाध्यायगुर्वर्त्विक्त्वादिकमुक्तम् ।

"वैशेष्यात् प्रकृतिश्रैष्ठ्यात् नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥

जात्युत्कर्षात् हिरण्यगर्भोत्तमाङ्गोद्भवाच्च ब्राह्मणस्योत्कर्षः उक्तः—

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः।
चतुर्थ एकजातिस्तु शूद्रो, नास्ति तु पञ्चमः॥ (म० १०।४)
'सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः।
अनिन्द्येषु विवाहेषुपुत्राः सन्तानवर्धनाः'॥ ६॥ (या.स्मृ.आ.उ.)

सवर्णेभ्यो ब्राह्मणादिभ्यः सवर्णासु ब्राह्मण्यादिषु सजातयः मातृपितृसमानजातीयाः पुत्राः भवन्ति. (मिताक्षरा)। 'विन्नास्वेष विधिः स्मृतः इति' ब्रुवाणः स्वपत्न्युत्पादितस्यैव ब्राह्मण्यादि जातित्वं निश्चिकाय। उक्तेन विधिनोढायां सवर्णायां वोढुः सवर्णादुत्पन्नास्तस्मात्समानजातीया भवन्ति। अतश्च कुण्डगोलककानीनसहोढजादीनामसवर्णत्वमुक्तम्। ब्राह्मणादिजातिस्तु स्मृतिलक्षणा। यथा स्मरणं भवति। यथा समानेऽपि ब्राह्मण्ये कुण्डिनो वाशिष्ठोऽत्रिर्गौतम इति स्मरणलक्षणं गोत्रं तथा मनुष्यत्वे समानेऽपि ब्राह्मण्यादिजातिः स्मरणलक्षणा।

मन्दाग्नितायां स्वीया अपि निष्कासयन्ते" इति तत्तुच्छम्, यतो भक्ष्याभक्ष्यविचारहीनानामेव सर्वभक्षकत्वं संभवति। नच कोऽपि पाषाणकाष्ठविषादिकं पाचयितुं शक्नोति, उद्दीप्ताग्नेरपि योग्यभक्षण एव प्रवृत्तिर्भवति, नायोग्यभक्षणे, अभक्ष्यानिष्टकरभक्षणेनात्तुर्विनाशो ध्रुवः। योग्याः प्रायश्चित्तादिभिः सङ्ग्राह्या अवश्यं भवन्ति। उच्छृङ्खलाः स्वेच्छाचारिणः संगृहीताः समाजमेवोच्छेत्स्यन्ति। ततो यथा दुश्चिकित्स्यस्य पाकव्रणादेर्बहिष्करणमेव योग्यं तथैव तेषां बहिष्करणमपि नायोग्यम्।

तत्र कैश्चिदुच्यते—पूर्वमेकवेदः पश्चाच्छाखाभेदेन तद्बहुभवनम्। पश्चाच्च बहुशाखाविलोपश्च जातः। संभाव्यते कदाचित्सर्वथा लोपोऽपि स्यात्। ह्रासदर्शनाद्ध्रासानुमानमवशिष्टानामपि संभवत्येव। तथात्वेऽपौरुषेयनित्यत्वादिकमपि संदेहाक्रान्तं भवति वर्णाश्रमतदाचाराणमपि तथैव सन्देहास्पदत्वं जायते" इति, तन्न, नित्येश्वरस्य तत्कृपापात्रभूतानां महर्षीणाच्च हृदयेष्वनादिनिधनाया वेदलक्षणाया वाचः सर्वदैव विद्यमानत्वेन क्वचित्सम्प्रदायलोपेन तल्लोपव्यवहारेऽपि क्षत्यभावात्। तथाहि—

'ऋषीणां विषयज्ञो यः स शरीराद्विमुच्यते।
अतीत्य तमसस्पारं स्वर्गे लोके महीयते॥

सहस्रयुगपर्य्यन्तमहर्ब्राह्मं यदुच्यते ।
नाकस्य पृष्टे तं कालं दिवि सूर्य्य इव रोचते ॥
ततः कृतयुगस्यादौ ब्रह्मपूतो महायशाः ।
सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन् ॥'

इति सामवेदीयदेवताध्यायब्राह्मणे ।

एतेन तपः स्वाध्यायादिभिर्दिव्यशक्तिप्राप्तौ नित्यसिद्धानां मन्त्राणां दर्शनसामर्थ्यमुपलभ्यत इति सिद्धयति । ब्रह्मपुराणे च —

'प्रवृत्ते तु ततस्तस्मिन् पूते कृतयुगे तु वै ।
उत्पन्नाः कलिशिष्टाश्च प्रजाः कार्त्तयुगास्तदा ॥
तिष्ठन्ति चेह ये सिद्धा अदृष्टा विचरन्ति च ।
सह सप्तर्षिभिश्चैव तत्र ते च व्यवस्थिताः ॥
ब्रह्मक्षत्रविशः शूद्रा बीजार्थं ये स्मृता इह ।
कलिजैः सह ते सन्ति निर्विशेषास्तदाऽभवन् ॥
तेषां सप्तर्षयो धर्मं कथयन्तीतरेषु च ।
वर्णाश्रमाचारयुतः श्रौतः स्मार्त्तो द्विधा तु सः ॥
ततस्तेषु क्रियावत्सु वर्त्तन्ते वै प्रजाः कृते ।
श्रौते स्मार्त्ते कृतानाञ्च धर्मे सप्तर्षिदर्शिते ॥
केचिद्धर्मव्यवस्थार्थं तिष्ठन्तीह युगक्षयात् ।
मन्वन्तराधिकारेषु तिष्ठन्ति मुनयस्तु ते ॥
यथा दावप्रदग्धेषु तृणेष्विह तपेन तु ।
वनानां प्रथमं वृष्ट्या तेषु मूलेषु संभवः ॥
तथाकार्त्तयुगानां तु कलिजेष्विह संभवः ।
एवं युगे युगस्येह सन्तानस्तु परस्परम् ॥
वर्त्तते ह्यव्यवच्छेदाद्यावन्मन्वन्तरक्षयः ।' इति ।

याज्ञवल्क्योऽप्याह

तत्राष्टाशीतिसाहस्रा मुनयो गृहमेधिनः ।
पुनरावर्त्तिनो वीजभूता धर्मप्रवर्त्तकाः ॥

यतो वेदाः पुराणानि विद्योपनिषदस्तथा ।
श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम् ।।
( प्रायश्चित्ताध्याये १८६-१८९ )

वायुपुराणेऽपि

तिष्ठन्ति चेह ये सिद्धाः सुहृष्टा विचरन्ति च ।
सदा सप्तर्षयश्चैव ये च तत्र व्यवस्थिताः ।।
ब्रह्मक्षत्रविशः शूद्रा बीजार्थं ये स्मृता इह ।
तेषां सप्तर्षयो धर्मं कथयन्तीतरेषु च ।।
वर्णाश्रमाचारयुतः श्रौतस्मार्तो द्विधा तु सः ।
तेषां धर्मव्यवस्थार्थं तिष्ठन्तीहायुगक्षयात् ।।
मन्वन्तराधिकारेषु तिष्ठन्ति मुनयस्तु वै ।
यथा दावप्रदग्धेषु तृणेष्विह तपे ऋतौ ।।
वनानां प्रथमं वृष्टाया तेषां मूले तु संभवः ।
एवं युगायुगस्येह सन्तानस्तु परस्परम् ।।
वर्तते ह्यव्यवच्छेदाद्यावन्मन्वन्तरक्षयः ।'
( ५ ।१०३।११० )

एतेन वेदादिशास्त्राणां तदुक्तधर्मस्य जन्ममूलकवर्णव्यवस्थायाश्चानादिनिधनत्वं स्पष्टं विज्ञायते ।

## विकासवादो जातिश्च

अद्यत्वे मनुष्येषु श्वेतपीतजातिव्यवहारो भवति । रङ्गरूपादिपरिवर्त्तनमपि दृश्यते । जलवायुदेशकालादिभेदेन कफवातपित्तानामपि प्राधान्याप्राधान्यभेदेन रङ्गरूपस्वभावेषु भेदो दृश्यते । यथा वातावरणैर्विचारैश्च रजस्वलायोषित्प्रभाविता भवति, देशकालवातावरणादिभिः प्रभावितस्त्रीपुरुषाणां प्रभावस्तदीयसन्ततिष्वपि जागर्ति । बृहदारण्यके चैतदुक्तम्—'य इच्छेत् पुत्रो मे शुक्लवर्णो एकवेदविच्च भवेत् संविधानोपेतं क्षीरोदनं पाचयित्वा घृतेन सपत्नीकैः प्राश्नीयात् । य इच्छेत् कपिलः पिङ्गलवर्णो मे पुत्रः द्विवेदविच्च स्यात् स घृतयुक्तं दध्योदनं सपत्नीकः प्राश्नीयात् । एवमेव श्यामो लोहिताक्षो वेदत्रयप्रवक्ता मे पुत्रः स्यादिति कामयमानस्यापि तत्र विधानं

दृश्यते । 'य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ।'

( बृ० उ० ६।४।१४ )

तत्रैव च 'कपिलः पिङ्गलो जायेत……दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वै ( बृ. ६।४।१५ ) श्यामो लोहिताक्षो …। पुष्पेषु फलेषु रूपरङ्गास्वादाः रससेकोपचादिबाह्योपचारैः परिवर्त्तयितुं शक्यन्ते । तात्कालिकैः प्राक्तनैश्च कर्मभिरपि रूपादिपरिवर्त्तनं तु शास्त्रसम्मतमेव । देवानामृषीणां वरशापादिभिस्तीव्रैः पुण्यैः पापैश्च जातिपरिवर्त्तनमपि नहुषनन्द्यादीनां योगादिशास्त्रसम्मतमेव । सर्वज्ञः परमेश्वरस्तत्तत्प्राणिकर्मवशात् तत्तद्विलक्षणरूपरङ्गशरीराणि निर्मातुं समर्थ एव । जडप्रकृतिः परमाणवो विद्युत्कणा वा अचेतना सर्वथाऽपि तत्र नेशते ।

गौरश्यामवादः

आर्य्याणां गौरत्वमनार्य्याणां श्यामलत्वमिति कल्पना तु निर्मूलैव, यतश्चक्रवर्तिदशरथात् रामभरतौ श्यामलौ, लक्ष्मणशत्रुसूदनौ गौरौ, वसुदेवाद् गौरश्यामलौ रामकृष्णौ च जाताविति प्रसिद्धमेव । व्यासशुकादयोऽपि श्यामला एवासन् ।

वस्तुतस्तु भारते षण्णामृतूनां विकासाद्देशकालभेदेनात्र विविधरङ्गरूपादिसम्पन्नानां मानवानामाविर्भावो युक्त एव । अत एव मैथिल-वङ्गीय-पञ्चनदीयोत्तरप्रदेशीय - महाराष्ट्रिय-द्राविडादिष्वार्य्यत्व - ब्राह्मणत्वाविशेषेऽपि रूपरङ्गरचनादिवैशेष्यदर्शनं भवत्येव । देवेष्वपि शिवो गौरो, विष्णुस्तु श्यामलः, ब्रह्मा रक्तवर्णः । महाकालीमहालक्ष्मीमहासरस्वत्यादीनामपि तथैव रूपभेद इष्यते । सत्त्वस्य शुक्लत्वेन तत्प्रधानानां शुक्लत्वं, रजसो रक्तत्वेन तत्प्रधानानां रक्तत्वं, तमसः कृष्णत्वेन तदुपहितानां कृष्णत्वं श्लिष्यत एवं । तेनैव युगभेदेन विष्णोरपि 'शुक्लो रक्तस्तथापीत इदानीं कृष्णतां गत' (भा० १०।८। १३) इत्युक्तिरीत्या शुक्लादिवर्णभेदो जातः संगच्छते ।

पृथिव्याः पीतवर्णो, जलस्य शुक्लोऽग्नेः रक्तो, वायोः कृष्णो, वियतश्च धूम्रो वर्णो योगतत्त्वोपनिषदि प्रसिद्धः । तत्तद्भूतप्राधान्येनापि रङ्गभेदो युज्यते । सूर्य्यचन्द्र-मङ्गल - बुध-गुरु-शुक्र - शनिग्रहाणां ताम्र-श्वेत-हरित-पीत-भास्वर-

शुक्ल-कृष्णवर्णाः प्रसिद्धाः। जन्मकालिकलग्ननवांशस्वामिनो बलवत्त्वेनापि स्वामिग्रहानुरोधेन पुरुषरङ्गो जायते। लग्ननवांशाधिपतेर्नैर्बल्ये लग्नस्थितस्य ग्रहस्य तद्द्रष्टुर्वा ग्रहस्यानुसारेण वर्णो जायते।

'लग्ननवांशकतुल्यतनुः स्याद् वीर्ययुतग्रहतुल्यवपुर्वा।
चन्द्रसमेतनवांशकवर्णः' (बृहज्जातके ५।२३) इति।

तत्रापि देशकुलजातिभेदेन वर्णतारतम्यं भवति। 'परं विधाय्याः कुलजातिदेशा' इत्युक्तेः। विकासवादिनां रीत्याऽपि कदाचिदाकस्मिके विप्लवे दोषयुक्ता जातयो नश्यन्ति। तदानीमेव च गुणयुक्ता जातयो जीवन्ति। मैथिलादिरूपसंस्थानादिषु देशजलवायुप्रभावाः प्रतिफलन्ति। तत्राङ्गप्रत्यङ्गादिसौन्दर्य्य-माधुर्य्यादिप्रादुर्भावे प्राणिनां पुण्यमपि हेतुतां नातिवर्त्तते। पुण्यादितारतम्य-मूलकं तत्तारतम्यमपि भवत्येव। योगैस्तपोभिर्वा येषां प्रकृतिः स्वायत्ता तैस्तु संकल्पबलेन पूर्वजात्यारम्भकपरमाणुविघटनेनाभीष्टजात्यारम्भकपरमाणु-संघटनेन जातिपरिवर्त्तनं कर्त्तुं शक्यमेव।

तादृशानां वचनेनैव नहुषस्याजगरत्वं, नन्दिनश्च देवत्वं तस्मिन्नेव जन्मनि संवृत्तम्। साधारणानां वाचोऽर्थानुसारिण्यो भवन्ति। विशिष्टानां तु वाचोऽर्था अनुधावन्ति।

"लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति" ॥इति॥

यदुक्तम् "श्यामलायाः कुक्कुट्याः श्वेतकुक्कुटेन सम्बन्धेन जातेषु चतुर्षु शिशुषु श्वेतश्चैकः श्यामलश्चैको भवति द्वौ च मिश्रितौ भवतः। द्वितीये पर्य्याये षोडशसंख्याकेषु शिशुषु एकः श्वेतः श्यामलश्चैकः शेषाश्चतुर्दश संख्याकाः मिश्रवर्णा भवन्ति। तृतीये पर्य्याये चतुःषष्ठिसंख्याकेषु द्वौ मातापितृवर्णानुसारिणौ। अनया रीत्या संकरेष्वपि केचिन्मातापितृजातीयाः शुद्धा एव शिशवो भवन्ति। तथैव श्वेतानां पाश्चात्यानां पीतानां मङ्गोलानाञ्च मिश्रणेन केचित्पाश्चात्यरूपरङ्गवन्तो भवन्ति, केचिच्च मङ्गोलजातीया भवन्ति। आधिक्येन तु ईरानी-पारसीक-तुल्या भवन्ति। एतेन "पारसीकादयो मिश्रिता ज्ञायन्ते" इति, तन्मन्दमन्यत्र तद्व्यभिचारदर्शनात्। तथा अन्योऽन्य-साङ्कर्य्येणोत्पन्नेष्वाम्रेषु कस्यचिदपि मूलाम्र जातीयता न दृश्यते।

यदप्युक्तम् "व्यक्तीनां रूपरङ्गतौल्यं उत्कर्षे च तौल्यमङ्गानां स्पष्टता च शुद्धायाः जातेर्लक्षणम्" इति, तदपि न । प्रामाणिकाधाराभावेन निर्मूलत्वात् । वयं तु पश्यामः स्पष्टाङ्गवत्योऽस्पष्टाङ्गवत्यश्च जातय एव भिन्ना भवन्ति, न तत्र मिश्रणामिश्रणादिभेदकृता विशेषाः ।

यदुक्तम् "भारतीयेषु शास्त्रेष्वपि पञ्चम्यां षष्ठ्यां सप्तम्यां सन्ततौ अशुद्धं शुद्धं भवती"ति तदपि तुच्छम्, भावानवबोधात् । तत्र शुद्धजातिप्राप्तिरीतेर्भिन्नत्वात् । 'जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा ।' इत्यादिवचनव्याख्यानप्रसङ्गेन तस्य विवृतत्वात् । शूद्रकन्या ब्राह्मणेनोढा कन्यामेव यदि जनयेत् सापि ब्राह्मणेनोढा सती कन्यामेव जनयेदेवं सप्तमे पर्य्याये सा शुद्धं ब्राह्मणं जनयतीति कन्यानामेव सप्तमे पञ्चमे वा पर्याये पितृजातीयत्वस्योक्तत्वात् ।

रक्तमिश्रणेन जातिभेदस्तु संकरजातिवर्णनेन वर्णित एव । वैदेशिकवातावरणदर्शनेन यद्यपि स्त्रीशुद्धौ विश्वासो न संभवति तथापि वैदिकसंस्कारसंस्कृतेष्वार्य्येषु न तदसम्भवः, पितृकुले मातापित्रोर्भ्रातृणां, श्वसुरकुले श्वसुरपतिभर्तृणां पुत्राणाञ्च नियन्त्रणे या तिष्ठति रजो दर्शनात्प्रागेवोद्वाहिता सती पतिकुले निगूढा तिष्ठति, ज्येष्ठश्वसुरादिभिरसंम्भाषमाणा स्वातन्त्र्येण कुटुम्बिजनमन्तरागमनागमनवर्जिता बाह्यैः संभाषणसंबन्धाद्यसम्भवात् सा सर्वथैव शुद्धा संभाव्यते । पतिव्रताधर्म-वैधव्यधर्म-सतीधर्मपालनप्रसारादिभिरपि स्त्रीशुद्धिरेव संरक्ष्यते । मैथिलपञ्चनदीयवंगीयब्राह्मणादीनां रूपरङ्गभाषादिवैविध्येऽपि ब्राह्मणत्वादिकं समानमेव तिष्ठति, गोत्वमिव नीलरक्तश्वेतगवादिषु। अतएव सर्वत्र गोत्रमन्त्रशाखादिसमानता दृश्यते ।

## रुच्यनुसारेण वर्णलाभवादः

यत्त कश्चिदाह—"वनवासकाले द्रौपद्याः स्वयंवरकाले क्षत्रियप्रवराणां सत्यवादिनां धर्मनिष्ठानां युधिष्ठिरादिपाण्डवानां च ब्राह्मणत्वकथनं भिक्षाटनादिकञ्च तेषां वर्ण्यमानं गुणकर्मादिमूलकं ब्राह्मण्यमित्येव द्योतयति । यथा हि द्रौपदी स्वयंवरस्थाने वयं ब्राह्मणाः स्मेति ब्रुवाणास्ते ब्राह्मणसमाजेऽवस्थिताः । ब्राह्मणत्वेन च व्यवह्रियमाणा आसन् ।

'वृत्तो ब्राह्मोत्तरोरङ्गः पाञ्चाली ब्राह्मणैर्वृता'

(म० भा० आदि प० १६०;३९,४० )

कर्णेन च 'तुष्यामि ते विप्रमुख्य भुजवोर्य्यस्य संयुगे ।' ( म० भा० आ० प० १६०।१६ ) इत्यर्जुनाय विप्रमुख्यत्वमुक्तम् । अर्जुनेनापि 'ब्राह्मणोऽस्मि युधां श्रेष्ठ' ( म०भा० आ० प० ) इत्यात्मनो ब्राह्मणत्वमुक्तम् । ब्राह्मं तेजोऽसह्यं मत्वा कर्णो युद्धान्निवृत्त इत्यप्युक्तम् ।

'एवमुक्तस्तु राधेयो युद्धात्कर्णो न्यवर्त्तत ।
ब्राह्मं तेजस्तदाजय्यं मन्यमानो महारथः ॥'

( म० भा० आ० १९० )

इत्थमनेकेषु प्रसङ्गेषु पाण्डवैः स्वस्य ब्राह्मणत्वमुक्तम् । तेनेदं विज्ञायते यत्तदानीं स्वेच्छावशात् स्वस्वरुच्यनुसारेणार्य्यजनो यं यं ब्राह्मणादिवर्णं प्राप्तुं यद्यद्वर्णधर्मांश्च पालयितुमभिललाष तं तं वर्णं प्राप्तुं शशाक । तत्तद्धर्मांश्चाभ्युपगन्तुं प्रबभूव । कठिनं वर्णबन्धनं नाभूत् । तत्तद्गुणकर्मवेषादिपरिवर्त्तनतः सहजतया तद्वर्णपरिवर्त्तनं कर्तुमार्य्याः प्राभवन्" इति, तत्तुच्छम्, स्वस्वरुच्यनुसारेण वर्णतद्धर्मप्राप्तावभ्युपगम्यमानायां 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' । गी०३।३५ इत्यादि विरोधापत्तेः । रुचीनामव्यवस्थितत्वेन वर्णव्यवस्थाया अप्यनवस्थितत्वापातात् । पाण्डवास्तु गूढचर्य्यया समयमतियापयमानाः स्वब्राह्मण्यं ख्यापयामासुः । जरासन्धवधप्रसङ्गे कृष्णभीमार्जुना अपि ब्राह्मणवेषेण गत्वा स्वस्य ब्राह्मण्यं प्रख्यापितवन्तः । द्यूतप्रसङ्गानन्तरमपि विराटनगरे वेषान्तरेण स्वक्षत्रियत्वं प्रच्छाद्य तस्थिवांसः तदनुरोधेन ब्राह्मणत्वव्यवहारो न तेषां मुख्यमेव ब्राह्मणत्वं साधयति । एवं प्रयोजनानुसारेण वेषान्तरग्रहणेन तादृग्व्यवहारेण च न वस्तुभूततत्तद्वर्णतत्तद्धर्मप्राप्तिः संभवति । किञ्च यदि वेषादिग्रहणेन यथेच्छवर्णपरिवर्त्तनं शक्यं स्यात्तदा 'ब्राह्मं तेजस्तदा जय्यमिति ( म० भा० आ० १९०।२३ ) ब्राह्मतेजसः किमिवाजय्यता स्यात् ?

यदप्युच्यते 'क्षत्रियस्य सतो ब्राह्मणधर्माचरणं न संभवतीति क्षत्रियस्य कृते ब्राह्मणधर्मस्य निषिद्धत्वादिति' । तदपि न;

'वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययापदि ।
चरेद्वा विप्ररूपेण न श्ववृत्त्या कथञ्चन ॥'

( श्रीभागवते ११।१७।४८ )

क्षत्रियस्य विप्ररूपेणापदि समययापनस्यानुमतत्वेन तद्दोषात् ।

## आचार्यकृतो वर्णविभागः

यदुक्तम् 'तत्तद्रोगपरीक्षणकुशलस्य राजवैद्यस्येव मनुजस्वभावाकृतिवर्णादिपरीक्षणकुशलस्याचार्य्यस्यापक्षपातितया परीक्षया बाल्येऽपि 'आकृतिर्गुणान् कथयती'ति न्यायेन विशेषतोऽनभिव्यक्तगुणकर्मादिनिर्णयसंभवेन ब्राह्मण्यादिनिर्णयसंभवः ।

'आचार्य्यस्त्वस्य यां जातिं विधिवद्वेदपारगः ।
उत्पादयति सावित्र्या सा सत्या साजरामरा ॥'

( मनुः २।१४८ )

इति वचनात्, माणवकस्याकृतिवर्णोच्चारणादिपरीक्षणेन सावित्र्या गायत्रीमन्त्रप्रदानादिद्वारा यां ब्राह्मणत्वादिजातिम् उत्पादयति प्रकटयति सैव जातिरजरामरा भवति । अत्र जातिशब्देन ब्राह्मणत्वादिजातिर्ज्ञेया । सा नैव जन्मतः सिद्धा किन्त्वाचार्य्येण जन्यते ।

'स्वाध्यायेन व्रतैर्होमैः त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥'

( मनुः २।२८ )

पितृभ्यां शरीरमात्रस्योत्पत्तिः, न तु ब्राह्मण्यादिजातेः, तस्यास्तत्तद्गुणकर्मभिरेवोत्पाद इति ।

कामान् माता पिता चैवं यदुत्पादयतोमिथः ।
संभूतिं तस्य तां विद्यात् यद्योनावभिजायते ॥' इति

( म० २।१४७ )

तन्न, रोगादिपरीक्षणसाधनायुर्वेदादिशास्त्रस्येवेह बालस्य ब्राह्मण्यादिपरीक्षणसामग्र्यनुपलब्धेः । दशमे दिवसे नामकरणविधानं दृश्यते । ब्राह्मण्याद्यनुसारेण शर्मान्तादिकं नामकरणं भवति । नहि तदानीं कस्यापि गुणकर्मादिनिर्णयः संभवति ।

किञ्च एवमेव पञ्चाष्टादिवर्षवयस्कस्य बालस्य ब्राह्मणस्योपनयनकालस्तदानीमपि ब्राह्मण्यनिर्णायकगुणकर्मादिज्ञानमसंभवमेव । कथञ्चिज्जीविकासाधनकर्मयोग्यतानिर्णयसंभवेऽपि वेदाध्ययनज्योतिष्टोमराजसूयवैश्यस्तो-

माद्यौपयिकत्रैवर्णिकत्वब्राह्मणत्वक्षत्रियत्वादिज्ञानन्तु सर्वथा न संभवत्येव। अत एव राजसूये राजशब्दो न कर्ममूलकः किन्तु, जातिमूलक इति निर्णीतं मीमांसायाम्। 'आकृतिगुणान् कथयतीति' न्यायो दुर्जनत्वसज्जनत्वादिसामान्यस्य सत्सु सहकार्य्यन्तरेषु निर्णायको भवति न स्वातन्त्र्येण ब्राह्मण्यादिनिर्णायकः।

अत एव समवेतेषु ब्राह्मणादिषु नाकृत्या कश्चिद्वर्णेन् निर्णेतुं प्रभवति। तत एव ब्राह्मणत्वादिजातिर्नाकृतिग्रहणा जातिः, किन्तु सकृदाख्यात निर्ग्राह्या जातिरभ्युपगम्यते। जन्मना जातित्व एव मातृदोषाद् ब्राह्मणत्वादि संदेहोऽपि 'वयं ब्राह्मणा वा अब्राह्मणा वा स्म' इति श्रुत्युक्तः संदेहोऽपि संभवति। कर्मणा तत्त्वे तु तदनवकाश एव स्यात्। 'आचार्यस्त्वस्य यां जाति'मित्यत्र जातिपदस्य जन्मैवार्थः। तथैव कुल्लूकभट्टादिभिर्व्याख्यातत्वात्। तथाहि आचार्यो वेदज्ञः माणवकस्य यां जातिं यज्जन्म विधिवत्सावित्र्या साङ्गोपनयनसावित्र्यनुवचनेनोत्पादयति सा ब्रह्मप्राप्तिफलत्वादजरामरा। उपनयनपूर्वकवेदाध्ययनतदर्थानुष्ठानैर्निष्कामस्य मोक्षलाभात्। द्विजातेर्जन्मद्वयमूलकत्वात्, तत्रैकं जन्म मातापितृजन्यं, द्वितीयं तु आचार्य्यजन्यम्। आचार्य्योऽपि ब्राह्मणत्वादिकं परीक्ष्यैवोपनयति। अत एव ब्राह्मणादीनामेवोपनयनविधानमुक्तं न शूद्राणाम्। यथेच्छसंस्कारेण द्विजत्वनिर्माणसंभवे ब्राह्मणादीनामेव कुतस्तद्विधानम्। सिद्धस्यैवोद्दिष्टता संभवति न साध्यस्य। अत एव सिद्धं ब्राह्मणत्वादिकमुद्दिश्योपनयनादिकं विधीयते सर्वाणि च कर्माणि सिद्धानेव ब्राह्मणदीनुद्दिश्य विधीयन्ते। अत एव द्वाभ्यां जन्मभ्यां द्विजत्वं जायते, तेन न यथेच्छगुणानुरोधेनापि कस्यचिद् ब्रह्मणत्वादिविधानं संभवति।

"महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः", (म० २।२८)

इत्यनेन ब्रह्मप्राप्तियोग्यशरीरनिर्मितिरुक्ता। अत एव ब्रह्मप्राप्तियोग्येयं तनुस्तन्ववच्छिन्न आत्मा क्रियते, कर्मसहकृतब्रह्मज्ञानेन मोक्षावाप्तेः। नात्र ब्राह्मणजातिनिर्माणमुक्तम्, तत्र प्रमाणाभावात्। 'नत्वेवं जन्ममात्रेण ब्राह्मीजातिर्भवेन्नृणां' मित्यादि वचनं तु प्रमत्तगीतमेव। स्मृतौ ब्राह्मी तनुरुक्ता न तु ब्राह्मी जातिः।

धर्मपरिवर्तनवादः

यत्तूक्तम् "गुणकर्मानुसारेणानेकधर्मपरिवर्त्तनमिष्टमेव। अत एव स्तेनो वाल्मीकिरभून् महर्षिः, विप्रोऽपि दशकन्धरोऽभद्दैत्यः" तदपि न, विषमोपन्यासात्। स्तेनस्य स्तैन्यत्यागे सत्कर्मानुष्ठानेन संभवति महर्षित्वम्। ब्राह्मणस्यापि दुराचरणादिना दुर्वृत्तत्वम्, परन्तु ब्राह्मणस्य क्षत्रियत्वं क्षत्रियस्य ब्राह्मणत्वं तु न तस्मिन्नेव जन्मनि संभवति। जन्मान्तरे तु संभवत्येव। विश्वामित्रादीनां क्षेत्रदोषापोहेन सत एव ब्राह्मण्यस्याभिव्यक्तिरित्यन्यत्रोक्तमेव। परिवर्त्तनशीलत्वे त्वव्यवस्थितत्वात् वर्णस्य न व्यवस्था।

"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" (गी० ३।३५)

इत्यादि स्वधर्म-परधर्म व्यवस्थाया अवकाशश्च न स्यात्। रुच्यनुसारेण वर्णतद्धर्मलाभसंभवे प्रतिदिनं परिवर्त्तनस्याप्यदोषत्वे व्यवस्था विधायकानि वचनानि निरालम्बनान्येव स्युः। स्तेनोऽपि साधुर्भवति, मुनिर्भवति न तावता शूद्रो ब्राह्मणो भवति। शूद्रोऽपि सदाचारः साधुर्भवति। ब्राह्मणोऽपि दुराचारोऽसाधुर्भवति, न स शूद्रो भवति।

यदुक्तम् 'यथा औष्ण्यप्रकाशविहीनेन सूर्यत्वावच्छिन्नेन तमो विहन्तुं विश्वाह्लादकमालोकञ्च विस्तारयितुं न शक्यते चेत्तथाभूतस्य सूर्य्यस्यास्तित्वपरिचयोऽपि न स्यात्, तथैव तत्तद्गुणकर्मरहितब्राह्मणक्षत्रियादेः चिकित्सादिगुणकर्मरहितस्य डाक्टरस्येव (सौश्रुतिकस्येव) कानून(विधि)ज्ञानादिरहितस्य वैरिस्टरस्ये(प्राड्विवाकस्ये)वास्तित्वपरिचयोऽपि केन कथं लभ्यः स्यात्? पृथिव्यादाविव व्यवहारविषयाया अनिर्वचनीयायास्तत्तज्जातेरपि परिचयस्तत्तदसाधारणगुणादिकमादायैव सिध्यती"ति तत्तुच्छम्, दृष्टान्तवैषम्यात्।

तथाहि नहि सूर्यस्य तमो विहन्तृत्वमिवाज्ञानाद्यपनोदकत्वमेव ब्राह्मणस्य ब्राह्मण्यम्। वेदाध्ययनाध्यापन तदर्थानुष्ठानोपयोगि ब्राह्मण्यस्यान्यादृशत्वात्। नहि ब्रह्मज्ञानमूलकस्य ब्राह्मण्यस्य कर्मोपयोगित्वम्। ब्रह्मज्ञानस्य कर्माधिकारापनोदकत्वात्। डाक्टरवैरिस्टरा(सौश्रुतिकप्राड्विवाका)दीनां गुणकर्ममूलकत्वमपि प्रतिपन्नमेव डाक्टरत्वादेर्जातित्वानभ्युगमात्। न खलु ब्राह्मण्यमपि तथाविधम् तस्याद्यापि सिषाधयिषितत्वात्।

वज्रसूच्यां तु ब्रह्मज्ञानमूलकत्वमेव ब्राह्मण्यमुक्तम्। नात्र वर्णव्यवस्थायाः

कर्मप्रयोजकं ब्राह्मण्यस्य वा प्रतिपादनम्। अत एव ब्राह्मणस्यैव विचारस्तत्र दृश्यते न क्षत्रियादीनाम्। वर्णविचारे तु तेषामपि विचारेणावश्यं भवितव्यम्।

यदुक्तम् राजगोपालाचार्य्येण दाक्षिणात्यब्राह्मणेन स्वकन्याया वैश्यजातित्वेन व्यवहृतस्य गान्धिमहात्मनः पुत्रेण, क्षत्रियेण ययातिराजेन सह ब्राह्मणेन शुक्राचार्य्येण स्वपुत्र्या देवयान्या इव समुद्रिक्तगुणकर्मसाम्यमालोक्यैव विवाहः कृतः। वर्ण्यन्ते निरूप्यन्ते इति वर्णास्तद्गतगुणकर्मादय इति रीत्या द्वयोः समान एव वर्णः। अतएव राजगोपालाचार्येणोक्तम् "यतोऽहं यादृशदेहवर्णवान् वैरिस्टरो वैष्णवः शाकाहारी रामनामप्रियो गीतापाठकश्च तथा महात्मागान्धिरपि। अत एव मत्कन्यायास्तत्पुत्रस्य च समान एव वर्णो विद्यते" इति तदेतदज्ञानविजृम्भितम्, श्रुतिस्मृतिविरुद्धत्वात्। ब्राह्मणादिमातापितृजन्यत्वस्यैव ब्राह्मणत्वादिप्रयोजकत्वस्योक्तत्वात्। देवयान्यास्तु—महर्षिकचशापेन ब्राह्मणवरप्राप्त्यभावदशायां दैवयोगेन कूपपतितायाः समुद्धरणाय ययातिना पाणिग्रहणस्य कृतत्वेन तपः सिद्धस्य शुक्रस्यानुमत्या धर्मविदग्रगण्यस्य ययातेरन्तःकरणस्य तद्गतत्वेन च तद्वृत्तस्य धर्मत्वं ज्ञायते।

राजगोपालाचार्यादिप्रभृतीनां तु रागादिमूलकसम्बन्धस्य प्रोत्साहनायैव जुगुप्सिते कर्मणि प्रवृत्तिः। अपि च महतामपि धर्मविरुद्धानीतिवृत्तानि न धर्मे प्रमाणानि, किमुत धर्मविमुखानां शास्त्रविरुद्धानामितिवृत्तानि।

तपः श्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारकमि' ति (म० भा० २।२।६) रीत्या योनेर्ब्राह्मण्यकारकत्वेऽपि विद्यातपसोरप्यपेक्षोक्तैव। तत एव—

किं ब्राह्मणा ये सुकृतं त्यजन्ति किं क्षत्रिया लोकमपालयन्तः।
स्वधर्महीना हि तथैव वैश्याः, शूद्राः स्वमुख्यक्रियया विहीनाः॥

इत्याद्युक्तिः, भविष्यपुराणीयजातिनिषेधकानि वचनानि जातिकर्मणोः समुच्चयार्थकानीति स्पष्टमन्यत्रोक्तमेव। यथा दण्डविशेषणाभावाद्दण्डी पुरुषो नास्तीति व्यवहारो भवति पुरुषस्य सत्त्वेऽपि, तथैव योनिसत्त्वेऽपि तपआदिविशेषणाभावान्मुख्यं ब्राह्मण्यं नास्तीति व्यवहारो युक्त एव। नैतावता कर्मणा वर्णो व्यवतिष्ठते। अतएव कर्मणाऽपि वर्णो न संभवतीति भविष्ये तत्रैव

स्पष्टमुक्तम्। वज्रसूच्यामपि कर्मणाऽपि ब्राह्मण्यं न सम्भवतीत्युक्तम्। अत एव वचनान्तरानुरोधेनैव—

'शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्।' ( म० १०।६५)

इत्यादि वचनान्यपि जन्मान्तरे वर्णान्तरापत्तिरित्येवंपराण्येव ज्ञातव्यानि। क्वचित्तु देवदत्तस्य शौर्य्यादिभिर्गुणैर्गौणं सिंहत्वमिव शूद्रस्य शमदमादिभिर्गौणं ब्राह्मण्यं प्राप्यत इत्येवमर्थानि वा।

### चित्तपावनब्राह्मणोत्पत्तिः

यदुक्तम् महाराष्ट्रादौ प्रसिद्धानां चित्तपावनब्राह्मणानामुत्पत्तिरुक्ता सह्याद्रिखण्डादौ—

एवं निवासं कुर्वत्सु अकस्माद्दैवयोगतः।
नीत्वा सागरमध्यस्थैर्म्लेच्छैर्बर्बरकादिभिः॥
बहून्यब्दान्यतीतानि तेभ्यो जाता च संततिः।
चितास्थाने तु सहसा ह्यागतांश्च ददर्श सः॥

सः = परशुरामः।

का जातिः कश्च धर्मश्च क्व स्थाने चैव वासनम्।
एवं रामेण ते पृष्टा ऊचुः कैवर्त्तका इदम्॥
जातिं पृच्छसि हे राम जातिः कैवर्त्तकः स्मृतः।
सिन्धुतीरे कृतो वासः व्याधकर्मविशारदः॥
चतुर्दशगोत्रकुलं स्थापितं चतुरङ्गके।
सर्वे च गौरवर्णास्ते सुनेत्राश्च सुदर्शनाः॥
तेषां षष्टिकुलं श्रुत्वा पवित्रमकरोत्तदा।
ब्राह्मण्यञ्च ततो दत्त्वा सर्वविद्यासु लक्षकम्॥
चितास्थाने पवित्रत्वाच्चित्तपावनसंज्ञकाः॥

इत्यादि वचनैर्निषादानामेव ब्राह्मण्यं परशुरामेण दत्तं, न स्वाभाविकं ब्राह्मण्यम्, किन्तु कृत्रिममेवेति तत्तुच्छम्, सिद्धस्य भगवतः परशुरामस्य तपोबलात्तेषां ब्राह्मण्यलाभेऽपि बाधानुपपत्तेः। तपसो लोकोत्तरमाहात्म्यश्रवणात्।

यद् स्तरं यद्दुरापं यद् दुर्गं यच्च दुष्करम् ।
सर्वं तत्तपसा साध्यं तपो हि दुरतिक्रमम् ॥'
(मनुः ११ । २३८)

इति मनुस्मरणात् ।

'दुरन्वयं दुष्प्रधर्षं दुरापं दुरतिक्रमम् ।
सर्वं वै तपसाऽभ्येति तपो हि बलवत्तरम् ॥
(भारते अनु० १२२।८)

इत्यादिभिस्तपसो लोकोत्तरमाहात्म्यस्मरणात् ।

वस्तुतस्तु ब्राह्मणा एव संसर्गदोषेण निषादभावमापन्नाः परशुरामेण शुद्धिमापादिताः । माधवकृतशतप्रश्नलतिकाग्रन्थानुसारेण ते ब्राह्मणा एवासन् ।

सह्यस्य पश्चिमे भागे (विप्राः) सकुम्टुम्बाश्चतुर्दश ।
वेदवेदांगसंपन्नाः पुत्रपौत्रादिसंयुताः ॥
रक्षितेष्वग्निहोत्रेषु इष्टापूर्त्तेषु चैव हि ।
शिष्ये विद्यां प्रयच्छत्सु अन्नदानादिकं यथा ॥

दरभिसन्धिना पूर्वपक्षिणेममंशं परित्यज्यैवांशान्तरं गृहीतम् ।

एवं निवासं कुर्वत्सु अकस्माद्दैवयोगतः ।
नीत्वा सागरमध्यस्थैर्म्लेच्छैर्बर्बरकादिभिः ॥
बहून्यब्दान्यतीतानि तेभ्यो जाता च संततिः ॥
तत्संपर्काच्च सञ्जातास्तद्रूपाः पुत्रपौत्रकाः ।
उद्वाह्यन्ते न विधिना दाम्पत्यं हि परस्परम् ॥
अभवन्पतिताः सर्वे संसर्गे द्वीपवासिनः ।
कालेन कियता रामो जातः परशुपूर्वकः ॥
प्रताप इति व्याख्याता शब्दकर्त्ता नु चापरः ।
विप्रोऽसौ सर्वधर्मज्ञो ज्ञानी परमधार्मिकः ॥
सर्वशास्त्रेषु निपुणः सर्ववेदप्रपाठकः ।
प्रियकृत्सर्वलोकानां ज्ञात्वा शरणमाययुः ॥
तेन विप्रेण सर्वेषां प्रायश्चित्तं यथोदितम् ।
दत्त्वैषां चित्तशुद्धिन्तु यस्मात्परशुरामतः ॥
चित्तशुद्धिः कृता तेषां तस्मात्ते चित्तपावनाः ।'
(ब्राह्मणोत्पत्तिमार्तण्डे पृ० ३२२—३२३)

इत्यादिना मूलतस्तेषां ब्राह्मण्यं विज्ञायते। संसर्गदोषात्ते निषादप्राया जाताः। परशुरामानुग्रहेण तेषामुद्धारः। न च तावताऽपि कर्मणा वर्णव्यवस्था, नवा जन्मनस्तदहेतुता सिद्ध्यति।

## आभीरब्राह्मणोत्पत्तिः

यदपि ब्राह्मणोत्पत्तिमार्तण्डकथायां "श्रीरामचन्द्रः किरातान् शूद्रान् ब्राह्मणान् कृत्वा तेभ्यः पितुः श्राद्धकर्म समाचरत्, पश्चात्तेभ्यो रामोऽब्रवीत् यूयमद्यारभ्य ब्राह्मणा भवन्तु। ते रामाज्ञया तथैव संवृत्ताः। साम्प्रतमपि आभीरभिल्ल नामधेयेन ते व्यवह्रियन्ते। तथाहि

"वनाद्वनान्तरं गच्छन् विन्ध्याद्रिनिकटे यदा।
श्राद्धं प्राप्तं कुदेशेऽत्र कथं कर्म भविष्यति।
विप्राभावेन चिन्तायां निमग्ने सति राघवे।
तत्रैव पञ्च कैवर्त्ताः सम्प्राप्ता वनचारिणः॥
तांश्च पप्रच्छ रामो वै के यूयमिति तेऽब्रुवन्।
वय किराता राजेन्द्र किं कार्य्यं वद नः प्रभो॥
रामोऽपि चिन्तयामास करिष्यामि द्विजानिमान्।
चकार भूमौ रेखानां सप्तकं तदनन्तरम्॥
उल्लङ्घयन्त्विमा रेखा इति तानब्रवीत्प्रभुः।
प्रथमायां शुद्धाभिल्ला द्वितीयायां च शिल्पिनः।
तृतीयायाञ्च शूद्रा वै सच्छूद्राश्च ततः परम्॥
पञ्चम्यां हि वयं वैश्या षष्ठ्यां वै क्षत्रिया इति।
सप्तम्यां तु वयं विप्रा इति रामो वचोऽब्रवीत्॥
अथ रामश्च तैः सर्वैः (साकं) श्राद्धकर्म समाचरत्।
अथ तानब्रवीद्रामो पूर्वमार्गेण गच्छथ।
हे राम ते कृपालेशादीदृशीं पदवीं गताः।
न गच्छामः पुनर्योनिं कैवर्त्ताख्याधमां प्रभो॥
तदा रामोऽब्रवीत्तान्वै यूयं भूमौ द्विजातय।
भवन्तु भिल्लनामानश्चाभीरा परनामकाः॥" इति,

तदपि न कर्मणा वर्णसिद्धान्तपोषकम्। सर्वज्ञस्य सर्वशक्तिमतो रामस्य

परमेश्वरत्वेन तस्य संकल्पेन विश्वसृष्टिवद् ब्राह्मणसृष्टौ विरोधाभावात्। नात्र कथायां गुणकर्मभिस्तेषां ब्राह्मण्यं निर्णीतवान्। किन्तु स्वसंकल्पबलेन तान् द्विजान्कृतवान्। यस्य पादरजः स्पर्शेन पाषाणभूताप्यहल्या दिव्याङ्गना सञ्जाता, अयोध्यावासिनः सर्वेऽपि सरयूजलस्पर्शमात्रेण दिव्यदेहाः साकेत-लोकमुपगताः; तस्य संकल्पेन किराताः षड्रेखारूपाःशुद्धभिल्लादिरूपाः जातीरतिक्रम्य ब्राह्मणजातिमवाप्ता इत्यत्र किमाश्चर्यम्। तैरपि किरातयोनिमधमयोनिं त्यक्त्वा ब्राह्मण्यमुपगता वयमित्यनुभूतमेव।

निम्बूद्रीपादब्राह्मणोत्पत्तिः।

यदुक्तमेवमेव—

'अब्राह्मण्ये तदा देशे ( केरले ) कैवर्त्तान्प्रेक्ष्य भार्गवः।
विशिष्टाचारमादिश्य यज्ञसूत्रमकल्पयत्॥
स्थापयित्वा स्वकीये स क्षेत्रे विप्रान्प्रकल्पितान्।
जामदग्न्यस्तदोवाच सुप्रीतेनान्तरात्मना॥
( स्कन्धपुराणे सह्याद्रिखण्डे १०३।३१ )

इत्यादिवचनैः 'कैवर्त्तैर्ब्राह्मण्यं लब्धमि'ति विज्ञायते। त एव नम्बूद्रि ( नम्पूतरि ) नाम्ना प्रसिद्धाः परशुरामकल्पिता ब्राह्मणाः। नम्पूशब्दः-केरलभाषायां कर्णधार ( पतवार ) बोधकः। तिरिशब्दस्य त्यागोऽर्थः। नौकादित्यागेन कैवर्त्ता ब्राह्मण्यमुपगता इति नम्पूतरि इति शब्द एव तेषामितिहासं बोधयति। सम्प्रत्यपि विवाहसमये नम्बूद्रिब्राह्मणाः मत्स्यस्पर्शं कुर्वाणाः स्वपूर्वतमपुरुषनिष्ठं मत्स्यजीवित्वं ज्ञापयन्ति।[1]

तदपि तुच्छम्। पूर्वोक्तश्रुतिस्मृत्यनुरोधेन कैवर्त्ताचारान् ब्राह्मणानेव स्वतपोबलेन शोधयित्वा तेषां ब्राह्मण्यं सम्पादितवान् परशुराम इत्येव तदर्थ इति ज्ञातुं युक्तत्वात्। चित्तपावनशोधनस्येव तच्छोधनस्यापि संभवात्। महताऽपि तपसा मतङ्गो यद्ब्राह्मण्यं प्राप्तुं नाशक्नोत् तदनासेन कथं प्राप्तुं शक्येतेति सुधियो विदाङ्कुर्वन्तु। भारत में जातिभेद इति नामकं पुस्तकं त्वप्रमाणमेव। श्रीपरशुरामस्य सिद्धत्वात्तपोबलाज्जातिपरिवर्त्तनमपि संभवत्येव। सिद्धानां वरशापादिप्रभावान्नन्दिनहुषादीनामपि जातिपरिवर्त्तन-स्मरणात्। भविष्यपुराणीये—

[1]( भारतवर्ष में जाति भेद ) इति पुस्तके स्पष्टमि ति

अथवाधीत्य वेदांस्तु क्षत्रवैश्यास्तु वानराः।
गो अपूर्वा कृतिमोयुर्जातिं वा दाक्षिणात्यजाम्॥
अपरिज्ञातशूद्रत्वाद्ब्राह्मण्यं याति कामतः।
तस्मान्न जायते भेदो वेदाध्यायक्रियाकृतः॥
( भविष्ये ४१।४०५।६ )

इत्यादि समाधानन्तु विस्तरेणास्मिन्नेव पुस्तकेऽन्यत्र कृतमेव। तत्र च वेदाध्ययनादिक्रियाकृतोऽपि भेदो न संभवतीत्यनुपदमेवोक्तम्। तेन कर्मणा वर्णव्यवस्थावादोऽपि निन्दित एव। अज्ञानभ्रान्त्यादिमूलकः प्रमादस्तु प्रमादत्वादेव नोदाहरणमर्हति। सर्वमप्येतद् गुणकर्मजन्मादिनिन्दनं कर्मजन्मसमुच्चयविधित्सया कृतं काल्पनिकमेव न तात्त्विकमिति तत्रैव कर्णेहत्यालोचनीयम्।

## नागरब्राह्मणवृत्तान्तः

यदप्युक्तम् 'बहवोऽवरवर्णजाः शूद्रा अपि बलशौर्य्यादिकमवाप्य भूप्रदेशानात्मसात्कृत्य राजानो भूत्वा क्षत्रियाः संवृत्ताः। उत्तरप्रदेशस्था भटनागरसंज्ञया संप्रत्यपि प्रसिद्धाः कायस्थाः सहस्राधिकवत्सरेभ्यः पूर्वं गुर्जरदेशं गत्वा केचन नागरब्राह्मणाः, केचन नागरवैश्याश्च जाताः। एवं डा० भाण्डारकरमहोदयास्तु तद्गोत्रोपाधीनामुभयत्र समानरूपेणोपलब्धत्वात् बंगदेशीयाः कायस्थाः गुर्जरदेशीया नागराश्च मूलत एक एव सन्तीति वदन्ति। भारतवर्ष मे जातिभेदपुस्तके तदतीव स्पष्टमिति तदपि तुच्छम्। स्कन्दपुराणीयनागरखण्डादिप्रामाण्येन तदनुगुणपरम्परया च सदाचारादिभिश्च नागरब्राह्मणानां विशुद्धब्राह्मणत्वावगमात्। मिथिलादेशनिवासित्वेन ब्राह्मणक्षत्रियादीनां मैथिलत्वे समानेऽपि ब्राह्मणादिभेदस्य सत्त्ववत्प्रकृतेऽपि तत्संभवात्। दृश्यन्ते हि ब्राह्मणाब्राह्मणेष्वपि गुरुशिष्यादिष्वपि समानगोत्रत्वादयः। अनेके राजानः—सन्तोऽप्यक्षत्रिया दृश्यन्ते इन्दौर-ग्वालियर-बड़ौदादयः।

यदुक्तम्

'सर्वज्ञातिषु चाण्डालाः सर्वज्ञातिषु ब्राह्मणा'।
ब्राह्मणेष्वपि चाण्डालाः चाण्डालेष्वपि ब्राह्मणाः॥

इत्याश्रयेण जन्ममूलकवर्णव्यवस्थापलापायाल' इति, तदपि तुच्छम्, सिंहभिन्नेष्वपि देवदत्तादिमनुष्येषु शौर्य्यादिगुणयोगेन गौणसिंहशब्द-प्रयोगवद्ब्राह्मणेष्वपि गौण्या वृत्त्या ब्राह्मणपदप्रयोगाविरोधात्। अत एव स्मृत्यादिषु ब्राह्मणेषु क्वचिद् ब्रह्मदेवमुन्याद्यनेके भेदा उक्ताः। वशिष्ठपराश-रव्यासादीनां महर्षीणां यथा जन्मनैव ब्राह्मण्यं यथा वा भविष्यपुराणीयवच-नानाञ्च समुच्चयविधित्वया जन्मसंस्कारनिन्दार्थवादत्वं तथात्रैव पुस्तकेऽन्यत्र स्फुटम्।

## बौद्धानां ब्राह्मणत्वप्राप्तिः

यदुक्तम् 'भगवत्पादेनाद्यशङ्कराचार्य्येण तत्तद्गुणकर्मादिभिर्ब्राह्मणादिवर्ण-व्यवस्था विहिता। ततः पूर्वम् अशोकसम्राट्प्रभृतयो राजानो धनाढ्याश्च सर्वे श्रुतिस्मृतिविमुखा बौद्धमेव धर्मं प्रभूतया श्रद्धया मन्वाना अभवन्। भगव-त्पादप्रयोजितवैदिकधर्मप्रचारसमये ते सर्वे निष्कासिता विध्वंसिता वेति न वक्तुं शक्यते। किन्तु ते श्रीशङ्कराचार्य्यप्रभावेण बौद्धधर्मं परित्यज्य ब्राह्मणादिवर्गमण्डितहिन्दुरूपेण कथं संवृत्ता इति प्रश्नस्येदमेव सदुत्तरम्। यथा पूर्वजाः शौनकमन्वादयस्तत्तद्गुणकर्मानुसारेण चातुर्वर्ण्यव्यवस्था-मकुर्वत तथैव भगवत्पादोऽपि गुणकर्मानुसारेणैव तान् बौद्धान् हिन्दूरूपान-करोत्। तत एवात्रैकोऽपि बौद्धो नावशिष्यते' इति, तदपि तुच्छम्, श्रुतिस्मृति-पुराणादिविरुद्धत्वात्। जन्मनैव वर्णव्यवस्था न कर्मणेति व्युत्पादितमेव। बौद्धेषु वेदप्रामाण्यानादरादहिंसादिप्रवणत्वाच्च यद्यपि वैदिकयागादिषु विद्वेष एवासीत्तथापि पारम्पर्येण सदाचारोपासनादिस्वर्गनरकादिभक्ष्याभक्ष्यादि-विचारोऽविच्छिन्न एवासीत्। अत एव लङ्कावतारेऽभक्ष्यभक्षणादिभ्यो निकृष्ट-योनिप्राप्तिरुक्ता। तत्र हि अष्टमे परिवर्ते निम्नोद्धृतानि वचनानि समुपलभ्यन्ते-

'लशुनं गृञ्जनञ्चैव योगी नित्यं विवर्जयेत्।'
'उभौ तौ पापकर्माणौ पच्येते रौरवादिषु।
ते यान्ति परमं घोरं नरकं पापकर्मिणः॥'
'चाण्डालपुक्कसकुले डोम्बेषु च पुनः पुनः।
डाकिनीजातियोन्याश्च मांसादे जायते कुले॥'
'राक्षसी मार्जारयोनौ च जायतेऽसौ नराधमः।'

नह्येतावदेव । किन्तु मांसादिकं वर्जयतां ब्राह्मणयोनौ जन्म तत्रैवोक्तम्—

ब्राह्मणेषु च जायेत अथवा योगिनां कुले ।

बुद्धिर्धनञ्चैव शुभकर्मणामेव फलं तैरङ्गीक्रियते—

'प्रज्ञावान् धनवांश्चैव मांसाद्यानां विवर्जनात् ।' इति ।

'कृण्वन्तो विश्वमार्यम्' इति मन्त्रस्यापि तथैवार्थो निर्णेयः ।

तथा चास्य सूक्तस्य द्रष्टा निध्रुविः काश्यप ऋषिः । 'ऋषिदर्शनात्' इति निरुक्तात् । तथा 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति' ( नि० ७।१।१ ) इति निरुक्तवचनात् । मन्त्रस्तुत्यः पवमानसोमो देवता । तथाचानुक्रान्तम्—'आपवस्व निध्रुविः काश्यपः' इति । एवञ्च—'एते असृग्रमाशवोऽतिह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ।'

( ऋ० सं० ९।६३।४ )

निध्रुविः काश्यपो ब्रवीति-बभ्रवः बभ्रुवर्णाः । आशवः शीघ्राः । एते इमे । सोमाः । ऋतस्य उदकस्य धारया । असृग्रम् सृज्यन्ते । ह्वरांसि रक्षांसि । अति अभिगच्छन्ति च ।

'इन्द्रं वर्धन्तो अप्तुरः । कृण्वन्तो विश्वमार्यम् । अपघ्नन्तो अराव्णः ।'

( ऋ० सं० ९।६३।५ )

इन्द्रं वर्धन्तः वर्धयन्तः । अप्तुरः उदकस्य प्रेरकाः । विश्वं सोममस्मदीय-कर्मार्थम् । आर्यं भद्रं । कृण्वन्तः कुर्वन्तः । अराव्णः अदातॄन् अपघ्नन्तः विनाशयन्तः । अभ्यर्षन्तीत्युत्तरया सम्बन्धः ।

'सुता अनुस्वमारजोऽभ्यर्षन्ति बभ्रवः । इन्द्रं गच्छन्त इन्दवः ।

( ऋ० सं० ९।६३।६ )

बभ्रवः बभ्रुवर्णाः । सुताः अभिषुताः । इन्दवः सोमाः । इन्द्रम् । आ । गच्छन्तः आभिमुख्येन प्राप्नुवन्तः । स्वं स्वकीयम् । रजः स्थानं अनुप्रति । अभ्यर्षन्ति अभिगच्छन्ति ।

एवं विवेचनेन ज्ञायते यत् 'कृण्वन्तो विश्वमार्यम्' इत्यत्र आर्यशब्दस्य न जातिरर्थः किन्तु अभिगम्यः श्रेष्ठ इत्येवार्थः । अनया स्तुत्या सर्वं यज्ञोपयुक्तम् ।

शासनादिव्यवस्था च प्राचीनैव बौद्धैरप्यङ्गीकृता । तत एव हिन्दूकोड-

निर्मातृभिरपि हिन्दूलाभिधानेन राजकीयनियमेन ये शिष्यन्ते ते हिन्दव इति परिभाषां विधाय तत्र जैनबौद्धावप्यन्तर्भावितौ। हिन्दूलाभिधाने नियमे मिताक्षरा–दायभाग-व्यवहारमयूखादीनामेव प्राधान्यं विद्यते। तेषाञ्च मूलं नारदाङ्गिरःप्रभृतिप्रोक्ताः स्मृतय एव। तासाञ्च मूलं वेद एव। बौद्धत्वेऽपि वर्णव्यवस्थाऽपलापित्वेऽपि व्यवहारतः परम्पराप्राप्तभेदस्तत्रावशिष्ट एवासीत्। यथाऽद्यत्वे आर्य्यसामाजिका यद्यपि कर्मणैव वर्णव्यवस्थामङ्गीकुर्वन्ति तथापि तेषु प्राचीनो जन्मना वर्णभेदोऽनुवर्त्तत एव, अयं शूद्रोऽयञ्च ब्राह्मण इति व्यवहारदर्शनात्। न च कर्मकृतो वर्णभेदः समाजे प्रचलितः, तथैव बौद्धेष्वपि व्यवस्थासीत्। बुद्धेनापि लङ्कावतारे कदाचित्स्वस्य ब्राह्मणकुले जन्म प्रोक्तं कदाचिच्च क्षत्रियकुले जन्म उक्तम्।

यदप्युक्तम् 'कृण्वन्तो विश्वमार्य्यमि'त्यादि श्रुत्या विश्वस्यार्य्यत्वकरण-मनुमन्यत एवे'ति, तदपि तुच्छम्, श्रुत्यर्थानवबोधात्। वेदार्थनिर्णय-पद्धत्या वक्तुः ऋषित्वस्य प्रतिपाद्यस्य देवतात्वस्य निर्णयो भवति। सोमादि-कमार्य्यं श्रेष्ठं सम्पाद्यते मन्त्रैः संस्कारैश्च। एवमेव मिश्रदेशस्थान-नार्य्यान् कण्वादय आर्य्यानकार्षुरित्यस्यापि समाधानमन्यत्र कृतमेव।

### शाकद्वीपिब्राह्मणवृत्तान्तः

यदपि च 'शाकद्वीपादितः बहवः संघशः समागत्य यथायोग्यं ब्राह्मणा क्षत्रिया वैश्याश्च सञ्जाताः। सर्वज्ञकल्पा महर्षयः शाकद्वीपादिगतानाम् तेषां जन्मादिगतं वैलक्षण्यं ज्ञात्वैव तेषु ब्राह्मण्यादिप्रभेदं कृतवन्तः। इति। यदपि च 'तेषां मध्ये काश्यपश्च सर्वज्ञानसमन्वितः।

मिश्रदेशे मुनिर्गतः ............।
सर्वान्म्लेच्छान् मोहयित्वा कृत्वाथ तान् द्विजन्मनः॥
संख्या दशसहस्रञ्च नरवृन्दं द्विजन्मनाम्।
द्विसहस्रं स्मृताः क्षत्राः वैश्याः शूद्रा इति स्मृताः॥

(भविष्य पु० प्रति अ० १३।०६)

मिश्रदेशोद्भवा म्लेच्छाः काश्यपेनैव शासिताः।
संस्कृताः शूद्रवर्णास्ते ब्रह्मवर्णमुपागताः॥

शिखा सूत्रं समाधाय पठित्वा वेदमुत्तमम् ।
यज्ञैश्च पूजयामासुः ...... शचीपतिम् ॥
( भविष्य० पु० प्र० पर्वअ० २०।७७।७६ )

सरस्वत्याज्ञया कण्वो मिश्रदेशमुपाययौ ।
म्लेछान्संस्कृतमाभाष्य तदा दशसहस्रकान् ॥
वशीकृत्य स्वयं प्राप्तो ब्रह्मावर्त्ते महोत्तमे ।
सपत्नीकांश्च तान्म्लेच्छान् द्विजवर्णान् हि प्राकरोत् ॥
( भविष्य० पु० ४ अ० २१ )

एवं रामानन्दसम्प्रदायेऽपि–

म्लेच्छास्ते वैष्णवा आसन् रामानन्दप्रभावतः ।
संयोगिनश्च ते ज्ञेया रामानन्दमते स्थिताः ।
भाले त्रिशूलचिह्नञ्च श्वेतरक्तं तदाभवत् ।
कण्ठे च तुलसीमाला जिह्वा राममयी कृता ॥'

इत्यादिभिरपि गुणकर्मादिभिरेव हिन्दुत्ववैष्णवत्वादिकं जातमिति निश्चीयते इति, तदपि तुच्छम्, भावानवबोधात्। तथाहि म्लेच्छादिप्रादुर्भावात्पूर्वं सर्वत्र ब्राह्मणादयो वर्णाश्रमिणो व्याप्ता आसन्। तेषु कण्वस्तपोबलान्म्लेच्छप्रायेष्वपि ब्राह्मण्यादिकं ज्ञात्वा प्रायश्चित्तादिना तेषां शुद्धिं कृत्वा ब्राह्मण्यादिकं पुनरपि प्रतिष्ठापितवानिति नात्र जन्मना वर्णसिद्धान्तखण्डनम्। श्रीरामानन्दादिप्रभावेण म्लेच्छा अपि वैष्णवा संवृत्ता इत्यत्र तु न मनागपि विरोधः। विष्णारुपासनं रामनामादिमन्त्रजपस्तु न क्वचिदपि निषिद्धम्। तुलसीमालादिधारणमपि न निषिद्धम्। तेन न वैष्णवत्वेऽपि जन्मना वर्णविरोधः।

एवमेव श्रीरामानुजसम्प्रदायेऽपि शठकोपादीनां न कर्मणा ब्राह्मण्यादिकं, किन्तु तेषां सिद्धानां लोकोत्तरत्वमेव। सिद्धाः सर्वत्रैव भवन्ति न तेषामितरसाधारण्यम्।

"श्रेष्ठः श्रीवैष्णवाचार्यः शठकोपोऽन्त्यजात्मजः ।
जन्मकर्मविशुद्धानां ब्राह्मणानामभूद् गुरुः ॥
( दिव्य० चरि० सर्गः ४ )

इतिवचनमपि लोकोत्तरचरित्रत्वादेवानुदाहरणम् ।

एतेन भक्तिसारे परकालमुनिवाहनादयः श्रीवैष्णवाचार्य्याः शर्पकारभिल्ल-वेणुकाराद्यवरजातिकुलजन्मान एव श्रूयन्ते ।

'विचक्षणो विश्वविमोहहेतोः कुलोचिताचारकलानुषक्तः ।
पुण्ये महीसारपुरे विधाय विक्रीय शूर्पं विचचार योगी ॥' (२ सर्गः)

इत्यादिकमपि व्याख्यातम् , सिद्धानां लोकोत्तरत्वादेव ।

म्लेच्छानामार्यत्वप्राप्तिः

यदुक्तम्—

शङ्कराचार्य एवापि शवधर्मपरायणः ।
त्रिपुण्ड्रञ्च स्थितं भाले कण्ठे रुद्राक्षमालिकाः ॥
मुखे गोविन्दमन्त्रश्च तेषां तत्र बभूव ह ॥
( भ पु० प्र० प० अ० २१।६७-६८ )

इत्यादिवचनैः "म्लेच्छाः शङ्कराचार्य्येण संस्कृता आर्य्याः संवृत्ताः" इति, तदपि तुच्छम् , यतः ते म्लेच्छा इति म्लेच्छप्राया इत्येवार्थः । यद्वा म्लेच्छा-सन्तोऽपि भस्मत्रिपुण्ड्ररुद्राक्षादिधारणेन ते शैवाः सम्पन्ना, नतु ब्राह्मणाः सम्पन्ना इति कुतो विरोधः । पूर्वोक्तश्रुतिस्मृतिपुराणादिविरोधात् न क्वापि कर्मणा वर्णव्यवस्था सिद्ध्यति ।

यदुक्तम्—

शकाश्च यवना हूणा अन्ये चाप्यन्यधर्मिणः ।
वैदेशिका विजातीयाश्चातुर्वर्ण्ये प्रवेशिताः ॥'

इति, तदपि तुच्छम् , प्रमाणाभावात् । उक्तवचनस्य चानार्षत्वेनाप्रमाण-त्वात् । तथात्वे वा भारते चातुर्वर्ण्यव्यतिरिक्तजात्यनुपलम्भप्रसङ्गात् ।

विभाजकश्रुतिः—

यदुक्तम् विभक्तारं हवामहे' ( शु० य० वे० ३०।४ ) वयं ऋषयो गुणकर्मा-नुसारेण ब्राह्मणादिवर्णानां विभक्तारं प्रजापतिं हवामहे आह्वयामः इति उव्वटाचार्य्यः । 'ब्रह्मणे ब्राह्मणं, क्षत्राय राजन्यं, मरुद्भ्यो वैश्यम् , तपसे शूद्रम्' (शु० य० ३०।५) ब्रह्मणे वेदाय तदध्ययनप्रवचनतज्ज्ञानप्रचाराय कर्मणे ब्राह्मणं नियोजयाम इति शेषः । अर्थात् तत्कर्मकर्त्तारं ब्राह्मणं वयं जानीमहे । क्षत्राय

क्षतात् शत्रुसमाक्रमणदुष्टपीडादिलक्षणात् लोकानां त्राणाय राजन्यं क्षत्रियं वयं नियोजयामः तत्कर्मकर्त्तारं क्षत्रियं वयमभ्युपगच्छामः। मरुद्भ्यः प्राणेभ्योऽन्नदानादिभिः, लोकेषु प्राणसन्तोषप्रदानाय वैश्यं नियोजयामः। कृषिगोरक्ष्यवाणिज्यादिकर्तारं वैश्यं वयं विद्मः। तपसे लोकसेवा कर्मणे शूद्रं वयं नियोजयामः" इति, तत्तु वेदार्थाज्ञानविजृम्भितम्, वेदार्थसम्प्रदायशून्यत्वात्। शबरस्वामिप्रभृतयो वेदार्थव्याख्यातारो वेदार्थकरणे य एव लौकिकाः शब्दास्तदर्थाश्च त एव वैदिका भवितुमर्हन्तीति सिद्धान्तमाश्रित्य वेदार्थं व्याचक्षते। तथा च ये शब्दा येष्वर्थेषु प्रसिद्धाः सति सम्भवे तेषां त एवार्था ग्राह्याः। अत्र ब्रह्मक्षत्रमरुदादिशब्दाः तेषु तेषु देवेषु प्रसिद्धा अतस्त एव तेषामर्थाः। तेषां वेदादिपरत्वन्तु प्रकरणविरुद्धमेव।

यदुक्तम् 'गुणकर्मानुसारेण ब्राह्मणादिवर्णानां विभक्तारमित्यर्थं उव्वटेन कृतस्तत्तु मिथ्यैव, उव्वटभाष्ये तदनुपलम्भात्। 'विभक्तारं कर्मानुरूपेण विभक्तारम् हवामहे आह्वयामः' इति तत्रत्यं भाष्यम्। अत्र कर्मानुसारेण विभक्तारमव्याकृतविश्वस्य नामरूपाभ्यां व्याकर्त्तारमित्येवार्थः। विश्वविभागस्य कर्मजन्यादृष्टफलत्वेन कर्मानुरूपता युक्तैव। ब्राह्मणादयोऽपि जन्मान्तरीयकर्मानुसारेणैव ब्राह्मणादियोनिजन्मानः। 'रमणीयचरणा······रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वैश्ययोनिं वा' (छा० उ० ५।१०।७) इत्यादिश्रुतिभ्यः। जन्मान्तरीयैः कर्मभिस्तस्मिन्नेव जन्मनि ब्राह्मण्यादिलाभस्तु प्रमाणविरुद्ध एव।'

वस्तुतस्तु विभक्तारमिति विभजतेः कर्ममूल एवोक्तम्। नात्र ब्राह्मणादीनां विभाग उक्तः। किन्तु वसोश्चित्रस्य राधसः"(शु० य० ३०।४)दापयितुः चित्रस्य राधसो धनस्य विभक्तारमित्येव सम्बन्धो युक्तः। उव्वटमहीधरयोरुभयोरपि तत्रैकमत्यात्। अत्र प्रजापतिशब्दस्याध्याहारोऽप्ययुक्तः, सवितारमिति विशेष्यस्य निर्देशादेव। उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावात्। किञ्चात्र ब्राह्मणादयः पशुत्वेनोक्ताः। पशवश्च भिन्नजातीया भवन्ति। यथा छागादयः पशुबोधकाः शब्दा जातिविशेषविशिष्टव्यक्तिपरास्तथैव ब्राह्मणादि शब्दा अपि जातिविशेषविशिष्टव्यक्तिपरा भवितुमर्हन्ति। अत्र नियोजयामः अभ्युपगच्छामः इत्यपि नार्थः। तत्र यूपबन्धनस्यैव नियोगशब्दार्थत्वात्।

तदुक्तं महीधरभाष्ये 'अतः परं पुरुषमेधकाः पशवः आ अध्यायसमाप्तेः। ततः प्रतियूपमेकैकमेकादशिनं नियुज्य ब्राह्मणादीनष्टचत्वारिंशत् संख्यान् पुरुषान् प्रकामोद्यायसदमित्यन्तानग्निष्टे यूपे नियुनक्ति। इतरेषु यूपेष्वेकादशैकादश पुरुषान् वर्णायानुरुधमित्यादीन्नियुनक्ति। ब्रह्मणे ब्राह्मणं तत्र ब्रह्मणे जुष्टं नियुनज्मीति अग्निष्टे ब्राह्मणं प्रथमं नियुनक्ति। एवमग्रे सर्वेषां यूप एव बन्धनम्। चतुर्थ्यन्तदेवतापदं द्वितीयान्तं पुरुषपदं बोद्धव्यम्।' ब्राह्मणपदं जातिपरमिति बृहदारण्यकोपनिद्भाष्ये शङ्करभगवत्पादेन त्वदाचार्येण गृहीतम्। 'योगाद्रूढिर्बलीयसी' ति न्यायेन यौगिकार्थापेक्षया रूढार्थस्यैव ग्राह्यताभ्युपगम्यते आचार्य्यैः। न च सर्वेषां शब्दानां यौगिकार्थः संभवति। अत्रैव 'मेधा यै, रथकारम्' 'धैर्य्याय तक्षाणम्' इत्यत्र रथकारस्तक्षा च जातिविशेषौ गृहीतौ।

'माहिष्येण करण्यां तु रथकारः प्रजायते। इति (या॰ आ॰ ९५) स्मृतेः। तक्षशब्देनापि जातिविशेषो ग्राह्यः, छान्दोग्यभाष्ये भगवत्पादैस्तथोक्तेः। 'ब्रह्मसंस्थोऽमृतत्वमेति २।२३।१ छान्दोग्योपनिषद्वचनभाष्ये भगवत्पादैरुक्तम्।

यत्पुनरुक्तं रूढशब्द निमित्तं नोपाददत इति तन्न; गृहस्थतक्षपरिव्राजकादिशब्ददर्शनात्। गृहस्थिति-पारिव्राज्य-तक्षणादिनिमित्तोपादाना अपि शब्दा गृहस्थपरिव्राजकाश्रमिविशेषे विशिष्टजातिमति च तक्षेति रूढा दृश्यन्ते। न यत्र यत्र तानि तानि निमित्तानि तत्र-तत्र वर्त्तन्ते प्रसिद्ध्यभावात्।[१] एवं मिथ्योल्लेखं स्वाचार्य्यं विरुद्धोल्लेखञ्च कृत्वा वचनाभासैर्युक्त्याभासैश्च कर्ममूलकं वर्णव्यवस्थापनमुपहासास्पदमेव। किञ्च सवितारमिति षूङ् प्राणिप्रसवे इति धातोर्निष्पन्नस्य शब्दस्योत्पादयिताऽर्थस्तच्चोत्पादनं प्राक्तनकर्मानुसारेणैव भवत्यन्यथावैषम्यनैर्घृण्यदोषप्रसङ्गः स्यात्।

यदुक्तं "रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम्॥' (यजु॰ १८।४८)

इत्यत्र स्वस्वगुणकर्मधारणजन्यां रुचं कान्तिं शोभां नः अस्माकं धेहि कृधि कुरु, विश्येषु वैश्येषु मयि एतन्मन्त्रेण प्रार्थनाकर्त्तरि मयि रुचा रुच विविधकान्तिपरम्परामित्यर्थः" इति, तदपि तुच्छम्, मन्त्रस्य तथार्थकत्वे

[१] (छा॰ २ अध्याये त्रयोविंशे प्रथमे शाङ्कर भाष्यम्)

मानाभावात् । स्वस्वगुणकर्मधारणजन्यामित्यस्यार्थस्य निर्मूलत्वाच्च। उव्वटादिरीत्या रुचं न इत्यग्निदेवत्यानुष्टुप् । तथा च हे अग्ने नः अस्माकं ब्राह्मणेषु अस्मत्सम्बन्धिषु विप्रेषु रुच दीप्तिं धेहि। दीप्त्यधिष्ठातृत्वादग्नेः । गुणकर्मधारणजन्यादीप्तिर्गुणकर्मभिरेव सम्पद्यते, तदर्थमग्निप्रार्थनाया नैरर्थक्यात्। एव नोऽस्मत् सम्बन्धिराजसु क्षत्रियेषु वैश्येषु शूद्रेषु रुचं कुरु मयि च रुचा सह रुचं अविच्छिन्नां रुच धेहि। यद्वा विप्रादिशूद्रान्तेषु या रुक् तां नो अस्माकं धेहि देहि इति उव्वटमहीधराद्यनुसारिभाष्यम्।

एतेन "कृतयुगे सर्वे समा एक वर्णा एकभाषा एकरूपाश्चासन्। सत्ययुगापरपर्य्याये कृतयुगे सर्वेऽधर्मोत्तमवर्जिता आसन्।

आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः।
कृतकृत्याः प्रजा यस्मात्तस्मात्कृतयुगं विदुः॥ इति।

महाभारतेऽपि --

'असृजद् ब्राह्मणानेव पूर्वं ब्रह्मा प्रजापतीन्।'

ततस्त्रेतायां कर्मणैव पूर्वं वर्णव्यवस्था जाता, तथैवाद्यापि कर्मणा वर्णव्यवस्थापने सुखशान्तिः समृद्धिश्च भवित्री । जन्मना वर्णाभ्युपगमेनैव वृत्तिसाङ्कर्य्यं दुःखपारम्पर्य्यञ्च जायते ।

"ब्रह्मक्षत्रं हि सर्वेषां वर्णानां मूलमुच्यते।
ब्रह्मक्षत्रप्रसूतास्तु वैश्याः शूद्राश्च मानवाः॥"

इति कथन गुणकर्मवाद एव सगच्छते" इत्यपास्तम्। वाय्वादेः सृष्टेः प्रागाकाशस्येव सत्त्ववत् क्षत्रियादिसृष्टेः प्राग्ब्राह्मणानामेव सत्त्वसंभवेऽपि वाय्वादिभेदस्येव क्षत्रियादिभेदस्यासत्त्वासिद्धेः। वैश्यशूद्रापेक्षया ब्रह्मक्षत्रयोः प्राधान्येनैव ब्रह्मक्षत्रमूलत्वोक्तिः। 'ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत' ( ऋ० सं० १०।९०।१२ ) इति मन्त्रविरोधात्।

अत एव 'ब्राह्मणः संभवेनैव देवानामपि दैवतम्, ( म० ११।८४ )

'जन्मनैव महाभागो ब्राह्मणो नाम जायते' ( म० भा० अनु० ३५।१ ) इत्यादिभिः स्पष्टं जन्मनैव वर्णव्यवस्थोक्ता।

यदुक्तम्—'जातमात्रस्य तावद्बालस्य पूर्वं कर्मणा शमशौर्य्यादिना वर्णो

निश्चीयते पश्चाद् वृत्त्या अध्यापनयुद्धादिना स व्यवस्थितो भवति ।' इति, तदपि निरस्तम् ।

जातमात्रस्य शमशौर्य्यादिज्ञानासम्भवात् । शमशौर्य्यादिका ब्राह्मणादिस्वभावास्तु यथायोग्यदेशकालादिभिरेव व्यज्यन्ते । वर्णनिर्णयस्तु मातापित्रादिवर्णज्ञानेनैव । श्वयोनिजातस्य श्वत्ववद् ब्राह्मणादियोनिजातस्य ब्राह्मणत्वादिकमपि जन्मनैव निर्णीयते । अत एव छान्दोग्ये श्वयोनिं········ ब्राह्मणयोनिं········इति कपूयाचरणफलश्वादियोनिवद् रमणीयाचरणफलब्राह्मणादियोनिरुक्ता ।

वंशानुक्रमवादः

यदुक्तम्—'वंशानुक्रमसिद्धान्तः प्रकृत्या विरुद्धः प्रत्यक्षमेव च तद् दृश्यते—जन्मवर्णाभिमानिषु वंशानुक्रमणं न भवति । वर्णोचिताः शमशौर्य्यादयो न दृश्यन्ते । केषुचित् ब्राह्मणम्मन्येषु शूद्रधर्मा दृश्यन्ते । शूद्राश्च भूयांसो ब्राह्मैः क्षात्रैः स्वभावैर्युक्ता दृश्यन्ते । तस्माद्यत्र क्वापि वंशे वर्णसंपदादयो दृश्यन्ते तत्र तथैव वर्णनिश्चयो युक्त'इति तदपि कुशकाशावलम्बनमेव, विपरीतस्यैव सुवचत्वात् । प्रकृत्या हि वंशानुक्रमणं दृश्यते । मत्स्येषु जन्मनैव जलप्लवनसमर्था मत्स्या जायन्ते । नाविकेषु जन्मनैव नौचालनसंस्कारवन्तो जायन्ते । वर्धकिषु वर्धकिसंस्कारयुता वर्धकिनो जायन्ते, तथैव ब्राह्मणेषु शमादिमन्तः, क्षत्रियेषु युद्धोत्साहवन्तो जायन्ते । विपरीतसंस्कारैश्च यथा क्वचित्सिंहोऽपि मेषायते तथैव क्वचिद् ब्राह्मणोऽपि शूद्रायते, क्वचिच्छूद्रोऽपि ब्राह्मणायते ।

त्रेतायां कर्मणैव वर्णव्यवस्थासीदिति मुधैव प्रलपितम् । निष्प्रमाणत्वात् । श्रुतिस्मृतिपुराणादिषु जन्ममूलकवर्णव्यवस्थाया एव प्रतिपादितत्त्वात् । तस्या एव सर्वदैवप्रसरणमासीत्, तयैव च समृद्धिः शान्तिश्चासीत् । बौद्धादिनास्तिकाभ्यूहितकर्मवर्णवादस्यैव पतनहेतुत्वम् । तत एवारभ्याद्य यावत् नास्तिक्यमूलकमेव पतनं दृश्यते । वृत्तिसाङ्कर्य्यन्तु क्वचिदापन्मूलकं क्वचिच्चाज्ञानमूलकमेव । जन्मना वर्णव्यवस्थाया एवेदं माहात्म्यं यद्घोरेऽपि कलिकाले जन्मनैव ब्राह्मणेषु वेदरक्षाभारस्ततस्तैरेवाद्य यावत्साङ्गावेदा अनेकशाखोपबृंहिता अद्यापि सुरक्षिताः । के नाम कर्मणा ब्राह्मणाः एकमपि मन्त्रं शुद्धं सस्वरमुच्चारयितुं समर्थाः ।

युद्धेऽपि क्षत्रिया एवाद्यापि बाहुल्येन साफल्यमासादयन्ति। व्यापारेऽपि जन्मना वैश्या एव बाहुल्येन सफला भवन्ति। शिल्पादिषु शूद्रा एव संलग्नाः साफल्यमासादयन्ति।

वर्णशब्दनिर्वचनम्।

यदुक्तम् 'वृ संवरणे, वृञ् संभक्तौ, वृञ् आवरणे इत्यादिधातुभ्यो निष्पन्नस्य वर्णशब्दस्य स्तुतिविस्तारशुल्काद्युद्युक्तिदीपने इति कविकल्पद्रुमानुरोधेन च वर्णयति वर्णापयति कविः स्तौतीत्यर्थः। वर्णयति तन्तुं विस्तारयतीत्यर्थः। वर्णयति प्रतिमां शुक्लादिवर्णां करोतीत्यर्थः। वर्णयति - उद्युङ्क्ते दीप्यते वेत्यर्थः। तथा च वर्ण्यते प्रेर्यते स्वधर्मेण समाजस्य योगक्षेमयोः, वर्णयति प्रेरयति स्वकर्मसु परस्परम्, वर्णयति उद्युङ्क्ते स्वकर्त्तव्ये, दीप्यते वर्चःपराक्रमैश्वर्य्यप्रभृतिभिर्वर्णयति विस्तृणाति अभिवृद्धिं गमयति समाजं, आवृणोति आच्छादयति गोपायति समाजं स्वकर्त्तव्यपालनेन, व्रियतेऽनेन यथायोग्यस्वभावानुगुणावृत्तिः। व्रियतेऽसौ गुणकर्मानुसारतस्तत्तद्वर्णत्वाय महाजनैः, एवमादयोऽर्था अवगन्तव्या" इति, तदपि न जन्ममूलकवर्णव्यवस्थाविरोधकम्। यथायथं तत्रापि तत्तदर्थानां समन्वयात्।

नहि कर्मणा वर्णः शुक्लादिवर्णं करोति। अदृष्टद्वारेण तु जन्मना वर्णो जन्मान्तरे शुक्लादिवर्णं संपादयत्येव। उद्योजनमुद्दीपनञ्चापि स एव संपादयति। वर्ण्यते प्रेर्यते धर्मेणेति तु विरुद्धमेव, शास्त्रेणैव स्वधर्मानुष्ठानाय योगक्षेमाभ्याञ्च वर्णस्य प्रेर्यत्वदर्शनात्। वर्णयति प्रेरयति स्वकर्मसु परस्परमित्यप्यशुद्धम् परस्परप्रेरणस्य शास्त्रविरुद्धत्वात्। ब्राह्मणस्यैव धर्मोपदेशकत्वेन तत्प्रेरकत्वसंभवात्।

'विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ् नान्येन केनचित्॥' (१।१०३)

इति मनुस्मृतिविरुद्धत्वाच्च।

जन्मना वर्ण एव ब्रह्मवर्चः पराक्रमादिभिर्दीप्यते। कर्मणा वर्णपक्षे तु पराक्रमादिभिरुत्पद्यते वर्णो न दीप्यते पूर्वमविद्यमानत्वात्। स्वभावानुगुणवृत्तिवरणमपि वर्णशब्दस्य नार्थः, अव्यवस्थापातात्। 'स्वधर्मे निधनं श्रेयः' (३।३५) 'स्वकर्मणा तमभ्यर्च्येति' (१८।४६) गीतादिवचनविरुद्धत्वाच्च। कर्मणा वर्णपक्षे तु यो यत्कर्म करोति स कर्मानुसारेण तत्तद्वर्णो भवतीति सर्वमपि कर्म तस्य तस्य स्वधर्म एव भवतीति स्वधर्म स्वकर्म व्यवस्थैव लुप्येत।

वस्तुतस्तु वर्णो द्विजादौ शुक्लादौ इति प्रसिद्धामरकोषानुसारेण द्विजादि-जातिविशेषपरोऽयं वर्णशब्दो योगरूढ एव, पङ्कजादिशब्दवत् । रूढिर्योगमपहरतीति न्यायेन तद्विरुद्धः सर्वोऽप्यर्थोऽसंगत एव ।

यदुक्तम् "ब्रह्म हि ब्राह्मणः क्षत्रं हीन्द्रः ( श० ब्रा० का० ५ अ० १।७।१ ) 'बाहू वै मित्रावरुणौ ( श० ब्रा० ५।४।३ ) इति तत्तद्गुणकर्म द्योतयितुं समाम्नायते, तदपि न । मनुष्येष्विव देवेष्वपि ब्राह्मणादिवर्णप्रतिपादन एव श्रुतितात्पर्य्यात्, गुणकर्मबोधकपदाभावाच्च ।

यदुक्तम् 'वर्णो वृणोतेरिति निरुक्तप्रामाण्याद् वर्णीयाः वरीतुमर्हाः स्वीकर्त्तुं योग्या गुणाः कर्माणि तान्, तानि च दृष्ट्वा व्रियन्ते ये ते वर्णाः' इति, तदपि तुच्छम् । नैरुक्तनिर्वचनस्य शुक्लादिवर्णपरत्वेन द्विजादौ तदप्रवृत्तेः । तथाहि 'द्वितीयाध्याये' तृतीये खण्डे रूपसमासोदाहरणप्रसङ्गे 'कल्याणवर्णरूपः' इत्युक्तम् । कल्याणवर्णः सुवर्णं तस्येव यस्य रूपं स कल्याणवर्णरूपः, अग्निरन्यो वा कश्चित् । तत्रैव वर्णशब्दस्य निर्वचनप्रसङ्गे वर्णो वृणोतेरित्युक्तम । तत्रैव दुर्गाचार्य्यः—'आवृणोति हि स आश्रयम्, शक्लादिवर्णो हि स्वाश्रय द्रव्यमावृत्त्यैव तिष्ठति' इति नैरुक्तनिर्वचनेन न द्विजादिवर्णसम्बन्धः । 'सन्तुष्यतु' न्यायेन तथाभ्युपगमेऽपि यथा—पङ्कजस्य पङ्कजनिकर्तृत्वेऽपि पद्मे पङ्कज-शब्दो रूढो न यौगिकशक्तया कुमुदादिस्तदर्थस्तथैव प्रकृतेऽपि ज्ञेयम् ।

जीविकावरणात् वर्णत्वाभ्युपगमेऽपि तद्वरणं स्वेच्छया, शास्त्रानुसारेण वा । नाद्यः अनापदि वृत्त्यन्तरग्रहणस्य निषेधात् । शास्त्रेण तु वर्णमुद्दिश्य जीविका विहिता, उद्दिष्टस्य प्राक् सिद्धतैव भवति, न तु जीविकामुद्दिश्य वर्णो विधीयते, येन जीविकावरणाद्वर्णत्वं स्यात् । किञ्च नात्र गुणा वर्णपदव्यपदेश्या येन वरीतुमर्हा गुणा वर्णा भवेयुः, किन्तु ब्राह्मणादि मनुष्या वर्णपदेन व्यपदिश्यन्ते ।

यदुक्तम् "क्षत्रं क्षत्रियकुलम् इन्द्रः परमैश्वर्य्यवान् इदिपरमैश्वर्य्ये' इति स्मरणात् । शत्रूणां क्षयकारणात् युद्धोत्सुकत्वाच्च धर्मदेशप्रजारक्षणतत्पर इन्द्रो भवितुमर्हति । मित्रः वैश्यः सर्वेभ्यो अन्नरसादिसमर्पणेन सुखदाता । वरुणः शूद्रः सेवाकर्मधारणेन श्रेष्ठः । इमावेव मित्रावरुणौ ब्राह्मणस्य क्षत्रियस्य द्वौ बाहू बाहुवदुपकारकौ भवेतामिति, तदपि न युक्तम्, यत इन्द्र-

मित्रवरुणादिपदानि रूढ्या देवताविशेषपराणि। नहि मित्रोऽनैश्वर्य्यवान् न वा इन्द्रो न सुखदाता तथापि नेन्द्रो मित्रो न वा मित्र इन्द्र तत्कस्माद्धेतोः 'रूढिर्योगमपहरती'ति न्यायात्।

## न जातिवर्णस्वरूपभेदः

यदप्युक्तम् 'जाति वर्णस्वरूपयोरस्ति पार्थक्यम्। याज्ञवल्क्यस्मृतिः १।६० ) मिताक्षराटीकायां 'प्रत्यक्षगम्या जातिर्भवति। ब्राह्मणत्वादिवर्णस्तु स्मृतिलक्षणः' इत्यभिहितत्वात्। यथा गोत्वोष्ट्रत्वमनुष्यत्वादयो जातयो निसर्गजा इत्याकृतिग्रहणा भवन्ति, न तथा ब्राह्मणत्वादयो वर्णा निसर्गजा आकृतिग्रहणा भवन्ति। किन्तु समाजस्यैहिकाभ्युदयकार्य्यव्यवहारसौकर्य्यात्माद्युन्नतिसिद्ध्यर्थाः पूर्वगुणकर्मानुसारतः प्राक्कालिकसामाजिकैः परिकल्पिताः। तदेतदैतरेयब्राह्मणेनापि समाम्नायते—'देवविशः कल्पयितव्या इत्याहुः, ताः कल्पमाना अनुमनुष्यविशः कल्पयन्ते, (ऐ० ब्रा० पं०१ अ० २ ख० ३ ) अर्थात् देवेष्वपि तत्तद्गुणकर्मभिः कल्पिता ब्राह्मणादयो वर्णविशेषा अग्निर्बृहस्पतिश्च देवेषु ब्राह्मणौ 'अग्ने महां असि ब्राह्मणः भारत' 'ब्रह्म वै देवानां बृहस्पतिः' इति श्रुतेः। इन्द्र-रुद्र-यम-सोम-प्रभृतयो देवक्षत्रियाः, वसु-मरुत्—विश्वेदेवादयो देववैश्याः। पूषप्रभृतयः शूद्राः कल्पमानास्ताः देवविशोऽनुसृत्य मनुष्यविशः ब्राह्मणादयो मनुजप्रजा अपि तत्तद्गुणकर्मभिः कल्प्यन्ते। अतः वेदस्मृतिपुराणेषु वर्णोत्कर्षापकर्षयोः सिद्धान्त ऐकमत्येन स्वीकृतो दृश्यते। स च कर्मणा वर्णव्यवस्थायामेव संगच्छते। वर्णत्वे जन्मना सिद्धे न स्यात्तत्परिवर्त्तनम्। विना वर्णपरिवृत्तिं तदुत्कर्षो न सिद्ध्यति। नापकर्षश्च तस्मात्सा कर्मणा, नैव जन्मने'ति तत्तुच्छम्। भावानवबोधात्। ब्राह्मणत्वादिजातेर्ब्राह्मणमातापित्रादिज्ञानसहकृतप्रत्यक्षगम्यत्वाभ्युपगमात्। स्मृतिनिर्देशानुसारेण विवाहे सत्येव ब्राह्मणमातापित्रादिजन्यस्य ब्राह्मणत्वं नान्यथेति जन्मना एव ब्राह्मणत्वादिजातेः स्मृतिलक्षणत्वमुक्तम्।

यत्तु—"ऐतरेयश्रुत्या तु देवादिषु कल्पना मया ब्राह्मणादयो भवन्तीति कल्पन्ते इति पदेन सूच्यते इति तत्सायणभाष्यविरुद्धम्। तत्र कल्पन्ते इत्यत्र सम्पद्यन्ते इत्यर्थो बोध्यते। तथाहि—

प्रायणीयेष्टौ काम्यान् प्रयाजप्रकारान् विधाय देवताश्च प्रशस्य तासां देवतानां सम्बन्धिन्यौ याज्यानुवाक्ये क्रमेण अभिसन्धातुं प्रस्तौति मन्त्रः—'देवविशः कल्पयितव्या इत्याहुस्ताः कल्पमाना अनुमनुष्यविशः कल्पन्त इति सर्वा विशः कल्पन्ते, कल्पते यज्ञोऽपि, ( ऐ. ब्रा. १।९ ) इति। अत्र भाष्यम्—"विश इत्ययं शब्दः प्रजामात्रवाची वैश्यजातिविशेषवाची वा। सन्ति हि देवेष्वपि जातिविशेषाः। अग्निर्बृहस्पतिश्च देवेषु ब्राह्मणौ अग्ने महाँ असि ब्राह्मण भारत। ब्रह्म वै देवानां बृहस्पतिः, इति श्रुतेः। क्षत्रियादिजातयस्तु सृष्टिप्रकरणे वाजसनेयिभिः स्पष्टमेवाम्नाताः।

( ऐ० ब्रा० प्रथमपञ्चि० ९ खण्डे )

'तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवता क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान' इति।

'स विशमसृजत यान्येतानि देवजातानि गणश आख्यायते ( न्ते ) वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति।

'तमथ शौद्रं वर्णमसृजत् पूषणम्' इति। एवम् 'आदित्यो वै देवं क्षत्र'मित्यादिकमुदाहार्यम्। एवं सति देवेषु विशो वैश्यजातिरूपाः प्रजामरुदादयो याः सन्ति ता अस्मिन्यागे कल्पयितव्याः सम्पादयितव्या इत्येवं ब्रह्मवादिन आहुः। कल्पमानाः—सम्पन्नास्ता देवविशोऽनुसृत्य मनुष्यविशोऽपि तदनुग्रहात् सम्पद्यन्त इत्येवं दैव्यो मानुष्यश्च सर्वा विशो यजमानस्य सम्पद्यन्ते। तासु सम्पन्नासु द्रव्यलाभात् यज्ञोऽपि कल्पते स्वप्रयोजनसमर्थो भवति।" तथा च काल्पनिकी वर्णव्यस्था इति नोक्तवचनेन सिद्ध्यति।

अत्र कल्पयितव्या इति तव्यप्रत्ययेन विधानं गम्यते। यज्ञः कल्पते इति तत्फलमप्युक्तम्। यज्ञाश्च तेषां तेषां यजमानानां प्रातिस्विका भवन्ति। नहि देवादि-प्रजानां मनुष्यादि-प्रजानां वा विशां वा विद्यमानानामेव कल्पनं संभवति। किञ्च कल्पयितव्या इति चोदनाऽपि व्यक्तिविशेषान् यजमानान् प्रत्येव संभवति। नहि व्यक्तिकल्पनयापि समाजे तत्प्रसिद्ध्यति। वैयक्तिकरूपेण शुक्तौ रूप्यकल्पनायामपि सर्वान्प्रति तदसिद्धेः। नहि यज्ञोऽपि कल्पनामात्रम्। किन्तु क्रियामयो व्यावहारिक एव। अन्यथा व्यावहारिकस्वर्गहेतुत्वमपि तस्य कथं स्यात्? तस्मादत्र प्रजा विशो वा विद्यमाना एव यजमानसम्बन्धित्वेन

कल्पन्ते सम्पद्यन्त इत्येवार्थः। यथा विद्यमाना अपि गावो यजमानसम्बन्धित्वेन सम्पद्यमाना एव पुरुषार्थाः प्रभवन्ति। उत्कर्षापकर्षौ च जातिविपरिवृत्त्यैव भवतः। जातिश्चात्र जन्मैवोच्यते, जन्मान्तरे वर्णान्तरप्राप्त्योत्कर्षापकर्षौ संगच्छेते। जातिश्च न केवलमाकृतिग्रहणैव भवति, महाभाष्यादिभिर्जातिलक्षणभेदाभ्युपगमात्।

'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सवभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह॥'

इति रीत्या सकृदाख्यातनिर्ग्राह्या ब्राह्मणत्वादिजातिः। जातित्वादेव 'जातेरस्त्रीविषयादयोपधात् (४।१।६३) इति पाणिनिसूत्रेण ब्राह्मणात्यत्र ङीष् विधानम्। ब्राह्मोऽजातौ इति रीत्या च जातावेव ब्राह्मणशब्दः सिद्ध्यति, अजातौ तु ब्राह्म इत्येव सिद्ध्यति। तस्माद्वर्णस्याजातित्वसाधनं निष्प्रमाणकमेव। 'वर्णो द्विजादौ इति कोषविरोधाच्च।

एतेन "ब्राह्मण-क्षत्रिय-प्रभृतिशब्दास्तत्तद्गुणकर्मबोधकगुणशब्दाः परिवर्त्तनशीलवर्णवाचका" इत्यपास्तम्, श्रुतिस्मृतिपुराणादिभिः श्रीशङ्कराचैराचार्य्यैश्च ब्राह्मणादिशब्दानां जातिवाचकत्वाभ्युपगमात्।

यदुक्तम् 'पतञ्जलिना सर्वे एते शब्दा गुणसमुदायेषु वर्त्तन्ते, ब्राह्मणः क्षत्रियो वैश्यः शूद्र इति' (अष्टा ५।१।११५) इत्युक्तत्वाद् गुणशब्दा एवैते, तदपि तुच्छम्, इति, महाभाष्याभिप्रायानवबोधात्। तत्र हि गुणविशिष्टजातावेव ब्राह्मणशब्दो मुख्यः। गुणहीने तु जातिमात्रमूलकोऽपि ब्राह्मणशब्दो भवतीति अभिप्रैति महाभाष्यकारः।

तपः श्रुतञ्च योनिश्च त्रयं ब्राह्मणकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥

इति तेन तुल्यमिति (५।१।११५) सूत्रे तद्वचनस्य जागरूकत्वात्।

## गौणब्राह्मणपदप्रयोगः

यदुक्तम् 'यदि ब्राह्मणादिशब्दा जातिवाचका भवयुस्तदा जात्यन्तरे न प्रयुज्येरन्। नह्यश्वशब्दो गवि गोशब्दश्चाश्वे कदाचित्प्रयुज्यते' इति, तदप्यविचारितरमणीयम्। जातिविशेषवाचकस्यापि सिंहशब्दस्य शौर्य्यक्रौर्य्यादिगुणयोगाद्देवदत्तादौ मनुष्येऽपि प्रयुज्यमानत्वात्। तद्वदेव गौण्या वृत्त्या गुणयोगेन शमदमादिगुणयोगिनि शूद्रेऽपि जातिविशेषवाचकस्यापि ब्राह्मणशब्दस्य गौणप्रयोगसंभवात्।

## पशुषु गौणवर्णव्यवस्था

यदुक्तम् 'ब्रह्म वा अजः (श० ब्रा० ६।४।४।१५) 'क्षत्रमश्वः' (१३।२।२।१७) 'वैश्यश्च शूद्रश्च रासभः' (६।४।४।१२) 'ब्रह्म वै पलाशः' (१।३।६।१९) 'क्षत्रं वा एतदोषधीनाम् यद् दूर्वा (ऐ० ब्रा० ८।८) इत्यादिस्थलेषु जात्यन्तरे ब्राह्मणादिप्रयोगदर्शनान्नूनमेते गुणशब्दाः नतु जातिशब्दा' इति, तदपि तुच्छम्। मनुष्येष्विव देवपश्वादिष्वपि वर्णव्यवहारार्थं तत्र ब्राह्मणादिशब्द-प्रयोगे बाधाभावात्।

यदुक्तम् "ब्राह्मणत्वादिवर्णव्यवहारेषु क्वचिज्जातिशब्दप्रयोगस्तयोर-पृथक्त्वभ्रान्त्यैव वेदितव्य" इति, तदपि निरस्तम् वेदितव्यम्। मनुव्यास-शंकराचार्य्यादिभिरपि ब्राह्मणादिषु जातिप्रयोगस्य कृतत्वात्। बृहदारण्यक-भाष्योद्धरणं कृतमिहैवान्यत्र द्रष्टव्यम्। 'जातिब्राह्मण एव सः 'ब्राह्मोऽजातौ' इत्यादिषु च जातावेव ब्राह्मणशब्दप्रयोगश्चानुपदमेव दर्शितः। सूत्रभाष्यादि-विरोधादेव गुणवाचका अप्येते शब्दा जातिविशिष्टगुणेष्वेव वर्तन्ते। अतएव तपःश्रुताभ्यां सार्द्धं योनेरपि ब्राह्मण्यकारकत्वमुक्तम्। तपः श्रुतञ्च योनिश्च एतद् ब्राह्मणकारकम्' इति योन्यभावे गुणमात्रसत्त्वे तु गौणमेव ब्राह्मण्यम् गुणाभावे तु जातिब्राह्मण्यम्, तदुभयसत्त्वे तु मुख्यं ब्राह्मण्यमित्यन्यत्रोक्त-मेव। अतएव गुणानां परिवर्त्तनसंभवेऽपि यावद्देहयोनिपरिवर्त्तनासंभवेन वर्णपरिवर्त्तनमप्यसंभवमेव।

## ज्योतिःशास्त्रानुसारिवर्णव्यवस्था

यदुक्तम्—

> "एकपित्रोः प्रजातानामेकजातिमतां नृणाम्।
> ज्योतिःशास्त्रानुसाराच्च श्रूयते भिन्नवर्णता ॥" इति

तदतीव मौर्ख्यम्, तत्र मूषकमार्जारादिभिन्नयोनित्वस्यापि श्रवणेन मनुष्यस्य मूषकत्वाद्यापत्तेर्दुर्निवारत्वात्। यदि तच्छ्रवणेन गौणमेव मूषक-त्वादिकं तदा भिन्नवर्णत्वेऽपि सैव नीतिः कुतो नावलम्ब्यते? किमर्धजरती-यत्वेन? एतेन पारस्करगृह्यसूत्रभाष्योदाहृतानां कारिकाणामपि भावार्थो व्याख्यातः।

अन्नप्राशनप्रसङ्गे च—

कृतप्राशनमुत्सङ्गाद्धात्री बालं समुत्सृजेत्।
कार्य्यं तस्य परिज्ञानं जीविकाया अनन्तरम्॥
देवताग्रेऽथ विन्यस्य शिल्पभाण्डानि सर्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत्स्पृशेद् बालो रिङ्गमाणः स्वयं तदा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥'

(पा॰ गृ॰ का॰ १ कं १९)

इति कारिका उक्ताः। तादृक्परीक्षया जीविकावृत्तेरेव निर्णयो भवति। जीविकावृत्तिस्तु सम्पदापदादिभेदेन विभिद्यत एव। तत एव न जीविकानिबन्धनो वर्णव्यवहारः, किन्तु जन्मनिबन्धन एव। न वा जीविकैव वर्णफलम् किन्तु तत्तद्वर्णाधिकारिकवेदाध्ययनतदर्थानुष्ठानादिकमेव मुख्यं वर्णफलम्। योनिब्राह्मणादीनामेव संस्कारादिविधानात्। गुणवृत्त्यादिभेदेन तु ब्राह्मणेष्वपि ब्रह्म-देव-मुनि-ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-चण्डालाद्यनेकभेदास्तत्र तत्रोक्ता इह प्रदर्शिताश्च।

यदुक्तम् धर्मचर्य्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते 'जाति परिवृत्तौ' (प्र.२ क. ११ सू. १०-११) इत्यादिसूत्रेण वर्णान्तरप्राप्तिरुक्ते'ति तदतीव मन्दम्, तत्र जातिपरिवृत्ताविति स्पष्टं जन्मान्तरे वर्णान्तरप्राप्तेरुक्तत्वात्, जातिशब्दस्य जनिधातोर्निष्पन्नत्वेन जन्मार्थताया अनायासलभ्यत्वाच्च।

यदुक्तम् "वर्णमापद्यते इति वर्त्तमानक्रियाबोधकवाक्यविरोधाज्जीवतामेव नराणां वर्णान्तरप्राप्ति"रिति, तदपि मन्दम्, जातिपरिवृत्ताविति विरोधेन तत्र लटोऽविवक्षितार्थत्वात्। यथा 'वारिदस्तृप्तिमाप्नोति' ४।२२९ (मनुः) इत्यत्र नहि वारिदानस्य तृप्तिरूपं फलं दानकाल एव लब्धुं शक्यते, यज्ञदानादि फलस्य कालान्तरभावित्वात्, किन्तु कार्य्यकारणभावबोधन एव लटस्तात्पर्य्यं तथैवात्रापि बोध्यम्। 'शरदि पुष्पन्ति सप्तच्छदाः।

'वसन्ते सर्वसस्यानां जायते पत्र शातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः'॥ इति।

वर्षास्वपि वदन्त्येव जनाः। नहि तदानीं तत्क्रियाणां वर्तमानता। तथा

वर्त्तमानकालप्रयोगः क्रियते। न च तत्र वर्तमानता विवक्ष्यते, शरद्वसन्तादि-सम्बन्धबोधन एव वाक्यतात्पर्य्यात्।

एवमेव—

वर्णोत्कर्षमवाप्नोति नरः पुण्येन कर्मणा ॥२॥
उत्कर्षार्थं प्रयतेत नरः पुण्येन कर्मणा।
वर्णेभ्यो हि परिभ्रष्टो न वै सम्मानमर्हति ॥३॥
(म० शा० प० २९१)

इत्यादि महाभारतवचनैरपि जन्मान्तर एव वर्णोत्कर्ष प्राप्तिरुक्ता। तेनैव मतङ्गो महताऽपि तपसा ब्राह्मण्यं नाप्तवान्। निषादेषु वसन् निषादाचारो निषाद्यासक्तोऽपि ब्राह्मणो निषादत्वं नाप्तवान् इति भारतीया कथापीहैवोद्धृता द्रष्टव्या।

पुराणेतिहासवचसां जन्ममूलकवर्णव्यवस्थायामेव तात्पर्य्यम्। तद्विरुद्धानां कर्मणा वर्णबोधकवचनाभासानाञ्च समन्वयोऽन्यत्रैहैवोक्तः।

यदुक्तम् 'भगवता पतञ्जलिना तपसा विश्वामित्रेण न केवलं स्वनिष्ठं ब्राह्मण्यं संपादितमपितु स्वपितुः गाधेः स्वपितामहस्य कुशिकस्य च ब्राह्मण्यं सम्पादितम्। तद्यथा 'विश्वामित्रस्तपस्तेपे नानृषिः स्यामिति तत्र भवानृषिः सम्पन्नः, स पुनस्तपस्तेपे नानृषेः पुत्रः स्यामिति तत्र भगवान्गाधिरप्यृषिः सम्पन्नः, स पुनस्तपस्तेपे नानृषेः पौत्रः स्यामिति तत्र भवान् कुशिकोऽपि ऋषिः सम्पन्नः' (पा० सू० ४।१।१०४) इति तदपि न गुणकर्मादिमूलकवर्णव्यवस्थापोषकम्। तथात्वे तपोविशेषस्यानावश्यकत्वापत्तेः। येन महता तपसा नव्यसृष्टिनिर्माण-सामर्थ्यं लभ्यते। तेन स्वस्य स्वपित्रादेश्च ब्राह्मण्यसम्पादने सामर्थ्यमभ्युप-गम्यत एव। न च तावता यो मूषकस्यापि शरीरपरिवर्त्तनं कर्त्तुं न पारयति तस्यापि ब्राह्मण्यप्राप्तिसामर्थ्यं परिकल्पितुं शक्यम्।

किञ्च यद्यब्राह्मणपुत्रस्यापि ब्राह्मण्यं संभवत्येव तदा किमर्थमतीतानां पित्रादीनां ब्राह्मण्यसंपादने प्रयासः? तत्प्रयत्नेन तु स्पष्टं विज्ञायते यदब्राह्मणस्य कुशिकादेः पौत्रपुत्रादेः ब्राह्मण्यं निन्दितमेवासीत्। तत एव तदपनोदनार्थं तपोविशेषबलेन तेषामपि ब्राह्मण्यादिकं संपादितम्।

शूद्रस्य ब्राह्मण्यलाभवृत्तान्तः ।

यदप्युक्तम् भविष्यपुराणे प्रतिसर्गपर्वणि द्वितीयखण्डे-विक्रमादित्यराज्ये कस्यचिद् द्विजस्य मदाघूर्णितलोचना कामपीडिता पत्नी व्याधवीर्य्येण पुत्रमुत्पादितवती । स च द्वादशवर्षीयो धूर्त्तो व्याधकर्मकरो जातः । स च शुभेन कर्मणा विप्रो जातो विक्रमादित्यस्य यज्ञाचार्य्यश्च सम्पन्नः । तेन धर्मचर्य्यया आपस्तम्बोक्तरीत्या स ब्राह्मणो जात' इति, तदपि तुच्छम् , व्यभिचारजातस्य निन्द्यत्ववर्णनेन वैधविवाहजातस्यैव प्रशस्तत्वावगतेः । अज्ञानेनैव तस्य प्रतिलोमसंकरस्य यद्यपि ब्राह्मणेन पित्रा संस्कारः कृतस्तथापि स निरर्थको जात इत्यपि तत्रैवोक्तम्—

'द्वादशाब्दे गते काले स धूर्तो वेदवर्जितः ।
व्याधकर्मकरो नित्यं व्याधकर्मा ह्यतोऽभवत् ॥'

तथापि तस्य जन्मान्तरीयकर्मयोगेन शिवामन्दिरे देव्याश्चरित्रश्रवणप्रभावेण धर्मबुद्धिर्जाता । ततस्तेन सर्वस्वं ब्राह्मणायार्पितम् । ब्राह्मणाच्च भगवत्या बीजमन्त्रः प्राप्तः । बीजमन्त्रप्रभावेण तदङ्गादुल्वणं पापं कृमिरूपेण निःसृतम् । ततः स निष्पापो जातः । ततोऽक्षरमालां पठित्वा प्रथमचरित्रं जजाप । द्वादशाब्दमिते काले काश्यां गत्वान्नपूर्णां तुष्टाव । भगवती च समागत्य तस्मै ऋग्विद्यां ददौ । ततः स यज्ञाचार्य्यो जातः । एतत्कथयाऽपि ब्राह्मण्यप्राप्तौ महती तपस्या देवानुग्रहश्चापेक्षित इति ज्ञायते । दैवप्रभावेण सत्समागमस्ततो बुद्धिशुद्धिस्ततः सर्वस्वदानं ततो बीजमन्त्रलाभस्तज्जपेन च कृमिरूपेण पापनिर्गमनं, ततो निष्पापता, ततः प्रथमचरित्रपठनपूर्वकजपस्ततो भगवत्या दर्शनम्, ततः ऋग्वेदादिलाभः । अद्यापि यद्येवं देवानुग्रहेण कस्यचिद्वेदलाभः स्यात्तदा तस्य ब्राह्मण्यादिकं श्रद्धातुं तु शक्यमेव । परमद्य सामाजिकाः बौद्धाः भवादृशाः सुधारकास्तु एतादृशं महान्तमायासमन्तरैव गैरिकवस्त्रादिप्रदानमात्रेणैव ब्राह्मणं ब्रह्मविदामाचार्यञ्च सम्पादयितुं प्रवर्त्तन्ते किमेतया कथया तत्समर्थयितुं शक्यते ? तत्रत्यानि वचनानि तु—

एकदा दैवयोगेन शिवामन्दिरमाययौ ।
चौरवृत्तिपरो धूर्त्तः स्त्रिया भूषणमाहरत् ॥
कदाचित्प्राप्तवांस्तत्र द्विजं देवीपरायणम् ।

श्रुतं तत्रादिचरितं तेन शब्दप्रियेण वै ॥
पाठपुण्यप्रभावेण धर्मबुद्धिस्ततोऽभवत् ।
दत्त्वा चौर्य्यधनं सर्वं तस्मै विप्राय पाठिने ॥
शिष्यत्वमगमत्तस्याक्षरमैशं जजाप ह ।
बीजमन्त्रप्रभावेण तदङ्गात्पापमुल्वणम् ॥
निःसृतं कृमिरूपेण पश्चात्तापेन तापितम् ।
त्रिवर्षान्ते च निष्पापो बभूव द्विजसत्तम ॥
पठित्वाक्षरमालाञ्च जजापादिचरित्रकम् ।
द्वादशाब्दमिते काले काश्यां गत्वा तु सद्विजः ॥
अन्नपूर्णां महादेवीं तुष्टाव परया मुदा ।
सुष्वाप तत्र मुदितः स्वप्ने प्रादुरभूच्छिवा ॥
दत्त्वा तस्मै हि ऋग्विद्यां पुनरन्तरधीयत ।
उत्थाय स द्विजः श्रीमान् लब्ध्वा विद्यामनुत्तमाम् ॥
विक्रमादित्यभूपस्य यज्ञाचार्य्यो बभूव ह ।

( भ० पु० प्रतिसर्गे २खं० )

दैवानुकूल्येन समुचितसङ्गे सन्मन्त्रप्राप्तौ भगवत्याः प्रसादविशेषेण ऋग्वेदलाभे को हि तस्य महाभाग्यतायां सन्दिह्येत ? देवानुग्रहादेव शुनी सरमापि मन्त्रद्रष्ट्री सम्पन्ना । वेदानधिकारिण्यो घोषाऽपालादयो योषितोऽपि मन्त्रद्रष्ट्र्यो जाता एव । तथैवास्याधमस्य चण्डालस्यापि देवानुग्रहादृग्वेदप्राप्तिः स्याच्चेत् भवतु वैशिष्ट्यम् ।

वस्तुतस्तु मतङ्गोपाख्यानविरोधादतत्परस्याख्यानस्यार्थवादभूतस्य सप्तशतो माहात्म्यवर्णन एव तात्पर्य्यं, न तु स्वार्थप्रतिपादने, तस्य प्रमाणविरुद्धत्वात् । अर्थवादवचनस्य सप्तशतो स्तुतिपरस्यापि स्वार्थेऽवान्तरं तात्पर्य्यं स्याद्यदि मतङ्गाख्यानविरोधो न स्यात् । तत्र तु मतङ्गेन बहुकालं तपस्तप्तमनेकधा इन्द्रः स्वयं प्रादुर्भूय वरं वरीतुं तं छन्दयामास । तेन तु ब्राह्मण्यं वृतं तथापीन्द्रेण तदशक्यमुक्त्वा तस्यान्ते किमप्यन्यदेव दत्तं न ब्राह्मण्यमिति महाभारतीयाख्यानं प्रसिद्धमेव । पुराणापेक्षयेतिहासस्याभ्यर्हितत्वादपि भारतीयाख्यानेनास्य बाध एव युक्तः, केवलं सप्तशतो स्तुतावेवास्य तात्पर्य्यं बोद्धव्यम् ।

पापीयसः व्याधस्य वृत्तान्तः

यदुक्तम् "एवमेवान्यव्याधकथापि भविष्यपुराणेऽस्ति । यत्कस्यचित्पापकारिणो व्याधस्य विशिष्टब्राह्मणदर्शनेन बुद्धिः शुद्धा । तेनैव कदाचित्तस्य ब्राह्मणस्य व्याधाद्रक्षा कृता । ब्राह्मणश्च प्रसन्नो भूत्वा तमुवाच ।

इदानीं तव पापानि देविकाभिषवेण च । (देविका नदीस्नानेन)
मद्दर्शनेन च चिरं विष्णुनाम श्रुतेन च ।
नष्टानि शुद्धदेहोसि साम्प्रतं नात्र संशयः ।
इदानीं वरमेकं त्वं गृहाण मम सन्निधौ ॥
तपः कुरुष्व साधो त्वं चिरकालं यदिच्छसि ।
इत्येवमृषिणादिष्टो व्याधोऽतप्यत संयतः ।
तपः सिद्धिप्रभावोत्थस्वन्नदानादिसेवया ।
ऋषिं दुर्वाससं सोऽयं कदाचित्समतोषयत् ॥
दुर्वासा च संतुष्टस्तमुवाच.......... ।
उवाच वेदाः साङ्गास्ते सरहस्यपदक्रमाः ।
ब्रह्मविद्या पुराणानि प्रत्यक्षाणि भवन्तु ते ।
एवं प्रादाद्वरं तस्य दुर्वासा नाम चाकरोत् ॥
भवान्सत्यतपाः नाम ऋषिराद्यो भविष्यति ।

( भ० प्रतिसर्ग खं० २ अ० ३२ )

कथमहं व्याधो भूत्वा वेदानध्यापयामीत्येवं तत्प्रश्ने—दुर्वासा उवाच—तपः प्रभावेण ते पापमयं प्राक्शरीरं नष्टमिदानीं तपोमयं शुद्धं वेदादिविद्यासम्पन्नमभिनवं शरीरमुत्पन्नम् ।

'अतस्त्वं शुद्धकायोऽसि सत्यमेतद् ब्रवीमि ते ।'

पुनश्च किं मे द्वे शरीरे स्त इति तत्प्रश्ने मुनिनोक्तम् । एकस्मिन्नेव स्थूलशरीरे वर्त्तमानं सूक्ष्मशरीरं प्राग्ज्ञानवर्जितमधर्मोपचितञ्चासीत् । तदिदानीं तपः प्रभावेण नष्टम् । तत्स्थानेऽत्यन्तधार्मिकं ब्रह्मचर्य्याहिंसाशमदमदयादिव्रतसंयुक्तं शरीरमभिनवं जातमिति । अतस्त्वं तपो वेदादिशास्त्रज्ञानशमदमादिप्रभावेण महान् सत्यतपाः नामाग्रगण्यो यशस्वी ऋषिः सञ्जातोऽसि । एतेन वेदान्तदर्शनस्यापशूद्राधिकरणं समालोचितम् । ऋषीणा-

मौदार्य्यस्य परा काष्ठा च दृश्यत इति" तदपि न गुणकर्ममूलवर्णव्यवस्थापोषकम् । ब्राह्मणरक्षणस्तुतावेवास्याख्यानस्य तात्पर्य्येण मतङ्गाख्यानविरोधेन स्वार्थे तात्पर्य्याभावात् । अवान्तरतात्पर्य्येऽपि तपःसिद्धस्य दुर्वाससो वरप्रभावेण व्याधस्यर्षित्वसम्पत्तेरपवादभूतत्वेनोत्सर्गस्य जन्ममूलकचातुर्वर्ण्यस्याबाध्यत्वात् ।

'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति'

इति रीत्या सिद्धा ऋषयो यथा वदन्ति तथैवार्था भवन्ति । अन्यत्र 'नहि शब्दशतमपि घटं पटयितुमीष्टे' परन्तु सिद्धानां तु शब्दाः नहुषमजगरयितं, मानुषं नन्दिनं तु देवयितुं प्रभवन्त्येव । तथैव ते शब्दाः शूद्रं ब्राह्मणयितुमपि प्रभवन्त्येव । तथा च नायमुत्सर्गः । नाद्यत्वे कश्चित्तादृशः सिद्ध उपलभ्यते यो मूषकं मार्जारयितुं शक्नोति । शूद्रस्य ब्राह्मणत्वसम्पादनन्तु दूरतोऽपास्तम् ।

भविष्यपुराणे प्रतिसर्गपर्वणः प्रक्षिप्तत्वं बहुभिरुपेयते । तत्र विक्टोरिया प्रभृतीनां वर्णनदर्शनात् । चित्रमेतद्यत्सुधारका मन्त्रस्य ब्राह्मणस्य महाभारत-रामायणादिप्रमाणसिद्धजन्ममूलकब्राह्मण्यमनङ्गीकृत्य पुराणीयप्रक्षिप्तांशाश्रयणेनापि स्वसमीहितं साधयितुमीहन्ते ।

## सत्यकामवृत्तान्तः

यदुक्तम् 'छान्दोग्योपनिषदि सत्यकामजाबालोपाख्याने सत्यकामस्य जाबालस्य स्वपितृ-जाति-गोत्रज्ञानरहितस्य सत्यवचनगुणमात्रेण ब्राह्मणत्व-प्रतिपादनमुपलभ्यते । तथाहि गुरुकुलं प्रवेष्टुकामेन जाबालेन किं गोत्रोन्वहमस्मि माता पृष्टा । सा हैनमुवाच नाहमेतद्वेद तात, यद्गोत्रस्त्वमसि, बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे' ( छा० उ० ४।४।२ ) अहमेकाकिनी युवती जीवननिर्वाहाय बहुचरन्ती इतस्ततोऽनेकस्थलं गच्छन्ती परिचारिणी विविधानां जनानामृषीणाञ्च विविधां परिचर्यां सेवां कुर्वाणा सती यौवने यौवनकाले त्वां पुत्रं अलभे लब्धवती । साहं नैव जानामि बहूनां समागमे कस्मात्त्वं संभूतोऽसि ? कस्त्वदीयः पितासीत् ? पितृज्ञानमन्तरा तज्जातिज्ञानं तद्गोत्रज्ञानं च कथं संभवेत् ? अतस्तव पितुर्नामाप्यहं न जानामि । कुतस्तज्जातिः कुतस्तरां तद्गोत्रमप्यहं जानीयाम् ? अतो जाबाल माताहमस्मि त्वन्तु

मदीयः पुत्रः सत्यकामोऽसीत्येतावदहं जानामि। एतदेव स्पष्टतया निर्भयतया च गुरवे वक्तव्यम्। एवं सत्यकामाय मात्रापि निष्कपटं लोकविगर्हितमप्ये-तादृशं निर्भयं सत्यमेव वचः संभाषितम्।

यदि सत्यकामस्य कश्चन पिता जीवितो वा मृतो वा भवेत्तर्हि बृहस्पति-भार्यया तारया प्रबोधितः स्वपुत्रस्य बुधस्य चन्द्रमा पितेव तत्पृथक्तया विज्ञा-पितः स्यात् तन्मात्रा जबालया तदा तत्पार्श्ववर्त्तिभ्यस्तत्सम्बन्धिभ्यो जनेभ्य-तज्जातिगोत्रादिज्ञान सुलभं भवेत्। परन्तु तत्पितुस्तत्पृथक्तया ज्ञानाभावादेव तन्मात्रा स्पष्टतया नाहमेतद्वेद इति सत्यमेवाभिहितम्। तस्य सत्यकाम-जाबालस्य गुरुकुले समागतस्य प्रशस्ताकृतिं दृष्ट्वा स्वपरनिष्ठघृणाजनकमपि तदतिस्पष्टं निर्भयं सत्यवचनं श्रुत्वा हारिद्रुमतो गौतम आचार्यः प्रसन्नः सन्निदमुवाच 'नैतदब्राह्मणो विवक्तुमर्हति। समिधं सोम्याहर उप त्वा नेष्ये। न सत्यादगाः।' (इति छा० ४।४।५) ब्राह्मणाद् भिन्नो विशेषतयाऽतिस्पष्टतया वक्तुं नार्हति। अर्थात् अतिस्पष्टं निर्भयं निरभिमानत्वपोषकं सत्यवचनमेव ब्राह्मणलक्षणम्। तेन लक्षणेन संयुक्तत्वात्। स्वपितृजातिगोत्रज्ञानरहितमपि त्वामहं ब्राह्मणमेव मन्ये न ब्राह्मणभिन्नमिति। अत एव समिधमाहर त्वामह-मुपनेष्ये। यतस्त्वं तस्मात् ब्राह्मणलक्षणान्न अगाः प्रचलितवानसि। परं धर्मं सत्यं रक्षितवानसि। तदुक्तं भारते—

'य एव सत्यान्नापैति स श्रेयो ब्राह्मणस्त्वया।' (म० भा० वनपर्व २८।७)

एतेन सरलस्वभावाः कुलपतय आचार्य्या पुरोवर्त्तिनं विद्यार्थिनं दृष्ट्व-तद्वचनं श्रुत्वा तस्य योग्याधिकारञ्च विनिर्णीय, तस्मै प्रशस्ततत्तद्गुणकर्म-निबन्धनां तां तां तद्योग्यां कक्षां समर्प्य स्वराष्ट्राभ्युदयाय वर्णविभाग व्यवस्थापयामासुः।

अत एव यजुर्वेदस्य काठकसंहितायां ब्राह्मणपरिचयस्य न मातृपितृजन्यत्व-लक्षणं जात्या, अपि तु प्रशस्तविद्यादिगुणत एव कर्त्तव्यत्वप्रतिपादनमित्थमुप-लभ्यते। यथाहि—किं ब्राह्मण पितरं पृच्छसि, किमु भ्रातरं श्रुतं चेदस्मिन वेद्यं हि स पिता स पितामहः॥' (३०।१) अयमर्थः-केनचित् कश्चित् सद्विद्या-दिगुणाढ्यो महर्षिः भवतः कः पिता का च माताऽस्ति तव। पित्रोः किं जातिवै-शिष्ट्यं विद्यते। तदीयं प्रश्नं श्रुत्वा स आह-ब्राह्मणस्य ब्राह्मणत्वाभिव्यञ्जक

तत्तत्प्रशस्तविद्यादिसात्त्विकगुणविशिष्टस्य किं पितरं मातरं वा पृच्छसि ? यः कोप्यस्य शरीरस्योत्पादकः पिता माता वा स्यात् तेन किं तत्कुले शरीरजन्मनो दैवायत्तत्वाद् ।

'दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ।' इति स्मरणात् ।

यद्यस्मिन्शरीरे वेद्यं श्रुतं वेदनीयमभ्यर्हणीयं सद्विद्यादिलक्षणं प्रशस्तं ब्राह्मणत्वप्रयोजकं गुणकर्मादिकं विद्यते । स एव पिता स एव पितामहो वेदितव्य इति तेन स्पष्टमेवोक्तम् ।" तदपि न क्षोदक्षमम्, निष्प्रमाणत्वेन स्वकपोलकल्पितत्वात् । आकृतिं दृष्ट्वा, वचनं श्रुत्वा वर्णनिर्धारणरीतिरासीत्तर्हि किमर्थमाचार्येण गोत्रप्रश्नः कृतः ? गोत्रप्रश्नादेव विज्ञायते । यत् गोत्रादिज्ञानपूर्वकमेवोपनयनादिकं क्रियते स्म इत्युत्सर्गः । प्रकृते गोत्रज्ञानाभावात् तत्स्वभावज्ञानेन ब्राह्मणत्वन्निश्चित्य समिदाहरणायाज्ञप्तमित्यपवाद एव । नैतद्ब्राह्मणो विवक्तुमर्हतीति वचनस्वारस्यात् । नहि सत्यवदनमेव ब्राह्मणस्याव्यभिचारिलक्षणम्, क्षत्रियेषु हरिश्चन्द्रयुधिष्ठिरादिष्वपि तत्सत्त्वदर्शनात् । तुलाधारादि वैश्येषु विदुरादि शूद्रेष्वपि च तद्दर्शनात् । अत एव सत्यं सर्ववर्णसाधारणधर्मेषु परिगणितम् ।

'धृतिः क्षमादयोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥' (म० स्मृ० ६।९२)

अत एव वेश्यापुत्रो जाबालो गुणेन ब्राह्मणत्वमगादित्युच्छृङ्खलोक्तिरपि पराहता । सत्यस्य ब्राह्मणत्वप्रयोजकत्वे तन्मातुरपि ब्राह्मणत्वनिश्चयेन वेश्यात्वासिद्धेः । वस्तुतस्तन्मातुरेव मुख्यं सत्यनिष्ठत्वम् । जाबालस्य त्वबोधबालकस्य मात्रुक्तस्यानुवादकत्वमेव । सप्ताष्टवर्षस्य कस्यचिद्वेश्यापुत्रस्य कोसीति प्रश्ने स्वस्य वेश्यापुत्रत्वकथनं साधारणी वार्ता, नो महत्त्वपूर्णा । सत्यवादित्वेनैव ब्राह्मणत्वे बहूनां वेश्यापुत्राणां ब्राह्मणत्वप्रसक्तेः, तथात्वेऽव्यवस्थैव स्यात् । एवं सत्यनायासेन ब्राह्मणसंख्यावृद्धिः । ब्राह्मणपुत्राणामपि पित्रादिपरिचयदानाशक्त्याऽब्राह्मणत्वापत्तिश्च, न च तथात्वं युज्यते ।

किञ्च गुणकर्मणो ब्राह्मणत्वप्रयोजकत्वे सत्यवदनात्त्वं ब्राह्मण इत्येवं वक्तव्यमासीद् गुरुणा । 'नैतदब्राह्मणो विवक्तुमर्हतीति' एतत्कथनेन जन्मजातब्राह्मणस्यैव जाबालस्य ब्राह्मणत्वं ज्ञातं न त्वारोपितम् । अत्रैव शाङ्कर-

भाष्यम्। नैतद्वचोऽब्राह्मणो विशेषेण वक्तुमर्हत्यार्जवार्थमुक्तम्। ऋजवो हि ब्राह्मणाः, नेतरे, स्वभावतः। अन्यैस्त्वनुष्ठेयतयार्जवमाद्रियते। तस्मान्न सत्याद् ब्रह्मणजातिधर्मादगाः नापेतवानसि अतो ब्राह्मणं त्वामुपनेष्ये।' (शा० भा० छा०) अत्र जातिस्वभावजेन सत्येन ब्राह्मणत्वजातिज्ञानम्, न पुनः सत्येन कर्मणा ब्राह्मणत्वजातेस्तद्वर्णस्य वोत्पत्तिरिति स्पष्टम्। इतरे तु साधनरूपेण सत्यादिधर्ममनुतिष्ठन्ति। न तेषां स्वभावस्तथा शौर्यञ्च क्षत्रियादेर्यथा स्वभावजमन्येषां तु प्रयत्नेन तदर्ज्यते। न केवल जाबालस्य पितुस्तन्मातुरपि तथैवार्जवार्थयुक्तसत्यवचनेन सुतरां विद्यमानमेव ब्राह्मण्यं सिद्धयति। तद्वेश्यात्वकल्पनन्तु निरङ्कुशतुण्डानां परं प्रत्यवायकरमेव।

किञ्च यदि जबाला गणानुरोधेन ब्राह्मणी, तदा तत्पुत्रस्य निर्णीतमेव ब्राह्मणत्वम्, न पुनर्निर्णेतव्यम्। यदि शूद्रा तदा गुणकर्मकृतवर्णव्यवस्थेति सिद्धान्तहानिः। यतस्तत्र छान्दोग्ये सत्यवदनं जबालाया एव मुख्यम्। जाबालस्य तु मातृवचनानुसरणमेव। ततो मुख्यसत्यार्जवादियुक्ताया जबालाया ब्राह्मणभिन्नत्वं तत्पुत्रस्यानवबुद्धस्य मात्रुक्तानुवादकस्य ब्राह्मणत्वमिति स्पष्टं विरुद्धयते। वेश्यापुत्रकथनेन तस्य का हानिरिति बालस्य नावबाधः संभवति। न च तस्य तद्वचनं स्वज्ञानपूर्वकम्। हानिलाभज्ञानवत्याः सत्यवक्त्र्या मातुरब्राह्मणीत्वोक्तिर्विरुद्धैव।

अतएव 'नैतदब्राह्मणो विवक्तुमर्हति' इत्यस्यायमेवार्थो यत् ब्राह्मणपुत्रमन्तराऽन्य एतदार्जवयुक्तं वचनं न वक्तुमर्हति। ब्रह्मणोऽपत्यं ब्राह्मणः। 'ब्राह्मोऽजातौ' (६।४।१७१) पाणिनोयस्मरणेनाजातौ ब्राह्मः, जातौ तु ब्राह्मण इति सिद्धान्तात्। 'अथ हो वाच महाशालं जाबालकम्। औपमन्यव कं त्वं वैश्वानरम्' इति शतपथ-(अ० अ० प्र० ब्रा० १०।६।४।४।६) वचनानुसारेण जाबालस्योपमन्युपुत्रत्वावगमात् उपमन्योश्च व्याघ्रपादपुत्रत्वात् व्याघ्रपादस्य बौधायनकल्पसूत्रे ब्रह्मवंश्यत्वोक्तेः। तस्माज्जाबालस्य जन्मब्राह्मणत्वमेव।

किञ्च परिचारिणीति शब्दस्य न बहुपुरुषगामिनी वेश्या वार्थः। प्रकृतशब्दानां तद्बोधकशक्त्यभावात्। परिपूर्वस्य चरतेः परिचर्य्यार्थत्वात्। तथा च पतिगृहे समागतातिथिपरिचर्यापरायणाऽऽसमिति तदर्थः। निघण्टौ (३।५) परिचरणार्थेषु सपर्यति प्रभृतिधातूनां सन्निवेशात्। तस्माद्-

तिथिपरिचर्य्यापरत्वादेव गोत्रादिप्रश्नस्यावसरो न लब्धः । अद्यापि तादृश्यो बह्व्यः सन्ति स्त्रियो या पतिगोत्रं न जानन्ति । न तावता तासामब्राह्मणीत्व साधयितुं शक्यमतिप्रसङ्गात् । अतएव मनोः स्मृतौ ( १०।५ ) पद्ये मेधातिथिना स्पष्टीकृतम् –'गौतमस्यापि न ततो वचनाद् ब्राह्मणोऽयमित्यवगमः । प्रागेवासौ तं ब्राह्मणं वेद । गोत्रं तु न वेद । गोत्रप्रश्नेन चरणप्रश्नो वेदितव्यः । तत्रोपनयनभेदोऽस्ति । न तु गोत्रभेदेनोपनयने प्रयोजनम् ।' अतएवात्र गोत्रप्रश्नो न वर्णप्रश्नः । ब्रह्मर्षिवंश्यानामेवार्षेयगोत्रस्मृतिर्नान्येषाम् ।

श्रीशङ्करभगवत्पादैरपि जबालायाः पतिगृहागतातिथिपरिचर्य्यापरायणत्वेनैव गोत्रप्रश्नानवकाशादेव तदपरिज्ञानमुक्तम् । तथाहि--कस्मान्न वेत्सीत्युक्ताह–बहुभर्तृगृहे परिचर्य्या जातातिथ्यभ्यागतादिचरन्त्यहं परिचरणशीलैवाहं परिचरणचित्ततया गोत्रादिस्मरणे मम मतिर्नाभूत् । यौवने तत्काले त्वामलभे । 'नैतदब्राह्मणो विवक्तुमर्हति' नैतद्वचोऽब्राह्मणः विशेषेण वक्तुमर्हत्याजवार्थमुक्तम् । ऋजवो हि ब्राह्मणाः नेतरे, स्वभावतः, तस्मान्न सत्याद् ब्राह्मणादिजातिधर्मादगा नापेतवानसि । अतो ब्राह्मणं त्वामुपनेष्ये । अत्र परिचर्य्यया बहुशब्दः सम्बद्ध्यते । तथा च बहुपुरुषसम्बन्धकल्पना हृदयकालुष्यमूलिकैव । शाङ्करभाष्यटीकाकृताऽऽनन्दगिरिणाऽपि च तदनुगुणमेव व्याख्यातम् ।

तथाहि-अतिथ्यभ्यागतावधिकृत्य परिचर्य्याजातं बहुचरन्ती भर्तृगृहे यतोऽहं स्थिता तेन परिचरणचित्ततया गोत्रादीन्नापृच्छम् । यौवने लज्जया प्रथमं पतिं प्रति न प्रश्नः । पुनश्च तस्योपरतत्वाद् दुःखबाहुल्याच्च । एतेन तत् सम्बन्धिनां तत्राभावात्तेभ्योऽपि तज्ज्ञानं न लब्धमित्यपि सम्यग्ज्ञातुं शक्यम् । एतेन गोत्रादिनिर्णयमन्तरोपनयनादि संस्कारो न भवति स्म । गोत्रप्रश्नो द्विजत्वस्थैर्य्यार्थम् । गोत्रज्ञानाभावाच्छूद्रत्वनिश्चयाद् यज्ञोपवीतं न दीयते । अत्र तु गोत्राज्ञानेऽपि ब्राह्मणत्वानुमानादुपनयनं कृतम् । अत एव जाबालस्याज्ञातकुलस्यापि गुणकर्मादिना ब्राह्मण्यनिर्णयत्वोक्तिरपि परास्ता । यतः श्रुतौ गोत्रप्रश्न उक्तो न कुलप्रश्नः । 'न भोजनार्थे स्वे विप्रः कुलगोत्रे निवेदयेदिति मनुवचनानुसारेण कुलगोत्रयोर्भेदो ज्ञायते । विवाहे स्त्रीणां गोत्रं परिवर्तते, न

कुलम्। पितुरसगोत्रा कन्या विवाहार्थे युक्ता कुलगोत्रयोरैक्ये पितुरसमानवर्णा कन्या ग्राह्या भवेत्। तच्च मन्वादिविरुद्धमेव। तत्र सवर्णाया एव ग्राह्यत्वोक्तेः। गुणकर्मादिभिर्वर्णव्यवस्थायां वर्णप्रश्नोऽपि नोपपद्यते, जन्मना तत्त्वे एव तत्प्रश्नावकाशात्। किञ्च कोऽपि पिता भवेत्, कापि माता भवेत् गुणकर्मभ्यामेव ब्राह्मण्ये कुलप्रसूतजारजयोरवैशेष्यापत्तिः स्यात्। तथात्वे जातिसाङ्कर्य्यवर्णसाङ्कर्य्यादिनिन्दावचनानां नैरर्थक्यापत्तेश्च।

जाबालस्य तन्मातुश्च गोत्राज्ञानमेवोक्तम्। नाहमेतद्वेद भो यद्गोत्रोहमस्मि- मात्रापि तदेवोक्तम्, गुरुणापि गोत्रमेव पृष्टम्। किं गोत्रोऽसि, नात्र ब्राह्मणादि कुलस्याप्यज्ञानमुक्तम्। अतिथिसत्कारव्यग्रतया यौवने गोत्रप्रश्नो न कृतः, पश्चात् त्वत्पिता तपस्तप्तुं गतः। अतः गोत्रप्रश्नावकाशो न लब्धः। अन्यथा वेदाध्ययनारम्भात्प्राक् गुणकर्मादिभिरपि कथं ब्राह्मणनिर्णयः स्यात्। नैतद- ब्राह्मणो विवेक्तुमर्हति इति सत्यवदनस्वाभाव्येनैव ब्राह्मण्यं निर्णीतम्। यथाग्नेरौष्ण्यं तथैव ब्राह्मणस्य सत्यवदन स्वभावस्तेनैव ब्राह्मण्यनिर्णयः। नहि सत्यवदनलक्षणकर्मणा ब्राह्मण्यनिर्णयसम्भवः। क्षत्रियादीनामपि सत्यवद- नस्य धर्मत्वात्। परं तेषां सत्यवदने धर्मो न स्वभावः, स्वभावस्तु ब्राह्मणस्यैव। उग्रकष्टसहनमपलायनञ्च योद्धुर्ब्राह्मणस्यापि धर्मः, क्षत्रियस्य तु स्वभावः। यत्र ब्राह्मणमातापित्रादिनिर्णयो न स्यात्तत्र तादृक्स्वभावेन ब्राह्मणनिर्णयो युक्तः।

ऐलूषकवषवृत्तान्तः

ऐलूषकवषस्यापि ब्राह्मणत्वमेव न शूद्रत्वम्, तस्य 'अक्षैर्मादीव्य' इति मन्त्रदर्शनात् प्राक् द्यूतपरायणतासीत्, तस्यैवोक्तमन्त्रद्रष्टृत्वात्। तस्मादेव 'दास्याः पुत्र' इति निन्दार्थवादेन दासीपुत्रत्वोक्तिः। 'आम्नायस्य क्रियार्थत्वे- नानर्थक्यमतदर्थानाम्' 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति रीत्या अर्थवादानां नाक्षरार्थो ग्राह्यो भवति, किन्तु विवक्षितार्थ एव ग्राह्यः, तस्यैव तात्पर्य्यगोचरत्वात्। 'यत्परः शब्दः स शब्दार्थ' इति सिद्धान्तात्। यथा 'प्रजापतिरात्मनो वपामुदखिदत्' इत्यस्य न प्रजापतिकर्तृकवपोत्खेद- बोधने तात्पर्य्यं, तस्य निरर्थकत्वात्, किन्तु वपाहोमस्तुतौ तात्पर्य्यम्। एवं प्रशस्तो वपाहोमो यदर्थमन्यवपाऽलाभे प्रजापतिना स्ववपैव होमार्थमुत्खिन्ना।

वस्तुतस्तु वपोत्खेदेन मृत्यौ निश्चिते वपाहोमो न संभवत्येव। तस्माद्वपो-

त्वेदृघटनाबोधे नार्थवादतात्पर्यं, किन्तु वपाहोममाहात्म्यबोधन एव। तदिति तद्वत्। एतेन "एतरेयब्राह्मणे कवषस्यैलूषस्य शूद्रस्यापि महता तपसा द्विजोत्तमत्वस्य मन्त्रद्रष्टृत्वरूपमहर्षित्वस्य प्राप्तिः। 'ऋषयो हि वै सरस्वत्यां सत्रमासत। ते कवषमैलूषं सोमादनयन्। दास्याः पुत्रः कितवोऽब्राह्मणः कथं नो मध्ये दीक्षीष्टेति'। (ऐ० ब्रा० ८।१) इत्यादिग्रन्थेन समाम्नायते। तदर्थस्तु शूद्रो हि कवषः यज्ञे प्रविश्य दीक्षां गृहीतवान्। तस्य शूद्रत्वं विज्ञाय सावेश-मृषिभिस्तत्रत्यैः स बहिष्कृतः तस्यानधिकारचेष्टायाः कटुफलं विधातुम्। सरस्वत्याः पावनं जलमयं मा पिबतु, किन्तु पिपासयैवायं म्रियतामित्यभि-प्रेत्य निर्जले मरुप्रदेशेऽयं वराकः कवषः तैर्निक्षिप्तोऽभूत्।

तदुक्तं 'तं बहिर्धन्वोऽदवहन् अत्रैनं पिपासा हन्तु। सरस्वत्या उदकं मा पा'दिति (ऐ० ब्रा० ८।१) तं मरुप्रदेशभूमिं प्रति उदवहन् उद्धृतवन्तः बलादपसारितवन्तः। एवं पिपासामारयत्वित्यभिप्रायेण सारस्वत्याः पवित्र-मुदकं मा पिबतु।

तत्र गतोऽयं तीव्रेण तपसानन्यसाधारणेन साधारणविज्ञानशक्तिमवाप। तया किल 'अपां न पा'दित्यादि ऋग्वेदीयसूक्तसमूहस्य तत्रावस्थितविविध-मन्त्राणाञ्चायं द्रष्टा भूत्वा प्रमुखो महर्षिरभवत्। ततो भूयोपि महर्षिभि-रभ्यर्हणीयतामापेदे। तस्य इलूष पुत्रस्य कवषस्य तपः सामर्थ्येन संजाते विशुद्ध एकाग्रे हृदये स्वयं प्रतिभातमन्त्रप्रार्थनाप्रभावात् प्राक् कुरुक्षेत्रे प्रवहणशीला सरस्वती नदी मरुप्रदेशेऽपि दर्शनीयरूपा प्रवाहिताभूत्। सरस्वती समन्तात् पर्य्यधावत्। (ऐ० ब्रा० ८।१) तेन जप्तेन सूक्तेन सरस्वती नदी तं कवषं मरुप्रदेशेऽवस्थितं पिपासाव्याकुलं पर्य्यधावत्। 'अपांनपान्मधुमती-रपोदा।' (ऋ० सं० १०।३०।४) इत्यादि मन्त्रे तन्माहात्म्यं स्फुटम्। हे अपां न पात्! (अब्देवताकं त्रैष्टुभमिदं तेनाप एवात्र स्तूयन्ते) स त्वं मधुमतीर्मा-धुर्य्यगुणयुक्ता अपो दाः देहि 'याभिः सोमो मोदते हर्षते च। कल्याणीभि-र्युवतिभिर्नमर्यः (ऋ० सं० १०।३०।५) याभिः सोमो देवो मोदते हर्षते च। यथामर्य्यः कल्याणीभिर्युवतिभिः मोदते तद्वत्। 'प्रास्मै हिनोत मधुमन्त भूर्मिगर्भो यो वः सिन्धवो मध्व उत्सः। (ऋ० सं० १०।३०।८) हे सिन्धवः स्यन्दनशीलाः आपः वः युष्माकं मध्वः मधुररसस्य गर्भः सारभूतः उत्सः

प्रस्रवणः। तं मधुमन्तं ऊर्मिं अप्संघातं अस्मै यज्ञस्याधिष्ठात्रे इन्द्राय प्राहिणोत प्रगमयत। 'आग्मन्नाप उशतीर्बर्हिरेदंन्यध्वरे असदन् देवयन्तीः।' (ऋ० सं० १०।३०।१५) उशती उशत्यः आपः सारस्वतानि जन्यानि इदं बर्हिर्वेदिस्तरणं अस्मिद् यज्ञं प्रति आगमन् आगच्छत्। अस्मद् यज्ञे देवयन्तोर्देवान् कामयमानास्तर्पयितुमिच्छन्त्यः,। नि असदन् निवासं चक्रुः।

'तस्माद्धाप्ये तर्हि परिसारकमित्या वक्षते।
यदेन सरस्वती समन्तं परिससार॥' (ऐ० ब्रा० ८।१)

यस्मिन्स्थाने सरस्वती एनं कवषं परिससार तत्स्थानमेतर्हि अपि तीर्थविशेषज्ञाः परिसारकमिति नाम्ना व्यवहरन्ति। एवं कवषस्य प्रत्यक्षं सामर्थ्यं सरस्वती समानयनलक्षणं मन्त्रद्रष्टृत्वलक्षणञ्च ज्ञात्वा सर्वेऽपि महर्षयस्तं धन्य धन्यमभिधाय विश्वामित्रादिवत् तस्मै ब्रह्मर्षिपदवीं समर्पयामासुः। अनया गाथया स्पष्टमेव गम्यते यत्पूर्वमुत्तमगुणकर्माणि समवाप्याधमत्वं विहाय विशिष्टसामर्थ्यशाली भूत्वा सर्वोत्तमः पूज्यश्चाभवत्।" इत्यपि समाहितम्।

ऐलूषकवषस्य देवतानुग्रहेण मन्त्रद्रष्टृत्व, महर्षित्वं, महर्षिसमादरणीयत्वादिकञ्च सम्पन्नं नास्त्यत्र विवादः। स शूद्र आसीद् गुणकर्मभिस्तस्य ब्राह्मणत्वादिकं सम्पन्नमित्यत्र तु न किञ्चिदपि मानम्। ब्राह्मणोप्युत्तमगुणकर्माभावान्निन्द्यो भवति। तत्सद्भावाच्च पूज्यो भवतीत्यत्रापि नास्ति विवादः। शूद्रोऽपि समोचीनगुणकर्मसद्भावादादरं लभते। परं शूद्रो गुणकर्मभिर्ब्राह्मणो भवतीत्यत्र प्रदर्शितमन्त्रेषु नैकमपि वचनं पदं वा प्रमाणम्। 'दास्याः पुत्रोः कितवोऽब्राह्मणः इत्येवमादयः शब्दास्तु तस्य द्यूतादिपरायणत्वेन ब्राह्मणस्यैव सतोऽपि निन्दार्थवादगतत्वेन निंदा सूचका एव। 'दास्याः पुत्रः' इति 'षष्ठ्या आक्रोशे' (पा० सू० ६।३।२१) इत्याक्रोशसूचनार्थमेवालुक समासः। अब्राह्मण इत्यपि शब्दोऽप्रशस्तब्राह्मणबोधक एव न शूद्रबोधकः।

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता॥

इति रीत्या नञोऽत्राप्राशस्त्यबोधकत्वेन दोषाभावात्। विरोधान्यत्वाद्यर्थकत्वेऽपि न शूद्रस्तदर्थः क्षत्रियादीनामपि तदन्यत्वादिना बोधसंभवात्।

अत एव सदाचारादिभिः कवषस्य ब्राह्मण्यं जातमित्यपास्तम् । तावताल्प-कालेन सदाचारादिभिर्ब्राह्मण्यलाभमन्त्रदर्शनाद्यसंभवात् । तथात्वेऽन्येषामपि तत्संभवापत्तेः । तस्माज्जन्मान्तरीयपुण्यप्रभावात् प्राप्तदेवता प्रसादादेव मन्त्रदर्शनादिकं मन्तव्यम् । अत एव 'विदुर्वा इमं देवा उप इमं ह्वयामहा' ( ऐ० ब्रा० ८।१ ) इति श्रुतिर्वदति ।

सायणभाष्यानुसारि ब्राह्मणप्रघट्टकार्थस्त्वित्थम्—

'ऋषयो वै सरस्वत्यां सत्रमासत । ते कवषमैलूषं सोमादनयन् । दास्याः पुत्रः कितोऽब्राह्मणः कथं नो मध्येऽदीक्षिष्टेति । तं बहिर्धन्वोऽदवहन्नत्रैनं पिपासा हन्तु । सरस्वत्या उदकं मा पादिति स बहिर्धन्वोद्वहलः पिपासया वित्त एतद्-पोनप्त्रीयमपश्यत् । प्रदेवत्रा ब्रह्मणे गातुरेत्विति । तेनापां प्रियं धामोपागच्छत्, तमापोऽनूदायस्तं सरस्वती समन्तं पर्य्यधावत् ।'

( ऐ० ब्रा० ८ अ० १ ख० )

ऋषयः सरस्वत्यां सत्रमासत तदानीं तेषां मध्ये कश्चिदिलूषाख्यस्य पुरुषस्य पुत्रः कवषनामकोऽवस्थितोभूत् । ते तं कवषं सोमयागान्निःसारितवन्तः । तेषामभिप्राय उच्यते । दास्याः पुत्र इत्युक्तिरधिक्षेपार्था कितवो द्यूतकारस्तस्मादब्राह्मणोऽयं ईदृशो नोऽस्माकं शिष्टानां मध्ये स्थित्वा कथं दीक्षां कृतवानिति तेषामभिप्रायः । तं सरस्वतीतीराद्दूरे धन्वजलरहितां भूमिं प्रत्युद्वहन् बलादपसारितवन्तः । यथा एनं कवषं पिपासा मारयतु, नद्याः पवित्रमुदकमयं पापिष्ठो मा पिबतु । स तत्र तं दिशं प्रति उत्कर्षेणापसारितः पिपासया वित्तो लब्ध आक्रान्तस्तत्परिहारार्थमेतत्प्रदेवत्रेत्यादिकमपोनप्तृदेवताकं सूक्तं वेदमध्ये विचार्य्यापश्यत् । तेन सूक्तेन जप्तेनापां जलाभिमानिनीनां देवतानां प्रियं स्थानमुपागच्छत् । तत्रागतमापो देवताः अनूदायन् अनुग्रहेणोत्कर्षो यथा भवति तथा प्राप्तवत्यः । ततः सरस्वती नदी तं पर्य्यधावत् प्रवाहवेगेन प्रवृत्तासीत् । 'तस्माद्धाप्येतर्हि परिचारकमित्याचक्षते । यदेनं सरस्वती समन्तं परिससार ।' ( ऐ० ब्रा० ८।१ ) 'ते वा ऋषयोऽब्रुवन् विदुर्वा इमं देवा उपेमं ह्वयामहा इति । तथेति तमुपाह्वयन्ततमुपहूयैतदपो न प्रीयमकुर्वत । प्रदेवत्रा ब्रह्मणे गातुरेत्विति । तेनापां प्रियं धामो गच्छन्नुपदेवानाम् । ( ऐ० ब्रा० ) ते भृग्वादयः परस्परमिदमब्रुवन् । इमं कवषं देवाः सर्वेऽपि

जानन्त्येवातोऽस्य कितवत्वादि दोषो नास्ति । तस्मादिममस्मत्समीपं प्रत्याह्वयाय इति विचार्य तमुपहूय तेन इष्टमेतदपोनप्तृदेवताकं सूक्तमकुर्वन् प्रयुक्तवन्तः । तेन सूक्तेन जलदेवतानामन्यदेवतानाञ्च प्रियं स्थानमुपागच्छन् ।

वाचा विरूपनित्यया' (ऋ० सं० ८।७५।६ इति मन्त्रेण वेद लक्षणाया वाचो नित्यत्वमाम्नातम् । 'औत्पत्तिकस्तु' इति ( १।१।५ ) जैमिनिसूत्रानुसारेण शब्दार्थयोरौत्पत्तिकत्वेन नित्यत्वमेवोक्तम् । तथा च वसिष्ठविश्वमित्रादिवदनादिप्रसिद्धोऽयं कवषो महर्षिः प्रतिकल्पं तदाविर्भावबोधिकाख्यायिकापि नित्यवेदान्तर्गतत्वान्नित्यैव । तत एव 'इमं देवा विदुः' इति कथनं संगच्छते । नहि कश्चित्साधारणो ब्राह्मणो वा शूद्रो वा तथा तिरस्कृतो मरुप्रदेशे प्रक्षिप्तः पूर्वं विरुद्धाचारोऽपि कतिभिः क्षणैर्दिवसैर्वानुष्ठितैस्तपोभिः सदाचारैर्वा ब्राह्मण्यं मन्त्रदर्शनं वा प्राप्तुं शक्नोति । न वा 'तं देवा जानन्तीति महर्षीणामवगमः सम्भवति । तस्मान्नानेन कवषस्य शूद्रत्वम , न वा तपसा तस्य ब्राह्मण्यप्राप्तिर्नवा तद्दृष्टान्तेनान्येषामपि तपसा ब्राह्मण्यप्राप्तिः साधयितुं शक्या ।

किञ्चैवमैलूषकथाया ऐतिहासिकत्वेन तद्दृष्टसूक्तानामप्यैतिहासिकत्वे ततः प्राक् तेषामभावापत्त्यानादित्वाभावेन सादित्वेनानित्यत्वापत्तिश्च । शूद्रभ्रान्त्या तद्बहिष्कारेण त्वद्रीत्या वेदकालेऽपि शूद्रैः सह भेदव्यवहारेण तस्य वैदिकत्वेन तद्विपरीतव्यवहारस्यावैदिकत्वमेव सिद्ध्यति ।

कैश्चित्तु सरस्वत्या उदकं मा पादिति विद्याध्ययननिषेधः परिकल्पते । तत्त प्रकरणादिविरुद्धत्वात्कपोलकल्पितमेव ।

दास्याः पुत्रः' 'अब्राह्मण' इत्यादयः शब्दाः ऋषिभिर्द्यूतव्यसनिनः कितवस्य कवषस्य निन्दार्थमेव प्रयुक्ताः । अतएव सायणेनोक्तम्—दास्याः पुत्र इत्युक्तिरधिक्षेपार्था । नहि तस्य वस्तुतः शूद्रत्वेऽधिक्षेपार्थता संभवति, तस्य सत्यत्वेन तादृगुक्तेरपमानजनकत्वाभावात् । नहि दासीपुत्रः तथोक्तः सन्नात्मनोऽवमानं मनुते । गुणेषु दोषारोपणमसूया । अर्थात् दोषेषु गुणारोपणमप्यसूया । गुणेषु गुणारोपणं, दोषेषु दोषारोपणञ्च स्तुतिः ।'' ( स० प्र० ४ समुल्लासे ) इति रीत्याऽपि शूद्रस्य शूद्रत्वोक्तिः स्तुतिरेव नाधिक्षेपः । 'नादिन्याक्रोशे पुत्रस्य' ( पा० सू० ८।४।४८ ) इति सूत्रेण पुत्रादिनी त्वमसि पापे इति प्रयोगेऽसत्यत्वेनाक्रोशवशादेव पुत्र शब्दस्य द्वित्वं निषिद्धम् ।

पुत्रादिनी सर्पिणीत्यत्र सत्यत्वेनाक्रोशाभावाद्द्वित्वं भवत्येव । एवमेव दासीपुत्रस्य दासीपुत्रत्वोक्तिर्नाधिक्षेपार्था संभवति सत्यत्वात् । एवमेवाब्राह्मणस्याब्राह्मणत्वोक्तिरपि । ब्राह्मणस्य दासीपुत्रस्यैव तथोक्तिरधिक्षेपार्था संभवति, मिथ्यात्वात् । 'षष्ठ्या आक्रोशे' ( पा० सू० ६।३।२२ ) इतिसूत्रस्थाक्रोशपदानुवृत्त्या 'पुत्रेऽन्यतरस्या' मिति सूत्रेणाक्रोशार्थे एव पुत्रशब्दे विकल्पेनाऽलुक् समासो भवतीत्युक्तम् । तदुदाहरणम् दास्याः पुत्रः, दासीपुत्रः इति । अतत्त्ववचनमेवाक्रोशः । तत्त्ववचने तु समासेऽलुक्समासता सर्वथा न भवति । व्यस्तता कामं भवति । तेन श्रुतौ दास्याः पुत्र इति समासयुक एव शब्द आक्रोशबोधकः । अतः कवषः शूद्रापुत्रो न सिद्ध्यति । किन्तु ब्राह्मण एव सन् द्यूतव्यसनित्वात् दास्याः पुत्र इति शब्देन निन्दितः । यथा व्याकरणज्ञानमन्तरा 'नताद् ब्राह्मणम्' इत्यत्र 'सुपां सुलुक्पूर्वसवर्णाच्' ( पा० ७।१।३९ ) सूत्रानुसारेण नतादिति द्वितीयान्तमपि पञ्चम्यन्तं बुद्ध्यते । यथा 'देवानांप्रिय' इति अलुक्समासान्तशब्दस्य विदुषांप्रिय इत्यर्थोऽवगम्यते, तथैव दास्याः पुत्र इत्यलुक् समासान्तशब्दो निन्दितब्राह्मणरूपोऽशूद्रार्थकोऽप्यनभिज्ञैः शूद्रार्थको गृह्यते ।

कालिदासप्रणीतेऽभिज्ञानशाकुन्तले द्वितीयाङ्के विदूषकेन सेनापतये 'दास्याः पुत्र' इति शब्दः प्रयुक्तः । 'गच्छ भो दास्याः पुत्र ? ध्वंसितस्ते उत्साहवृत्तान्तः । न चात्र सेनापतिः शूद्र एवेति वक्तुं युक्तम् । तस्य संस्कृतभाषित्वेन नाटकरीत्याऽशूद्रत्वनिश्चयात् । शूद्रस्य प्राकृतभाषित्वमेवेति नाटकरीतिः । तस्मादनादिकालादेव गालिप्रदान एव 'दास्याः पुत्र' इति शब्दः प्रयुज्यते । मृच्छकटिके च प्रथमाङ्के विदूषकेन 'एते खलु दास्याः पुत्राः अर्थाः' इति धनाय दास्याः पुत्र इतिशब्दः प्रयुक्तः । नह्यर्थस्य शूद्रत्वं संभवति । तत्रैव नाटके तृतीयाङ्के 'किमत्र उज्जयिन्यां कोपि चौरो नास्ति, य एतद् दास्याः पुत्रम् सुवर्णभाण्डं नापहरति ।' अत्र तत्पात्ररक्षापरित्रस्तोऽधिचिक्षेपिषुरेव विदूषको वक्ति । पञ्चमाङ्के दुर्दिनमपि दास्याः पुत्रशब्देनाधिक्षिप्तम् । शाकुन्तलस्य द्वितीयाङ्केऽपि विदूषकेन 'त्वं तावद् दास्याः पुत्रोटवीतोऽटवीमाहिण्डमानो यावत् नरनासिकालोलुपस्य कस्यापि जीर्णर्क्षस्य मुखे निपतितो भव' इति सेनापतिरधिक्षिप्तः । षष्ठेऽङ्के 'ही ही भोः एष दास्याः पुत्रः कुसुमरसपाटच्चरो दुष्टमधुकरस्तत्रभ-

वत्याः वदनकमलमभिलषति' इति भ्रमरोऽपि' तेनैव शब्देनाधिक्षिप्तः। न च मधुपस्य वस्तुतः शूद्रत्वं संभवति। मृच्छकटिकनिर्माता शूद्रकः भगवद्दत्त लिखितभारतवर्षीयबृहदितिहासपुस्तकानुसारेण कलिसंवत् २६४५ वर्षे-ख्रिस्तीयसंवत्सरात् पूर्वं ४५५ वर्षे आसीत्। तस्मिन्नाटके प्रथमेऽङ्के 'आः दास्या पुत्र जूर्णवृद्ध' इति सूत्रधारेण जूर्णवृद्धेति ब्राह्मणः संबोधितः। यद्येतेषु प्रयोगेषु दास्याः पुत्रशब्देन शूद्रो न गृह्यते, तर्हि श्रुतौ दास्याः पुत्र-शब्देन कवषः शूद्र इतिकथं निर्धारयितुं शक्यः?।

यथा श्रीदयानन्देन पोप-गवगण्ड-कजर-चाण्डालवर्णोत्पन्न-आदिसम्बोधनैर्वञ्चकाः भर्त्सितास्तथैव ऋषिभिरपि द्यूतव्यसनी कवषोऽपि भर्त्सितः। यथा पूर्वोक्तैः शब्दैरधिक्षेप एव विवक्षितस्तथैव प्रकृतेऽपि बोध्यम्। यथा वा 'अविद्यायामन्तरे वर्तमाना स्वयं धीरा पण्डितंमन्यमानाः। दन्द्रम्यमाणाः परियान्ति मूढा अन्धेनैव नीयमाना यथान्धाः' ( मुण्डक० १।२।८ ) यथा वा 'असुतृप उक्थशासश्चरन्ति ( ऋ० सं० १०।८२।७ ) इति च मन्त्रेऽपि कर्मठा आक्रुष्टास्तथैव ऐतरेयब्राह्मणे ऋषिः कवषः दास्याः पुत्र इत्यादि शब्दैराक्रुष्टः। यथा वा कुत्सशत्रुः 'निमायावान् ब्रह्मादस्युरर्त्त' ( ऋ० सं० ४।१६।६ ) इतिमन्त्रे अब्रह्मादिशब्दैरधिक्षिप्तस्तथैव कवषोऽपि तादृशैः शब्दैरधिक्षिप्तः। यथा मन्त्रे 'मायावान्' तथैव ब्राह्मणे कितवः, मन्त्रे यथा 'अब्रह्मा' तथैव ब्राह्मणे 'अब्राह्मणः' यथामन्त्रे 'दस्यु'स्तथा ब्राह्मणे दास्याः पुत्रः'। ब्रह्मब्राह्मणशब्दौ समानार्थकौ। "समानार्थावेतौ ब्रह्मनशब्दो ब्राह्मणशब्दश्च। अतश्च समानार्थयोरेकेन विग्रहः।" (५।४।१।७) मन्त्रे अब्रह्मा शब्दो शूद्रार्थबोधकः। 'वेदोक्तकर्मस्वास्तिक्य रहितः' इति सायणेन तदर्थकरणात्। दस्युशब्दस्य शत्रुरर्थः कृतः। 'स्त्रियं दृष्ट्वाय कितवं' ( ऋ० सं० १०।३४।११ )।

मन्त्रे गालिप्रदानार्थमेव द्यूतव्यसनो कितवो वृषलशब्देनोक्तः। अतएव सायणेन वृषल इत्यस्य वृषलकर्मा इत्यर्थः कृतः। किञ्च यावत्पर्यन्तं कवषस्य पित्रोश्शूद्रत्वं प्रमाणैर्न सिद्ध्येत् तावदन्यपरैरधिक्षेपार्थैः शब्दैस्तस्य शूद्रत्वं न सिद्ध्यत्येव। कितवशब्दसान्निध्येन अब्राह्मणशब्दोऽपि अप्रशस्तब्राह्मण-बोधकः नतु ब्राह्मणभिन्नपरः। यथा 'अपशवो वा अन्ये गो अश्वेभ्यः' अत्र अपशुशब्दो न पशुभिन्नपरः, किन्त्वप्रशस्तपशुपर एव। गोऽश्वादिभिन्न

महिषादीनां पशुभिन्नत्वाभावात्। यथा वा 'दस्युः' 'अमानुषः' (ऋ० सं० १०।२२।८) मन्त्रे दस्युरमानुषः उक्तः। तत्राप्यप्रशस्तमनुष्य एवार्थः। न मनुष्यभिन्नत्वमर्थः। प्रत्यक्षविरुद्धत्वात्।

अतएव सायणेन मनुष्यसंव्यवहाराद् बाह्यः, असुरप्रकृतिः इत्युक्तम्। तथैवात्रापि ब्राह्मणसंव्यवहाराद् बाह्यः अब्राह्मण उक्तः, अब्राह्मणप्रकृतिर्ग्राह्यो द्यूतस्य तदप्रकृतित्वात्।

किञ्च दास्याः पुत्र-शब्देन कवषस्य शूद्रत्वे सिद्धेऽब्राह्मणशब्द-प्रयोगो व्यर्थ एव स्यात्। शूद्रस्याब्राह्मणत्वे संशयाभावात्। अब्राह्मणशब्देन तु क्षत्रिय-वैश्ययोरपि ग्रहणसंभवः। शूद्रपुत्रत्वे तु सिद्धेऽब्राह्मण-शब्दप्रयोगः सर्वथा व्यर्थ एव स्यात्। तस्मात्सर्वे चैते शब्दाः निन्दार्था एव, न कवषस्य शूद्रत्व-बोधनपराः। तेनाप्रशस्तोऽयं ब्राह्मणः कथमनेन दीक्षा गृहीता इत्येव ऋषीणां तात्पर्यमासीत्। षट्सु नञर्थेषु-अप्राशस्त्यस्यापि गणितत्वात्। तत्सदृशः-अब्राह्मणः, अभावः-अपापम्, तद्भिन्नः-अनश्वः, अल्पः-अनुदरा कन्या, अप्रशस्तः-अपशवो वा अन्ये गोऽश्वेभ्यः, विरुद्धः अधर्मः, यथा प्रशस्तपशुगोऽश्वाद्यपेक्षया महिषादयोऽपशवः अप्रशस्त पशव एव, तथैव द्यूतव्यसनित्वात् कवषः प्रशस्तब्राह्मणापेक्षया अप्रशस्तब्राह्मण इति हेतोरब्राह्मण उक्तः।

अतएव नञ् (पा०२।२।६) सूत्रे महाभाष्ये गुणहीनब्राह्मणोदाहरणेऽब्राह्मणशब्दः प्रयुक्तः। 'अब्राह्मणोऽयं यस्तिष्ठन्मूत्रयति······यस्तिष्ठन् भक्षयति 'तपः श्रुतयोरभावात् निन्दयात्र अब्राह्मणशब्दप्रयोगः। तत्र जातिमात्रेऽवयवे समुदाय-रूपारोपात् ब्राह्मणशब्दप्रयोगः। नञा तु स्वाभाविकी तपः श्रुतनिवृत्तिर्द्योत्यत इति कैयटः। तपः श्रुतयोनिसमुदाये ब्राह्मणशब्दस्य मुख्यत्वात्। तदवयवे जातिमात्रे तदभावात्। समुदायारोपात्। अब्राह्मणशब्दे नञा तन्निवृत्तिर्द्योत्यते। नहि यो ब्राह्मणस्तिष्ठन् मूत्रयति स ब्राह्मणभिन्नो भवति। तस्मादैतरेयकण्डिकास्थेनाब्राह्मणशब्देनैव कवषस्य ब्राह्मणत्वं सिद्ध्यति। यद्यत्र अब्राह्मणशब्दो न स्यात्तदा ब्राह्मणत्वनिर्णयासंभव एव स्यात्। 'दास्याः पुत्र' शब्देन समभिव्याहृतेनाब्राह्मणशब्देन तु पूर्वोक्तरीत्या अप्रशस्तब्राह्मणत्वं स्पष्टं निर्णीयते। अब्राह्मणशब्देन गालिदानं ब्राह्मणस्यैव भवति, नान्यस्य। अन्यथा दास्याः पुत्र-शब्देनैव तस्याब्राह्मणत्वप्रतीतौ पुनरब्राह्मणत्वोक्तिरपार्थैव स्यात्। अतएव साय-

णेनोक्तं कितवो द्यूतकारः तस्मादब्राह्मणोऽयमीदृशो (द्यूतदेवनव्यसनी) नोऽस्माकं शिष्टानां मध्ये स्थित्वा कथं दीक्षां कृतवान् इति तेषामभिप्रायः। न दासीपुत्रत्वेन ब्राह्मण उक्तः, किन्तु कितवत्वेन। अब्राह्मशब्दोऽतस्तस्याप्रशस्तत्व एव पर्य्यवस्यति। तदभावेऽपि निन्दार्थं तच्छब्दप्रयोगः। 'पुंयोगादाख्यायाम्' (४।१।४८) इति पणिनिसूत्रे महाभाष्ये चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति। तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात् च। तत्र तात्स्थ्यात् मञ्चाः हसन्ति, गिरिर्दह्यते। ताद्धर्म्यात्—जटिनं यान्तं ब्रह्मदत्त इत्याह। ब्रह्मदत्ते यानि कार्य्याणि जटिन्यपि तानि क्रियन्ते इत्यतो जटी-ब्रह्मदत्त उच्यते। तत्सामीप्यात्—गङ्गायां घोषः, कूपे गर्गकुलम्। तत्साहचर्यात्—कुन्तान् प्रवेशय, यष्टीः प्रवेशय इति।

अत्र कैय्यटेनोक्तम्—'आरोप्यते ताद्रूप्यम्, नतु मुख्यमित्यर्थः। बालेषु मञ्चत्वारोपात् मञ्चशब्दप्रवृत्तिः; हसन्तीति पदान्तरयोगात् विज्ञायते। प्रकृतेऽपि तथैव कितवशब्दयोगात्कवषेऽब्राह्मणशब्दप्रयोगः। आरोपाद्भवति। ब्रह्मदत्तवद्धर्मलाभाज्जटिनि तद्रूपारोपः। सिंहो माणवको गौर्वाहीक इत्यादावपि ताद्धर्म्यात्ताद्रूप्यारोपात्तच्छब्दप्रवृत्तिः। तदुक्तं हरिणा—

'गोत्वानुषङ्गो वाहीके निमित्तात्कैश्चिदिष्यते।
अर्थमात्रविपर्यस्तशब्दः स्वार्थव्यवस्थितः।' वाक्यपदीये।

यथा हसन्ति पदयोगात् मञ्चस्थितबालके मञ्चशब्दप्रयोगः, तथैव 'कितवोऽब्राह्मणः' इत्यत्र कितवशब्दयोगात् निन्दार्थमब्राह्मणशब्दप्रयोगः।

न्यायदर्शने (२।२।६२) इति सूत्रावतरणिकायां वात्स्यायनेनोक्तम्—'निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु, सूत्रानुसारेण सहचरण १ स्थान २ तादर्थ्य ३ वृत्त ४ ब्राह्मण १ मञ्च २ कट ३ राज ४ पुरुषेषु अतद्भावेऽपि तदुपचारः। उदाहरणानि च तत्र भाष्ये द्रष्टव्यानि।... वृत्ताद् यमो राजा, कुबेरो राजा इति वस्तुतो राज्ञो यमत्व-कुबेरत्वाभावेऽपि वृत्तात् आचरणात्तद्वत्त्वं व्यवह्रियते, तथैव कवषेऽपि द्यूतव्यसनित्वेन वृत्तादब्राह्मणत्वम्।

अथवा ब्रह्मवेदस्तज्ज्ञानाद् ब्राह्मणस्तद्भिन्नो अब्राह्मण इति वेदानभिज्ञः कवष इति अब्राह्मणः, 'अक्षैर्मा दीव्य' (ऋ० सं० १०।३४।१३) इति वेद

मन्त्रमपि न जानाति। तेनाब्राह्मण उक्तः। इदानीं यावत्सूक्तस्यादर्शनात् स कितव शब्देन संबोधितः। तेनैव लक्षणया परिभाषया यौगिकवृत्त्या वा अब्राह्मण उक्तः।

अतएव वीरमित्रोदये उपनयनप्रकरणे उपनेयनिर्णयप्रसङ्गे ३६२ पृष्ठे 'दास्याः पुत्रः कितवोऽब्राह्मण इति आक्षेपमात्रम्, नतु वस्तुगत्यैव तन्मातुर्दासीत्वम्' इति भाष्यव्याख्यानात्। अतएव दास्याः पुत्र इत्युक्तिरधिक्षेपार्था। कितवो द्यूतकारस्तस्माद् अब्राह्मणोऽयम् (अप्रशस्तब्राह्मणोयम्) ईदृशो नः अस्माकं शिष्टानां मध्ये कथं दीक्षां कृतवान् इति तेषामभिप्रायः' इति सायणोक्तिः संगच्छते। शूद्रापुत्रोऽयमस्माकं ब्राह्मणानां मध्ये कथं प्रविष्ट इति सायणेन न व्याख्यातम्। सरस्वत्या पवित्रमुदकमयं पापिष्ठो मा पिबतु इति निन्दार्थमेव पापिष्ठशब्दः सायणेनोपात्तः। तस्य शूद्रापुत्रत्वे तु न किञ्चिदपि प्रमाणम्। प्रत्युत ब्रह्मपुराणे—

'पैलूष इति विख्यातः कवषस्य सुतो द्विजः।' (१३६।२)

इति पद्ये कवषस्य द्विजपितृत्वात् द्विजत्वमेव विज्ञायते। द्विजशब्दस्य क्षत्रियादिपरत्वेऽपि तस्य शूद्रत्व-साधकः पक्षः पराणुद्यते। सर्वथाऽपि नोक्तब्राह्मणेन शूद्रस्य कर्मणा तपसा वा ब्राह्मणत्वं सिद्ध्यति।

किञ्च ऋषीणां स यज्ञ आसीन्नानृषीणाम्। कवषस्तु द्यूतकारत्वेनाप्रशस्तब्राह्मणत्वादनृषित्वात्तथाधिक्षिप्तो निराकृतश्च। ऋ० सं० १०।३४)

अक्षसूक्तस्य कवषद्रष्टृकत्वेनापि कवषस्य द्यूतकारत्वं विज्ञायते। कवषस्य बोधनार्थमेव देवताभिस्तन्मुखादनेकवारं कितवशब्दः प्रयोजितः। तेन तस्य यज्ञप्रवेशेन ऋषीणां क्रोधः सञ्जातः। तस्यानृषेऋषियज्ञप्रवेशे 'दास्याः पुत्रः कितवोऽब्राह्मण' इति शब्दा आक्रोशार्थमृषिभिः क्रोधात्प्रयुक्ताः। पश्चाद्देवतानां कृपया अपो नप्त्रीयसूक्तदर्शनात्तस्यर्षित्वे निश्चिते देवतानामनुग्रहं विज्ञाय तस्य कैतवदोषमुपेक्ष्यापि तस्मिन्नृषियज्ञे तत्प्रवेशः कारितः।

एतेन कवषो अब्राह्मणो ब्राह्मणः सम्पन्न इति कथमपि न सिध्यति। अनृषिः सन् स देवानुग्रहादृषिः सम्पन्न इत्येव सिध्यति। मन्त्रद्रष्टृत्वादृषिस्तु क्षत्रियादिरपि भवत्येव। निरुक्ते (६।२८।१) इत्यत्र 'जालबद्धा मत्स्या ऋषयः' इत्युक्तम्।

यत्तु केनचिन्मन्त्रार्थद्रष्टृत्वात्तस्य ब्राह्मण्यं ज्ञात्वा ऋषिभिः स यज्ञ आहूतः' इत्युक्तम्, तन्निर्मूलत्वात्पराहतम्। 'विदुर्वा इमं देवा उप इमं ह्वयामहै' (ऐ० ब्रा० ११९) इति ब्राह्मणवचनेन येषामाराधनार्थं यज्ञः क्रियते तेषामनुग्रहं विदित्वा स यज्ञे प्रवेशितः। 'ते भृग्वादयः परस्परमब्रुवन् इमं कवषं देवाः सर्वेऽपि विदुर्वै जानन्त्येव। अतोऽस्य कितवत्वादिदोषो नास्ति। तस्मादिममस्मत्समीपं प्रत्याह्वयामः' इति सायणोक्त्या च तस्य कितवत्वेनाप्रशस्तत्वमेव न शूद्रत्वम्। 'अक्षैर्मा दीव्यः' (ऋ० सं० १०।३४।१३) इति सूक्तस्य द्रष्टृत्वेन द्यूतक्रीडाया अपि तस्य घृणा जाता।

किञ्च संतुष्यतु न्यायेन कवषस्य दासीपुत्रत्वाभ्युपगमेऽपि शूद्रापुत्रत्वं न सिद्ध्यति। द्रौपद्यादीनामपि विराटगृहे सैरन्ध्रीरूपेण दासीत्वस्मरणात्, हरिश्चन्द्रपत्न्याः शैव्यायाः कस्यचिद्दासीत्वप्राप्तावपि शूद्रत्वाभावाच्च। न च तावता रोहिताश्वस्य दासीपुत्रस्यापि शूद्रत्वम्, ययातिपत्न्याः शर्मिष्ठायाः देवयानीदासीत्वेऽपि न शूद्रात्वम्, न वा तत्पुत्राणां शूद्रत्वम्। पत्न्यपि पत्युर्दासी भवति। न तावता सा शूद्रा भवति। विनतायाः कद्रूदासीत्वेऽपि न गरुडस्य शूद्रत्वम्।

यत्तु केनचिदिलूषाख्याया दास्याः पुत्रः कवष इत्युक्तम् तदपि, निर्मूलम्। तादृशस्येतिहासस्याभावात्। इलूषस्तु कवषस्य पिता। इलूषस्यापत्यमैलूष इति तद्व्युत्पत्तेः। सायणः (ऋ० सं० १०।३०।७) 'इलूषपुत्रस्य कवषस्यापत्यम्' इत्याह। इलूषापुत्रस्येत्यनुक्तेश्च।

ऐतरेयब्राह्मणभाष्येऽपि तेषां मध्ये कश्चित् इलूषाख्यस्य पुरुषस्य पुत्रः कवषनामकः इत्युक्त्या सायणेन इलूषाख्यस्य पुरुषस्यैव पुत्रः कवषो मन्यते। यदि कवषो दासीपुत्रः स्यात्तदा तन्नाम्ना प्रसिद्धः स्यात्। तदभावादिलूषाख्यस्य पुरुषस्य पुत्रस्य कवषस्य निन्दार्थमेव दास्याःपुत्रशब्दप्रयोगः। तस्य मातुर्दास्या नामाप्रसिद्धेः। तन्नाम्ना च कवषस्याव्यवहाराद्दास्याः पुत्रत्वोक्तिर्निन्दार्थैव मन्तव्या।

एतेन 'भारत वर्ष में जाति भेद' पुस्तके क्षितिमोहनसेनमहोदयेन यदुक्तमिलूषाख्या काचिच्छूद्रा दासी तस्याः पुत्र ऐलूषः (२५ पृ०) तदप्यपास्तम्, टाबन्तस्येलूषाशब्दस्याभावेन तदयुक्तः। कवषस्य दासीपुत्रत्वं सुधारकाणां कपोलकल्पितमेव।

यत्तु केनचिदुक्तं 'ऋग्वेदस्याध्ययनेनापूर्वविषयावभासनादृषिभिः कवष आहूत' इति, तदपि निराधारम्। ऐतरेयब्राह्मणेऽन्यत्र वा तदनुक्तेः। ऐतरेयब्राह्मणे तु 'स बहिर्धन्व उदूढः पिपासया वित्त एतद् अपोनप्त्रीयमपश्यत्' (२१९) इति तत्क्षणमेव देवानुग्रहेण सूक्तस्फुरणमुक्तम्। तस्य वेदाध्ययनतदर्थप्रतिभानादिकं न तत्रोक्तम्। ३१।३२।३३।३४ सूक्तान्यपि प्रतिभातानि। अन्यत्तु कल्पनामात्रं निराधारमेव।

एतेन 'सम्पूर्णस्य ऋग्वेदस्याध्ययनादभिनवाभिनवविषयाणां हृदयङ्गमकरणात् ऋषिभिराहूय स आचार्यत्वेन वृत' इति रजनीकान्तशास्त्रिणोप्युक्तिर्निराधारैव, ऐतरेयब्राह्मणविरुद्धत्वात्। यज्ञान्निःसारणाह्वानयोर्मध्ये मासाद्यन्तराभावात्। कथमत्यल्पावधौ तदध्ययनार्थावधारणसंभवः? यज्ञारम्भकाले दीक्षाप्रसङ्गे स ऋषिभिर्निष्कासितः प्रत्यागमनात् प्रागेव ऋषीणां समक्ष एव कवषस्यापोनप्त्रीयं सूक्तमध्ययनमन्तरैव प्रतिभातम्। तादृक् चमत्कृत्यैव देवानुग्रहं विज्ञाय स तस्मिन्नेव यज्ञे तैः संनिवेशितः। सातवलेकरेणापि यदुक्तम् 'नीचकुलोत्पन्नमुक्त्वा कवषो यैस्त्यक्तस्तैरेव तस्य वेदविद्यां ज्ञात्वा यज्ञे स सन्निवेशितः' इति, तदपि निर्मूलमेव। यदि पूर्वमविद्वानासीत्तर्हि कथं कतिभिश्चित्क्षणैः विद्वान् संवृत्तः? यदि पूर्वमेव विद्वानासीत्तदा कथमब्राह्मण इत्युक्त्वा स बहिष्कृतः।

वस्तुतः तस्मिन्यज्ञे संमिलिता मन्त्रस्तोमद्रष्टार ऋषयः आसन्। कवषस्यर्षित्वाभावात्स अब्राह्मणः, यौगिकवृत्त्या ब्रह्म मन्त्रानभिज्ञः, अनृषिः, कितवः, दास्याः पुत्रः इति निन्दया निराकृतः। यदि दासीपुत्रत्वात् स निराकृतो भवेत्तदार्षादिमतरोतयेदानीमपि तस्य दासीपुत्रत्वमस्त्येवेति कुतः स परिगृहीतः? तस्माद् गालिप्रदानार्थमेव दास्याःपुत्रशब्दप्रयोगो न तस्य दासीपुत्रत्वशूद्रत्व-ज्ञापनार्थो वा।

तपोविशेषाद्देवतानुग्रहान्मन्त्रद्रष्टृत्वे जाते ऋषित्वं भवति। तस्मिन्सम्पन्ने तस्य तत्र प्रवेशो युक्त एव। पश्चाद्देवानुग्रहादेव द्यूतविरतये (ऋ० सं० १०।३४) सूक्तप्रतिभानात् कितवत्वनिवृत्तिरपि जाता। अब्राह्मणत्वेऽपि तस्य शूद्रत्वं न सिद्ध्यति, क्षत्रियादीनामप्यब्राह्मत्वाविशेषात्। ऋषित्वमपि तत्र न व्याहतम्, देवशुन्याः सरमाया अपि ऋषित्वप्राप्तेः। ( निरुक्ते

११।२७।१ ) एतेन 'परिश्रमेण कवषो ब्राह्मणत्वं प्रतिपेदे' इत्यप्यपास्तम्, प्रमाणाभावात्। देवकृपामन्तरा तत्रैतरेये तत्परिश्रमस्याप्रामाणिकत्वात्। अद्विजानामव्रतानामनधिकारो वेद इति तु कवषस्य बहिष्कारादेव सम्यग्ज्ञायते। 'वेदमाता प्रचोदयन्तां पावमानी द्विजानामिति ( अ० सं० १९।७१।१ ) द्विजानामेव तत्राधिकारश्रवणं स्पष्टमेव। शूद्रत्वे कवषस्य प्रथमत एव यज्ञदीक्षायां प्रवेशो न स्यात्। 'ब्राह्मणो वैव राजन्यो वा वैश्यो वा ते हि यज्ञियाः' ( ३।१।१।६ श० ब्रा० ) 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' ( तै० सं० ७।१।१।६ ) द्विजातय इवेज्याभिः ( मनुः ८।३११ ) इत्यादिवचनेभ्यः। तस्माद्यूतव्यसनित्वादप्रशस्तोऽशङ्क्यो ब्राह्मणोऽपि यज्ञान्निराकृत इति मन्तव्यम्।

## मतङ्गचाण्डालवृत्तान्तः

यत्तु-'मतङ्गस्य चाण्डालस्य ब्राह्मणत्वप्राप्तिरित्युक्तम्' तन्न, सतां प्रमाणविरुद्धत्वात्। तथाहि—तपस्यया ब्राह्मणत्वप्राप्त्यर्थं प्रार्थयानं मतङ्गम्प्रति ब्राह्मण्यमतिदुर्लभं बहुजन्म साध्यमितीन्द्रेण स्पष्टमुक्तम्। ( म० भा० अनुशासनपर्व २७।२८। २९ अध्यायेषु )

'ब्राह्मण्यं दुर्लभं तात प्रार्थयानो न लप्स्यसे' ( २८।२ )
वृणीष्व काममन्यं त्वं ब्राह्मण्यं हि सुदुर्लभम्।' (२८।१६)
चण्डालयोनौ जातेन (ब्राह्मण्यं) नावाप्यं वै कथञ्चन।
अन्यं कामं वृणीष्व त्वं मा वृथा तेऽस्त्वयं श्रमः।' ( २९।४ )
'मतङ्ग ब्राह्मणत्वं ते विरुद्धमिह दृश्यते।' २९।८
बह्वीस्तु संविशन् योनीर्जायमानः पुनः पुनः ॥ ११ ॥
पर्य्याये तात कस्मिंश्चिद् ब्राह्मण्यमिह विन्दति ॥
'तमुत्सृज्येह दुष्प्रापं ब्राह्मण्यमकृतात्मभिः ॥ २९।१२ ॥
अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः ॥' (२९।११।१३)
'एवमेतत्परं स्थानं ब्राह्मण्यं नाम भारत।
तच्च दुष्प्रापमिह वै महेन्द्रवचनं यथा ॥' ( २९।२६ )
ब्राह्मण्यं तात दुष्प्राप्यं वर्णैः क्षत्रादिभिस्त्रिभिः।' (२७।५ )
न च स्थाने मतङ्गो ब्राह्मण्यं नालभद् भरतर्षभ।
चाण्डालयोनौ जातो हि कथं ब्राह्मण्यमाप्तवान्।
( म० भा० अनु० ३।१९ )

इति युधिष्ठिरप्रश्नेन तस्य ब्राह्मण्यप्राप्तिर्ज्ञायते इति वाच्यम्, प्रश्नस्य पूर्वपक्षत्वेन सिद्धान्ते ब्राह्मण्यासिद्धेः स्पष्टत्वात्।

वस्तुतस्तु 'स्थाने मतङ्गो ब्राह्मण्यं नालभद्भरतर्षभ।

चण्डालयोनौ जातो हि"......इति तृतीयपादान्तश्लोको मतङ्गकथाशेषः। कथं ब्राह्मण्यमाप्तवान् इति। चतुर्थपादस्तु–

'देहान्तरमनासाद्य कथं स ब्राह्मणोऽभवत्'? (३।१७)

कथं प्राप्तं महाराज क्षत्रियेण महात्मना।

विश्वामित्रेण धर्मात्मन् ब्राह्मणत्वं नरर्षभ ॥ (३।१-२)

विश्वामित्रः शरीरान्तरधारणमन्तरैव कथं ब्राह्मण्यं प्राप्तवान्। मतङ्गश्चाण्डालयोनौ जातो ब्राह्मण्यं नालभत् इति स्थाने युक्तमेव। परन्तु विश्वामित्रेण कथं ब्राह्मण्यं प्राप्तमिति वर्णय इति तदर्थः। अन्यथा उत्तरवचनविरोधध्रौव्यात्। रामायणीयमहामुनिर्मतङ्गस्तु ततो भिन्न एव। तयोरैक्ये प्रमाणाभावात। महाभारतस्य रामायणादर्वाचीनत्वेन तदैक्ये स एव मतङ्गो महामुनिरूपेण रामायणे प्रसिद्ध इति वेदव्यासेनावश्यमुच्येत। भारतस्थस्य मतङ्गस्य गत्यन्तरप्राप्तिस्तत्र स्पष्टमुक्ता।

मातङ्ग उवाच—

इदं वर्षसहस्त्रं वै ब्रह्मचारी समाहितः।

अतिष्ठमेकपादेन ब्राह्मण्यं नाप्नुयाङ् कथं॥

(अनुशासने २६ अ० ३ श्लोकः)

शक्र उवाच—

चण्डालयोनौ जातेन नावाप्यं वै कथञ्चन।

अन्यं कामं वृणीष्व त्वं मा वृथा तेऽस्त्वयं श्रमः ॥ ४ ॥

एवमुक्तो मतङ्गस्तु भृशशोकपरायणः।

अध्यतिष्ठद् गयां गत्वा सोऽङ्गुष्ठेन शतं समाः ॥ ५ ॥

सुदुर्वहं वहन् योगं कृशोधमनिसन्ततः।

त्वगस्थिभूतो धर्मात्मा स पपातेति नः श्रुतम् ॥

तं पतन्तमभिद्रुत्य परिजग्राह वासवः ॥ ६ ॥

शक्र उवाच—

मतङ्ग ब्राह्मणत्वं ते विरुद्धमिह दृश्यते ।
ब्राह्मण्यं दुर्लभतरं संवृतं परिपन्थिभिः ॥ ८ ॥
पूजयन् सुखमाप्नोति दुःखमाप्नोत्यपूजयन् ॥
बह्वीस्तु संविशन् योनीर्जायमानः पुनः पुनः ॥११॥
पर्याये तात कस्मिंश्चित् ब्राह्मण्यमिह विन्दति ।
तदुत्सृज्येह दुष्प्रापं ब्राह्मण्यमकृतात्मभिः ॥१२॥
अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः ।

मतङ्ग उवाच—

किं मां तुदसि दुःखार्त्तं मृत मारयसे च माम् ॥१३॥
त्वां तु शोचामि यो लब्ध्वा ब्राह्मण्यं न बुभूषसे ।
ब्राह्मण्यं यदि दुष्प्रापं त्रिभिर्वर्णैः शतक्रतो ॥१४॥
सुदुर्लभं सदावाप्यं नानुतिष्ठन्ति मानवाः ।
यः पापेभ्यः पापतमस्तेषामधम एव सः ।
ब्राह्मण्यं यो न जानीते धनं लब्ध्वेव दुर्लभम् ।
दुष्प्रापं खलु विप्रत्वं प्राप्तं दुरनुपालनम् ।
एकारामो ह्यहं शक्र निर्द्वन्द्वो निष्परिग्रहः ॥१७॥
अहिंसादममास्थाय कथं नार्हामि विप्रताम् ।
दैवं तु कथमेतद् वै यदहं मातृदोषतः ॥१८॥
एतामवस्थां संप्राप्तो धर्मज्ञः सन् पुरन्दरः ।
नूनं दैवं न शक्यं हि पौरुषेणातिवर्त्तितुम् ॥१९॥
यदर्थं यत्नवानेव न लभे विप्रतां विभो ।
एवं गते तु धर्मज्ञ दातुमर्हसि मे वरम् ॥२०॥
यदि तेऽहमनुग्राह्यः किंचिद् वा सुकृतं कृतम् ॥

वैशम्पायन उवाच—

वृणीष्वेति ततः प्राह ततस्तं बलवृत्रहा ।
चोदितस्तु महेन्द्रेण मतङ्गः प्राब्रवीदिदम् ।
यथा कामविहारी स्यां कामरूपी विहङ्गमः ॥ २२ ॥

ब्रह्मक्षत्राविरोधेन पूजां च प्राप्नुयामहम् ।
यथा ममाक्षया कीर्त्तिर्भवेच्चापि पुरन्दर ।
कर्त्तुमर्हसि तद्देव शिरसा त्वां प्रसादये ॥ २३ ॥

शक्र उवाच—

छन्दो देव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि ।
कीर्तिश्च तेऽतुला वत्स त्रिषु लोकेषु यास्यति ॥
एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत ॥ २५ ॥
प्राणांस्त्यक्त्वा मतङ्गोऽपि संप्राप्तः स्थानमुत्तमम् ।
एवमेतत् परं स्थानं ब्राह्मण्यं नाम भारत ।
तच्च दुष्प्रापमिह वै महेन्द्रवचनं यथा ।

( अनुशासन २९ अध्याये )

एतेन स एव मतङ्गो वाल्मीकिरामायणप्रसिद्धो महर्षिर्मतङ्गः संजातः इत्युक्तिर्मूढजनप्रतारणायैव । उपर्युक्तं 'प्राणांस्त्यक्त्वा मतङ्गोऽपि संप्राप्तः स्थानमुत्तममिति महाभारतवचनविरोधाद् ॥

वृत्तेनादरणीयत्वसमर्थनम् ।

ननु 'कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः ।
शूद्रोऽपि द्विजवत्सेव्यः इति ब्रह्माब्रवीत्स्वयम् ॥ ४८ ॥
स्वभावः कर्म च शुभं यत्र शूद्रेऽपि तिष्ठति ।
विशिष्टः स द्विजातेर्वै विज्ञेय इति मे मतिः ॥ ४९ ॥
न योनिर्नापि संस्कारो न श्रुतं न च संततिः ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥ ५० ॥
सर्वोऽयं ब्राह्मणो लोके वृत्तेन च विधीयते ।
वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति ॥ ५१ ॥
ब्राह्मः स्वभावः सुश्रोणि समः सवत्र मे मतिः ।
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः ॥ ५२ ॥

( म०भा०अ०प० १४३ )

'ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥' ( १८।४१ )

इति श्रीमद्भगवद्गीतायाम् ।

अत्र कर्मगुणस्वभावैरेव ब्राह्मणादिकमिति चेन्न —

शमो दमः तपः शौचं क्षान्तिरार्जवमेव च ।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम ।

दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम् ॥ ४३ ॥'(श्री० भ० गी० १८)

'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।' ( श्री० भ० गी० ३।३५ )

'स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥' ( श्री० भ० गी० १८।४७)

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।' ( श्री० भ० गी० १८।४८)

इत्येवमादिभिः गीतावचनैः जन्मान्तरीयगुणकर्मस्वभावानुरोधेन ब्राह्मणादिजन्मप्राप्तौ ईश्वरप्रकृतिगतसत्त्वरजस्तमोगुणेष्वन्यतम प्राधान्यानुरोधेन त्रिगुणात्मप्रकृत्यनुरोधेनैवेदानीं स्वकर्माभिमुखजन्मान्तरीयसंस्कारेणाभिव्यक्तगुणानुरोधेनैव वा वर्णसम्बन्धितया धर्मशास्त्रेषु विहितानां शमदमादीनां शौर्य्यादीनां, कृषिगोरक्ष्यादीनां परिचर्य्यादीनाञ्च व्यवस्थापितत्वेनोक्तस्वरूपकर्मानुष्ठानमात्रतत्परः स्वस्वकर्मानुष्ठानेनेश्वरमभ्यर्च्य शुद्धान्तःकरणः सन् मुक्तो भवति । स्वधर्मातिरिक्ते नान्यधर्मेण सम्यगनुष्ठितेनापि सद्गतिं न प्राप्नोति । यस्य यो धर्मो विहितस्तस्य दुष्टत्वेऽपि तदन्यस्यादुष्टत्वेऽपि तदतिरिक्त धर्मानुष्ठाने प्रत्यवाय एवेति स्वभावः नियतस्वधर्मातिरिक्तो धर्मो नानुष्ठेय इति सिद्धत्येवेति स्वधर्मातिरिक्तं क्षत्रियादिधर्मानुष्ठाने क्षत्रियत्वादिकं प्राप्नोतीत्यर्थस्यासङ्गतत्वमेव

'न योनिर्नापि संस्कार' इत्यादीनामपि न योन्याद्यपवादे तात्पर्य्यं, किन्तु वृत्तावश्यकत्वप्रतिपादन एव तात्पर्य्यं वाक्यान्तरेषु योनेरपि ब्राह्मण्यकारणत्वप्रतिपादनात् ।

यथा 'नाहं वेदैर्न तपसा न दानेन न चेज्यया ।

शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥'

( श्री० भ० गी० ११।५३ )

'भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन ।

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥'

( श्री० भ० गी० ११।५४ )

इत्यत्र न यज्ञादीनामपवादः, किन्तु भक्त्यावश्यकत्वप्रतिपादन एव वाक्यतात्पर्यं यज्ञादीनां विधानेनापवादासंभवात् । यथाङ्करहितानां शून्यानां शून्यत्वेऽपि वामाङ्कसन्निविष्टाङ्कशून्यानामुत्तरोत्तरं दशगणितपदार्थबोधकत्वं तथैव भक्तिरहितानां यज्ञादीनां शून्यप्रायत्वेऽपि भक्तिसहितानां तेषां भगवदाराधनौपयिकत्वेनात्यन्तमहत्त्वपूर्णत्वमवबोद्धव्यम् ।

'वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति ।'

( म० भा० अ० प० १४३।५१ )

'ब्राह्मणो वा च्युतो धर्माद्यथाशूद्रत्वमाप्यते ॥५६॥'

( म०भा०अ०प० १४३।५६ )

इत्यादिषु शूद्रब्राह्मणसदृशत्वमेवार्थः । अतएव 'शूद्रोऽपि द्विजवत्सेव्य' ( म० भा० अ० प० १४३।४८ ) इति सत्कार उक्तः । सेव्य इत्यस्य आदरणीय इत्येवार्थः ।

अतएव

'ब्राह्मणः पतनीयेषु वर्तमानो विकर्मसु ।

दाम्भिकोऽदुष्कृतः प्राज्ञः शूद्रेण सदृशो भवेत् ॥'

( म० भा० वनपर्व ) ( २१६ अ० १३ )

इति दुष्कर्मकृतः शूद्रतुल्यतोदिता ।

मनुना च 'शूद्रेण हि समस्तावद्यावद्वेदे न जायते ।' ( २।१७२ ) इत्युक्तम् ।

गोतमेनापि 'प्रागनुपनयनात् कामचार - कामवाद - कामभक्षाः इति समर्थितम् । इदमेव ब्रह्मक्षत्रविशां शूद्रसादृश्यं नतु निषिद्धमांसभक्षणादिकम् । तत एव निषिद्धवर्जमित्युक्तं गोतमेन । अतएव चाधर्मचर्य्ययोत्तमवर्णस्य जघन्यवर्णत्वापत्तिर्जातिविपरिवृत्तावुक्तम् । जघन्यवर्णस्योत्तमचर्य्ययोत्तमवर्णत्वप्राप्तिरपि 'जातिपरिवृत्तावेवोक्तमापस्तम्बेनापि जातिपरिवृत्तौ जन्मपरिवर्त्तन इत्यर्थः । जात्युत्कर्षो युगे ज्ञेयः" ( या० १।९६ ) इत्यत्रापि सप्तमे पञ्चमे युगे जात्युत्कर्ष उक्तः ।

'तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।

उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मतः ॥'(मनु १०।४२)

मनुनापि तपो बीजादिभिर्जन्मान्तर एवोत्कर्षप्राप्तिरुक्ता ।

जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च।
एभिर्युक्तो हि यस्तिष्ठेन्नित्ये सद्विज उच्यते ॥'
इत्याग्नेये वृत्तादिभिः सार्धं जातेरपि द्विजत्वे हेतुतोक्ता।
तपःश्रुतञ्च योनिश्च एतद् ब्राह्मणकारकम्।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥१॥
(५।१।१३ पा० सू०)

इति पतञ्जलिना तपःश्रुताभ्यां सार्द्धं योनेश्च ब्राह्मण्ये हेतुत्वमुक्तम्। 'तपः श्रुताभ्यामिति— नासौ परिपूर्णो ब्राह्मणः। जातिलक्षणैकदेशाश्रयस्तु तत्र ब्राह्मणशब्दप्रयोगः। अतएव च तस्य सर्वासु ब्राह्मणक्रियासु नास्त्यधिकारः' इति कैयटः।

'विद्या योनिः कर्म चेति त्रयं ब्राह्मणकारकम्।
सेवा संग्रहबुद्धिश्च कायाश्च पातनम् ॥'

इति पिङ्गलसूत्रव्याख्यया उपोद्घाते।

जन्मशारीरविद्याभिराचारेण श्रुतेन च।
धर्मेण च यथोक्तेन ब्राह्मणत्वं विधीयते ॥
चित्रकर्म यथानेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मणत्वमपि तद्वत् संस्कारैर्विधिपूर्वकैः ॥ (८।१९)

इति पराशरमाधवीये अङ्गिरस उक्तिः संगच्छते। 'वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमेन पञ्चमेन (४।८ गौ० स्मृतौ) योनिस्तपः श्रुताभ्यां सहिता ब्राह्मणत्वस्य संपादिका। द्विजातीयोत्कृष्टपरम्परा कुलपरम्परागता योनिस्तु पञ्चमे सप्तमे वा जन्मनि बीजजातीयमानुलोम्यं उक्तबीजजातीयं जनयति, अन्यथाऽपकृष्टम।

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥'
(म० भा० शा० प० १८८।१०)

'एकवर्णमिदं सर्वं विश्वमासीद्युधिष्ठिर।
कर्म क्रिया विभेदेन चातुर्वर्ण्यं प्रतिष्ठितम्।
सर्वे वै योनिजा मर्त्याः सर्वे मूत्रपुरीषिणः।
एकेन्द्रियेन्द्रियार्थाश्च तस्माच्छीलगुणैर्द्विजः ॥

इत्यादि वचनानामयमेवार्थो यत् ब्रह्मणा सृष्टे ब्रह्ममये जगति सर्वं ब्रह्ममयमेव ( ब्रह्मणः स्वरूपमेव )। तत्र केचिद् ब्रह्मकर्म याजनाध्ययनाध्यापनदानप्रतिग्रहरूपं षट्कर्म, नित्यनैमित्तिककाम्यरूपं कर्म च परित्यज्य क्षत्रियधर्ममाश्रित्य वैश्यधर्मं शूद्रधर्मं वाश्रित्य स्वस्वकर्मानुरोधेन जन्मान्तरे क्षत्रियत्वादिकं गताः। ये स्वस्वधर्ममपरित्यज्यैव स्थितास्ते ब्राह्मणा एवासन्। तथा च कार्यस्य कारणानुगुणत्वेऽपि मुखबाहूरुपादरूपोपाधिभेदेन तत्तद्धर्माश्रयणात् श्रुत्युक्तां तां तां जातिं गताः। तत्रापि वैपरीत्यमाश्रितास्तु यस्य धर्ममाश्रितास्तत्तुल्या अभूवन्। शान्तिपर्वणि १८९ अध्याये भगवता व्यासेन तदेव स्पष्टीकृतम्।

'ब्राह्मणः केन भवति क्षत्रियो वा द्विजोत्तम।
वैश्यः शूद्रश्च विप्रर्षे तद् ब्रूहि वदतां वर॥ १॥
भृगुरुवाच–जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः॥ २॥
शौचाचारस्थितः सम्यग्विघसाशी गुरुप्रियः।
नित्यव्रती सत्यपरः स वै ब्राह्मण उच्यते॥ ३॥
सत्यं दानमथाद्रोहः स वै क्षत्रिय उच्यते।
'स वैश्य इति संज्ञितः ॥
शूद्रे चैतद्भवेल्लक्ष्म द्विजे तच्च न विद्यते।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः॥ ८॥

शूद्रो यत्कर्माचरति तत्तुल्यो भवति। एवं ब्राह्मणो ब्राह्मणो न भवेदित्यस्यापि ब्राह्मणो यत्कर्माचरति तत्तुल्यो भवतीत्यर्थः। शूद्रस्याप्युत्तमकर्माचरणादादरणीयत्वं भवति। तत्रापि शमदमादि तदनिषिद्धकर्माचरणादेवोत्तमतुल्यता भवति। तत्तु वेदाध्ययनादि निषिद्धकर्माचरणेन, तथात्वे पतनस्मरणात्।

'प्रणवोच्चारणाद्धोमात् शालग्रामशिलार्चनात्।
वेदाक्षरविचारेण शूद्रश्चाण्डालतामियात्॥'

इति वचनात्।

एवमेव 'यस्तुशूद्रो दमे सत्ये धर्मे च सततो स्थिततः।
तं ब्राह्मणमहं मन्ये वृत्तेन हि भवेद्द्विजः।' (वन पर्व २१६ अ.)

अस्यापि वृत्तप्रशंसायामेव तात्पर्यम्।

'ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः।
क्षत्रियायां तथैव स्यात् वैश्यायामपि चैव हि ॥'
(म० भा० अनु० प० ४७।२८)

इति स्वोक्तिविरोधाच्च।

अत्र 'त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः' ॥ ११ ॥
'स्वधर्मान्नानुतिष्ठन्ति ते द्विजाः वैश्यतां गताः' ॥ १२ ॥
'कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः' ॥ १३ ॥
(म० भा० शा० प० १८८)

इति प्रमाणवचनविरोधाच्च।

ननु क्षत्रियस्य ब्राह्मणत्वं, वैश्यत्वं, शूद्रत्वञ्च भवति, वैश्यस्य ब्राह्मणत्वादिकं भवति, शूद्रस्य च ब्राह्मणत्वादिकं भवतीत्यस्य तत्तद्धर्मप्रयोज्यकर्मणामधिकारी भवतीत्येवार्थः। स त्रयाणां ब्राह्मणत्वादिविशेषधर्मेषु षट्सु क्षत्रियत्वे वैश्यत्वे च यजनाध्ययनदानादिरूपकर्मविशेषेष्वेव शूद्रत्वे सेवादिविशेषधर्मेषु चाधिकारी न्याय्यतया भवतीतिति चेन्न।

'निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥
(म० २।१६)

इति निषेकादिश्मशानान्तानि कर्माणि मन्त्रैर्येषामुक्तानि तेषामेवात्राधिकारात्। केषां तानि कर्माण्युक्तानि कुत्र वेति शङ्कायां द्विजन्मनां पुण्यैर्वैदिकैः कर्मभिर्निषेकादिरूपशरीरसंस्कारः इह पावनो भवति, परत्र च पावनः इत्युक्तम्।

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्य्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥
गार्भैर्होमैः जातकर्म चौडमौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।
स्वाध्यायेन व्रतैर्होमैः त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।
प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।

मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ।
नामधेयं दशम्यां तु द्वादश्यां वास्य कारयेत् ।
माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम् ।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।
शर्मवद् ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् ।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥'
( म० २।२६-३२ )

जन्मना ब्राह्मणादीनामेवेदं संभवति । शूद्रस्य वेदाध्ययनाधिकारः पूर्वोत्तरमीमांसाभ्यां निराकृत एव । उपर्युक्तेन 'निषेकादिश्मशानान्त' इति वचनेन च तन्निषेधश्च स्पष्टः । तथा च शूद्रस्य ब्राह्मणत्वादिप्राप्तौ षट्कर्माधिकारो दूरतो निरस्तः ।

अतएव—'शुचिः सद्भक्तिदीप्ताग्निदग्धदुर्जातिकल्मषः ।
श्वपाकोऽपि बुधैः श्लाघ्यो न वेदज्ञोऽपि ब्राह्मणः ॥'

इति भारतेऽपि जन्मूलकजातिभेदमङ्गीकृत्यैव सद्गुणैः श्वपाकस्यापि ब्राह्मणवदादरणीयत्वमेवोक्तम्, नतु वस्तुतः श्वपाकस्य ब्राह्मणत्वम् ।

स्तेये तत्तज्जातिभेदेन दण्डदानाधिकारः, क्षत्रियस्य दुष्टनिग्रहाद्यधिकारः ततोऽन्यत्वेऽन्यधर्माधिकारं बोधयन् मनुः स्पष्टं जन्मनैव जातिभेदं ज्ञापयति ।

'न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते ।
वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च ॥११०॥
यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ।
भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥१११॥
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ।
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥११२॥
( म० अ० ३ )

इति तारतम्यबोधनमपि स्वाभाविकजातिभेदं बोधयति । शूद्रस्यैकजातित्वेन दुष्प्रापमेव द्विजातित्वम्, पूर्वोत्तरमीमांसयोस्तस्य वेदाध्ययनाधिकारनिषेधात् । तत एव 'वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनामेव पावनः संस्कार उक्तः ( २।२६ म० ) ।

संस्कृतस्यैव यागादिफलसम्बन्धोऽपि सिद्ध्यति। तथा च शूद्रस्योपनयनाद्यभावेन ब्राह्मणत्वादिप्राप्तिस्तद्धर्माधिकारश्चासंगत एव।

'जीवेत् क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः॥ ८१॥
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद् भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्॥ ८२॥
वैश्यवृत्त्यापि जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा।
हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत्॥ ८३॥'

(म० १०) इति मनुना जन्मत एव ब्राह्मणस्य क्षत्रियस्य वैश्यस्य च वेदाध्ययनादिकं कर्म उक्तम्। तेषामेव प्रतिपादितो जीविका भेदश्च संगच्छते। अतएव सशरीरस्वर्गगमनार्थं तपश्चरतः शम्बूकस्य त्रिशंकोश्च निग्रह उपपद्यते।

यदुक्तम्—"शूद्रादीनां ब्राह्मणत्वादि नैरपेक्ष्येणैव 'यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याम् शूद्राय चार्य्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासम्' (शु० य० २६।२) इति कण्ठरवेणैव वेदरूपा कल्याणी वागुपदेष्टव्यत्वेनोक्ता।

'न मेऽभक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः।
तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम्॥' (भ० भा०)

इति कर्म गुणादिभिरेव श्वपचादीनां पूज्यता चोक्ते"ति तन्न,

'शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।'

इति संस्कारमयूखोद्धृतया मनूक्त्या पूर्वोत्तरमीमांसाभ्यां च विरोधात् इमां वाचमिति तु दीयतां भुज्यतामिति प्रिया वागेव सर्वान्प्रति वक्तव्यत्वेनोक्त्या नतु वेदवाग् प्रमाणाभावात्, उक्तप्रमाणविरोधाच्च न मे भक्तश्चतुर्वेद इति वचनं तु भारते नोपलभ्यते। यदुक्तम् 'निषेकादिकर्मणः जननोत्तर कालातिक्रमप्रायश्चित्तानुष्ठानपूर्वकमनुष्ठाने सति शूद्रा अपि वेदाधिकारिणो भवेयु"रिति, तन्न, गर्भाधानात्पूर्वं तत्पित्रारसंस्कृतत्वेन वेदाधिकारशून्यत्वेन च वैदिकमन्त्रानधिकारात्। प्रायश्चित्तविधानाच्च। नहि ब्राह्मणाद्युद्देश्येनोक्तस्य प्रायश्चित्तस्यान्येनानुष्ठानं कर्तुं शक्यम्। न च सृष्ट्यादावुत्पन्नब्राह्मणादेरपि संस्कृतपित्राद्यभावेन कः संस्कारः? तस्यादिस्रष्ट्रा नारायणेनैव संस्कृतत्वात्।

'तपस्तप्त्वासृजद् ब्रह्मा ब्राह्मणान् वेदगुप्तये ।
तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥'
(या० स्मृ० आ० १९८)

इति तेषां वेदाधिकार उक्त एव । न च नारायणस्याप्यसंस्कृतत्वेन कथं तस्य संस्कारकर्तृत्वं संभवतीति वाच्यम् । तस्य नित्यशुद्धबुद्ध-मुक्तत्वेन संस्कारानपेक्षत्वात् । सजातीयोढमातापितृजन्यस्यैव दत्तक-परिग्रहविधानेन परिग्रहीतृजातिमत्त्वेन दत्तकस्यापि तज्जातित्वे न क्षतिः । श्राद्धादिगतब्राह्मणेषु पितृत्ववत् ।

देवरेऽपि—'तामनेन विधानेन निजो विन्देत देवरः' (म० ९।६९) इति घृताभ्यक्तत्वादिविशिष्टवेदनरूपतन्मात्रप्रयोजकविलक्षणनवमविवा-हाभ्युपगमेन देवरजेष्वपि सजातीयोढमातापितृजन्यत्वमव्याहतमेव । सजातीयायां विधिवत्परिणीतायां विधिविहितगर्भाधानादि संस्कारेणोत्पन्नस्य ब्राह्मणादेः तत्पित्रोस्तत्पितामहानाञ्चोद्दालकव्रतेन व्रात्यस्तोमेन च ब्राह्मण्या-दिकं यथा साध्यते, न तथाऽभक्ष्यभक्षकस्यापेयपातुः शूद्रस्य ब्राह्मण्यादि प्राप्त्यर्थं प्रायश्चित्तं शास्त्रकारैरुक्तम् ।

'जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥' (१।९६)

इति याज्ञवल्क्येन पञ्चमे सप्तमे जन्मन्येव ब्राह्मणत्वादि जातिप्राप्त्युक्ते-स्तदैव वेदाधिकार प्राप्तिर्युक्ता न तु शमदमादिप्राप्तिमात्रेण ।

'एष सर्वः समुद्दिष्टः कर्मणां वः फलोदयः ।
नैःश्रेयसकरं कर्म विप्रस्येदं निबोधत ॥' (म० १२।८२)

इत्यादिभिर्ब्राह्मणस्य प्रवृत्तिनिवृत्तिलक्षणं कर्म चोक्त्वा—

'यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥' (म० १२।९२)

'एतद्धि जन्म साफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यं हि द्विजो भवति नान्यथा ॥' (म० १२।९३)

इति ब्राह्मणस्यैव विशेषतः इत्युक्तम् । अन्यथा नरस्य जनस्य इत्यादि प्रयोगः स्यात् । अतएव

'तपः श्रुतञ्च योनिश्च एतद्ब्राह्मणकारकम् ।
तपः श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ।'

इति 'तेन तुल्य' ( पा० सू ५।१।११५ ) मित्यत्र भाष्योक्तं सगच्छते ।

'जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते ।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥
ब्राह्मणा ब्रह्मयोनिस्था ये स्वे कर्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट कर्माणि यथाक्रमम् ॥' ( म० १०।७४ )

अतएव

'षट् कर्माणि विप्रस्य त्राणि क्षत्रियवैश्ययोः ।'
शस्त्रास्त्रभृत्त्व क्षत्रस्य वणिक् पशुकृषिर्विशः ।
आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः॥' ( म० १०।७९ )

गोत्रव्यवस्थाबाधः ।

किञ्च शूद्रस्य द्विजत्वेऽभ्युपगम्यमाने गोत्रव्यवस्था नोपपद्यते । न च सर्वेषां मनुष्याणां कश्यपवंशोत्पन्नत्वेन कश्यपगोत्रत्वं स्यादिति वाच्यम् । प्रवर-व्यवस्थायाः सर्वथा कर्तुमशक्यत्वात् । तथात्वे वा 'असमानार्ष गोत्रजा'मिति ( याज्ञ १।५३ ) रीत्या विवाह्य कन्या निर्णयासंभवाच्च । न चास्य गोत्र-प्रवराभावात् सर्वा अपि असमानार्षगोत्रजा एवेति वाच्यम्, विवाहे कन्या-वरयोः प्रवरगोत्रयोः सूत्रकारैर्वक्तव्यत्वोक्तेः ।

श्राद्धबाधः ।

किञ्च शूद्रस्य ब्राह्मणत्वेऽभ्युपगम्यमाने मरणे तस्यान्त्येष्टिकर्त्रभाव-प्रसक्तिश्च स्यात्, पितृपुत्रादीनां शूद्रत्वात् । न च सापिण्ड्येन पित्रादीना-मन्यजातीयत्वात् । शूद्रीभूतस्य ब्राह्मणस्य च मरणे के संस्कर्त्तारः ? न च पुत्रादयस्तेषां ब्राह्मणत्वात् । व्यत्यस्तजातिकस्य तस्य मातापितृमृतौ श्राद्धमनेन कर्तव्यं न वा ? तथाऽशौचमपि तस्य भविष्यति न वा ? नित्याया जातेरनभ्युपगमे 'शूद्रा चामहत्पूर्वा जातिः' ( वा. ४।१।४ ) इत्यत्र जातिग्रहणन्तथा 'शूद्राणामनिरवसितानाम्' ( पासू. २।४।१० ) इति समाहारद्वन्द्वे एकवद्भावविधायके सूत्रे यैर्भुक्ते पात्रं संस्कारेण शुद्ध्यति तेऽनिरवसितास्तेषां शूद्राणामेकवद्भावार्थं तक्षायस्कारमिति सिद्ध्यर्थं, चण्डाल

मृतपा इति व्यावृत्त्यर्थम् अनिरवसितग्रहणं कृतम्, चण्डालादि जात्यभावे तदुभयं व्यर्थमेव स्यात्। तस्मान्नित्यैव जातिरभ्युपेतव्या।

तत एव शान्तिशीलादिभूत्यास्तदभिव्यञ्जिकाया वा ब्राह्मणत्वादिजातेरभ्युपगमेनैव दण्ड व्यवस्थोक्ता, अन्यथा मूर्खत्व-पराधीनत्वाभक्ष्यभक्षकत्वापेयपातृत्व विद्याग्रहणधारणासमर्थत्वकुत्सिताचरणादिमतः शूद्रस्य—

'शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति॥' (मनु० ८।२६७)

इति वधदण्डविधानासंगतिरेव स्यात्। तथात्वे वाबालोन्मत्त-महाभीतिग्रहादिग्रस्तादीनामपि वधदण्डापत्तिः स्यात्।

'एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥' (म० ८।२७०)

इत्याद्यसंगतिश्च।

'धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः॥' ( मनु ८।२७२ )

इति दण्डविधानञ्चासंगतं स्यात्। जातेर्गुणमात्रमूलकत्वे धर्मोपदेशकस्य ब्राह्मणत्वमेव स्यान्न दण्डार्हत्वमिति दण्डविधानमसंगतमेव स्यात्। अत एव 'स वै न सर्वेणेव संवदेत। देवान् वा एष उपावर्त्तते—यो दीक्षते। स देवानामेको भवति। न वै देवाः सर्वेणेव संवदन्ते। ब्राह्मणेन वैव राजन्येन वा वैश्येन वा। ते हि यज्ञियास्तस्माद्यद्येनं शूद्रेण संवादो विन्देदेतेषामेवैकं ब्रूयादिममिति विचक्ष्वे' ( ३।१।१।१० ) इति शतपथब्राह्मणं शूद्रस्यायज्ञियत्वादिप्रतिपादनं संगच्छते।

न च 'विद्या कर्म वयो बन्धु वित्तैर्मान्या यथाक्रमम्।
एतैः प्रभूतैः शूद्रोऽपि वार्धके मानमर्हति॥' (या० १।११६)

इति शूद्रस्यापि विद्यासम्बन्धो ज्ञायते इति वाच्यं। तत्र विद्यापदेन शिल्पादिविद्याग्रहणेन दोषाभावात्।

अतएव 'वृत्तमेव द्विजत्वस्य कारण' मित्यत्रैवकारोऽप्यर्थः। तेन वृत्तमपि द्विजत्वे कारणं मन्तव्यम्। तथा च कुलजातियोनिप्रभृतिभिः सार्द्धं वृत्तस्यापि तद्धेतुत्वम्। तेन योनिवृत्तादिसमुच्चयस्यैव द्विजत्वप्रयोजकत्वं नैकैकस्य।

अतएव 'वृत्तं यत्नेन संरक्ष्यं ब्राह्मणेन विशेषतः ।
चतुर्वेदोऽपि दुर्वृत्तः स शूद्रादतिरिच्यते ॥ इति ।
वृत्तस्यावश्यकत्वप्रतिपादनं संगच्छते । ( म० भा० )

'तेन तुल्यं क्रिया चेद्वतिः' ( ५।१।११५ ) इति सूत्रे महाभाष्ये ब्राह्मण-क्षत्रियादिशब्दानां गुणसमुदायेषु प्रवृत्तिरुक्ता । तत एव तपःश्रुतयोनिसमुदाये ब्राह्मणशब्दस्य वृत्तिरुक्ता । तत्र समुदाये प्रवृत्तः शब्दोऽवयवेष्वपि वर्त्तत इति रीत्या जातिहीने गुणहीने च ब्राह्मणशब्दप्रवृत्तिमुक्तवान् । 'अब्राह्मणोऽयं यस्तिष्ठन् मूत्रयति' अत्र गुणहीने जातिमात्रे ब्राह्मणशब्दप्रयोगः । 'अब्राह्मणोऽयं यस्तिष्ठन् भक्षयति' । अत्र जातिहीने संदेहाद् दुरुपदेशाच्च ब्राह्मणशब्दो वर्तते । संदेहे तावद् गौरं शुच्याचारं पिङ्गलं कपिलकेशं दृष्ट्वाऽध्यवस्यति 'ब्राह्मणोऽयम्' । ततः पश्चादुपलभते 'नायं ब्राह्मणः' । अमुष्मिन्नवकाशे ब्राह्मणोऽयमिति तत्र संदेहाद् ब्राह्मणशब्दः प्रवर्त्तते । जातिकृता चार्थस्य निवृत्तिः । दुरुपदेशाच्च, दुरुपदिष्टमस्य भवति । अमुष्मिन्नवकाशे ब्राह्मणस्तमानय । स तत्र गत्वा यं पश्यति तमध्यवस्यति ब्राह्मणोऽयमिति । न च संदेहाद् ब्राह्मणशब्दप्रवृत्तिः जातिकृता चार्थस्य निवृत्तिः । नह्ययं काल माषराशिवर्णमापणे आसीनं दृष्ट्वाध्यवस्यति ब्राह्मणोऽयमिति जातेर्मुख्यस्वरूपप्रविष्टत्वं महाभाष्यकृता स्पष्टमेवोक्तम् ।

शूद्रे तु यद् भवेल्लक्ष्म द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥'
( म० भा० व० प० १८०।२५ )

इत्यत्र नञोऽल्पार्थता ज्ञातव्या । गुणवृत्ताद्यभावादल्पो ब्राह्मणो भवति । अल्पत्वं नाम सत्कारमानदानानर्हत्वमेव । शूद्रे तु सत्कारमानार्हत्वमेव ।

## शूद्रसिद्धान्नभक्षणे दोषः

अङ्गिरः संहितायाम्—

"अन्त्यानामपि सिद्धान्नं भक्षयित्वा द्विजातयः ।
चान्द्रं कृच्छ्रं तदर्धन्तु ब्रह्मक्षत्रविशो विदुः ॥
रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृता ॥

अन्त्यजानां गृहे तोयं भाण्डे पर्युषितञ्च यत् ।
प्रायश्चित्तं यदा पीतं तदैव च समाचरेत् ॥
चाण्डालकूपभाण्डेषु त्वज्ञानात् पिबते यदि ॥
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः ।
तदर्धं तु चरेद्वैश्यः पादं शूद्रेषु दापयेत् ॥
अज्ञानात् पिबते तोयं ब्राह्मणस्त्वन्यजातिषु ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्धयति ॥
विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन ।
आचान्त एव शुद्धयेत अङ्गिरामुनिरब्रवीत् ॥
क्षत्रियेण यदा स्पृष्ट उच्छिष्टेन कदाचन ।
स्नानं जपं तु कुर्वीत दिनस्यार्धेन शुद्धयति ॥
वैश्येन तु यदा स्पृष्टः शुना शूद्रेण वा द्विजः ।
उपोष्य रजनीमेकां पञ्चगव्येन शुद्धयति ॥
अग्निहोत्री च यो विप्रः शूद्रान्नं चैव भोजयेत् ।
पञ्च तस्य प्रणश्यन्ति आत्मा वेदास्त्रयोऽग्नयः ॥
शूद्रान्नेन तु भुक्तेन यो द्विजो जनयेत् सुतान् ।
यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्तते ॥
शूद्रेण स्पृष्टमुच्छिष्टं प्रमादादथ पाणिना ।
तद्द्विजेभ्यो न दातव्यमापस्तम्बोऽब्रवीन्मुनिः ॥"

गुणैर्वृत्तैर्वा ब्राह्मण्यं यत्रोक्तं तेषां वचनानां गुणवृत्तावश्यकत्वप्रतिपादन एव तात्पर्यं न कर्मकृतब्राह्मण्यप्रतिपादने । एवञ्च जातिब्राह्मणस्य सत एव गुणानां सम्पादनेन श्रेष्ठत्वमित्येवाशयः ।

अतएव—

"मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम् ।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ॥
इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ ।
तेषां परः परः श्रेष्ठो विद्यावृत्तिविशेषतः ॥

ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्।
अतः क्रियाविहीनः स मात्र इत्यभिधीयते।
एकोद्दिश्यमतिक्रम्य वेदस्यादानवानृजुः।
स ब्राह्मण इति प्रोक्तो निभृतं सत्त्ववान् घृणी।
एकां शाखां सकल्पां च षड्भिरङ्गैरधीत्य च।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥
वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः।
शेषं श्रोत्रियवत्प्राप्तः सोऽनूचान इति स्मृतः॥
अनूचानगुणोपेतो यज्ञस्वाध्याययन्त्रितः।
भ्रूण इत्युच्यते प्राज्ञैः शेषभोजी जितेन्द्रियः।
लौकिकं वैदिकञ्चैव सर्वं ज्ञानमवाप्य यः।
आश्रमस्थो वशी नित्यमृषिकल्प उदाहृतः॥

न चैवं छिन्नपुच्छे शुनि श्वत्ववदेकदेशविकृतमनन्यवदिति न्यायेन संस्कारादिशून्येऽपि ब्राह्मणत्वादिकमेव स्यान्न व्रात्यत्वम्, तपःश्रुताभ्यां शून्यस्य योनिमात्रस्य सत्त्वेऽपि समुदायादर्धाधिकविकारे उक्तन्यायावतारा-भावात्।

यथा हीरकादिरत्नानि परीक्षया विज्ञायन्ते तथैव ब्राह्मणत्वादयोऽपि परीक्ष्यन्ते। सात्त्विकराजसः, राजससात्त्विकः, सात्त्विकतामसः, तामस-सात्त्विकः, इति प्रधानगुणभावेन वर्त्तमाना गुणा एव वर्णा उच्यन्ते, ते च क्रमेण ब्राह्मणक्षत्रियवैश्यशूद्राः।

ननु—

शूद्रयोनौ हि जातस्य सद्गुणानुपतिष्ठतः।
वैश्यत्वं भवति ब्रह्मन् क्षत्रियत्व तथैव च॥
आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते।' इति।

शूद्रयोनौ जातस्यैव तत्तद्गुणादिभिर्ब्राह्मण्यं क्षत्रियत्वं वैश्यत्वञ्च जायत इति स्पष्टं ज्ञायत इति चेन्न, तत्र ब्राह्मणादिशब्दस्य तत्तुल्यार्थकत्वे दोषाभावात्। महाभाष्ये तथा प्रयोगस्य दर्शितत्वात्। यथा व्यवहारार्थं कल्पिते गुरुप्रतिनिधौ गुरुतुल्यतैव न तु गुरुत्वम्, यथा वा पत्युः श्राद्धे श्राद्धभोक्तरि

पतितुल्यत्वमेव, नतु पतित्वम्, यथा पत्न्याः श्राद्धे श्राद्धभोक्त्र्या न पत्नीत्वम्, किन्तु तत्तुल्यत्वमेव, तद्वत्प्रकृतेऽपि ज्ञेयम्।

ननु सत्यपि विवेके ज्ञानपराक्रमादयो न दृश्यन्त इति चेद् दृश्यन्ते यथाकालम्। यथा नद्यो बहुगंभीरा अपीदानीं पानोपवल्प्तिमात्र-जलास्तथा ज्ञानपराक्रमादयः कालपरतन्त्राः। यत्र भूयान् विवेकः तत्रैव कालमहिम्ना विलोपप्रसङ्गः। कथमन्यत्र तत्संभवः? आकस्मिकस्य स्थायित्वासंभवात् न ब्राह्मणत्वादिजातयो गुणमूलिकाः। गुणानां जात्युपाधीनां न जातित्वं गुणानां परिणामित्वाज्जातीनां नित्यत्वात्।

ननु स्त्रीत्वं पुंस्त्वञ्च द्वे एव जाती आकारभेदात्तथात्वे बह्व्यो जातयो-ऽङ्गीकृता भवेयुः, नानाकारभेददर्शनात्। किञ्च यद्युपाधिभेदेन जातिभे-दस्तदा स्वभावभेदेनापि जातिभेदः स्यात्।

ननु जातिभेदाङ्गीकारेऽपि फलं न दृश्यत इति चेन्न, आम्रत्वादि-जातीनां फलकाले पूर्णत्वदर्शनेऽपि तदभावेऽपि तत्सत्त्वे बाधाभावात्। तथैव ज्ञानपराक्रमनीतिनैपुण्यसेवाकौशलादर्शनेऽपि ब्राह्मणत्वादयः सन्त्येव कालान्तरे फलसंभवात्। व्यञ्जकोपाधीनां कालतन्त्रत्वेन व्यङ्ग्य-जातिनित्यत्वमेव।

तस्य गृत्समदः पुत्रो रूपेणेन्द्र इवापरः ॥५८।
शक्रस्त्वमिति यो दैत्यैर्निगृहीतः किलाभवत् ॥
ऋग्वेदे वर्त्तते चाग्र्या श्रुतिर्यस्य महात्मनः ॥ ५९ ॥
यत्र गृत्समदो राजन् ब्राह्मणैः स महीयते।
स ब्रह्मचारी विप्रर्षिः श्रीमान् गृत्समदोऽभवत्।
पुत्रो गृत्समदस्यापि सुचेता अभवद् द्विजः।
(म० भा० अनु ३०)

इत्यत्र वीतहव्ये तत्पुत्रे च ब्रह्मर्षित्वं प्रतिपाद्य गृत्समदपुत्रस्य सुचेतसो यद्विप्रत्वमाम्नायते, यच्च गृत्समदस्यैव द्विजोत्तमत्वमाम्नायते, यदपि च 'तथैव कथितो वंशो मया गार्त्समदस्तव।' (म० भा० अ० प० ३०।६७) इति वंशस्य गृत्समदानन्तरं प्रवृत्तिरिति तत्सर्वं ब्रह्मर्षीणां गोत्रप्रवर्त्तकत्वे मन्त्र द्रष्टृत्वे च महर्षीणां दैवानुग्रहविशेषेण सत्यपि ब्रह्मवंशकारकत्वं पुत्रद्वारैव

तत्रापि पुत्रतः सप्तमस्यैव मुख्यं ब्राह्मणत्वमिति स्पष्टमेव । अन्यथा हि 'वीतहव्यश्च नृपतिः श्रुतो मे विप्रतां गतः ।' ( म० भा० अ० प० ३०।३ ) इति वीतहव्यब्राह्मण्यप्रश्ने कथम् 'तथैव कथितो वंशो मया गात्सर्मदस्तव' इति वीतहव्यवंशेऽयमित्युपसंहारमकृत्वा गात्सर्मदवंश इति गात्सर्मद-मारभ्यैव वंशानुकीर्त्तनमुपपद्यते ? ( म० भा० ) शल्यपर्वणि ४०।४१ अध्याययोः आर्ष्टिषेणापाख्याने ।

'यत्रार्ष्टिषेणः कौरव्यो ब्राह्मण्यं संशितव्रतः ।
तपसा महता राजन् प्राप्तवानृषिसत्तमः ॥
सिन्धुद्वीपश्च राजर्षिर्देवापिश्च महातपाः ।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रस्तथा मुनिः ॥

( म० भा० शल्यपर्व. ३९।३६-३७ )

पुरा कृतयुगे राजन्नार्ष्टिषेणो द्विजोत्तमः ।
वसन्गुरुकुले नित्यं नित्यमध्ययने रतः ॥ ३ ॥
समाप्तिं नाममद्विद्या नापि वेदा विशाम्पते ॥ ४ ॥
स निर्विण्णस्ततो राजंस्तपस्तेपे महातपाः ।
ततो वै तपसा तेन प्राप्य वेदाननुत्तमान् ॥ ५ ॥
स विद्वान् वेदयुक्तश्च सिद्धश्चाप्यृषिसत्तमः ।
तत्र तीर्थे वरान् प्रादात् त्रीनेव सु महातपाः ॥६॥
अस्मिंस्तीर्थे महानद्या अद्य प्रभृतिमानवः ।
आप्लुतो वाजिमेधस्य फलं प्राप्स्यति पुष्कलम् ॥ ७॥
अद्य प्रभृति नैवात्र भयं व्यालाद्भविष्यति ।
अपि चाल्पेन कालेन फलं प्राप्स्यति पुष्कलम् ॥ - ॥
एवमुक्त्वा महातेजा जगाम त्रिदिवं मुनिः ।
एवं सिद्धः स भगवानार्ष्टिषेणः प्रतापवान् ॥ ९ ॥
तस्मिन्नेव तदा तीर्थे सिन्धुद्वीपः प्रतापवान् ।
देवापिश्च महाराज ब्राह्मण्यं प्रापतुर्महत् ॥ १०॥
तथा च कौशिकस्तात तपो नित्यो जितेन्द्रियः ।
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ॥ ११॥

( म० भा० श० प० ४० )

अत्र सर्वविद्यानधिगमे दुःखितस्य तपसा सर्वविद्यावाप्तिरेव वर्णिता न ब्राह्मणत्वप्राप्तिः । तथा च विद्यावाप्तिरूपं ब्राह्मण्यमार्ष्टिषेणविश्वामित्रादीनामुक्तम्, नतु ब्राह्मणत्वजातिप्राप्तिः।

यच्चानुशासनिके पर्वणि

'ब्राह्मणत्वं गतस्तात ब्रह्मर्षित्वं तथैव च ।'

(म० भा० अ० प० ४।१)

'ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः ॥

(म० भा० अनु० प० ४।४८)

'राजर्षिर्दुर्लभं प्राप्तो ब्राह्मण्यं लोकसत्कृतम् ।'

कथं प्राप्तं महाराज क्षत्रियेण महात्मना ॥१॥

विश्वामित्रेण धर्मात्मन् ब्राह्मणत्व नरर्षभ, (म० भा० अ० प० ३)

इत्यादावपि ब्राह्मणता शब्देन ब्राह्मणशब्द व्यवहार एवोक्तः न ब्राह्मणत्वजातिः। अन्येषां रीत्या तु विश्वामित्रादीनां देवताप्रसादजन्यस्मरणलक्षणमेव ब्राह्मण्यम् । नेदानीन्तनानां शान्त्यादिगगमात्रेण ब्राह्मण्यं लब्धु शक्यम्।

नन्विदानीं चातुर्वर्ण्यधर्मादर्शनात् कथं चातुर्वर्ण्याभ्युपगमो युक्त इति चेन्न, यतः —

'ततस्तु द्विशते काले लभते काण्डपृष्ठताम् । ११ ॥
काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्त्तते ॥
ततस्तु त्रिशते काले लभते जपतामपि ॥ १२ ॥
तां च प्राप्य चिरं काल तत्रैव परिवर्त्तते ॥
ततश्चतुःशते काले श्रोत्रियो नाम जायते ॥ १३ ॥

(म० भा० अनु० प० २८)

इत्यादौ जपतापदेन गायत्रीजपनिष्ठता प्रोक्ता। तावताऽपि चातुर्वर्ण्यस्थितिः सिद्धयति । इदानीं तु तत्र तत्राग्निहोत्रवैश्वदेवादिबहुविधवैदिककर्मानुष्ठानं दृश्यत एव ।

## वज्रसूचीसंवादः

वज्रसूच्यादावपि 'ब्राह्मण क्षत्रियवैश्यशूद्रा इति चत्वारो वर्णा' इति वचनेनैव चातुवर्ण्यं सिद्धयति । उत्कर्षस्तु ब्रह्मज्ञानेनैव भवति । यदि

चाध्ययनादिकं ब्राह्मणप्रयोजकं भवेत्तदा तर्हि शूद्रेष्वपि दृश्यमानत्वादध्ययनं न निमित्तमित्यसंगतमेव स्यात्। यद्यपि ब्राह्मणमातापितृकत्वेनैव ब्राह्मणत्वजातिनिर्णयस्तथापि कर्माधिकारप्रयोजकं ब्राह्मण्यं नोक्तजन्ममात्रेण, किन्तु जन्मकर्माभ्यामेव। वज्रसूच्या ब्रह्मज्ञानलक्षणं ब्राह्मण्यमेव विवक्षितम्। न च कर्माधिकारप्रयोजकं ब्राह्मण्यं तत्। कर्माधिकारप्रयोजकं ब्राह्मण्यन्तु जातिकृतमेव। क्षत्रियादीनां कर्मणोत्कर्षे समानेऽपि ब्राह्मणानां जात्याप्युत्कर्षः। तपोविशेषादिना मन्त्रसिद्ध्यादिलक्षणं ब्राह्मण्यम्, नतु ब्राह्मण्यलाभः। भविष्यपुराणादिगतानां जात्यादिनिषेधवचनानां पूर्वपक्षरूपतैव। अतएव तत्रतत्र जातिमात्रेणापि ब्राह्मणानामुत्कर्षप्रतिपादनम्।

यथा भविष्य पुराणे—

सर्ववेदमयं विप्र सर्वलोकमयं तथा।
मयाप्यवगतं वीर ब्राह्मणं न परीक्षयेत् ॥३७॥
तस्मात्संपूजयेदेनं न गुणांस्तस्य चिन्तयेत्।
केवलं चिन्तयेज्जातिं न गुणान् विनतात्मज ॥ ३८ ॥
तस्मादामन्त्रयेत्पूर्वमासन्नं ब्राह्मणं बुधः। ३९।
यस्त्वासन्नमतिक्रम्य ब्राह्मणान् पतिताद्दृते।
दूरस्थान् पूजयेन्मूढो गुणाढ्यो नरकं व्रजेत् ॥४०॥
'त्रयाणामेव वर्णानां जन्मतो ब्राह्मणः प्रभुः।
संसृष्टा ब्राह्मणाः पूर्वं तपस्तप्त्वा द्विजोत्तमाः ॥१॥
जन्मना चोत्तमोऽयञ्च सर्वार्चां ब्राह्मणोऽर्हति ॥३॥
यस्माद्विष्णुमुखाद्विप्रः समुद्भूतः पुरा द्विजाः ॥१२॥
भ. पु. द्वि० पर्व० पञ्चमाध्याये।

प्रथम पर्वणि द्वितीयाध्याये—

'लोकस्येह विवृध्यर्थं मुखबाहूरुपादतः ॥५१॥
ब्रह्मक्षत्रं तथाचोभौ वैश्यशूद्रौ नृपोत्तम ॥५२॥
सर्वस्य राजन् सर्गस्य गुप्त्यर्थं च महाद्युते।
मुखबाहूरुपादानां पृथक्कर्माण्यकल्पयत् ॥१२०॥
अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहञ्चैव ब्राह्मणानामकल्पयत् ॥१२१॥

प्रजानां पालनं राजन् दानमध्ययनं तथा।
विषयेषु प्रसक्तिश्च तथेज्यां क्षत्रियस्य तु ॥१२२॥
पशूनां रक्षणं दानमिज्याध्ययनमेव च।
वणिक्पथं कुसीदञ्च वैश्यस्य कृषिरेव च ॥१२३॥
एकमेव तु शूद्रस्य कर्म लोके प्रकीर्तितम्।
एतेषामेव वर्णानां शुश्रूषामनुपूर्वशः ॥१२४॥
पुरुषस्य सदा श्रेष्ठं नाभेरूर्ध्वं नृपोत्तम।
तस्मादपि शुचितरं मुखं तात स्वयंभुवः ॥१२६॥

(भ. पु. १।२)

तस्मान्मुखाद् द्विजो जात इतीयं वैदिकी श्रुतिः।
'त्रयाणामपि वर्णानां भावाभावाय वै द्विजः ॥ ४ ॥
भवेद्राजन्नसन्देहस्तुष्टो भावाय वै भवेत्।
अभावाय भवेत्क्रुद्धस्तस्मात्पूज्यः सदा हि सः ॥ ५ ॥
ब्रह्मत्वं कीदृशो विप्रो ब्रह्मलोकञ्च गच्छति।
नाममात्रोऽथ किं विप्रो ब्रह्मत्वं ब्रह्मणः सदा।
याति ब्रह्मन् गुणाः के स्युर्ब्रह्म प्राप्तौ ममोच्यताम्।

(भ. पु १।२।१४०)

सुमन्तुरुवाच—

ये प्रोक्ता वेदशास्त्रेषु संस्कारा ब्राह्मणस्य तु

(भ० पु० १।२।१४२)

'गर्भाधानादयो ये च संस्कारा यस्य पार्थिव।
चत्वारिंशत्तथाष्टौ च निर्वृत्ताः शास्त्रतो द्विजाः।
स याति ब्रह्मणः स्थानं ब्राह्मणत्वेन संयुतः' ॥ ६ ॥

(भ० पु० द्वि० पर्व अ० ५)

संस्कारा सर्वथा हेतुर्ब्राह्मणत्वे न संशयः।
जातकर्मादिसंस्कारान् वर्णानामनुपूर्वशः।

(भ० पु० अ० ३)

'गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राजन् क्षत्रियस्य विनिर्दिशेत् ॥
द्वादशाब्दे तु वै गर्भाद् वैश्यस्य व्रतमादिशेत् ।
ब्रह्मवर्चसकामेन कार्य्यं विप्रस्य पञ्चमे ।
बलार्थिना तथा राज्ञः षष्ठेऽब्दे कार्यमेव हि ॥
अर्थकामेन वैश्यस्य अष्टमे कुलनन्दन ।
आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्त्तते ॥
द्वाविंशतेः क्षत्रबन्धोराचतुर्विंशतेर्विशः ।
भवन्ति राजंश्चर्माणि व्रतिनां विविधानि च ॥
कार्ष्ण-रौरववास्तानि ब्रह्मक्षत्रविशां नृप ।
वसीरंश्चानुपूर्व्येण वस्त्राणि विविधानि च ॥
................ ... शाणक्षौमाविकानि च ।
'मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वीज्या, वैश्यस्य शणतान्तवी ॥
मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकवल्वजैः ।
त्रिवृताग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥
कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥
ब्राह्मणो बैल्वपालाशौ तृतीयं सक्षजं नृप ।
वाटखादिरौ क्षत्रियस्तु तथान्यं वैतसोद्भवम् ॥
पैलवोदुम्बरैः वैश्यस्तथाश्वत्थजमेव च ।
दण्डानेतान् महाबाहो धर्मतोऽर्हन्ति धारितुम् ॥
केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः ।
ललाटसंमितो राज्ञः स्यात्तु नासान्तिको विशः ॥'

(भ० पु० १।३)

२६ अध्याये प्रतिसर्गपर्वणि चतुर्थखण्डे

'कल्किनो वदनाज्जातो ब्राह्मणो वर्ण एव च ।
बाह्वोः क्षत्रं विशो जान्वोः शूद्रो वर्णस्तथाङ्घ्रयोः ॥ ६ ॥

गौरो रक्तस्तथा पीतः श्यामस्ते ब्राह्मणादयः ।
देव्याः शक्तिं समाधाय जनिष्यन्ति सुतान्बहून् ॥ ७ ॥
एकविंशत् किष्कुमिता मनुजा धर्मरूपिणः ।
जातिधर्मं समादाय यजिष्यन्ति सुरान् मुदा ॥ ८ ॥'

नह्येतानि वचनानि गुणकर्ममूलकं ब्राह्मण्यमादाय समञ्जसानि भवन्ति, किन्तु जातिवादमाश्रित्यैव । जन्मत एव साङ्कर्य्यान्नापितादिजातिविशेषाम्नानम् । तथाहि ब्रह्मवैवर्त्ते ब्रह्मखण्डे दशमाध्याये

'सौतिरुवाच—

भृगोः पुत्रश्च च्यवनः शुक्रश्च ज्ञानिनां वरः ।
क्रतोरपि क्रिया भार्य्या बालखिल्यानसूयत ॥ १ ॥
त्रयः पुत्राश्चाङ्गिरसो बभूवुर्मुनिसत्तमाः ।
बृहस्पतिरुतथ्यश्च शम्बरश्चापि शौनक ॥ २ ॥
वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः ।
पराशरसुतः श्रीमान् कृष्णद्वैपायनो हरिः ॥ ३ ॥
व्यासपुत्रः शिवांशश्च शुकश्च ज्ञानिनां वरः ।
विश्रवाः पुलस्त्यस्य यस्य पुत्रो धनेश्वरः ॥ ४ ॥
रावणः कुंभकर्णश्च धार्मिकश्च विभीषणः ॥१०॥
पुलहस्य सुतो वात्स्यः शाण्डिल्यश्च रुचेः सुतः ।
सावर्णिर्गौतमाज्जज्ञे मुनिप्रवर एव सः ॥११॥
काश्यपः कश्यपाज्जातो भरद्वाजो बृहस्पतेः ।
स्वयं वात्स्यश्च पुलहात् सावर्णिगौतमात्तथा ॥१२॥
बभूवुः पञ्च गोत्राश्च एतेषां प्रवराभवे ॥१३॥
बभूवुः ब्रह्मणो वक्त्रादन्या ब्राह्मणजातयः ।
ताः स्थिता देशभेदेषु गोत्रशून्याश्च शौनक ॥१४॥
चन्द्रादित्यमनूनाञ्च प्रवराः क्षत्रियाः स्मृताः ।
ब्रह्मणो बाहुदेशाच्चैवान्याः क्षत्रियजातयः ॥१५॥
ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः ।
तासां संकरजातेन बभूवुर्वर्णसंकराः ॥१६॥

गोपनापितभिल्लाश्च तथामोदककूबरौ ।
ताम्बूलिस्वर्णकारौ च वणिग् जातय एव च ॥१७॥
इत्येवमाद्या विप्रेन्द्र सच्छूद्राः परिकीर्त्तिताः ।
शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः ॥१८॥
विश्वकर्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥१९॥
मालाकारः कर्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कांस्यकारः षडेते शिल्पिनां वराः ॥२०॥
सूत्रधारश्चित्रकारः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादयाज्या वर्णसंकराः ॥२१॥

शापवशाच्छूद्रयोनौ जातायां घृताच्यां शापवशादेव ब्राह्मणयोनौ जाताद्विश्वकर्मणः सकाशात् पूर्वोक्ताः शिल्पिनो जाताः । तत्रैव च शूद्रायां कुलटायां चित्रकारादट्टालिकाकारो जातः । तस्माच्च कुंभकारयोषिति कोटकः । कुम्भकारात् कोटकयोषिति तैलकारो जायते । क्षत्रियाद्राजपुत्रस्य योषिति तीवरो जायते । तीवरात्तैलकारस्य योषिति लेटो जायते । लेटात्तीवर कन्यायां मात्रमन्वगमात् भडकोलकलन्दरा जायन्ते । ब्राह्मण्यां शूद्रवीर्य्येण चण्डालः । तीवराच्चाण्डाल्यां चर्मकारः । चर्मकार्यां चाण्डालान्मांसच्छेदी जायते । तस्माच्च तीवरेण कोञ्चो जायते । कोञ्चस्त्रियां कैवर्तात् फर्जारः परिकीर्तितः । चण्डालकन्यायां लेटवीर्य्येण हाडिडभौ जायेते । हाडिकन्यायां गङ्गापुत्रो जायते । गङ्गापुत्रकन्यायां वेशधारिणः । वेशधराकन्यायां शुङ्गी च पुत्रो जायते । वेश्यात्तीवरकन्यायां शुण्डी जायते । शूण्डियोषिति वैश्यात् पौण्ड्रकः, क्षत्रात्करणकन्यायां राजपुत्रो जायते । राजपुत्र्यां करणादागरी जायते क्षत्रवीर्य्येण वैश्यायां कैवर्त्तः । कलौ तीवरसंसर्गाद् धीवरो । तीवर्य्यां धीवराद्रजको जायते । रजक्यां तीवराच्च कौपाली । नापितात्गोपकन्यायामृषिवीर्य्येण ऋतोः प्रथमवासरे कूदरो जातः ।

'तदशौचं विप्रतुल्यं पतितो ऋतुदोषतः ॥११६॥
क्षत्रवीर्येण वैश्यायां ऋतोः प्रथमवासरे ।
जातः पुत्रो महादस्युर्बलवांश्च धनुर्धरः ॥११७॥

चकार वागतीतं च क्षत्रियेणापि वारितः ।
बलवन्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः ॥११९॥
अविद्धकर्णाः क्रूराश्च निर्भया रणदुर्जयाः ।
शौचाचारविहीनाश्च दुर्धर्षा धर्मवर्जिताः ॥१२०॥
जोलात्कुविन्दकन्यायां शरांकः परिकीर्त्तितः ॥१२१॥
कश्चित्पुमान् ब्रह्मयज्ञे यज्ञकुण्डात्समुत्थितः ।
स च मृतो धर्मवक्ता मत्पूर्वपुरुषः स्मृतः ॥१३४॥
पुराणं पाठयामास तञ्च ब्रह्मा कृपानिधिः ।
पुराणवक्ता सूतश्च यज्ञकुण्डसमुद्भवः ॥१३५॥
वैश्यायां सूतवीर्य्येण पुमानेको बभूव ह ।
स भट्टो वावदूकश्च सर्वेषां स्तुतिपाठकः ॥१३६॥

## कलावपि वर्णविभागः

यद्यपि लिङ्गपुराणे ४० अध्याये कलिवर्णनप्रसङ्गे श्रुतेरप्रामाण्यमधर्माभिमुख्यं । वर्णाश्रमविलोपश्चोक्तम्,तदपि न किञ्चित् —

कलौ देवो महादेवः शंकरो नीललोहितः ।'२०॥
प्रकाशते प्रतिष्ठार्थं धर्मस्य विकृता कृतिः ।
ये तं विप्रा निषेवन्ते येन कनापि शंकरम् ॥२१॥
कलिदोषान् विनिर्जित्य प्रयान्ति परमं पदम् ॥'

इति तत्रैव वर्णाश्रमव्यवस्थासमर्थनञ्चोपलभ्यते । घोरे कलावपि स्वल्पसंख्यानां वर्णाश्रमिणामवस्थानं पुनश्च तैरेव वर्णाश्रमप्रवर्त्तनं विज्ञायते तत्रैवाध्याये —

प्रवृत्ते तु ततस्तस्मिन पुनः कृतयुगे तु वै ॥७५॥
उत्पन्नाः कलिशिष्टाश्च प्रजाः कार्तयुगास्तदा ।
तिष्ठन्ति चेह ये सिद्धा अदृष्टा विचरन्ति च ॥७६॥
सप्तसप्तर्षिभिश्चैव तत्र ते तु व्यवस्थिताः ।
ब्रह्म-क्षत्र विशः शूद्राः बीजार्थं ये स्मृता इह ॥७७॥
कलिजैः सहते सर्वे निर्विशेषास्तदाभवन् ।
तेषां सप्तर्षयो धर्मं कथयन्तीतरेऽपि च ॥ ७८ ॥

वर्णाश्रमाचारयुतं श्रौत स्मार्त्तं द्विधा तु यम् ।
ततस्तेषु क्रियावत्सु वर्धन्ते वै प्रजाः कृते ॥ ७६ ॥
श्रौतस्मार्त्तकृतानाञ्च धर्मे सप्तर्षिदर्शिते ।
केचिद्धर्मव्यवस्थार्थं तिष्ठन्तीह युगक्षये ॥ ८० ॥
मन्वतराधिकारेषु तिष्ठन्ति मुनयस्तु वै ।'

तत्रैवाध्याये वर्णाश्रमविभागो युगे युगे वर्णितः ।

'एवं वर्णाश्रमाणान्तु प्रविभागो युगे युगे ॥ ९८ ॥
युगस्वभावस्तु तथा विधत्ते वै तदा प्रभुः ।
वर्णाश्रमविभागश्च युगानि युगसिद्धयः" ॥ ९९ ॥

एवमेवाग्निपुराणे १५१, १८२ अध्याययोः, कल्किपुराणे २ अध्याये गरुडपुराणे ५ अध्याये, मार्कण्डेयपुराणे ११ अध्याये च स एव प्रसङ्गोऽवलोकनीयः ।

पूर्वं शुक्लादिवर्णनिबन्धनत्वं ब्राह्मण्यादीनामासीत् । भारते भृगुभरद्वाजसंवादे, इदानीं तदनुसारेण व्यवस्थाभावे कारणमुपपादितम् । यथाधुना राजादिपदवीं प्राप्नुवन्ति तथैव महता तपसा विश्वामित्रेण ब्राह्मणशब्दो ब्राह्मणपदवीनिबन्धनः प्राप्तो न ब्राह्मणजातिप्रवेशः, सापिण्डव्यवस्थानुपपत्तेः ।

'प्रजातन्तुं मा व्यवच्छेत्सीः' इति सापिण्ड्योच्छेदस्तु निषिद्धोऽङ्गीकृतः स्यात् । नान्यथा जात्यन्तरप्रवेशः । यत्र जातौ प्रविष्टस्तत्राप्यभिनवस्य सापिण्ड्यं निरुद्धं केनाप्यसम्बन्धात् । गोत्रप्रवर्त्तको विश्वामित्रस्तु जातिब्राह्मण एव । यं गायत्र्या ऋषिं सस्माराभिनवो विश्वामित्रनामा (ब्राह्मणः) तस्य ब्राह्मणशब्दलाभात् पूर्वं यद्गोत्रं तदेवानुवृत्तं सापिण्ड्येऽन्यथोभयभ्रष्टत्वापत्तेरिति केचित् ।

शीलादिभिरपि तत्रैव जातिनिर्णयो यत्र पितृनिर्णयो न स्यात् । वृत्तमेव ब्राह्मण्यहेतुरित्याकर्ण्य रामावतारसमये शम्बूकः तपसि प्रवृत्तः । तेनापचारेण ब्राह्मण पुत्रो मृतः अतः स शम्बूको रामेण दण्डितः ।

। किञ्च वृत्तबोधकवचनेन यदि दुर्वृत्तत्वं निषिद्ध्यते, तदा जातिसमानाधिकरणं युक्तमेव, यदि च जातिस्वाध्यायश्रुतानि व्युदस्य वृत्तमभिलक्ष्य ब्राह्मणत्वं

विधीयते, तदा जातिव्यधिकरणस्य वृत्तस्य वर्णसंकरेऽपि संभवेन तत्रापि ब्राह्मणत्वापत्तिः। वृत्तसम्पन्नोऽपि शम्बूकः जातिविरुद्धधर्माचरणेन दण्डितः, जातिसम्पन्नोऽपि दुर्वृत्तो रावणो हतः।

'न जातिर्न कुलं राजन् न स्वाध्यायः श्रुतं न च।
कारणानि द्विजत्वस्य वृत्तमेव हि कारणम्॥
चतुर्वेदोऽपि दुर्वृत्तो शूद्रादल्पतरो हि सः।'

इत्यादि वचनानि तु जात्यादिसम्पन्नानामपि वृत्तं परमावश्यकमिति वृत्तं विना जात्यादीनामकिञ्चित्करत्वं बोधयन्ति, भक्तिं विना यज्ञादीनामिव। तदुक्तम्—

'वृत्तमन्विष्यताम् तात रक्षोभिः किं न पठ्यते ?
बहुना किमधीतेन नटस्येव दुरात्मनः॥'

रक्षसा दुर्वृत्तेन पठितं वधाय न परिपन्थि, शूद्रेणाधीतं तपश्चरितञ्च न नवधं प्रतिवद्धुमीष्टे।

'कपालस्थं यथा तोयं श्वदृतौ च यथा पयः।
दूष्यं स्यात् स्थानदोषेण वृत्तहीनं तथा श्रुतम्॥'
'सत्यं ज्ञानं क्षमाशीलमानृशंस्यं तपो घृणा।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः॥२१॥

(म० भा० व० प० १८०)

इति वचनन्तु जातिब्राह्मण्यस्य लक्षणमावेदयति। न लक्षणप्राधान्ये ब्राह्मण्य विद्यते। पूर्वोक्तदृष्टान्तानुरोधात्। तत्तज्जातिनिर्णये लोक एव प्रमाणं विशेषतश्च तत्तत्कुलपुरोहित एव। जातिमूलकवैदिकधर्मानुष्ठानादिभिरेव ब्राह्मणत्वादिकम्।

वस्तुतस्तु न केवलैर्लौकिकैर्गुणैः कर्मभिश्च ब्राह्मण्यादिकं किन्तु शास्त्रैकसमधिगम्यैर्वेदाध्ययनतदर्थानुष्ठानादिभिरेव तत्संभवति। वेदाध्ययनादिकं तु जन्ममूलकब्राह्मणादिकर्तृकमेव, नान्यथा त्रिवर्णेतराणामुपनयनादिसंस्काराविधानात्। कर्मणा वर्णव्यवस्थायां तु जन्मना यवनाङ्गलादीनामपि कर्मणा ब्राह्मणत्वादिसम्पत्तौ जन्मना ब्राह्मणादिभिर्यौनसम्बन्धे सर्वथापि रक्तसाङ्कर्यं वर्णसाङ्कर्यादपि निकृष्टतरं प्रसज्यते। तथा च हिन्दुत्वमेव

किमिति निर्धारयितुं न पार्य्यते। सर्वसाङ्कर्य्ये मानव इत्येव वक्तव्यो हिन्दुत्वाग्रहोऽपि व्यर्थ एव स्यात्। हिन्दूशास्त्रानुसारित्वेन हिन्दुत्वे तु शास्त्रानुसारेणैव जन्ममूलकवर्णव्यवस्थाऽप्यङ्गीकार्य्या। तथा गुणकर्मादिभिर्गौणमेव ब्राह्मण्यादिकं प्रशंसार्थमेव तत्र तत्रोक्तम्। मुख्यं ब्राह्मण्यादिकन्तु अविच्छिन्नब्राह्मणमातापित्रादिपारम्पर्य्येणैव भवति।

●

# वर्णद्वयवादः

यदुक्तम् हत्वी दस्यून् प्रार्य्यं वर्णमावत्' ( ऋ० सं० ३।३४।९ ) 'दासं वर्णमधरं गुहाकः ( ऋ० सं० २।१२।४ ) इत्याभ्यां वचनाभ्यां द्वावेव वर्णौ सिद्ध्यतः। वेदेषु ब्राह्मणादिशब्दानामुपलभ्यत्वेऽपि न तेषां वर्णपरत्वम्। आर्य्यवर्णो गौरः शुक्लः, दासवर्णो असितः कृष्ण, कृष्णवर्णो द्विजो गौरः शूद्रश्चेत्साङ्कर्य्ये सत्येव भवतीति लोकप्रवादः। पुराणादौ जातिपरो ब्राह्मणादि शब्दो यत्र दृश्यते तत्रोपाधिमूलक एवेति मन्तव्यम्। वैद्यज्यौतिषि न्यायाधीश इव उपवर्णः, उपजातिः उपाधिरित्यनर्थान्तरम्। अनपायिनी यावदाश्रयभाविनी समानप्रसवात्मिका च जातिः, आगमापायिनो अयावदाश्रयभाविनी चोपजातिरिति विशेषः।

आर्य्य-दास शब्दावेव मनुष्यादिशब्दवज्जातिवाचकौ न ब्रह्मणादयः शब्दाः। पुरा खल्वार्य्यावर्त्ते ये नगर-ग्राम-वासिनः सभ्यास्तेषामार्य्यत्वं ये त्विहावीतरागा अप्यरण्याश्रिता गिरिकन्दरवासिनोऽसभ्यास्तेषामनार्य्यत्वमिति जातिद्वयं जन्मस्थानव्यवहारादि विभेदतः पार्थक्येन वर्णनीयमासीत्। तथैवानार्य्याणामपि आर्य्यानुगतत्वाननुगतत्व भेदाद् द्वैविध्यं सम्पन्नम्। ये ह्यार्य्यानुगतास्ते दासास्तद्विपरीता दस्यवः। त एव दासाः शूद्रा इति दस्यवस्तु म्लेच्छा इति चाख्याताः। इत्थमिह पञ्च वर्णाः। एताश्च पञ्च श्रेणयो मनुष्याणामेवेति मनुष्यशब्दपर्य्यायत्वमाप्तः पञ्चजन इति। एतेषु पञ्चजनेषु गुणकर्मभेदत एव ब्राह्मणः, क्षत्रियो, वैश्य इति त्रय आर्य्या, दासो दस्युश्चेति द्वावनार्य्यौ इति स्थित"मिति, तदेतद्वेदादिशास्त्रतात्पर्य्याज्ञानविजृम्भितम्। इहैव मन्त्रब्राह्मणात्मकवेदाश्रयेण चातुर्वर्ण्यस्य साधितत्वात्। 'प्रार्य्यं वर्णमित्यत्र तु आर्य्यशब्दो न जातिपरः किन्तु श्रेष्ठतामात्रपर इति त्वयाप्युक्तत्वात्। तथा च 'तद्य इह रमणीयचरणाः ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनि'मिति ( छा० उ० ५।१० ) श्रुत्यैकवाक्यतया त्रैवर्णिकानामेवार्य्यवर्णत्वमुक्तम्। एकवचनन्तु जात्यभिप्रायेण। चतुर्थस्य दासवर्णत्वमुक्तम्। तस्य सेवाप्रधानत्वात्। अतएव—

'ज्ञानी तुष्टश्च शान्तश्च सत्यवादी जितेन्द्रियः।
दाता दानी दयालुश्च स्यादार्य्यो ह्यष्टभिर्गुणैः॥'

इति व्यासस्मृतौ गुणमूलकत्वमेवार्य्यत्वमुक्तम्।

यदुक्तम्–वेदेषु ब्राह्मणादिपदानां सत्त्वेऽपि तत्र वर्णप्रयोगाभावान्न वर्णत्वमिति तत्तुच्छम्, ब्राह्मणादीनां वर्णत्वाभावे वर्णशब्दस्य निर्विषयत्वापत्तेः। न चार्य्यशब्देन विषयसमर्पणम्, तस्य श्रैष्ठ्यपरत्वाभ्युपगमात्। ब्राह्मणयोनिमिति योनिशब्देन तस्य जातिपरत्वमपि निर्णीयते। श्वयोनिमित्यादौ योनिशब्दस्य जातिपरत्वनिश्चयात्। अत एव वर्णो द्विजादौ शुक्लादौ (नानार्थ० व० ४८) इत्यमरोऽपि द्विजादौ वर्णशब्दप्रवृत्तिमाह। आर्य्यशब्दश्च जातिपर्य्याय इति त्वयापि स्वीकृतम्। आर्य्यवर्णो द्विजवर्ण उत्तमवर्ण इत्यप्यङ्गीकृतम्। आर्य्यवर्णः शुक्लवर्णः इत्यादिकं तु प्रमादकृतमेव, जातिपरत्वाभ्युपगमविरुद्धत्वात्। शुक्लादिवर्णोऽपि न केवलं रङ्गमात्रपरः, किन्तु सत्त्वादि गुणपरः। 'लोहितशुक्लकृष्णाम्।' (तै० आ० १०।४०।१) इत्यादौ प्रकाशकत्वात्स्वच्छत्वात्सत्त्वं शुक्लम्, रागात्मकत्वेन रञ्जनाल्लोहितं रजः, आवरणादवष्टम्भाच्च कृष्णं तमः, तथा च विष्णौ रङ्गस्य श्यामलत्वेऽपि यथा सत्त्वात्मकत्वाच्छुक्लत्वं तथैव व्यासशुकचाणक्यादिषु श्यामलत्वेऽपि सत्त्वात्मकत्वेन शुक्लत्वमेवेति मन्तव्यम्। अन्यथा खल्वाङ्ग्लादीनामेव ब्राह्मणत्वं स्यान्न कृष्णेषु भारतीयेषु, तेषु कृष्णत्वेन शूद्रत्वापातात्।

एतेन ब्राह्मणादिशब्दा न जातिवाचकाः उपाधिपरत्वादित्यपि निरस्तम्। त्वद्रीत्याऽर्य्यशब्दस्याप्युपाधिपरत्वेन त्वदभ्युपगमविरोधापातात्। यथा ब्राह्मणादि शब्दानामुपाधिपरत्वं त्वयोक्तं तथैवार्य्यशब्दस्याप्यष्टगुणवत्त्वेनोपाधिपरत्वमङ्गीकृतम्। पुनश्चार्य्यशब्दस्य जातिपरत्वोक्त्या कथं न तव स्वोक्त्यैव विरोधः? 'ब्राह्मोऽजातौ' (६।४।१७१) इत्यादि व्याकरणस्मृत्यनुसारेण जातिपरत्वमेव ब्राह्मणशब्दस्य तथान्यत्र तत् विस्तरेणोक्तमेव।

किञ्च त्वद्रीत्या आर्य्यानार्य्यभेदोऽपि नगरादिनिवासित्वारण्यनिवासित्वादिभेदमूलक एवेति न तत्रापि त्वद्रीत्यापि जातिव्यवहारो युक्तः। आर्य्यानुगत्यादिकमपि उपाधिरेव। तथा च दासवर्णोऽपि न सिद्ध्यत्येव। तस्मादन्यमन्त्रब्राह्मणादिभिरेकवाक्यतया द्विज एव श्रेष्ठो वर्णः, शूद्रोऽवरवर्णस्तद्भिन्नोऽवर्णस्तेनैव पञ्चजनत्वमपि मानवे संगच्छते।

# एकवर्णवादः

एवमेवैकवर्णव्यवहारोऽपि शास्त्रतात्पर्य्याज्ञानविजृम्भित एव।

यदुक्तम् "ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्। तच्छ्रेयो रूपमत्यसृजत क्षत्रं......स नैव व्यभवत् स विशमसृजत (बृ० उ० १।४।११-१२) इति वचनेन पूर्वं ब्राह्मण एवासीत् क्षत्रियादिकं नासीत् इति रक्षणादिकार्य्यसमर्थत्वात् बलपराक्रमादिविक्रमादिविशिष्टं क्षत्रियं सोऽसृजत्। अतएव 'क्षत्रस्य योनिर्यद् ब्रह्म" (बृ० उ० १।४।११) इत्यनेनादिब्राह्मणस्यैव क्षत्रयोनित्वं विज्ञायते। ततोऽपि कृषिवाणिज्यादिकर्म करणाय वैश्यमसृजत्। परिचर्याद्यर्थं शौद्रं वर्णमसृजत्। अत्र सर्वत्र योग्यतानुरोधेन ब्राह्मणसमुदाय एव क्षत्रियादिकं निर्धारितवानित्येवार्थः" इति तदपि तुच्छम्, विप्रतिषिद्धत्वात्। अत्र हि ब्राह्मणस्य क्षत्रिययोनित्वेन क्षत्रियोत्पादकत्वमेव सिद्ध्यति, न तु ब्राह्मणेष्वेव योग्यतानुरोधेन केचित्क्षत्रियरूपेण निर्धारिता इत्यर्थः सिद्ध्यति। तथार्थकल्पने मानाभावात्। सृजेरुत्पादनार्थत्वात्। पूर्वमयं लेखक उक्तवान्—'ब्राह्मणादिशब्दैः सह वर्णपदप्रयोगाभावात् ब्राह्मणादीनां वर्णत्वं नास्ति। इदानीं 'ब्राह्मण एक एव वर्णः कृतयुग आसीदि'ति वक्ति। तदुद्धृतश्रुतौ तु शौद्रं वर्णमिति शूद्रस्य वर्णत्वव्यपदेशः स्पष्टमुपलभ्यते।

वस्तुतः सृष्टिक्रमे पौर्वापर्यं स्वाभाविकमेव भवति। न तावता पश्चाद्भाविनामपलापः संभवति। यथा वाय्वादि सृष्टेः पूर्वमाकाशमेवासीत्। तत एव वाय्वादीनामुत्पत्तयो जाताः। तावताऽपि न वाय्वादीनां भूतान्तरत्वप्रतिषेधः संभवति। तथैव पूर्वं ब्राह्मण एवासीत् पश्चात् क्षत्रियादय उत्पन्नाः। न तावतैकवर्णत्वं वस्तुभूतम्। तत्रैव ब्रह्मणः मुखत एव वर्णत्वोक्तेः।

न चात्र कल्पनामात्रमुत्पत्तिः, आकाशाद्वाय्वादेरिव ब्राह्मणात्क्षत्रियाद्युत्पत्तिबोधनविरोधात्। तत्रापि 'बाहू राजन्य' इति श्रुत्यनुरोधेन ब्रह्मणो ब्राह्मणत्वेन तस्यैव मुखाद्, ब्राह्मणः बाहुभ्यां राजन्यो, मध्याङ्गाद्वैश्यः, पद्भ्यां शूद्रो जात इत्येवार्थः प्रत्येतव्यः।

एतेन ब्रह्म देवानजनयत्। ब्रह्म विश्वमिदं जगत्।

ब्रह्मणः क्षत्रं निर्मितम्, ब्रह्म ब्राह्मणमात्मना' इति ( तै० ब्रा० २।८।८।९ ) इत्यपि व्याख्यातम् । अत्रापि ब्रह्मणो हिरण्यगर्भस्य विराज एव वा ब्राह्मणत्वम् । तेनैव तत एव देवानामप्युत्पत्तिरुक्ता ।

यत्तु "विद्वांसो वै देवा' इत्यनेन विदुषामेव देवत्वं सिद्ध्यती'ति, तदपि तुच्छम्, 'विद्वांसो ब्रह्मराक्षसा' इति वाल्मीकिवचनेन विदुषां ब्रह्मराक्षसत्वापत्तेः । तथाचात्र न विदुषां देवत्वं ब्रह्मराक्षसत्वं वा विधित्सितम्, किन्तु देवा विद्वांसो भवन्ति ब्रह्मराक्षसाश्च विद्वांसो भवन्तीत्येव ।

'छिद्रं हि मृगयन्त्येते विद्वांसो ब्रह्मराक्षसाः ।' (वा०रा०बा० का० १२।१८)

तथा च ब्रह्मणो हिरण्यगर्भाद्देवतानां ब्राह्मणानामन्येषाञ्च वर्णानामुत्पत्तिरिह विवक्षिता । महाभारतीयवचनस्य तु तात्पर्यं पूर्वमुक्तमेव । तत्रापि पूर्वं विश्वमेकवर्णमेवासीत् गुणक्रियाभेदेन जन्मान्तरे तेषामेव क्षत्रियत्वादिकमपि जातम् इत्येव तात्पर्यम् ।

'एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नान्यः एकोऽग्निर्वर्ण एव च ॥' ( शान्तिपर्व )

इत्यत्रापि क्षत्रियाद्युत्पत्तेः प्रागवस्थैव निरूपिता, न क्षत्रियादीनामपलापः । तथैव स्थूलरूपेण वेदानां सम्प्रदायप्रवृत्तेः प्राक् प्रणव एव वेद आसीद् इत्यपि संगतम् । अन्यथा 'वाचा विरूपनित्यया ।' ( ऋ. सं. ८।७५।६ ) 'पूर्वे पूर्वेभ्यो वच एतदूचुः' ( तै. ब्रा० ३।१२।९।२ ), इत्यादिषु मन्त्रादिलक्षणाया वाचो नित्यत्वोक्तिर्विरुद्ध्येतैव ।

'अप्रवृत्तिः कृतयुगे कर्मणोः शुभपापयोः ।
वर्णाश्रमव्यवस्थाश्च न तदासन्न संकरः ॥६१॥
अनिच्छाद्वेषयुक्तास्ते वर्त्तयन्ति परस्परम् ।
तुल्यरूपायुषः सर्वे अधमोत्तमवर्जिताः ॥६२॥

( वायुपुरा० उपोद्घातपा० अ० ८ )

इत्यत्रापि विविधविसृष्टेः प्राक् शुद्धसत्त्वमये युगे उत्तमाधमराहित्यं वर्णितम् । न चाद्यत्वे तत्कल्पनावकाशोऽपि, अनिच्छाद्वेषयुक्तत्व-तुल्यरूपायुष्ट्ववैपरीत्यदर्शनात् । किञ्चात्यल्पमिदमुच्यते । वस्तुदृष्ट्या सर्वस्यैव

ब्रह्मविवर्त्तत्वेन ब्रह्मरूपतैव तु पारमार्थिकी। 'सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत' ( छा० ३।१४।१ ) इतिरीत्या सर्वस्यैकब्रह्मरूपत्वमेव वक्तुं शक्यते। न तावताऽपि जगतो व्यावहारिकी मर्य्यादा जात्यादिभेदो वा व्यवहारदशायां बाधितुं शक्यते। अतएव पञ्चमवेदस्वरूपे भारत एव मतङ्गोपाख्याने जन्मनैव ब्राह्मण्यादिकं निगदव्याख्यातम्।

किञ्च कृतयुगे वर्णाद्येकत्वेऽपि न त्रेतादियुगे तत्सत्त्वमपलपितुं शक्यम्। यथा प्रामाणिकस्याहवनीयाद्यग्निभेदस्य नापलापस्तथैव वर्णभेदस्यापलापो न युज्यते।

अपि च देशकालभेदेन धर्मभेदोऽपि भवति। प्रातर्विहितोऽग्निहोत्रहोमो मध्याह्ने न धर्माय भवति, तथैव कृतयुगे विहितो यो धर्मो न स त्रेतायां, कलौ वा धर्माय संभवति। ब्रह्मचर्य्याश्रमे विहितो धर्मो गृहस्थाश्रमे न धर्मो भवति, गृहियोग्यो धर्मः संन्यासदशायां न धर्मो भवति यथा, तथैव कृतयुगे प्रोक्ता व्यवस्था तदानीमेव युक्ता, नेदानींतने काले। अतएव वायुपुराणे—उपोद्घातपादे अष्टमेऽध्याये—

सत्य ब्रह्म यथाभूतं ब्रुवन्तो ब्राह्मणाश्च ते ॥१६२॥
'इतरेषां कृतत्राणाः स्थापयामास क्षात्रयान् ॥१६३॥
'ये चान्येऽप्यबलास्तेषां वैशभं कर्म संस्थिताः ॥१६४॥
शोचनाश्च द्रवन्तश्च परिचर्य्यासु ये रताः ॥१६५॥
निस्तेजसो रूपवीर्य्याश्च शूद्रांस्तानब्रवीत्तु सः ॥१६६॥

इत्यादौ पूर्वोदाहृतश्रुतिस्मृत्याद्यनुरोधेन तत्तदनुरूपैर्गुणकर्मभिर्ब्राह्मणादि-योनिषु जन्मवशादेव ब्राह्मणादित्वं मन्तव्यम्। रमणीयचरणा ब्राह्मणयोनिं वैश्ययोनिं प्रपद्यन्त इत्यादि श्रवणात्।

यदपि च—'ब्राह्मणोऽस्य मुख'मिति मन्त्रे मुखादिशब्दा लाक्षणिका मुख-संभवान् गुणान् लक्षयन्ति। तत्र दृश्यमाना प्रथमा विभक्तिः पञ्चम्यर्था। यथाऽस्य प्रजापतेर्मुखे भवा विद्याविनयादयो मुख्या गुणाः, सत्यप्रियवदनो-पदेशादीनि कर्माणि च तेभ्यो ब्राह्मण आसीत् समुत्पन्नः। तथा बाहू बाह्वोर्भवा ये बलवीर्य्यपराक्रमादयो गुणास्तेभ्यो राजन्यः क्षतत्राणपरायणः क्षत्रिय उत्पन्नः, ऊरू मध्यभागः, तत्र भवा ये धनधान्योपार्जनवितरणौदार्य्य-

प्रावीण्यादयो गुणाः, कृषिवाणिज्यगोपालनादिकर्माणि तेभ्यो वैश्यस्तद्गुणकर्मसयुक्त उत्पन्नः। पद्भ्यां पादयोर्ये जडबुद्धित्व-मूर्खत्व-श्रमत्वादयोऽधमा गुणाः, सेवासहायादीनि च यानि कर्माणि, तेभ्यः सेवाश्रमादिनिकृष्टगुणकर्मविशिष्टः पराधीनः शूद्रः संभूतः। यद्यपि सेवाश्रमादीनां नास्त्यधमगुणत्वं तथापि जडबुद्धित्वमूर्खत्वादिनिकृष्टगुणवैशिष्ट्यारोपात्तेषामपि तथात्वं प्रत्येतव्यम्।

अतएव भविष्ये प्रतिसर्गे –

'सोमाद्वै ब्राह्मणा जाताः सूर्य्याद्राजन्यवंशजाः।
समुद्रात्सकलावैश्याः दक्षाच्छूद्रा बभूविरे॥''

(भ० पु० प्र० ख० ४।३ अ ५।२३)

"इह सोमादिभ्यो गुणकर्मणा ब्राह्मणादीनामुत्पत्तय उक्ताः, तथैव श्रुत्यर्थोऽपि ज्ञातव्यः" इति, तदपि निःसारम्। शक्यार्थत्यागलक्षणाश्रयणयोर्बीजाभावात्। मन्वादिभिश्च 'मुखबाहूरुपज्जानाम्' (म. १।८७) तथा म. १०।४५) इत्यादि रीत्या मुखादिभ्य एव ब्राह्मणादीनामुत्पत्तय उक्ता एवेति मुख्यार्थत्यागो लक्षणाश्रयणञ्च व्यर्थमेव।

किञ्च पूर्वोक्तै मुखादिगुणैः कर्मभिश्च ब्राह्मणादय उत्पन्ना इत्यर्थाभ्युपगमेऽपि जन्ममूलकवर्णवादिनां न हानिरुत्पत्तेर्जन्मार्थकत्वात्। अभ्युपगम्यते चैतत् जन्मान्तरीयैर्गुणकर्मभिरेव ब्राह्मणादियोनिषु प्राणिनामुत्पत्तयो भवन्तीति। यदि तु उत्पन्ना इत्यस्य कल्पिता इत्यर्थस्तदा तत्रापि मुख्यार्थत्यागो लक्षणाश्रयणञ्च निर्मूलम्, गौरवं च स्यात्।

किञ्च नहि विद्याविनयादयः सत्यप्रियहितवदनादयो ब्राह्मणानामेव गुणकर्माणि समेषां वर्णानां तदिष्टत्वात्। किञ्च पादयोः जडबुद्धित्व-मूर्खत्वादयो गुणा इति कथं साधितं श्लाघनीयप्रज्ञेणेति नोक्तम्, तथैव सेवाश्रमादीनामधमगुणत्वमपि चिन्त्यमेव। यद्यारोपात्तथात्वं तर्हि बलात्कारादिष्वपि कुतो न तदारोपः? भविष्यपुराणीयवचनन्तु न नः प्रतिकूलम् 'चन्द्रमा मनसो जातः' (ऋ० सं० १०।९०।१३, वा० सं० ३१, १२ अ० सं० १९।६।७) इत्युक्त्या सोमस्य विराजो मुखत्वेन विराजो मुखाज्जाता एव ब्राह्मणाः सोमजा उच्यन्ते। सूर्य्यस्यापि भगवतो बाहुरूपत्वं पुराणेषूक्तम्, तेन बाहुजा एव क्षत्रियाः सूर्यजा उच्यन्ते। समुद्रस्य भगवदुदररूपत्वञ्च पुराणेषूक्तम्, तेन

भगवत उदराज्जाता वैश्याः समुद्रजा उच्यन्ते । शिल्पादिदाक्ष्यात्पादयोरेव दक्षत्वकल्पनाऽपि । शूद्राणां शिल्पादिदाक्ष्यसंपादनाधिकारत्वाच्च ।

ब्राह्मणादिवर्गभेदविषये यदपि भविष्यपुराणीयवचनाश्रयणेनोक्तं यत् वर्णभेदाकारभेदबुद्धिभेदगुणदोषभेदादीनि प्रमाणानि नोपलभ्यन्ते, परमेकस्माज्जनिमत्त्वादीनि बाधकानि प्रमाणान्युपलभ्यन्ते । ततो वर्गहीनसमाजसाधनाय ब्राह्मणत्वादि जात्युच्छेदवाद एवाद्रियते । तदुक्तमेव—

'न ब्राह्मणाश्चन्द्रमरीचिशुभ्रा
न क्षत्रियाः किंशुकपुष्पवर्णाः ।
न चेह वैश्या हरितालतुल्याः
शूद्रा न चाङ्गारसमानवर्णाः ॥" (भ० पु० १।४१।४१)

शुक्लगौरवर्णत्वेन ब्राह्मणत्वे पाश्चात्यनामाङ्ग्लानामेव ब्राह्मणत्वं स्यात् । केचिच्च वैदिका मद्रासप्रान्तीया युवतिकृष्णकेशवत्कृष्णवर्णा भवन्ति । तत्र दन्ता एव शुभ्रवर्णा प्रतीयन्ते । कश्चिच्च शूद्रोऽपि गौरवर्णो विशुद्धोच्चारणेन च ब्राह्मणवदेव प्रतीयते । त्वङ्मांसमेदोऽस्थिरसाश्च नैव भिद्यन्ते ।

'वर्णप्रमाणाकृतिगर्भवासवाग्बुद्धिकर्मेन्द्रियजीवितेषु ।
बलत्रिवर्गामयभेषजेषु न विद्यते जातिकृतो विशेषः ॥ ४३ ॥

यथैकस्य पितुः चत्वारः सुता एक जातीया एव भवन्ति । चत्वार एकस्य पितुः सुताश्च तेषां सुतानां खलु जातिरेका ।

'एवं प्रजानां हि पितैक एव पित्रैकभावान्न च जातिभेदः ।'
( भ० पु० १।४१।४५ )

'फलान्यथोदुम्बरवृक्षजातेर्यथाग्रमध्यान्तभवानि यानि ।
वर्णाकृतिस्पर्शरसैः समानि तथैकतो जातिरतिप्रचिन्त्या ॥'
( भ० पु० १।४१।४६ )

तस्माद्विप्रेषु जात्यादि सामग्री प्रभवो न सः ॥ ३४ ॥
तस्मान्न च विभेदोऽस्ति न बहिर्नान्तरात्मनि ॥
न सुखादौ न चैश्वर्ये नाज्ञायां नाभयेष्वपि ॥ ३५ ॥
न वीर्ये नाकृतौ नाक्षे न व्यापारे न चायुषि ॥
नाङ्गे पुष्टे न दौर्बल्ये न स्थैर्ये नापि चापले ॥ ३६ ॥

न प्रज्ञायां न वैराग्ये न धर्मे न पराक्रमे ॥
न त्रिवर्गे न नैपुण्ये न रूपादौ न भेषजे ॥ ३७ ॥
न स्त्रीगर्भे न गमने न देहमलसम्प्लवे ॥
नास्थिरन्ध्रे न च प्रेम्णि न प्रमाणे न लोमसु ॥ ३८ ॥
शूद्रब्राह्मणयोर्भेदो मृग्यमाणोऽपि यत्नतः ।
नेक्ष्यते सर्वधर्मेषु संहतैस्त्रिदशैरपि ॥' ३९ ॥ इति
( भ० पु० १।४१ )

तदपि तुच्छम् । पञ्चमे वेदे महाभारत इव यस्मिन् गलप्राप्ते कण्ठदाहो भवेत् स त्वया ब्राह्मणो ज्ञातव्यो रक्षणीयश्चेति गरुडं प्रति कश्यपोक्तेः । तस्मान्निर्दोषब्राह्मणमातापितृजन्मत्वस्यैव ब्राह्मणत्वं विज्ञेयम् ।असाधारणदुःख-सहिष्णुत्वं क्षत्रियस्य लक्षणमिति भारते कर्णपरशुरामप्रसङ्गे प्रोक्तम् । परमेश्वरमुखादिशक्तिजत्वमेव ब्राह्मणादित्वमित्यप्यन्यत्रोक्तम् ।

गर्भजत्वेऽपि वर्णभेदकथनम्

ननु सर्वे ब्राह्मणादयो गर्भादेवोत्पद्यन्ते न मुखादिभ्य इति कुतस्तद्वैशिष्ट्य-मिति चेन्न सृष्ट्यादौ ब्राह्मणादीनां विराजो मुखादिभ्य उत्पत्तिश्रवणात् । न च तच्छ्रवणस्याप्रामाण्यम् । मन्त्रस्यापौरुषेयत्वेनापास्तसमस्तपुंदोषशङ्कात्वात् । तद्विरोधाद्भविष्यपुराणोक्तेरेव तदानुगुण्येन नेयत्वात् । पुराणस्य पौरुषे-यत्वेन स्वतःप्रामाण्याभावेनापौरुषेयवेदमूलकत्वेनैव प्रामाण्याभ्युपगमात् । तथाचेदानीं सर्वेषां गर्भादुत्पत्तौ दृश्यमानायामपि सर्वदैव तादृगुत्पत्तेर्नि-यन्तुमशक्यत्वात् । अन्यथाऽधुनेव सर्वदैवोत्पत्तेः सशरीरमातापितृमूलक-तया परमेश्वरकारणत्वाभ्युपगमवैयर्थ्यापातात् । पुराणादिषु मानसीसृष्टि-वर्णनदर्शनाच्च प्रथमशरीरस्याशरीरादुत्पत्तेरभ्युपगन्तव्यत्वात् । इहैव स्थलान्तरे प्रदर्शितपरमेश्वरस्य मुखादिभ्यो ब्राह्मणादीनामुत्पादनम् । अतएव गायत्र्या ब्राह्मणस्य निर्माणम् त्रिष्टुभा राजन्यस्य, जगत्या वैश्यस्य शूद्रस्य तु न केनचिच्छन्दसोत्पादनं श्रुतम् । तत एव त्रयाणामेव संस्कारो न शूद्रस्य । वसन्ते ब्राह्मणस्य, ग्रीष्मे राजन्यस्य शरदि वैश्यस्योपनयनं विहितं, न शूद्रस्यो-पनयनं विहितम् । एवमग्न्याधानादिष्वपि वैशिष्ट्यम् । आर्त्विज्यम् पुरोडाशा-दिभक्षणञ्च ब्राह्मणस्यैव ज्ञातव्यं न क्षत्रियवैश्ययोः । तत एव ब्रह्मवर्चसा-दिष्वपि वैषम्यं ज्ञातव्यम् ।

ननु तर्हि भविष्यपुराणीयवचनानां का गतिरिति चेन्न, समुच्चयविधित्सया निन्दार्थवादभूतानां वचनानां स्वार्थे तात्पर्य्याभावात्।

यथा 'अन्धं तमः प्रविशन्ति ये विद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः ॥ (ई. वा. उ. ६)

इह विद्याऽविद्ययोः कर्मोपासनयोर्विहितत्वेन 'कर्मणा पितृलोकः, विद्यया देवलोक' इति फलहेतुत्वेन प्रशस्तयोरप्येकैकस्य निन्दनं समुच्चिचीषया क्रियते। यथा निश्चितस्यापि परलोकस्य 'को हि वेद अयुष्मिन् विद्यते वा न वेति इति परलोकसन्देहप्रतिपादनस्य दिक्ष्वतीकाशान् करोतीति विधिशेषत्वेन तत्प्रशस्तिपरत्वमेव न स्वार्थपर्य्यवसायित्वम्। तथैव जन्मकर्मसंस्कारादिसमुच्चयस्यैव धर्मानुष्ठानमूलवर्णत्वप्रयोजकत्वं न केवलाया जातेर्नवा केवलस्य कर्मणो, न वा संस्कारमात्रस्य तद्धेतुत्वमित्यर्थविशेषप्रतिपादनायैव बहून्यभूतान्यपि दूषणान्यारोप्य जन्मसंस्कारादीनामकिञ्चित्करत्वमुक्तम्। विस्तरस्त्विहैवान्यत्र द्रष्टव्यः। एकस्मादुत्पन्नत्वेनैकजातित्वस्यापि तत् समानयोगक्षेमत्वम्, परमात्मन उत्पन्नत्वेऽपि पशुपक्षिमनुष्यादिजातिभेदस्य सर्वैरप्यभ्युपेतत्वेन हेतोर्व्यभिचरितत्वात्। एवं वीर्य्ये धर्मे तपसि च ब्राह्मणवैशिष्ट्यं प्रसिद्धमेव। ब्राह्मणादीनां स्वभावजानि शम-दम-शौर्य्य-वीर्य्यादीन्यप्युक्तान्येव गीतादिषु। तस्मान्नोदुम्बरादिदृष्टान्तेन ब्राह्मणादिजात्यपलापः सम्भवति।

## जातिलक्षणार्थः

यत्तु 'समानप्रसवात्मिका जातिः'। इति येषु किल समानरूपेण तुल्यतया प्रसवः सन्तानोत्पत्तिर्भवति, तेषु स्त्रीपुरुषेषु तुल्यैव जातिर्मन्तव्येत्यर्थः कृतस्तत्तु शास्त्रानभिज्ञानविजृम्भितमूर्खजनकृतार्थान्वानुकरणमेव। तथात्वे नित्येषु परमाणुष्वात्मसु जात्यनभ्युपगमापातात्। घटादिषु स्त्री पुरुषभिन्नेषु तद्रीत्या जातिव्यवहारः कथं स्यात्? वस्तुतस्तु समानबुद्धिप्रसवो येषु तेषु समानजातिव्यवहारः। तथा च घटो घट इत्यादि समानबुद्धिप्रसवहेतुत्वेन जातिरङ्गीक्रियते। अश्वगर्दभादिषु भिन्नजातीयत्वेऽपि प्रसवसम्बन्धः समानो दृश्यते। ततः सन्तानोत्पत्तिसमानत्वेऽपि ब्राह्मणक्षत्रियादिषु जातिभेदोऽङ्गीक्रियत एव।

यदुक्तम् विजितेन्द्रियाणां भगवद्भक्तानां शूद्रत्वेनाभिमतानां कबीर-तुकाराम-विवेकानन्दारविन्द-गोविन्दसिंह प्रभृतीनां श्रेष्ठत्व गुरुत्वं पूज्यत्वादिकं स्वीकृतमेवे'ति, तदपि निःसारम्, तदनुयायिषु तन्महत्त्वसत्त्वेऽपि वेदादि-शास्त्रप्रामाण्यवादिनां तद्गुरुत्वपूज्यत्वानभिमतेः। यथाकथञ्चिन्मान्यत्वे तु बुद्धस्य सर्वापेक्षया मान्यत्वमिति तस्यैव ग्राह्यत्वापत्तिः स्यात्। शिष्टापरिग्रहा-द्वेदविरुद्धत्वाच्च भारतीयैरनादृत एव बौद्धो धर्मः।

## जात्युच्छेदवादः

यत्तु जापानदेशदृष्टान्तेन सङ्घटनसंपादनार्थं जातिकुलाद्यभिमान-मपहाय समानजातित्वसमानशिक्षणत्वादिकं समर्थितम् तदपि तुच्छम्। स्वधर्मशास्त्रपारम्पर्यविरुद्धपरानुकरणस्यायोग्यत्वात्। लोकेऽनेके देशा जात-यश्च सन्ति। तेषां मान्यभूता ग्रन्थाः पारम्पर्यं धर्माश्च पृथक्-पृथक् सन्ति। तेषां कृते तदौचित्येऽपि अन्येषां तदयोग्यत्वात्। लौकिकोन्नतयस्तु लौकिक-प्रयत्नैरेव भवन्ति। ते च प्रयत्ना नात्रापि निषिद्धाः। जातिधर्मभेदनिरा-सस्य तदहेतुत्वात्तन्निराकरणायासो मौढ्यमेव। शुनां जातिधर्मभेदशून्यानामपि तादृगुन्नत्यप्राप्तेः।

## बदरीनाथवृत्तान्तः

यदुक्तम् 'भारतराष्ट्रसमीक्षणप्रसङ्गेन वयमुत्तमा, अधमा इमे न गण्याः, अस्माकमेवेदृशोऽधिकारो नान्येषामिति स्वीयाभ्यर्हिन्दुबन्धुविषयिण्यस्त-दिच्छासंकुचितभावना जाग्रतितराम्। सवर्णा न केवलं हरिजनानेवास्पृश्यान् मन्वते किन्तु सर्वेभ्यो घृणा उत्पादयन्ति। द्राविडा दाक्षिणात्या ब्राह्मणा गौडसारस्वतादीन् काशीशूद्रा इति व्यपदिशन्ति। बदरिकाश्रममूर्तेरर्चनं नम्बूद्रिब्राह्मणा एव कुर्वन्ति।

हिमालयीयब्राह्मणा वैदिकाः सदाचारा अपि तन्मूर्तिं स्प्रष्टुमपि न शक्नुवन्ति। दण्डिनो भिक्षुका ब्राह्मणत्वस्य मिथ्याभिमानवशंवदा दण्डरहितान् परमहंसभिक्षून् दृष्ट्वा श्वानवत् घुरघुरायमाणा शूद्रा इमे भ्रष्टाः शापिताः, एभ्यो न भिक्षा देया, न पण्डितैः शिक्षा देया इति जल्पन्ति। हिन्दूनां परस्परतिरस्कारभावनैव दशकोट्य-धिकक्रिश्चियन समाजस्य जननी। यत्र समाजे मनुष्यत्वस्य समादरः प्रतिष्ठा-

न स्यात्, प्रेमसद्भावविरोधिघृणा जात्यपमानजनकव्यवहारोऽवलोक्येत तत्र को मतिमानवस्थातुमिच्छेत्। केरलादौ अन्त्यजा यावत्पर्यन्तं स्वान् हिन्दुत्वेन पद्मनाभदास जनार्दनदासादिनामत्वेन तुलसी-देव-देवोपवादि पूजकत्वेन मन्यमाना भवन्ति तावत्पर्य्यन्तमस्पृश्या गर्हणीयाः सन्तः स्वकीयवीथीष्वपि प्रवेशयोग्यरहिता भवन्ति। त एव क्रिश्चियना यदा विदेशतद्भाषा-तद्वेष-संस्कृत्यादिप्रियाः, स्वदेशभाषा-स्ववेशसंस्कृत्यादिविमुखा, हिन्दुधर्मसमाज-द्वेषिणो भवन्ति, तदा ते सपद्येवोत्तमहिन्दुभिः समादरणीयाः, साहबेति गौरव-शालिनाम्ना सम्बोध्याः, स्ववीथीप्रवेशस्य किं, स्वगृहप्रवेशस्यापि योग्यता-शालिनो भवन्ति। त एव सम्प्रदायप्रान्तीयादिशासने सत्तारूढाः सन्तः हिन्दुसमाजस्य महतीमवहेलनां कुर्वन्ति।

> यत्समाजशरीरस्य पादः शूद्रः पृथक्कृतः।
> तन्मूर्ध्नि न कथं कुर्य्युः पादाघातं विधर्मिणः॥"

इति, तदपि, सर्वं प्रतिक्रियामूलकमेव। यतो केषाञ्चिन्मूर्खप्रायाणामभिमानित्वेऽपि शिष्टानां वैदिकधर्मकर्मसभ्यतानिष्ठानां ब्रह्मकार्य्यत्वेन सर्वस्यैव परमार्थतो ब्रह्मात्मतामभिमन्यमानामपि व्यवहारदशायां तत्तत्कर्म-धर्माद्युपेतजातिभेदधर्मभेदश्च तन्मूलक एवोत्कर्षापकर्षादिश्च शास्त्रदृष्ट्यैवाभ्युपगतः, व्यवहारदशायां व्यावहारिकभेदस्य निराकर्तुमशक्यत्वात्। यथा ब्राह्मणस्यैवार्त्विज्यमाचार्यत्वञ्च, नान्येषां। राजसूयाधिकारश्च क्षत्रियाणामेव। तथैव ब्रह्मक्षत्रविशां पूर्वपूर्वोत्कर्षत्वमपि शास्त्रसम्मतमेव। त्रयाणां दण्ड-मौञ्ज्यादिभेदो भिक्षाचर्य्यादिशब्दभेदश्च धर्मशास्त्रेषु सिद्ध इतीहैवान्यत्र प्रपञ्चितम्।

नहि चिकित्सका यथायोग्यमौषधोपचारादिभेदव्यवहारं कुर्वन्तो वचनीया भवन्ति। नहि पितृवत्पुत्रोऽपि पित्रा प्रणम्यते। व्यवहारे नरा रोगिणं विषं च स्पृष्ट्वा सविशेषं हस्तादिक्षालयन्तोऽपि न द्वेषिणो भवन्ति। न केवलं हिन्दुष्वेव किन्तूदारचरितानान्तु वसुधैव कुटुम्बकमिति रीत्या सम्पूर्णप्राणिष्वेवात्मभावनैव भवति सत्पुरुषाणाम्। अनन्तकोटिब्रह्माण्डात्मके महाविराड्येव पूर्वमात्मभावना भवति। ततो हिरण्यगर्भे समष्टिसूक्ष्मशरीरमयेऽभेदभावना। ततोऽव्याकृते महाकारणे स्वात्मभावना। तदनन्तरमेव

प्रत्यक्चैतन्याभिन्नपरस्मिन्नात्मभावना, तदनुगुणोऽपरोक्षसाक्षात्कारश्च भवति। तत्र महाविराज्यहङ्ग्रहबुद्धेः प्राङ् ममत्वमुत्पद्यते। देहादौ ममतास्पदे एवाहङ्कारस्पदत्वदर्शनात्। ममत्वास्पदे देहे यथाहितबुद्धिर्भवति तथैव समष्टिविराज्यपि युक्ता। व्यष्ट्यभिमानमेव मृत्युः समष्ट्यभिमानमेवामृतम्। तथापि तत्क्रमेण विकासमुपयाति। प्रथमं कुटुम्बे, ततः कुले, ततो जातौ, ततो देशे, ततो भूमण्डले, ततो ब्रह्माण्डे, ततो ब्रह्माण्डावलौ भावना जायते। तथापि लौकिकपारलौकिककर्मानुष्ठानं वेदादिशास्त्रानुसारेणैव कर्तव्यं भवति। तादृग्व्यवहारेऽज्ञानां संकीर्णता प्रतिभाति। श्वशृगालादीनामात्मत्वेऽपि न तैः सार्द्धं भोजनपानादि व्यवहारः संभवति।

उत्तरभारते ब्राह्मणा अपि प्रायः संस्कारशून्या, वेदाध्ययनशून्याश्च सन्ति। तत एव ते काशीशूद्रनाम्ना व्यपदिश्यन्ते। तस्मात्परिभवादेव वेदाध्ययनादौ प्रवृत्तिर्भवति। यदि जारजानामपि कुलजानामिव सर्वत्र सम्मान स्यात्तदा कथं तत्परिहारे प्रवृत्तिरेव भविष्यति। तत एव निषिद्धानुष्ठायिनो निन्द्यन्ते। विहितानुष्ठायिनः प्रशस्यन्ते। तत्र निन्दास्तुत्योस्तात्पर्य्यं नास्ति, किन्तु निषिद्धपरिवर्जनविहितानुष्ठानप्रवृत्तावेव तात्पर्य्यं मन्तव्यम्। बदरीनारायणमूर्तिस्पर्शविशेषाधिकारोऽपि समूल एव। यजमानस्यर्त्विक्पुरोहितादिभिः स्वशाखीयैर्भाव्यमिति कृत्वा बदरीनारायणमूर्तिप्रतिष्ठापकैः भगवत्पादैः स्वशाखीयेभ्यस्तज्जातीयेभ्यश्च तत्पूजनाधिकारो नियत इति।

क्षत्रियवैश्ययोः संस्कारलोपादेव 'कलावाद्यन्तयोः स्थितिः' उच्यते। ब्राह्मणानामेव पारिव्राज्येऽधिकारः।

'मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम्।
बाहुजातोरुजातानां नायं धर्मः प्रशस्यते॥

केषाञ्चिद्रीत्या तयोरप्यलिङ्गसंन्यासेऽधिकारः। परन्तु सर्वथानुपनीतानामपि संन्यासधारणं तु सर्वमतेन गर्हितम्। तुलसीदासेनापीयं स्थितिर्निन्दिता

ये वर्णाधम तेलि कुम्हारा॥
'श्वपच किरात कोल कलवारा।
नारि मुयी गृहसम्पति नाशी।
मूड़ मुंडाय होहिं संन्यासी॥

ते विप्रन सन पाँव पुजावहिं।
उभयलोक निज हाथ नसावहिं॥

केचिद् ब्राह्मणा अपि तेषु प्रविशन्त्यज्ञानेन, ततश्च शूद्रशिष्यत्वेन तेषामपि पातित्यमेव भवतीति शास्त्रीयमेव तत्त्वं केचित्कथयन्ति हितबुद्ध्यैव, नतु द्वेषादिना। यवनक्रिश्चियनसम्प्रदायप्रवेशस्तु स्वधर्ममाहात्म्याज्ञानेन पदप्रलोभनादिभिश्च भवति। जीविकादानस्त्रीदानादिभिश्च ते वञ्चयन्ति। ब्राह्मणादयः सवर्णा विद्वांसोऽपि तत्र व्यासज्यन्ते, किमुतान्ये संस्कारशून्याः। 'गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः' इति रीत्या गुणदोषवर्णनं यद्यपि दूषणमेव, तथापि संग्रहो वर्जनञ्च ज्ञानमन्तरा न सम्भवतीति गुणदोषवर्णनं श्रुतिस्मृतिपुराणेषु सर्वत्रोपलभ्यते। शिष्टैश्च दोषतित्याजयिषया गुणपरिजिग्राहयिषया च दोषगुणवर्णनं क्रियते। अपशूद्राधिकरणरीतिमनुसृत्यैव विद्वांसश्चतुर्थवर्णान् तच्छिष्यत्वेन तत्तुल्यानेवान्यानपि वेदादिशास्त्रानधिकारिणो मन्यन्ते।

'न हीनतः परमभ्याददीत।' ( म० भा० म० प० १०४.३१ )

शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे।' (म० भा० उ० प० ४१।५

इति महाभारतादि रीत्याऽपकृष्टवर्णेभ्य उत्कृष्टानां धर्मब्रह्मग्रहणनिषेधात्। विकर्मस्थानां ब्राह्मणानामपि वाङ्मात्रेणापि सत्कारो मनुना निषिद्ध एव।

वाङ्मात्रेणापि नार्चयेत्' ( ४।३० ) इति तदुक्तेः।

यत्र कचिन्म्लेच्छानां पतितादीनामपि शासनपदे नियुक्तानां सम्मानं तच्छासनपदस्य सम्मानम्, न व्यक्तिविशेषाणां जातिविशेषाणां वा।

शासकत्वेनैवाङ्गलानां मुगलानाञ्च सम्मानादिकं प्रवृत्तमासीत्। कस्यचिद्विदुषो धर्मनिष्ठस्य तपस्विनो दरिद्रब्राह्मणस्य यत्संमानं तन्न शासकत्वेन, किन्तु धार्मिकत्वेन। गृहे स्वबालाद्याः कुमार्गनिवृत्तये सत्पथप्रवृत्त्यै शिक्ष्यन्ते, दण्ड्यन्ते, तिरस्क्रियन्ते च। न च तावताऽपि तेषु द्वेषः। स्वैरिण्यः कन्यका अपि तिरस्क्रियन्ते। तेनैव सत्पथारूढैः संघटितैः सर्वैर्देशस्वातन्त्र्यार्थं प्रयत्यते।

यदुक्तम्—"भेदभावमिथ्याभिमानद्वेषपूर्णां हिन्दूनां विषाक्तघृणितवातावरणात् समुद्विग्ना जना इस्लामाद्याश्रयं लब्ध्वा स्वजीवनं धन्यं मन्यमाना बोहरा खोजा इत्यादिनामभिः लक्षाधिका यवनाः प्रसिद्धा बभूवुः। ब्राह्मणा बभूवुः

बोहरा, लुहाणा, भाटिया इति। क्षत्रिया बभूवुः खोजा" इति, तदपि विप्रतिषिद्धम्। यतस्त्वदुक्त्यैवेदं सिद्ध्यति यन्मौर्ख्येण लोभादिना च ब्राह्मण क्षत्रियादयोऽपि धर्मान्तरं स्वीकुर्वन्ति। नतु हीनजातीया एव स्वापकृष्टत्वादिहेतोः। धर्मान्तरस्वीकरणभीत्या नियन्त्रणनिवृत्यभ्युपगमे सर्वोऽपि यथेष्टचेष्टो भविष्यति। नियमननिषेधे धर्मान्तरप्रवेशातङ्को विस्तरिष्यति। तदा सर्वेऽपि नियमा धर्माश्च प्रलयं गमिष्यन्ति। लोकेऽपि काश्चनापि संस्थाः सदस्यानां कामचारपोषणेन स्वात्मनावस्थातुं न पारयन्ति किन्तु कामचारिणो नियमोल्लङ्घिनो महतोऽपि निष्काशयन्त्यनुशासति च तेषां शेषाणां संस्थायाश्च हितकाम्यया।

हिन्दूनां धर्मान्तरप्रवेशस्य म्लेच्छत्वापादनस्य तत्कर्तृकस्य हिन्दूविध्वंसस्य सतीत्वविध्वंसस्य ञ्चोत्तरदायित्वं भवादृशेषु सुधारकेष्वेवापतति। यैः शास्त्रविश्वास उच्छिद्यते। शास्त्रविश्वासे दृढतरेऽकिञ्चना अपि, दरिद्रा अपि, शूद्रान्त्यजादयोऽपि हिन्दुधर्मं पालयन्ति, हिन्दुत्वञ्च रक्षन्ति। विस्रस्तशास्त्रधर्मविश्वासास्तु ब्राह्मणा अपि विद्वांसोऽपि धनाढ्या अपि हिन्दूधर्मं कामचारितया नाशयन्ति। म्लेच्छाश्च भवन्ति। विधर्मिणः साम्प्रतिकदेशकालविपरीतं संकीर्णमनुपयोगिनं हानिकरञ्च हिन्दुधर्मं वदन्ति, म्लेच्छादिधर्मांश्च प्रशंसन्ति।

भवादृशा सुधारका अपि हिन्दूशास्त्राणि हिन्दूधर्मास्तदाचार्यस्तदनुयायिनश्च निन्दन्ति। यदेव शत्रवो वदन्ति तदेव मित्राभासारछद्मशत्रवो भवादृशा सुधारका अपि वदन्ति। तदज्ञा जना उभयेषां संवादमवाप्य हिन्दूधर्मं परित्यजन्ति, धर्मान्तरञ्च प्रविशन्ति। तस्माद्यदेवारोप्यतेऽस्मासु तत्सर्वं युष्मास्वेवापतति।

## सिद्धपुरवृत्तान्तः

यदुक्तम्--'सिद्धपुरवृत्तान्तेन ब्राह्मणसमाजस्यैकविभागेन रागद्वेषादिवशादपरविभागस्य तिरस्कारार्थं गोमांसनिक्षेपादशुद्धकूपजलपानेन पातित्यम्लेच्छत्वोद्घोषणम्। यवनोच्छिष्टजलपानकर्त्तारस्ते ब्राह्मणत्वेन किं हिन्दुत्वेनापि नैव मन्तव्या। एवं हिन्दुषु विश्वासो जातस्तेनैव तिरस्कृता अवमताश्च निराशा हिन्दुत्वं ब्राह्मणत्वञ्च परित्यज्य यवनगुरुमुपाश्रित्य बोहरा संज्ञका मुसलमाना बभूवुः। अद्यापि ते तस्मिन्नेव क्षेत्रे यवनवेषभूषाधारिणो

निवसन्ति। केचन दवे ( द्विवेदी ) नाम्ना स्वात्मानं जानन्ति। केचित्तु त्रिवेदी ( तिवाड़ी ) ति नाम्ना जानन्ति तदेतत्सर्वं प्रमाणशून्यम्। हिन्दूनामयोग्यता-प्रदर्शनार्थं धूर्तैस्तद्दङ्मिथ्येतिवृत्तसहस्रकल्पनात्।

यदि च सत्यमेवाज्ञानात् गोमांससंसक्तकूपजलपानं यवनोच्छिष्ट-जलपानं वा कृतं भवेत्तदाऽपि धर्मशास्त्रेषु प्रायश्चित्तं विद्यत एव। नहि तादृशे प्रधानतोर्थस्थले विद्वत्सभा निर्णयमन्तरा ब्राह्मणाः क्षत्रिया वा सहसा हिन्दुत्वं ब्राह्मण्यं वा त्यक्तुं शक्नुवन्ति। तस्मान्नूनं सनातनधर्मविरोधिनामेवायं प्रवादः। मुसलमानैश्च हिन्दूनां यवनधर्मप्रवेशप्रोत्साहनायैव स्वेषां द्विवेदित्व-त्रिवेदित्वादि प्रख्यापनम्। प्रमादाद्वाऽकृतप्रायश्चित्तवतां तेषां तथात्वमिति मन्तव्यम्।

यदुक्तम्-'शूद्रातिशूद्रादयो नीचत्वेनास्पृश्यत्वेनोच्चवर्णेभ्यः सर्वथा विच्छिन्ना यवनसाम्राज्यकाले लोभाद् बलाद्वा यवनाः संवृत्ताः। तेषामुद्धारायापि प्रयत्नो न भवति। विच्छिन्नत्वादेव निम्नवर्णस्य कस्यचित्कन्यां यवना हरन्ति तदा हिन्दव उपेक्षन्ते तथैव तेषामपि कन्यादिहरणे तेषामप्युपेक्षायां सर्वेषामपि संकटदशाऽनिवार्या भविष्यति।' इति, तदपि न सम्यक्। तादृङ्मौर्ख्यस्या-ज्ञानमूलकत्वात्। नहि कश्चिदपि शिष्टस्तत्समर्थयते। हिन्दूनां परस्परपितृ-पुत्राग्रजानुजादिवदुत्कर्षापकर्षभावसत्त्वेऽपि परैर्विरोधे सर्वेषामैकमत्य-संभवात्। 'परैःपरिभवे प्राप्ते वयं पञ्चोत्तरं शतम्' इत्युक्त्यनुसरणं युक्तम्। शास्त्रविश्वासाभावादुत्तमवर्णा एव प्रायेण विधर्मिणो भवन्ति, नतु धर्मभीरवः शूद्रादयः। विरुद्धप्रचारस्य दुरभिसन्धिमूलकत्वात् शास्त्रानुसारिप्रायश्चित्तेन पृथक्श्रेणास्थापनेन हिन्दूधर्मप्रवेशमनुमोदन्त एव शिष्टाः। सामाजिकास्तु न केवल तानेव किन्तु सर्वानपि यवनानाङ्गलांश्च शोधयित्वा सर्वथाऽपि स्वकन्या-दिकं दत्त्वाऽपि तानात्मसात्कुर्वन्ति। तेषु प्रायेण कन्यां गृहीत्वा ते पुनरपि यवनादयो भवन्ति।

## एकत्वभावना:

यदप्युक्तम् -सिक्खेषु मुसलमानेषु च सर्वोऽप्यहं सिक्खोऽस्मि मुसल-मानो वा स्मीत्येवं वदति, तेन तेषु बन्धुत्वबुद्धिर्जागर्ति। हिन्दुषु तु अहम-मुकवर्णोऽस्मीत्येव विविधवर्णोपवर्णभेदबुद्ध्युदयेन बन्धुत्वभावना न

जागर्त्ति। तेन हीनवर्णा उत्तमवर्णान् वीक्ष्य स्वनिष्ठहीनत्वप्रयुक्तां लज्जामनुभवन्ति। उत्तमवर्णाश्च तान्वीक्ष्य स्वनिष्ठोत्तमत्वप्रयुक्ताहङ्कारञ्चानुभवन्ति। एवं विच्छेदभावदार्ढ्येन मम संकटसमये उत्तमवर्णाः साहाय्य न करिष्यन्ति, यथा सिक्खादयो बन्धुभावनया परस्परं रक्षार्थं प्रवर्त्तन्त इति दौर्बल्यमनुसन्धाय परैर्युद्धादिसमये हीनवर्णाः पलायन्ते। पराजयं वाङ्गीकृत्य तदधीनतामूरीकुर्वन्ती'ति, तदपि तुच्छम्, निष्प्रमाणत्वात्।

ईसायी-मुसलमानादिष्ववान्तरभेदेषु सत्स्वपि यथा ईसायित्वेन मुसल्मानत्वेन तेषु बन्धुत्वभावना संभवति तथैव ब्राह्मणत्वादिभेदभिन्नेष्वपि हिन्दुत्वे न बन्धुत्वभावना संभवात्। सर्वेष्वपि केनचिद्धर्मेण साधर्म्यं केनचिच्च वैधर्म्यं दृश्यत एव, पार्थिवजलीयादिपदार्थेषु पार्थिवत्वादिना परस्परं वैधर्म्येऽपि द्रव्यत्वादिना साधर्म्याभ्युपगमात्। नारङ्गफलेषु बहिरैक्येऽपि यथान्तर्भेदो भवति, तथैवान्यत्र बहिरैक्येऽपि भेद एवान्तः। यथा च कलिन्दादिफले बहिर्विविधरेखादिभिर्भेदे भासमानेऽप्यन्तरैक्यं तथैव हिन्दुषु वर्णादिभेदभिन्नेष्वपि समानशास्त्रधर्मनिष्ठत्वेन समानविराडङ्गत्वेन च समेषामैक्यमेव। ब्राह्मणस्य सतोऽपि कस्यचिद् ब्राह्मणत्वेन ब्राह्मणैः सह बन्धुत्वम् हिन्दुत्वेन रूपेण हिन्दुभिः सम्बन्धो भवति। भारतीयत्वेन रूपेण सर्वैर्भारतीयैश्च सम्बन्धो भवति। मानवत्वेन रूपेण प्राणिमात्रेण समं बन्धुत्वं तद्धितभावना च संभवत्येव।

यदप्युक्तम्—

"देशकालवयाऽवस्थाबुद्धिशक्त्यनुसारतः।
धर्मोपदेशः कर्तव्यो भैषज्यमिव पारगैः॥"
'आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥'
(मनुः १२।१०६)

'मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्, को न ऋषिर्भविष्यतीतितेभ्य एतं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहमभ्यूढं तस्माद्यदेव किञ्चानूचानोभ्यूहत्यार्षं तद्भवति।' (नि० १३।१२)

'केवलं शास्त्रमाश्रित्य न कर्त्तव्यो विनिर्णयः।
युक्तिहीने विचारे तु धर्महानिः प्रजायते॥'

इत्यादि विशिष्टवचांसि ब्राह्मणाद्या हिन्दवो न विचारयन्ति। मनागपि पूर्वापरं नानुसन्दधते । ईर्ष्या-द्वेष-घृणा-विच्छेद-मौढ्याद्यनौदार्य्यप्रभृतिभि कीदृशं पातित्यमिति न विचारयन्ति। तेनैव विदेशीया म्लेच्छाः पावने भारतवर्षे नग्नताण्डवं कुर्वन्ति।" इति,

तदपि निरर्गलप्रलापमात्रम् । व्यास-जैमिनि-भट्टपाद-शंकरमण्डन-वाचस्पतिप्रभृतिग्रन्थापरिज्ञानात् । वेदाः, स्मृतयः, पुराणेतिहासादयः, आर्षग्रन्थाः, भाष्यवार्त्तिकादिव्याख्यानानि, मिताक्षरा-व्यवहारमयूख-हेमाद्रि-वीरमित्रोदय-पराशरमाधवादि निबन्धग्रन्थाश्च धर्मा-धर्म निर्णय हेतव प्रसिद्धाः। तेषु तर्काणां बाहुल्यं तद्विदां न तिरोहितम् । वेदशास्त्राविरोधिनामेव तर्काणामुक्तवचनेष्वादर उक्तो न वेदविरोधिनामपि, वेदशास्त्राविरोधिनेति वचनात्। निरुक्तेऽप्यनूचानानां तर्कः समादृतो भवति। अनूचानाश्च वेद-शास्त्रनिष्णाता एव भवन्ति।

निरुक्तस्थतर्कशब्दस्य मन्त्रार्थाभ्यूह एवार्थः। अतएव तत्रैवोक्तम्—'मन्त्रार्थचिन्ताभ्यूहम् (१३।१२) इति। सोऽपि न स्वातन्त्र्येणत्यपि तत्रैवोक्तम्। मन्त्रार्थचिन्ताभ्यूहोऽपि, श्रुतितोऽपि, तर्कतोऽपि, न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः। 'नह्येषु प्रत्यक्षमस्ति अनृषेरतपसो वा' (नि० १३।१२) 'तदिदमायुरिच्छत न निर्वक्तव्यम्' (नि० १३।१३)

इति वेदशास्त्रज्ञैर्बहुशोऽपि तदाश्रयेणैव निर्वचनं कर्त्तव्यं न केवलेन तर्कबलेन तादृक् प्रयत्नस्यायुर्विच्छेदहेतुत्वात्।

## कश्मीरवृत्तान्तः

काश्मीरनिवासिनो ब्राह्मणा दिल्लीश्वरेण यवनसम्राजा म्लेच्छाः संपादिताः। तेषां शोधनार्थं क्षत्रियेण काश्मीरराजेन 'एते म्लेच्छा आर्य्या आसन्। तान् संशोध्यार्य्येषु प्रवेशय'न्त्विति प्रार्थिता अपि पण्डिता 'म्लेच्छ-शुद्धौ नास्ति किमपि शास्त्र प्रमाणम्। अतः शास्त्रविरुद्धं किमपि न वय कर्त्तुं प्रभवामः' इत्युक्तवन्तः। तस्य फलं समग्रेण भारतेनाद्य भुज्यते' इति यत् प्रलपितम्, तदपि भ्रान्तिविजृम्भितमुक्तोत्तरत्वात्। पृथक्श्रेणी स्थापनेन तेषां हिन्दुत्वसम्पादनसंभव उक्त एव । हिन्दुवेदादिशास्त्रानुसारेणैतद्धर्म-विश्वासस्यैव हिन्दुत्वप्रयोजकत्वात्। हिन्दुशास्त्रेषु मानवमात्रसुलभस्य

सामान्यधर्मस्य भक्तिज्ञानादित्रिंशल्लक्षणस्य भागवतादिषु वर्णनात् । धूर्तै-र्मिथ्यैव तादृगितिहासाभासः प्रख्यापितः ।

यत्तु "कृण्वन्तो विश्वमार्यम्' इत्यादिभिरनार्याणामार्य्यत्वसम्पादनमुक्तम्, तन्मूढजनजल्पितम् । तत्रार्य्यशब्दस्य श्रेष्ठार्थमात्रपरत्वात् । नात्र आर्य्य-जातिरभिहिता, किन्तु श्रेष्ठत्वमभिगम्यत्वमेवार्य्यत्वमिष्टम् । तथा च विश्वं श्रेष्ठं श्रेष्ठगुणभावयुक्तं कुरुध्वमित्येवार्थः ।

यत्तु 'इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्य्यम् । अपघ्नन्तोऽराव्णः ॥' (ऋ. स. ९।६३।५) इत्यस्य इन्द्रः परमेश्वरं तदुपदिष्टं समुदारं वैदिकसनातनधर्मं वा स्तुतिभिः सर्वत्र प्रचारं वा वर्धन्तः वर्धयन्तु भवन्त इति कर्तृपदाध्या-हारः । अप्तुरः अद्भिरुपलक्षितानि तद्वत् स्वच्छानि प्रशंसनीयानि शुभकर्माणि कुर्वन्तः, विद्याबलधनादिशक्तिसमुपार्जने प्रयत्नशीलाश्च भवन्तः, विश्वं समस्तं जगत् आर्य्यम् आर्य्यभावादियुक्तं कृण्वन्तः कुर्वन्तु । अराव्णो विधर्मणो दुष्टान् अनार्य्यान् अपघ्नन्तः अपघ्नन्तु विमर्दयन्तु इति व्याख्यानं कृतम् । तत्तु न सम्यक्, शाब्दन्यायविरुद्धत्वात् । यद्यपि इन्द्रशब्दस्य पारमैश्वर्य्य-योगात् परमेश्वरपरत्वं संभवति, तथापि रुढिर्योगमपहरतीति न्यायात् शतक्रतु-रिन्द्र एवात्र ग्राह्यः । 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यत्र तु इन्द्र-शब्दस्य वेदान्तप्रसङ्गात्परमेश्वरपरत्वं भवति । कथञ्चित् तत्परत्वेऽपि तदुपदिष्ट-वैदिकधर्मस्य लाक्षणिकस्यार्थस्येन्द्रपदेन ग्रहणे न किमपि बीजम् । धर्मप्रचा-रस्येन्द्रपदार्थत्वं तु दूरतो निरस्तम् । एवमेव अप्तुर इत्यस्य शुभानि कर्मा-णीत्यर्थः कथं गृहीतः । एवमेव अराव्ण इतिपदस्य अरातिः शत्रुरर्थो नाना-र्य्योऽर्थो निष्प्रमाणत्वात् ।

'आप वस्वेति त्रिंशदृच तृतीयं सूक्तं काश्यपस्य निध्रुवेरार्षं गायत्रं पवमान-सोमदेवताकं तथाचानुक्रान्त आपवस्वनिध्रुवि काश्यप, इति सायणभाष्यरीत्या अस्य तृतीयसूक्तस्य पवमानसोमदेवता भवति । यस्य मन्त्रस्य या देवता भवति सैव तत्प्रतिपाद्योऽर्थो भवति । तथा च पवमानसोमदेवतैवात्र स्तूयते ।

अतएव सायणः इन्द्रं वर्धन्तः वर्धयन्तः अप्तुरः उदकस्य प्रेरकाः विश्वं-सोममस्मदीयकर्मार्थं आर्य्यं भद्रं कृण्वन्तः कुर्वन्तु । अदातॄन् अपघ्नन्तः अभ्यर्षन्ति अभिगच्छन्तु इत्युत्तरया सम्बन्धः । अत्र न कर्तृपदाध्याहारः,

किन्तु 'सुता अनुस्वमारजोऽभ्यर्षन्ति बभ्रवः। इन्द्रं गच्छन्त इन्दवः।'
(ऋ. सं० ९।६३।६)

इति मन्त्रात् इन्दव इतिपदमुत्कृष्यते। अत्रेन्दव इति सोमाधिष्ठातारो देवा उच्यन्ते। विश्वमितिपदेन सोमात्मकं द्रव्यमुच्यते। अतएव न कर्मकर्तृविरोधः।

कर्मप्रकारेण तथा जात्यां जात्यां प्रजायते।
तिष्ठेत् कर्मफलं यावत् व्रजेत् कर्मक्षये पुनः।
(म० भा० अनु० पर्वणि)

इति रीत्या कर्मणां जन्महेतुत्वं, जन्मना च जातिव्यवस्था स्पष्टमुक्ता। कर्मणाञ्च प्राक्तनानां फलोन्मुखानां प्रारब्धपदवाच्यनामेव जन्महेतुत्वम्। तेन न वर्तमानशरीरनिवर्त्यकर्मणां वर्तमानदेहपातमन्तरा जातिहेतुत्व संभवति।

किञ्च कर्मणा वर्णत्वे केषाञ्चित् कर्मणां स्वीयपरकीयत्वासंभवात्, स्वधर्म-परधर्मव्यवस्थापि नोपपद्येत। किञ्च 'स्वे स्वे कर्मण्यभिरतः' (१८।४५) 'सहजं कर्म कौन्तेय सदोषमपि' इत्यादीनां गीतावचनानां संगतिर्न भवत्येव। अनापत्काले स्वधर्मत्याग-परधर्मानुष्ठानयोः पतनहेतुत्वमुक्तम्।

'वरं स्वधर्मो विगुणः न पारक्यः स्वनुष्ठितः।
परधर्मेण जीवन् हि सद्यः पतति जातितः॥ इति।
(मनुः १०।९७)

तेन न जाविकादिभिर्वर्णव्यवस्थाप्यते किन्तु जन्मनैव।

# आजीविकावर्णवादः

किञ्च वर्णव्यवस्था जीविकाभिः पुरुषाणामेव स्त्रीणामपि वा ? तासामपि किं शास्त्रजीविका, शस्त्रजीविका, वार्त्ताजीविका, सर्ववर्णसेवाजीविका च वर्णव्यवस्थार्थं विधास्यन्ते ? न च स्त्रियस्तथा व्याप्रियमाणा दृश्यन्ते। न च तत्संभवति। तदभावे कथं तासां कर्मानुसारिणी वर्णव्यवस्था उपपद्येत ? तासामवर्णत्वे वा 'सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।' (मनुः ३।१२) इत्याद्यसंगतं स्यात्। तत्रापि—

'शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥' (मनुः ३।४४)

इत्यादिषु जन्मनैव क्षत्रियत्ववैश्यत्वाद्यङ्गीकृत्यैव व्यवस्था युज्यते न कर्मणा। एवमेव प्रतिलोमानुलोमविधायकवचनानामपि व्यवस्था जन्मना वर्णाङ्गीकार एवोपपद्यते। संकरबोधकवचनानि तु संकराणां स्वातन्त्र्येण जीविकावरणं नानुमन्यन्ते, किन्तु नियतैव जीविका तेषां तेषां सा सा। कर्मणा वर्णत्वे जन्मना समेषां बालानां शूद्रत्वं मन्तव्यम्। तथा च श्रमजीवित्वापत्तिः। न च तद् दृश्यते। न च जन्मनैव श्रमः संभवति बालानाम्।

किञ्च 'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ (म० २।१६८)

इति रीत्या यः शस्त्रोपजीवी, वार्त्तोपजीवी वेदं नाधीते तस्य पुत्रादिसहितस्य शूद्रत्वेन श्रमोपजीवित्वं सम्पद्यते। एवमेव नामकरणोपनयनकालेषु अजिनमेखलोपवीतदण्डपरिमाणभिक्षाचरणाचमनादिविधयः वर्णभेदानुसारेण कथमुपपद्यन्ते ? तदानीं गुणकर्मादिभिर्वर्णनिर्णयासम्भवेन कथं शर्मवर्मादिनामव्यवस्था ? समावर्तनसंस्कारकाले गुणकर्मानुमानेन वर्णविधाने शूद्राणां तदभावात्कथं वर्णविधानम् ?

यदुक्तम् 'शस्त्रशास्त्रादिशिक्षणायोग्यस्यैव शूद्रत्वव्यवस्थे'ति, तदपि न। उपनयनाधिकाराभावेन तस्याध्ययनाप्रवृत्तौ तद्योग्यतानिर्णयस्यैवासंभवापा-

वात्। यदि 'जन्मना जायते शूद्रः' इति वचनेनैव जन्मनैव शूद्रस्य शूद्रत्व-निर्धारणं स्यात्तदा कर्मणा वर्णव्यवस्थेति मतभङ्गापत्तिः। किञ्च यदि शूद्रत्व-निर्णयो जन्मनाभ्युपेतस्तदाऽन्यवर्णनिर्णयः कुतो न जन्मना स्यात्? शास्त्र-शस्त्रवार्तासेवादि जीविकावरणाद्वर्णत्वे तद्भिन्नानां भिक्षाचौर्यव्यभिचारा-दिवृत्तीनामनुद्योगिनाञ्च प्रमादिनामवर्णत्वापत्तिश्च स्यात्।

किञ्च यदि वर्णशब्दस्य जातिमर्थमगृहीत्वा जीविकैवार्थो गृह्येत तदा कर्मणा वर्ण इत्यस्य कर्मणा कर्मेत्यर्थः स्यात्। जीविकया कर्मणा वर्णनिर्णयः जीविकानिर्णय इत्यर्थः स्यात्। स च निरर्थकोऽसंगतश्च। कोशेषु तु 'वर्णो द्विजादौ' (अमर० नाना० वर्ग ४८) 'वर्णाः स्युर्ब्राह्मणादयः॥' (१)

'विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम्।' (२) अम० ब्रह्मवर्गः)

'वर्णो द्विजादिः शुक्लादिः' मेदिनी, 'वर्णो रूपे द्विजादौ' हैमः इत्यादिभिः ब्राह्मणादिजातिरपि वर्णशब्दस्यार्थो विज्ञायते।

'ब्राह्मोऽजातौ' (पा० ६।४।१७१ इत्यनेन अजातौ ब्राह्मः, अपत्यार्थे जातौ तु ब्राह्मण इत्येव सिद्ध्यति। जन्मनैव वर्णव्यवस्थाभ्युपगमे ब्राह्मणीगर्भगतशि-शुहत्यया ब्राह्मणवधप्रायश्चित्तमुक्तम्।

'हत्वा गर्भमविज्ञातं एतदेव व्रतं चरेत्।'

(मनुः ११।८७)

'गर्भहा च यथावर्णं' याज्ञवल्क्यस्मृतौ (प्रा० अ० २५१) ब्राह्मणमात्रञ्च गर्भञ्च तस्याविज्ञात० (२४।७८ आपस्तम्बः) इत्यादौ।

न च गर्भस्थस्य शिशोः कर्मणा वर्णनिर्णयः संभवति। ऋतुस्नातया ब्राह्मण्यागर्भधारणसंभावनयैव अत्र ब्राह्मणगर्भः संभवतीति तस्या आत्रेयी संज्ञा। तस्या वधे ब्रह्महत्या प्रायश्चित्तमुक्तम्।

'निर्गुणं ब्राह्मणं हत्वा कामतो गणवान् गह॥
यष्ट्वा वा अश्वमेधेन क्षत्रियो यो महीपतिः।
जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकम्॥

इति भविष्यपुराणे ब्रह्महत्याप्रायश्चित्तमुक्तम्। सर्वमेतद् जन्मना वर्णव्य-वस्थायामेव संगच्छते॥

न च विश्वामित्रादिदृष्टान्तैरपि वर्णपरिवर्त्तनं सिद्ध्यति, दृष्टान्तमात्रस्यासाधकत्वात्। अन्यथाकस्यचिद् दुराचारस्य व्यवहार्य्यत्वे समेषां दुराचाराणां व्यवहार्य्यत्वापत्तिः स्यात्। समर्थानामृषीणां वरशापादिभिर्वर्णपरिवर्तनन्त्विष्यत एव, तस्यापवादत्वेनोत्सर्गत्वाभावात्। कर्मणा जीविकया वर्णपरिवर्तनस्यैकमप्युदाहरणं पुराणेतिहासादिषु नोपलभ्यते। अतएव श्रीकृष्णार्जुनयुधिष्ठिरादीनामध्यात्मोपदेष्टृत्वेऽपि न ब्राह्मणत्वं किन्तु क्षत्रियत्वमेव। परशुरामादीनां योद्धृत्वेऽपि ब्राह्मणत्वमेव। भारतेऽपि आनुशासनिके पर्वणि जन्मना वर्णव्यवस्थोक्ता।

'अथ पुण्यक्षयात्तस्मात् स्थाप्यते भुवि भारत।
जायते च द्विजकुले वेदवेदाङ्गपारगे॥'

एवमेव

'स्वभावादेव विद्यन्ते चत्वारो ब्राह्मणादयः।
एकं जात्या सुदुष्प्रापमन्यं वर्णत्वमागतम्॥
तच्च कर्मविशेषेण पुनर्जन्मनि जायते।
तस्मात्तेषां च वक्ष्यामि तत्सर्वं कर्मपाकजम्॥
ब्राह्मणस्तु नरो भूत्वा स्वजातिमनुपालयेत्।
दृढं ब्राह्मणकर्माणि वेदोक्तानि समाचरेत्॥
सत्यार्जवपरो भूत्वा दानयज्ञपरस्तथा।
सत्यां जात्यां समुदितो जातिधर्मान्न हापयेत्॥
एवं संवर्तमानस्तु कालधर्मगतः पुनः।
स्वर्गलोके हि जायेत स्वर्गभोगाय भामिनि॥
तत्क्षये ब्राह्मणो भूत्वा तथैव नृषु जायते॥
एवं स्वकर्मणा मर्त्यः स्वजातिं लभते पुनः॥'

एभिर्वचनैः कर्मानुसारेण जन्मप्राप्तिर्जन्मना च वर्णव्यवस्था सिद्ध्यति। जातिधर्मत्यागेन यः शूद्रकर्माभिलाषवान् भवति स यमलोके दण्डितः सन् जन्मान्तरे शूद्रो भवति।

'इतरस्तु तथा कश्चिद् ब्रह्मयोनिसमुद्भवः।
अवमत्यैव तां जातिमज्ञानतमसावृतः॥

अन्यथा वर्तमानस्तु जातिकर्माणि वर्जयेत् ।
शूद्रवद् विचरेल्लोके शूद्रकर्माभिलाषवान् ॥
शूद्रैः सह चरन्नित्यं शौचमङ्गलवर्जितः ।
स चापि कालधर्मस्थो यमलोके सुदण्डितः ॥
यदि जायेत मर्त्येषु शूद्र एवाभिजायते ।'

यदि कश्चिच्छूद्रोऽपि सत्यार्जवपरो भूत्वा दाननिष्ठो ब्राह्मण्यः श्रद्धालुः स्यात्तदा सोऽपि मरणानन्तरं स्वर्गादिसुखं भुक्त्वा ब्राह्मणानां कुले जायेत ।

'तथैव शूद्रस्त्वपरः शूद्रकर्माणि वर्जयेत् ।
सत्यार्जवपरो भूत्वा दानधर्मपरस्तथा ॥
मन्त्रब्राह्मणसत्कर्त्ता मनसा ब्राह्मणप्रियः ।
एवं युक्तसदाचारः शूद्रोऽपि मरणं गतः ॥
स्वर्गलोके हि जायेत तत्क्षये नृषु जायते ।
ब्राह्मणानां कुले मुख्ये वेदस्वाध्यायसयुते ॥
एवमेव सदा लोके शूद्रो ब्राह्मण्यमाप्नुयात् ।'

एवमेव क्षत्रिया वैश्याश्चापि स्वस्वकर्मानुसारेण उत्तमाधमयोनिषु जायन्ते । तस्माद्विशिष्टां जातिं प्राप्य सर्वथा प्रयत्नेन तां रक्षेत् ।

'एवं क्षत्रियवैश्याश्च जातिधर्मेण संयुताः ।
स्वकर्मणैव जायन्ते विशिष्टेष्ववधर्मेषु च ॥
एवं जातिविपर्यासः प्रेत्यभावे भवेन्नृणाम् ।
अन्यथा तु न शक्यं तल्लोकसंस्थितिकारणात् ॥
तस्माज्जातिं विशिष्टां तु कथञ्चित्प्राप्य पण्डितः ।
सर्वथा तां सदा रक्षेन्न पुनर्भ्रश्यते यथा ॥'

एतदेवापस्तम्बोऽप्याह-'धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते, जातिपरिवृत्तौ । अधर्मचर्यया पूर्वो वर्णो जघन्यं-जघन्यं वर्णमापद्यते, जातिपरिवृत्तौ । ( आपस्तम्बसूत्र० १०।१०।११ ) ।

मार्कण्डेयपुराणे जातिस्मरेण सुमतिना पूर्वजन्मवृत्तमुक्तम् ।

'ब्राह्मणक्षत्रियविशां शूद्राणाञ्चापि योनिषु ।
पुनश्च पशुकीटानां मृगाणामथपक्षिणाम् ॥
समुत्पन्नोऽस्मि गेहेषु' ( १०।२१ )

इति मृगकीटादियोनिवद् ब्राह्मणादियोनयोऽप्यत्र स्पष्टमुक्ताः। यथा मृगयोनिषु मृगो भवति तथैव ब्राह्मणादियोनिषु ब्राह्मणादयो भवन्ति। तत्रैव च पुण्यैः पापैश्चारोहणावरोहणादिक्रमेणोच्चावचासु योनिषु जायते नर इत्युक्तम्।

'अन्यासु चैव पापासु दुःखदास्वपि योनिषु।
चण्डालपुक्कसाद्यासु नरो योनिषु जायते॥
अवशिष्टेन पापेन पुण्येन च समन्वितः।
ततश्चारोहणीं जातिं शूद्रवैश्यनृपादिकाम्॥
विप्रदेवेन्द्रताञ्चापि कदाचिदवरोहणीम्।
एवन्तु पापकर्माणो नरकेषु पतन्त्यधः॥" १०।८७।९०

स एव सुमतिरितः सप्तमे जन्मनि वैश्यकुलेऽहमासमित्याह—

'अहं वैश्यकुले जातो जन्मन्यस्मात्त सप्तमे।' (१३।१)

एतेन पशुपक्ष्यादिवद् ब्राह्मणादयोऽपि जातिविशेषा एव। ते च जन्मनैव भवन्ति। भीष्मेण च हीनजातेरुपदेशे दोष उक्तः॥

'उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित्।
उपदेशे महान् दोषः उपाध्यायस्य भाष्यते॥'

(म० भा० अनु० १०।४)

तत्रैव दृष्टान्तरूपेणोक्तम्—'कश्चिच्छूद्रः कुलपतिमुद्दिश्य पृच्छति।

'वर्णावरोऽहं भवगन् शूद्रो जात्यास्मि सत्तम।
शुश्रूषां कर्त्तुमिच्छामि प्रपन्नाय प्रसीद मे॥'

(म० भा० अनु० १०।१५)

इत्यादि वचनैर्जात्यैव शूद्रत्वमुक्तम्। 'न चैतद्विद्मो ब्राह्मणास्मो वयमब्राह्मणा वा'। कर्मणा ब्राह्मण्ये नायं संशय उपपद्यते, कर्मानुसारेण निर्णेतुं शक्यत्वात्। जन्मना तत्त्वे तु मातुर्दोषात्संभवति संशयः। अध्यापनमात्रेण ब्राह्मण्यं न निर्णेतुं शक्यम्। आपत्काले अब्राह्मणादप्यध्ययनविधानात्।

'अब्राह्मणादध्ययनमापत्काले विधीयते॥'

(मनुः २।२४१)

'पतिर्भार्य्यां सम्प्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः॥' (म० ९।८)

'अङ्गादङ्गात् संभवति हृदयादधि जायते।
तथा च पितुरात्मैव पुत्ररूपेण जायते॥

तस्मात्स पितृजातीय एव। लोकेऽपि बीजजातीयत्वमेव पुत्रस्य दृष्टम्॥ नह्याम्रबीजादाम्रो निम्बादिर्जायते। संतानोत्पादने योषितः क्षेत्ररूपत्व-मेवोक्तम्॥

उत्तमेऽनुकूले संस्कृते क्षेत्रे यथायोग्यं निःक्षिप्तं बीजं योग्यं स्वजातीयमेव-फल जनयति। अतएव साङ्कर्यनिवारणार्थं स्त्रीरक्षा विहिता। ऋतुगमनादि-व्यवस्था च समाद्रियते। येषु देशेषु कुलेषु च जन्मना वर्णव्यवस्था विपरिलोप मुपगता, तत्र रक्षा पातिव्रत्यादि धर्मेषु न तादृगादरश्च दृश्यते। यथा भारते ब्राह्मणादि कुलेषु, किन्तु व्यभिचाराधिक्यमेव। मनुस्तु--

'तस्मात्प्रजा विशुद्ध्यर्थं स्त्रियं रक्षेत्प्रयत्नतः।' (९।९)
तथा—स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च।
स्वञ्च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति॥' (९।७)

इत्यादिना स्त्रीरक्षां बहुमानयाञ्चकार।

अद्यत्वे तु भारतेऽपि विधवाविवाह-विवाहविच्छेद-पुनर्विवाह-विजातीय विवाहादयो विधीयन्ते समाजोत्थानादिमिषेण। भारते-

'ब्राह्मणाः क्षत्रियो वैश्यस्त्रयो वर्णाद्विजातयः।' इति (भा० अनु० ४७।७)

ब्राह्मणादय एव वर्णा उक्ता न जीविका। यदि कर्मणैव वर्णनिर्णय इष्येत तदा शूद्रपुत्रोऽपि कर्मणा ब्राह्मणो भवितुं शक्नोत्येव। तथात्वे

'अब्राह्मण तु मन्यन्ते शूद्रापुत्रमनैपुणात्।' (मा० म० अनु० ४७।१७)

इत्यस्यासङ्गतिरेव। अपि च

'ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः।'
(म० भा० अनु० प० ४७।२८)

इति नोक्तं स्यात्। तस्माज्जन्मनैव वर्णव्यवस्था न कर्मणेति स्पष्टमेव। यथाऽन्ययोनीनां जन्मनैव जातिनिर्णयस्तथैव ब्राह्मणादियोनीनामपि।

जीवः कोशसमायुक्तः शीघ्रं रेतस्त्वकामतः।
स्त्रीणां पुष्पं समासाद्य सूतिकाले लभेत तत्॥
महद् दुःखं समासाद्य वियग्योनौ प्रजायते।

कर्मणा येन येनेह यस्यां योनौ प्रजायते।
जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु।
खरयोनौ प्रजायते जायते ब्रह्मराक्षसः।
ततो जायेत ब्राह्मणः। कृमियोनौ प्रजायते।
ततो जायेत गर्दभः। पश्चाज्जायेत ब्राह्मणः।
ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते। मृतो भवति वानरः॥
विश्वासहर्त्ता तु नरो मीनो जायति दुर्मतिः।
मृगो जायति भारत। ततश्छागः प्रजायते।
स जायते महाराज मूषिको निरपत्रपः।
मृतो भवति शूकरः।
मृतो जायति वायसः। ततो जायति कुक्कुटः।
ततो निधनमापन्नो मानुषत्वमुपाश्नुते।
ततः कूर्मः प्रजायते।
कपोतः सम्प्रजायते।शुक्रो जायति मानवः।
मृतो हंसः प्रजायते। शशो जन्तुः प्रजायते।

इत्यादौ हंसादियोनिवत् ब्राह्मणादियोनिरपि तत्रोक्ताः। देशवंशादिजन्ममूलकं दलं वर्गो वा कैश्चिज्जातिपदेनोच्यते। यथा कुरवः, यादवाः, राघवाः, सारस्वताः, बाङ्गाः, गौजराः, जर्मनाः, चीनी प्रभृतयः। तथापि जातिशब्दस्य वर्णो नार्थ इति न सिद्ध्यति।

जातिशब्दस्यान्येऽप्यर्था भवन्ति।, यथा जन्मवर्णः इति। एकजात्यपेक्षया द्विजातेरुत्कर्षोऽपि वर्णितः।

यथा 'मातुरग्रेऽधिजननम् द्वितीय मौञ्जिबन्धने।'
( मनु० २।१६९ )

'तत्र यद् ब्रह्म जन्मास्य मौञ्जीबन्धनचिह्नितम्।
तत्रास्य माता सावित्री पितात्वाचार्य्य उच्यते।'
( मनु० २।१७० )

जातिशब्दार्थः

'आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः।
उत्पादयति सावित्र्या सा सत्या साजरामरा।' ( मनु० २।१४८ )

अत्र द्विजातिशब्दान्तर्गतस्य जातिशब्दस्य जन्मैवार्थः।

'ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः, ( याज्ञ्यः आचार, ३९ )

शूद्रस्योपनयनाभावादेकजातित्वम्।

'चतुर्थ एक जातिस्तु शूद्रः' ( १०।४ मनुः )।

'सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः।' (या० आ० ९० )

'हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥"

( याज्ञ्य०-व्यवहार० ४३ )

'सजातावुत्तमो दण्डः आनुलोम्ये तु मध्यमः।
प्रतिलोम्ये वधः पुंसो' ( या० व्य० २८६ )

'सजातिजानन्तरजाः षट्सुता द्विजधर्मिणः।' ( मनु १०।४१ )

'अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्।' ( म० १०।६४ )

इत्यादौ जातिशब्दो वर्ण पर एव।

'जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।'( या० आ० ९६ )

यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः।' ( या० व्य० ६९ )

इत्यादिषु जातिशब्दस्य मूर्धाभिषिक्तादयो वर्णसंकरा एवार्थः।

'पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः॥

( म० १०।४४-४५ )

इत्यादि देशविशेष-कुलविशेष-जातेषु जातिशब्दप्रयोगेऽपि न क्षतिः।

परन्तु न सर्वत्र तदर्थक एव जातिशब्दः। तथात्वे कुलधर्म-जानपद-धर्म-श्रेणीधर्मेभ्यः पृथग्जातिधर्मनिर्देशो न स्यात्।

'जातिजानपदान् धर्मान् श्रेणीधर्मांश्च धर्मवित्।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्॥'

( मनुः ८।४१ )

'सद्भिराचरितं यत् स्यात् धार्मिकैश्च द्विजातिभिः ।
तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् ।'

( मनुः ८।४६ )

इत्यत्र देशकुलधर्मभिन्नतया जातिधर्मनिर्देशो दृश्यते । वीतहव्यप्रसङ्गे 'स्वजातिं त्याजितो मया' ( म० भा० अ० प० ३०।५५ ) इत्यादि वचनैः ब्राह्मणक्षत्रियादिवर्णेषु जातिपदप्रयोगो दृश्यते ।

कर्मणा वर्णत्वे तदर्जुनस्य शमदमवैराग्यादियुक्तत्वेन न केवलं ब्राह्मणत्वमपि तु संन्यासोऽपि स्वधर्म एव स्यात् । तथा च शौर्य्यादिगुणवत्त्वेन द्रोणकृपादीनां क्षत्रियत्वमेव युक्तं स्यात् । परम् 'स्वधर्मे निधनं श्रेयः' 'स्वे स्वे कर्मण्यभिरतः' इत्यादि रीत्या जन्मना वर्णसिद्धान्तमाश्रित्यैवार्जुनस्य क्षत्रियत्वं, भिक्षाधर्मानर्हत्वमुक्तम् । द्रोणादीनां स्वधर्मविरुद्धक्षात्रधर्माचरणेन निन्दार्हता चोक्ता ।

यदुक्तम् 'पृथिव्यां सर्वमानवाः' इति रीत्या जीविकालक्षणकर्मणैव वर्णव्यवस्था युक्ता, अन्यथा मानवमात्रग्राह्यता मानवधर्मस्य न भविष्यतीति, तदपि न, विकल्पानुपपत्तेः । यदि मानवधर्मपदेन अहिंसा सत्यादिलक्षणाः साधारणा धर्मा एव गृह्येरन् तदा तु मानवमात्रग्राह्यता तत्र संभवत्येव । यदा तु वर्णाश्रमधर्मस्तदा तु न तस्य 'पृथिव्यां सर्वमानवा' इत्यस्य विषयता ।

वस्तुतस्तु 'स्वं स्वं चरित्रं शिक्षेरन्' इत्युक्तरीत्या प्रातिस्विकचरित्रशिक्षण एव मनूक्तेस्तात्पर्य्यम् । नच सर्वेषां वर्णाश्रमधर्मो विहितः । अतएव मनुना दशमेऽध्याये पौण्ड्रक-चौड्र-द्रविड-काम्बोज-यवन-शक-पारद-पह्लव-किरात-दरद-खशादीनां कृते प्रतिलोमसंकरादीनाञ्च कृते, मत्स्यघातचर्मवादित्रशिल्पादिभिर्जीविका विहिता । ब्राह्मणादीनां कृते विशेषत उक्तम्—

'सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै ।'

( मनुः २।८ )

मिथ्याप्रलोभनेनाबोधजनान् प्रतार्य्य स्वधर्मे दीक्षयित्वा स्वकलेवरवृद्धिर्नेष्यते । एतदर्थमेव स्वधर्मनिष्ठा पोषिता मन्वादिभिः ।

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।' ( श्री० भ० गी० १८।४५ )

जन्मना वर्णः इति रीत्या पूर्वं जन्मना वर्णरूपाधिकारप्राप्तिः। तदनुसारेण कर्मप्रवृत्तिः। कर्मणा वर्ण इति रीत्या तु कर्मणः प्राथम्यम्। अधिकाररूपवर्णप्राप्तिः पश्चात्। शास्त्रेषु तु जन्मसिद्धान् ब्राह्मणादीनुद्दिश्यैव तानि तानि कर्माणि विहितानि। ब्राह्मणादीनां यानि प्रातिस्विकानि कर्माणि तेषु तेषामेवाधिकारो नान्येषाम्। न च तत्तत्कर्मकरणादेव ब्राह्मणत्वादिकं किन्तु 'एष वर्णाश्रमो धर्मः।' इति (शान्ति पर्व २०८।१६)

धर्मस्य वर्णाश्रमत्वमुक्तम्। तेन कर्मणः पूर्वमेव जन्मनैव तदाश्रयसिद्धया भाव्यम्। दुहित्रादीनां कृते तदाश्रयाणि कर्माणि विधीयन्ते न कर्मभिर्दुहित्रादयः साध्यन्ते। अन्यथा यव पत्नी कर्म कुर्यात्सैव पत्नी स्यादित्यव्यवस्थैव स्यात्। पित्रोः शुश्रूषा पुत्रस्य धर्मस्तथापि न सेवाधर्मेण कश्चिद्वस्तुतः पुत्रो भवति, व्यवहारे तस्य दायानधिकारात्।

'अधीयीरंस्त्रयो वर्णाः स्वकर्मस्था द्विजातयः।
प्रब्रूयाद् ब्राह्मणस्त्वेषां नेतराविति निश्चयः।' (मनुः १०।१)

इत्यनेनापि जन्मनैव वर्णव्यवस्था सिद्धयति।

स्वधर्मविरुद्धाचरणस्य प्रत्यवायहेतुत्वं प्रसिद्धमेव। जन्मना ब्राह्मणस्य तदनुगुणनिजगुणकर्माण्यावश्यकानीति तदर्थं प्रयत्नातिशयो युक्त एव। तथापि कचित्तदभावेऽपि जन्मना ब्राह्मण्यमस्त्येव। तस्यैव जातिब्राह्मण्यमुक्तम्। अतएव 'चत्वारो वर्णाः ब्राह्मण क्षत्रिय-वैश्य-शूद्राः, तेषां पूर्वः पूर्वो जन्मतः श्रेयान्' इत्यापस्तम्बसूत्रे जन्मनैव वर्णव्यवस्थोक्ता। जन्मनैव ब्राह्मणादीनां श्रेष्ठत्वमपि। तथा च शूद्रोचितगुणकर्मशून्यशूद्रापेक्षया तत्सम्पन्नस्य श्रेष्ठत्वम्, तदपेक्षयाऽपि जातिवैश्यस्य श्रेष्ठत्वम्, तदपेक्षयाऽपि जातिक्षत्रियस्योत्कर्षः। एवमेव मुख्यक्षत्रियापेक्षया जातिब्राह्मणस्य तदपेक्षयापि मुख्यब्राह्मणस्योत्कर्षः। अतएव मात्रब्राह्मणश्रोत्रियानूचानादिभेदेन ब्राह्मण वैविध्यमप्युक्तम्। व्यास स्मृतौ ब्राह्मणसमब्राह्मणब्रुवादि भेदोऽप्युक्तः (४।४१-४५)।

'ब्रह्मबीजसमुद्भूतो मन्त्रसंस्कारवर्जितः।
जातिमात्रोपजीवी च स भवेद् ब्राह्मणः समः॥
गर्भाधानादिभिर्मन्त्रैर्वेदोपनयनेन च।
नाध्यापयति नाधीते स भवेद् ब्राह्मणब्रुवः॥'

अत्रिणापि देव-मुनि - राज-वैश्य-शूद्र-निषाद-पशु-म्लेच्छ-चण्डालेति-दश भेदा ब्राह्मणानामुक्ताः। अत्रि संहिता ३७१ ) म० भा० शा० ७६ अध्याये ब्रह्मसम-देवसम-क्षत्रसम-वैश्यसम-शूद्रसम-ब्राह्मणचाण्डालभेदेन षड्भेदा ब्राह्मणानामुक्ताः । यदि कर्मणैव ब्राह्मणः स्यात्तदैते भेदा असंगता एव स्युः। जन्मना ब्राह्मण्यपक्ष एव गुणकर्मानुसारेण चैते भेदाः संगच्छन्ते। जन्मोचितकर्महीनो ब्राह्मणः शूद्रसमब्राह्मणो भवति इति स्पष्टमुक्तम्।

'ब्रह्मबीजसमुद्भूतो मन्त्रसंस्कारवर्जितः।
जातिमात्रोपजीवी च स भवेद् ब्राह्मणसमः॥'

( व्याससमृतिः )

'नरेषु ब्राह्मणाः स्मृताः। ब्राह्मणेषु च विद्वांसः'

( म० १।९६-९७ )

'उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती।'

( म० १।९८ )

'ब्राह्मणो जायमानो हि पृथिव्यामधिजायते।'

( म० १।९९ )

'यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति॥'

( म० २।१५७ )

'जन्मना ब्राह्मणो ज्ञेयः' ( अत्रिस्मृतिः ) इति रीत्या ब्राह्मणादयो जन्मनैव भवन्ति। गुणकृता भेदास्तु गौणा एव। जन्ममूलकमुख्यब्राह्मणादीनुद्दिश्य यानि कर्माणि विहितानि न तेषु गौणब्राह्मणादीनामधिकारः श्रुतौ साक्षि-प्रकरणे मनुना च ब्राह्मणयोनि-क्षत्रिययोनि-विड्योनि शूद्रयोनिरिति योनिशब्द-प्रयोगेण जन्ममूलकत्वमेव ब्राह्मणादीनां स्पष्टमवगम्यते। 'ब्राह्मणयोनिम्' ( छान्दोग्ये ५।१०।८ )।

'गृहिणः पौत्रिणः मौलाः क्षत्रविट्शूद्रयोनयः।' ( ८।६२ मनु )

श्राद्धप्रकरणे वर्ज्यब्राह्मणेषु अब्राह्मणवृत्तीनां ब्राह्मणानां श्राद्धा-नर्हतोक्ता। यदि कर्मभिर्गुणैश्च वर्णव्यवस्था स्यात्तदा तेषां ब्राह्मणत्वाभावा-देव तदनर्हतेति पृथक् तदनर्हतोक्तिरपार्थैव स्यात्। तत्रानधीयानः मांसविक्रय-

वाणिज्यवृत्ति - प्रेष्य-वार्धुषिक - पशुपाल-कुशीलव - शूद्रशिष्य-भृतकाध्यापक-बन्दि-तैलिक-रसविक्रयि-धनुर्बाणनिर्मातृ-हस्त्यादिशिक्षक-पक्षिपोषकयुद्धाचार्य-वृक्षारोपक - श्येनजीवि - हिंस्र-वृषलवृत्ति - कृषिजीवि -अजाविपाल-माहिषिक विगर्हिताचारा एवंविधा अपाङ्क्तेया ब्राह्मणाः श्राद्धे निषिद्धाः। जन्मना वर्णत्वे तेषां प्राप्तिर्निषेधश्च संगच्छते, न कर्मवर्णपक्षे।

'गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान्।
प्रेष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्॥ (मनुः ८।१०२)

इत्यादिषु भिन्नवृत्तिष्वपि विप्रपदप्रयोगो जन्ममूलकवर्णव्यवहार-मङ्गीकृत्यैव संगच्छते। यथा तात्कालिकैः कर्मभिर्वर्णव्यवस्थाऽशास्त्रीया अव्यवहार्य्या च तथैव सत्त्वादिगुणतारतम्येनापि मनुष्यैर्वर्णव्यवस्था दुःसम्पादा। भोजनपानसंगतिशिक्षणादिभिर्गुणेषु स्थैर्य्यासंभवात्। तदधीनाया वर्ण-व्यवस्थाया अपि स्थैर्य्यं न संभवति। दुर्वासा-भृगु-परशुरामादिषु क्रोधित्वादि-भिरपि न क्षत्रियत्वव्यवहारः। हरिश्चन्द्रयुधिष्ठिराम्बरीषादीनां परम-सात्त्विकानामपि क्षत्रियत्वमेव प्रसिद्धम्। विदुरस्य परमसात्त्विकत्वेऽपि शूद्र-त्वमेव। तथाविधस्यैव तुलाधारस्य वैश्यत्वमेव (म० भा०) अनुशासनपर्वणि सिंह-व्याघ्र-वराह-मृग-जल - सर्प-मकरस्वभावानामुग्रमन्दानेकनिन्द्यगुणाना-मपि ब्राह्मणानां वर्णनं भीष्मेण कृतम्।

'दुरासदाश्च चण्डाश्च रभसाः क्षिप्रकारिणः॥ १३॥
सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथापरे।
वराहमृगसत्त्वाश्च जलसत्त्वास्तथापरे॥ १४॥
सर्पस्पर्शसमाः केचित्तथान्ये मकरस्पृशः।
विभाष्यघातिनः केचित्तथा चक्षुर्हणोऽपरे॥ १५॥
सन्ति चाशीविषसमाः सन्ति मन्दास्तथापरे।
विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर॥ (३५।१३-१६)

शास्त्रेषु गुणकर्मानुसारिणी वर्णव्यवस्था नास्त्येवेति सिद्धम्। भारतीयानां जीवनं न केवलमर्थनिष्ठमपितु धर्मार्थकाममोक्षेति चतुर्वर्गपरमेव। अत-एव न जीविकामात्रपर्य्यवसायिनी वर्णव्यवस्था किन्तु वर्णव्यवस्थायाः लौकिकाः पारलौकिकाश्चाभ्युदया मोक्षश्च यथायोग्यमिष्यन्ते।

'तेषु सम्यग्वर्तमानो गच्छत्यमरलोकताम् ।
यथा संकल्पितांश्चेह सर्वान्कामान्समश्नुते ॥' ( मनुः २।५ )
'श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्यचानुत्तमं सुखम् ॥' ( म० २।९ )
'ब्राह्मणस्य तु देहोऽयं क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ॥'
( भागवत० ११।१७।४२ )
'दानातिथ्यं क्रिया धर्मैर्यान्ति वैश्याश्च सद्गतिम् ।'
( म० भा० वनपर्व १५०।५१ )

शूद्रस्यापि कृते मनुनोक्तम्

'यथा तथाहि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेमं चामुञ्च लोकं प्राप्नोत्यनिंदितः ॥'
( म० १०।१२८ )
'अर्थशास्त्रात्तु वलवद्धर्मशास्त्रमिति स्थितिः ।'
( याज्ञवल्क्य० २१ )

इति रीत्या—जीविका विभागेनार्थिकसंघर्षनिराकरणमेव, न वर्णधर्मप्रयोजनम् । किन्तु तद्द्वारा सौविध्येन धर्मानुष्ठानामुष्मिकफलनिष्पत्तिरेव मन्वादिधर्मशास्त्राणामुद्देश्यम् ।

यद्यपीदानीं स्वातन्त्र्येण सर्वैरेव सर्वाणि कर्माणि क्रियन्ते तथापि वंशानुक्रमेण प्राप्तजीविकाश्रयणेन सुव्यवस्थासंघर्षाभावश्चाद्यापि दृश्यते संभाव्यते च ।

पक्षिणामुड्डयने मत्स्यानां प्लवने यथा पित्रादि संस्कारानुसारेणैव साफल्यं भवति जन्मान्तरीयसंस्कारैरपि तादृशे कुले जन्म भवति यत्र तत्साफल्यं भवेत् । तदुक्त भगवताऽपि गीतायाम्—

'प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥
अथवा योगिनामेव कुले भवति धीमताम् ।'
'तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् ॥
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥'

कर्मणा वर्णव्यवस्थायां तु कस्यचिदपि कस्मिंश्चिदपि कर्मण्युत्तरदायित्वं न भवति। लाभलोभमन्तरा न क्वापि प्रवृत्तिर्भविष्यति। जन्मना तु संज्ञानत्वे कुलपरम्परा प्राप्ते कर्मणि स्वाभाविकी प्रवृत्तिर्जायते, तदकरणान्निन्द्यते च। तेन जन्मनियतेषु कर्मस्वनायासेनैव नैपुण्यं जायते। यथारुचि प्रवृत्तौ तु रुचीनामानन्त्याद्व्यवस्थैव स्यात्। सौविध्यञ्च कुलप्राप्तकर्मनैपुण्यसम्पत्तौ जायते। यद्यपि जन्मनाधिकारमाश्रित्यापि कर्त्तव्यवैमुख्यं केषाञ्चिद् दृश्यते तथापि तत्रावधानमेवोपायः। अन्यथा कर्मणा वर्णव्यवस्थायामपि तन्नासम्भवि। वर्णनिर्णयसमितिनिर्माणे सदस्यानां निर्वाचने निर्वाचनदोषा आयास्यन्ति।

तत्रापि पक्षपातोऽन्यायश्च न भविष्यतीति को वक्तुमीष्टे? लाभप्रदवृत्तिप्राप्त्यर्थं प्रभावशालिनां प्रभावोऽपि निष्पक्षवर्णनिर्णये बाधको भविष्यति। नहि कर्मणा वर्णव्यवस्थायां सत्यामेव रजस्तमसोः सर्वथा विलोपो भविष्यति। न वा तावतैव महाशनानां महापाप्मनां तमोद्वाराणां कामक्रोधलोभानामपगमः नलयुधिष्ठिरपरीक्षिदादीनामपि बुद्धिषु रजस्तमसोः प्रभावः प्रतिफलति। तदा कथं नान्यत्र तत्प्रभावः स्यात्? ततोऽनादिपरम्पराप्राप्तजन्मना वर्णव्यवस्थायामेव स्थैर्य्येण गुणाः सम्पादनीया परिहार्य्याश्चागन्तुका दोषाः।

यत्तु-सर्पयुधिष्ठिरसंवादेन कर्मणा वर्णसमर्थनप्रयासस्तदपि तुच्छम्, तत्र संवादे जीविकालक्षणस्य कर्मणोऽनुक्तत्वात्। तत्र तु केवलं ब्राह्मणस्यैव चर्चा दृश्यते, न क्षत्रियादीनाम्। तत्र तु ब्राह्मणत्वसाधकानां येषां कर्मणामुल्लेखस्तानि न जीविका साधनानि। तत्र तु 'ब्राह्मणः को भवेद्राजन्' इति सर्पप्रश्ने—

सत्यं दानं क्षमाशीलमानृशंस्यं तपो घृणा।
दृश्यते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः॥'

(म० भा० वन पर्व १८०।२१)

नैतेषु किञ्चिदपि कर्म जीविका साधनम्। एते च सत्यादिगुणा न केवलं शिक्षोपजीविकावतां शास्त्राजीविकावतां ब्राह्मणानामुपयुज्यन्ते, भवन्ति च। किन्तु शस्त्रजीविनां क्षत्रियाणां, वार्त्ताजीविनां वैश्यानामपि भवन्त्येव। तथा च किं ते सर्वेऽपि ब्राह्मणा एव भविष्यन्ति? तथा च चातुर्वर्ण्यभङ्ग एव स्यात्।

अथवा

'यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः।
यत्रैतन्न भवेत् सर्प तं शूद्रमिति निर्दिशेत्॥'

(म० भा० व० प० १८०।२६)

इति रीत्या ब्राह्मणशूद्रेति वर्णद्वयमेव स्यात्। अत एवेह संवादे चातुर्वर्ण्य-विचारप्रसङ्गाभावात् ब्रह्मज्ञानोपयोगिसात्त्विकगुणैर्ब्रह्मज्ञत्वलक्षणस्य पारमार्थिक-ब्राह्मण्यस्यैव निरूपणम्। तथा च तत्रैव शान्तिपर्वणि—

"कषाये कर्मभिः पक्वे रसज्ञाने च तिष्ठति॥३८॥
आनृशंस्यं क्षमा शान्तिरहिंसा सत्यमार्जवम्।
अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा शमस्तथा॥३९॥
पन्थानो ब्रह्मणस्त्वेते एतैः प्राप्नोति यत्परम्। (२७०।३८-४०)

यक्षयुधिष्ठिरसंवादेऽपि कुलवृत्तस्वाध्यायश्रुतेषु ब्राह्मण्यं केन सिद्ध्यतीति प्रश्नस्योत्तरप्रसङ्गे कुलस्वाध्यायश्रुतानि न द्विजत्वकारणम् किन्तु वृत्तमेव तत्कारणम्। अतो ब्राह्मणेन वृत्तोपार्जनार्थमेव प्रयतनीयम् इत्युक्तम्। तत् संवादेनापि कर्मणा वर्णव्यवस्था न सिद्ध्यति, वर्णव्यवस्थाप्रसङ्गाभावात्, क्षत्रियवैश्यादिविचाराभावाच्च।

अत्र

'वृत्तं यत्नेन संरक्ष्यम् ब्राह्मणेन विशेषतः।'

(वन० प० ३१३।१०९)

'चतुर्वेदोऽपि दुर्वृत्तः स, शूद्रादतिरिच्यते।'

(म० भा० व० प० ३१३।१११)

अत्र ब्राह्मण्यं पूर्वसिद्धमेव। तस्य तु वृत्तरक्षणे यत्नातिशयकर्तव्यतोक्ता। मनुष्यमात्रेण वृत्तं रक्षणीयम्। ब्राह्मणस्य सर्वश्रेष्ठत्वादेव प्रयत्नातिशयस्तत्रावश्यकः। तत्रोपसंहारे—

'योऽग्निहोत्रपरो दान्तः स ब्राह्मण इति स्मृतः।'

इत्युक्तं तत्राग्निहोत्रं न जीविका, न वा दान्तता जीविका।

जन्मना वर्णव्यवस्थेति सिद्धान्तबोधकश्रुतिस्मृत्यादिवचनाविरोधेनैव क्वचित् कर्मणा वर्णबोधकवचनानां समन्वयो युक्तः। तथा च भृगु-भरद्वाजसंवादीयानां 'न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्।'

'कर्मभिर्वर्णतां गतम्'। 'ते द्विजाः क्षत्रतां गताः। शूद्रतां गताः'
(शान्तिपर्व १८८।१०)

इत्यादि वचनानां तैस्तैः कर्मभिर्जन्मान्तरे क्षत्रतां वैश्यतां गता इत्येवार्थो मन्तव्यः। तस्मिन्नेव जन्मनि द्विजाः क्षत्रतां गता इति वचनाभावाच्चैव-मेवार्थो युक्तः। अत एव जन्मान्तर इत्यवश्यमध्याहर्त्तव्यम्। अत एव–

'केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः।

कथञ्चिदप्यतिक्रामन् पापः सूकरतां व्रजेत्।' (मनुः ३।१९०)

इदानीमपि जन्मान्तरे सूकरत्वप्राप्तिरुक्ता, न तस्मिन्नेव जन्मनि, प्रत्यक्षविरोधात्। तथैव प्रकृतेऽपि विज्ञातव्यम्। अत एव—

शूद्रे चैतद्भवेल्लक्ष्म द्विजे तच्च न विद्यते।

न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः॥' (शा०प०१८९।८)

इति वचनं तु गौणवर्णत्वबोधनद्वारा, कर्महीननिन्दनद्वारा च स्वकर्म-निष्ठा माहात्म्यं बोधयति। नात्र जन्मना वर्णनिषेधः। अत एव शूद्रो न शूद्रः, ब्राह्मणो न ब्राह्मण इत्युक्तम्। यो जन्मना शूद्रः प्रसिद्धः स तदुचितकर्माभा-वादशूद्र एव मन्तव्यः। एवं जन्मना ब्राह्मणोऽपि तदुचितगुणकर्माभावाद-ब्राह्मण एवेति मन्तव्यम्। शौर्य्यादिगुणाभावात् सिंहोऽसिंह इव, शौर्य्यादि-गुणयोगादसिंहोऽपि देवदत्तः सिंहवत्, अब्राह्मणोऽपि शूद्रः शमादिब्राह्मण-गुणयोगाद् ब्राह्मण इति व्यपदिश्यते। एतेन भृगुभरद्वाजसंवादेन कर्मणा वर्णव्यवस्था प्रतिपादनं भ्रममूलकमेव।

'ब्रह्मवीर्य्यं तथा क्षेत्रं संस्कारा ब्रह्मसम्भवाः।

ब्राह्मणाचरणाद् ब्रह्म विद्याभिर्ब्राह्मणो भवेत्॥"

इत्यादि वचनैः मेरुतन्त्रेऽपि ब्रह्मवीर्यक्षेत्रजानामेव संस्काराचरणब्रह्म-विद्याभिर्ब्राह्मणस्योत्तमत्वम् तदभावे त्वपकृष्टत्वमुक्तम्। ब्राह्मणोचितेषु संस्कारेष्वाचारेषु तु ब्रह्मवीर्यक्षेत्रजानामेवाधिकारः। किञ्च कर्मणा वर्णत्वपक्षे कस्यचिद् भूमिस्वामिनश्चत्वारो पुत्रास्तेषु कश्चन चिकित्सावृत्तिं, कश्चि-च्छिल्पं, कश्चिन्न्यायवादं करोति, पौरोहित्यञ्चापरः, कृषिञ्च न कश्चित्करोति। तदानीं भूमिरन्यस्मै दीयेत? राज्ञा वा गृह्येत? भूमौ तेषां स्वामित्वं कथं

स्थास्यति ? तथापि कर्मवर्णवादिनोऽपि परम्पराप्राप्तां भूमिं त्यक्तुं नेच्छन्ति ।

यदप्युक्तम् 'नानाविधैर्वाष्पयान-धूमयान-वायुयान-तडित्संदेश-दूरश्राव-कादियन्त्रैश्च सर्वस्यैव जगता घनिष्ठः सम्बन्धः सम्पन्नः । तथा च कर्मणा वर्णव्यवस्थायां प्रसृतायामेकत्रैव कथ जन्मना वर्णव्यवस्था सम्भवतीति, तदपि तुच्छम् । जन्मना वर्णव्यवस्थापक्षे व्यवहारे बाधाभावात् ।

'राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥' ( चा॰ नी॰ द॰ )
'दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः
सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् ।'
( मनुः ७.२४ )

'राजा हि युगमुच्यते'

शासकस्य धर्मिष्ठत्वे जनताया धर्मिष्ठत्वोपपत्तिः ।

कैश्चिदुच्यते 'विक्रमस्याष्टम्यां शत्यामत्र सर्वत्र कर्मणैव वर्णव्यवस्थाऽऽसीत् । तत्प्रभावादेव सर्वाङ्गीणा समुन्नतिरासीदिति । तत्तुच्छम्, तथात्वे कथं तद्विनाशः, कथञ्च तद्विपरीतवर्णव्यवस्थाप्रचारः सञ्जातः ।

'यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः ।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥" ( मनुः १०।९६ )

इति रीत्या क्षत्रियवैश्यादीनां ब्राह्मणजीविका निषिद्धा । अद्यत्वे प्रायेणाध्यापनादिकार्य्ये सर्वेषामेव प्रवृत्तिर्दृश्यते । याजनेऽपि बहूनां प्रवृत्तिः । प्रतिग्रहे तु विवेक एव नास्ति । वृत्त्यपहारादेव ब्राह्मणानामपि ब्राह्मणोचितानि कर्माणि न भवन्ति ।

'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः ।
अप्यकार्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ॥

इति पराशरमाधवीय उद्धृतमनुवचनरीत्या कुटुम्बपोषणार्थं वर्णविपरीतेष्वपि कर्मसु प्रवृत्तिर्जाता । कर्मणा वर्णपक्षे तु यस्य यत्र कर्मणि प्रवृत्तिस्तदनुसारेण तदेव तस्य कर्म भवति । तेन वृत्तिसाङ्कर्य्यनिषेधकवचनानां निर्विषयत्वमेव स्यात् ।

अप्रामाण्यञ्च वेदानां शास्त्राणाञ्चाभिलङ्घनम् ।
अव्यवस्था च सर्वत्र तद्वै नाशनमात्मनः ॥
( शान्ति प० ७९।१९ )

इतिरीत्या वेदादिशास्त्रमर्यादातिक्रमणस्यानर्थहेतुत्वमेव ।

यदुक्तम् 'यद्यपि शास्त्रेषु जन्मना वर्णबोधकवचनानां बाहुल्येनोपलब्धिः, कर्मणा वर्णबोधक वचनानां न्यूनतैव, तथापि यथा मणिरत्नाद्यपेक्षया लोष्ठपाषाणादीनां बाहुल्येऽपि न तस्य महत्त्वं, मणिरत्नादीनामेव तु महत्त्वं, तथैव कर्मणा वर्णबोधकवाक्यानामेव महत्त्वमनुसन्धेयमिति, तत्तुच्छम् , तन्महत्त्वबोधकप्रमाणाभावेन तादृक्सिद्धान्तस्य निःसारत्वात् । पूर्वोक्तयुक्त्या गुणकर्मादिबोधपरत्वेनातत्परत्वेन तत्परजन्मना वर्णबोधकवाक्यानामेव प्राबल्यात् ।

## वेदे चातुर्वर्ण्यसाधनम्

ननु वेदे चातुवर्ण्योल्लेखो नास्त्येव । तत्र 'हत्वी दस्यून् प्रार्य्यं वर्णमावत् ।'
( ऋ० सं० ३।३४।९ )

'यो दासं वर्णमधरं गुहाकः ।' ( ऋ० २।१२।४ )

'उभौ वर्णौ ऋषिरुग्रः पुपोष ।' ( ऋ० सं० १।१७९।६ )

इत्यादौ वर्णद्वयस्यैवोल्लेखात् । यद्यपि ब्रह्मराजन्यादिशब्दैरनेकजात्युल्लेखो लभ्यते । परन्तु तासां वर्णत्वं न सिद्ध्यति,

पुराणेषु च-'एकवर्णमिदं पूर्वं विश्वमासीद्युधिष्ठिर ।
कर्मक्रियादिभेदेन चातुर्वर्ण्यं प्रतिष्ठितम् ।'

इत्यादि महाभारतवचनैश्च चातुवर्ण्यं न प्राचीनं, किन्त्वर्वाचीनमेव सिद्ध्यतीति चेन्न, भावानवबोधात् । चत्वारो वै वर्णाः । ब्राह्मणो राजन्यो वैश्यः शूद्रः' ( ५।५।४।९ ) इति शतपथश्रुतौ वर्णचतुष्टयस्य कण्ठत उक्तत्वात् । चत्वारो वै पुरुषाः ।

'ब्राह्मणो राजन्यो वैश्यः शूद्र' इति ( ४।४।६ मै० सं० )

मैत्रायणीयसंहितायामपि चातुवर्ण्यमुक्तमेव । ब्राह्मण-क्षत्रिय-वैश्य-शूद्रा इति चत्वारो वर्णास्तेषां वर्णानां ब्राह्मण एव प्रधान' इति वज्रसूच्युपनिषद्यपि चातुर्वर्ण्यमुक्तमेव । वेदे आर्य्यशब्देन ब्राह्मणादि त्रयो वर्णा गृह्यन्ते, दासशब्देन शूद्रा गृह्यन्ते । तदप्युक्तम्– 'तिस्रः प्रजा आर्य्या ज्योतिरग्राः' ( ऋ० सं०

७।३१।७ ) इति मन्त्रे । अत एव प्रार्य्यं वर्णमावत् ( ऋ० सं० ३।३४।९ ) इत्यत्र सायणेन आर्य्यं उत्तमवर्णं त्रैवर्णिकमित्युक्तम् । दासवर्णं शूद्रादिकमित्यपि तेनैवोक्तम् । उभौ वर्णौ इत्यत्र तु वर्णशब्देन नार्य्य-शद्रौ विवक्षितौ, किन्तु कामः तपश्च । अत एव उभौ वर्णौ वर्णनीयावाकारौ कामश्च तपश्च पुपोष इति सायणेनोक्तम् । तथा च ब्राह्मणादयो वर्णा एवेति सर्वथा सिद्धयत्येव ।

एकवर्णमित्यादिवचनं भारते नोपलभ्यते । यदि स्यात्तर्हि त्वयमर्थः । इदं विश्व पूर्वं सृष्टेः प्राक् एकवर्णमद्वितीयब्रह्माकारमासीत् । पूर्वकल्पीयजीवानां कर्मक्रियाविभेदेन प्राक्कालिककर्मसंस्कारानुसारेण भावि सृष्टौ चाध्ययनादिक्रियाविभागेन चातुर्वर्ण्यं जातम् । अयञ्चार्थः श्रुत्याद्यनुसारी ।

'चातुर्वर्ण्यं भगवता पूर्वं सृष्टं स्वयं भुवा ।'

( अनु० प०म० भा० १४३।२ )

इति वचनेन भगवन्निर्मितं चातुर्वर्ण्यं प्रतीयते ।

यच्च भविष्यपुराणीयवचनेन 'एकस्य पितुश्चत्वारः पुत्रा यथा समानवर्णा भवन्ति तथैवैकस्य परमात्मनः सर्वेऽपि पुत्राः समानजातीया एवेति कुतो वर्णभेद' इति, यथा वैकस्योदुम्बरवृक्षस्य मध्याग्रमूलादिप्रदेशेष्वपि जायमानानि फलान्येकजातीयान्येव तथैव परमात्ममुखबाहूरूपादेभ्योऽपि जायमाना एकजातीया एवेति, तदपि तुच्छम् , समानजनकाज्जायमानानामपि स्त्रीपुरुषादिजातिभेददर्शनात् । ब्राह्मणादिषु मनुष्यत्वेन समानजातीयताप्यस्त्येव । न तावताऽपि तदवान्तरजात्यपलापः सम्भवति ।

प्रकृते तु एकस्मादेव पितुः परमेश्वराज्जायमानेषु देवर्षि-पितृ-मनुष्य-पशु-पक्षि-कीट-पतङ्ग-वृक्ष-पाषाणादि जातिभेदोऽस्त्येव । यथैकस्यापि देहस्य मुखबाहूरुपादेषु स्वरूपव्यवहारशुद्ध्यशुद्ध्यादि भेदस्तद्वत् । भविष्यपुराणीयवचनाभिप्रायस्तु जन्मकर्मसमुच्चयवर्णनमित्युक्तमेव ।

## मैक्समूलरमतम्

यदुक्तम् 'मनूक्ता वर्णव्यवस्था वेदे न विद्यते । चिप्स फ्राम ए जर्मन वर्कशाप भाग (२।१८६७) इति मैक्समूलरीये पुस्तके लिखितम् । तदपि तुच्छम् । 'दासं वर्णमधरं गुहाकः' ( ऋ० सं० २।१२।४ ) 'विश्वाः प्रजा आर्य्या ज्योतिरग्रा' ( ऋ० सं० ३।३४।६ ) 'दैव्यो वै वर्णो ब्राह्मणः असुर्यः शूद्रः' तैत्तिरीय ब्रा० १।२।६।७ )

'क्षत्रं वा अन्वश्वो वश्यश्च शूद्रश्चानु रासभो ब्राह्मणमजः ।' न 'कदाचन ब्राह्मणश्च क्षत्रियश्च वैश्यश्च शूद्रश्च पश्चादन्वितः'—श० ब्रा० ६।४।४।१२-१३

'शूद्रार्यौ चर्मणी व्यायच्छेते। तयोरार्यं वर्णमुज्जापयन्ति। यदार्यं वर्णमुज्जापयन्ति आत्मानमेव तदुज्जापयन्ति' (ताण्ड्य ५।६।१४।१६)

'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' ( तै० सं० ७।१।१।६ ) इत्यादिप्रमाणैर्वर्णभेदस्तदुत्कर्षापकर्षश्च सर्वथा सिद्ध्यति।

तेन मैक्समूलरोक्तिरनादरणीयैव। 'न शूद्रो दुह्यादसतो वा एष संभूतोऽसन् स्यात्' ( मैत्रायणी सं० ४।१।३।२२ )

इत्यत्र शूद्रकर्तृकं गोदोहनं यज्ञे निषिद्धम्। तेन शूद्रैः सार्धं भोजनविवाहादिसम्बन्धो दूरापास्तो वेदितव्यः।

'मनुर्वै यत्किञ्चावदत्तद् भेषजं भेषजतायाः' (ताण्ड्य २३।१६) इति वेद एव मनूक्तौ परमादरणीयतां वक्ति। तदा मनूक्ता वर्णव्यवस्था वेदसंमता नास्तीत्युक्तिरुन्मत्तप्रलपितैव वेदितव्या।

एवमेव वेदकाल—स्मृतिकाल-पुराणकालभेदेनाधुनिकानां व्यवस्थापि निर्मूलैव, वेदे स्मृतिपुराणादीनामप्युल्लेखदर्शनात्।

तथाहि-'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।' ( मुण्डक उ० १।५ )

ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम्' ( छा० उ० ७।१।२ )।

'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृहदा० उ० २।४।१०) इत्यादीनि बहुशो दर्शयितुं शक्यानि।

'नीचैर्दासा उपसर्पन्तु भूमिम्' ( अथर्व० ५।११।६ )

'दास्यार्द्रहस्ता समनक्तम उलूखलं मुसलं शुम्भतापः' (अथर्व० १२।३।१३)

'शूद्र एव न दुह्यात् असतो वा एष संभूतः यच्छूद्रः। अहविरेव तदित्याहुः यच्छूद्रो दोग्धीति'। ( तै० ब्रा ३।२।३।९।८ ) 'अग्निहोत्रमेव न दुह्याच्छूद्रः' ( तै० ब्रा० ३।२।३।१० )

## वर्णव्यवस्थादोषखण्डनम्

यदुक्तम् "प्रेमसद्भाव-संघटनयोरभावादेव पूर्वं साम्प्रतञ्च हिन्दुत्वजातेस्तद्धर्मस्य च पारतन्त्र्यादिप्रयुक्तां महतीं दुर्दशामवलोकयन्तोऽपि ब्राह्मणाद्याः प्रेमसद्भावाय संघटनाय च न प्रयतन्ते। केरलदेशे शूद्रातिशूद्रा अस्पृश्या ब्राह्मणादिभिरुपेक्षिताः समुद्विग्नाः सन्तो मोपलेति नामधेया दशलक्षाधिकामुसलमानाः सञ्जाताः। तैर्हिन्दूनामुपरि महानत्याचारो विहितः" इति तन्न, वैदिकानां ब्राह्मणादीनां प्रेमसद्भावसंघटनादिदृष्टिसत्त्वेऽपि लोभरागद्वेषादिवशात् धर्मान्तरप्रवेशेन मुसलमानसंख्यावृद्धिर्जाता। श्रीरामस्य प्रेमसद्भावसत्त्वेऽपि रावणादिराक्षसानां, युधिष्ठिरादीनां प्रेमसद्भावसत्त्वेऽपि दुर्योधनादीनाञ्च विपरीतप्रवृत्तिदर्शनात्। शास्त्रधर्मदेशस्वातन्त्र्याय बहवोऽपि ब्राह्मणादयो हिन्दवः पूर्वमद्यापि प्रयतन्त एव। तिलकमालवीयप्रभृतयोऽपि ब्राह्मणा एवासन्।

यत्तु—"ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा विवावृधुः। सुजातासो जनुषा पृश्निमातरो दिवो मर्या आनो अच्छाजिगातन' (ऋ० ५।५९।६)।

इति मन्त्रस्य वर्णानामुत्कर्षापकर्षनिषेधे तात्पर्य्यम्" इति तदपितुच्छम्, उक्तमन्त्रस्य एकोनपञ्चाशत्संख्याकानां मरुतां सहजत्वेन ज्येष्ठकनिष्ठत्वनिषेधे तात्पर्यात्।

यत्तु 'सुजातासो जनुषा पृश्निमातरो दिवो मर्या आनो अच्छाजिगातन' इत्यस्य विवरणे 'ये जनुषा जन्मना उत्पत्त्या पृश्निमातरः माताभूमिः पुत्रोऽहं पृथिव्याः' (अथर्व १२।१।१२) कीदृशास्ते दिवः स्वर्गलोकात् सुजातासः सुष्ठु संभृताः 'गायन्ति देवाः किलगीतकानि धन्यास्तु ये भारतभूमिभागे' इत्यादि स्मृतेः, पुनः कीदृशास्ते उद्भिदः शत्रूणां बाह्याभ्यन्तराणामाततायिनामुद्भेदयितारः विनाशयितारः शूरवीराः अज्येष्ठासः अकनिष्ठासः उत्तमाधमभावरहिता समाः समानप्रेमसद्भावा वा मर्य्याः मनुष्याः सन्ति। ते महसा तेजसा केनाप्यनभिभूता विद्यापराक्रमेण विवावृधुः शोभनामभिवृद्धिं आप्नुवन्तु। ते सर्वे यूयम् अस्मान् भगवत्स्वरूपदेवान् उपासितुमिति शेषः। अच्छ साधु यथास्यात्तथाऽस्मदभिमुखं आजिगातन आगच्छत। परस्परं भ्रातृभूताः

सौभगाय सुभगत्वाय सौभाग्याय वावृधुः विवर्धन्ताम्। एषां भवतामार्य्याणां पिता पालकः परमेश्वरः युवा नित्यतरुणः अविनाशी स्वपाः शोभनकर्मा भक्तरक्षणदुष्टदलनादिरूपाणि यस्य स्तुत्यानि कर्माणि सन्ति। एवंभूतो रुद्रो विविधदुःखद्रावकः समुपास्याऽस्ति। सुदुघा सुष्ठु दोग्ध्री विविधोपयोगिधनधान्यादिविमलदुग्धदोग्ध्री पृश्निः मातृभूता सेव्याऽस्ति। ये वा भवतामार्य्याणामिति शेषः। अतएव मरुद्भ्यो भगवद्रूपेभ्यो देवेभ्यः सुदिना शोभनानि दिनानि कुर्वन्तु भवन्तः" इत्यादि बहुजल्पितम्। तत्सर्वमयथार्थकं मन्त्रार्थवैपरीत्यात्। प्रेमसद्भावसंघटनादीनि यद्यपि शोभनानि कार्य्याणि तथापि मन्त्रस्यापि अयमेवार्थ इति न युक्तम्। ऋषिदैवतप्रकृतिप्रत्ययपूर्वापरसंदर्भानुसारेणैव मन्त्रार्थस्य निर्धारयितव्यत्वात्।

किञ्च सर्वस्य यथा परमात्मपुत्रत्वेऽपि पशुपक्ष्यादिभेदापलापो न संभवति। तथैव सर्वस्य पृश्निपुत्रत्वेऽपि न ब्राह्मणादिजातिभेदापलापः सुशकः। पृथवीपदेन मातृभूमेर्ग्रहणे भारतीयस्यैव पृश्निमातृत्वे वा किं बीजमिति नोक्तम्।

सायणरीत्या प्रथममन्त्रस्यायमर्थः। प्रवःस्पट् इत्यष्टर्चं तृतीयं सूक्तं श्यावाश्वस्यार्षं मारुतम्। अष्टमी त्रिष्टुप्। शिष्टाः सप्तजगत्यः। तेन सर्वमिदं सूक्तं मरुद्देवताकम्। तेन नात्र सर्वे मनुष्याः सम्बोध्यन्ते, किन्तु मरुतः स्तूयन्ते। ते अज्येष्ठा अकनिष्ठा उद्भिद उद्भेदयितारः शत्रूणां अमध्यमासः अमध्यमाः सर्वप्रकारैः समाः महसा तेजसा विवृधुः विवर्धन्ते। सुजातासः सुष्ठु संभूताः जनुषा जन्मना पृश्निमातरः पृश्नेः पुत्रा मर्य्या मनुष्येभ्यो हिता यूयं दिवः सकाशात् नः अस्मान् अच्छ अभिमुखं आजिगातन सर्वतः प्रशंसत। साध्वनुष्ठितमिति। उत्तरार्धार्थः प्रत्यक्षकृतः।

यद्वा हे सुजाता जनुषा पृश्निमातरश्च तान् दिव आगतान्, हे ऋत्विजो मर्य्या यूयमाजिगातन आगच्छत। तेनो अच्छ आगच्छतास्मदभिमुखम्। अपरस्यापि तत्सदृशमन्त्रस्यायमर्थः। अज्येष्ठासः अकनिष्ठासः। परस्परं ज्येष्ठकनिष्ठभावरहिताः। एते मरुतः। भ्रातरः। सौभगाय सुभगत्वाय। सम्। ववृधुः वर्धन्ते। युवा। स्वपाः शोभनकर्मा। एषां मरुताम्। पिता रुद्रः। सुदुघा सुष्ठु दोग्ध्री। पृश्निः गोदेवता। मरुद्भ्यः। सुदिना शोभनदिनानि। अकुरुतामिति शेषः।

एवं प्रकरणानुसारेण ऋषिदैवतानुसारेण परम्पराप्राप्तमर्थमपहाय स्वाभ्यूहितानि अनेकानि सूपयोगीनि व्याख्यानानि कर्तुं शक्यन्ते। परं तानि वेदमन्त्रव्याख्यानानीति न वक्तुं शक्यन्ते।

एवमेव 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्' (ऋ० १०।१९१।२) इति मन्त्रस्यापि व्याख्याने यदुक्तम्—'हे आर्य्यमानवाः पावनभारतभूवास्तव्याः यूयं संगच्छध्वं मिथः स्नेहसद्भावसहानुभूतिविनयादिसद्गुणैः संयुक्ताः सन्तः कौटिल्यञ्चापहाय मिथः संघटिताः स्वाभ्युदयाय राष्ट्रगौरवाभिवृद्धये प्रगतिशीला भवत। संवदध्वं राष्ट्रहितसम्पादकं सत्यं प्रियं वाक्यं ब्रूत।' इत्यत्रापि आर्य्यमानवा भारतभूवास्तव्या एव वा कथ ग्राह्याः? तथार्थ-ग्रहणेऽपि वर्णाश्रमव्यवस्थापलापः कथं सिद्ध्यति? अस्य मन्त्रस्य वर्णा-श्रमिणामपि संगमन-संवदनादि संमतौ बाधाभावात्।

यदपि 'अन्योऽन्यस्मै वल्गु वदन्त एत, मा' 'वियौष्ट' (अथर्व ३।३०।५) इमानि मन्त्रवाक्यान्यपि न विरुद्धानि। अन्योऽन्यवल्गुभाषणं कुर्वतां देशाद्यभ्युदयाय गमनम् परस्परविरोधेन वियोजनस्याभावश्च न वर्णाश्रमिणां प्रतिकूलम्। तावताऽपि दुष्टनिग्रहादिकं हितायैव गुणदोषवर्णनं नैतैर्मन्त्रैर्नि-षिद्धम्। 'अन्धं तमः प्रविशन्ति ये ऽविद्यामुपासते' इत्यादि मन्त्रेषु निन्दार्थवा-देषु तद्दर्शनात्।

एवमेव 'सं वो मनांसि जानताम्। यद्यदस्मदनुकूलं प्रतिकूलं वा तदन्ये-षामपि तथैव भवतीति स्वात्मदृष्टान्तेन प्राणिजाते सुखदुःखादिकं मानापमा-नादिक सममेकरूपमेव विजानन्तु। समानी व आकूतिः समाना हृदयानि वः'। (ऋ० सं० १०।१९१।४)

युष्माकं संकल्पः प्रयत्नो व्यवहारः समानी सरला अवक्रा प्रेमसद्भा-वादिसद्गुणभूषिता एकविधा अस्तु भवतु। वः हृदयानि अन्तःकरणानि समानानि भवन्तु। विषमाणि राष्ट्रगौरवस्वातन्त्र्याभ्युदयविच्छेदकानि न भवन्तु इत्यपि न विरुद्धम्।

'आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुखं स योगी परमो मतः॥' (श्री० भ० गी० ६।३२)
'आत्मनः प्रतिकूलानि परेषां न समाचरेत्'

इत्यादि वचनानि च तत्पोषकाणि। तथापि न सर्वैः सर्वाणि कर्माण्यनुष्ठेयानि। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः (३।३५) इति गीतावचनविरोधात्।

वस्तुतस्तु शुभोद्देश्येन समेषां गमनवदनादिभेदेऽपि संगमनसंवदनादिकं न विरुद्धम्। यथा शत्रुपराजयराष्ट्रविजयोद्देश्येन हस्त्युष्ट्राश्वरथ-वाष्पयान-वायुयान-वाहनभेदे यष्ट्यसिभुशुण्डीशतघ्न्यादिशस्त्रास्त्रभेदे विविधगमनव्यापारादिभेदे च सत्यपि समानोद्देश्यप्रवृत्तिकत्वेन संगमनादिकम्, तद्वत्।

यच्च—'समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्' (ऋ० सं० १०।१९१।३) इत्यस्य व्याख्याने गुप्तभाषण-गुप्तयोजना च समान एकविधः समानरूपेण समाजराष्ट्रहितसंपादकः, नत्वनेकविधो भवतु। यद्वा इष्टलाभायानिष्टनिवारणाय जपनीयः स्मरणीयः परमेश्वरस्य गायत्र्यादिरूपो मन्त्रोऽपि समेषामार्य्याणां भारतभूवास्तव्यानां समान एव भवतु, न तु विभिन्नः। समितिः सभा परिषत् विचारगोष्ठी समानी एकरूपाऽस्तु। एकस्यामेव समितौ समभावेनैवोत्तमाधमभावरहिताः सम्मिलिताः सन्तो भवन्तो राष्ट्रहितविचारायावतिष्ठन्ताम्। मनोऽपि विचारसाधनं भवतां समानमेव भूयात्। तथा चित्तं मननादिजं ज्ञानमपि सह सहित समानार्थलाभसंपादकत्वेन एकीभूतमेव स्यात्। एषां भवतां एकस्मिन्नेव राष्ट्रहितकार्ये सह प्रवृत्तानामिति तदेतत्प्रमादविलसितम्। गुप्तभाषणानां गुप्तयोजनानाञ्च कार्य्यभेदेन भेदसंभवात्। नहि समेषां समान्येव कार्य्याणि, जगद्वैचित्र्यलोपापत्तेः। समाजराष्ट्रहितसम्पादकयोजनानामप्यधिकारभेदेन भेदसंभवात्। गायत्र्यादिमन्त्रोऽपि न समेषां जपनीयः, नृसिंहतापनीयोपनिषद्विरोधात्।

तत्र हि सावित्री प्रणवादिजपः स्त्रीशूद्राणां निषिद्ध एव।

'सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति।'
'यदि जानीयात् स्त्रीशूद्रः स मृतोऽधो गच्छति।।'

(नृ० पू० ता० १।३)

द्वादशार्णो महामन्त्रो सर्वसिद्धिप्रदायकः।
स्त्रीशूद्राणां विताराेऽयं सतारस्तु द्विजन्मनाम्।।" इति

(बृहन्नारदीये)

समितावपि समभावेनोत्तमाधमभावरहिता न संभवन्ति। विशिष्टानां विशिष्टासनादिदर्शनात्। भवतापि स्वशिष्यैः समान एव आसने किमिति नोपविश्यते? कथमुच्चासने संस्थीयते। स्वातन्त्र्यपारतन्त्र्ययोरिष्टानिष्टत्वन्तु युक्तमेव।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्॥' इत्युक्तेः
( मनुः ४।१६० )

वस्तुतस्तु सायणादिप्रोक्त एवार्थोऽत्र संगतः। एतत्सूक्तस्य संवनन ऋषिः संसमिद्युवस इति प्रथमाया ऋचोऽग्निर्देवता शिष्टानां संज्ञानं देवता। अत्र प्रासङ्गिकत्वात् द्रव्यदेवतास्मारकत्वान्मन्त्राणां यज्ञादिसम्बन्धित्वेन स्तोतार एव संबोध्यन्ते।

तदुक्तम् सायणेन 'हे स्तोतारः यूयं संगच्छध्वं संगता संभूता भवत। संवदध्वं परस्परं विरोधं परित्यज्यैकविधमेव वाक्यं ब्रूत। वः युष्माकं मनांसि संजानताम्। समानमेकरूपमेवार्थमवगच्छन्तु। पूर्वे पुरातना यथा देवाः संजानाना ऐकमत्यं प्राप्ताः हविर्भागमुपासते। यथास्व स्वीकुर्वन्ति। तथायूयमपि वैमत्यं परित्यज्य धनं ( दक्षिणादिरूपं ) स्वीकुरुतेति शेषः।' अथर्वसंहितायामपीदं सूक्तं किञ्चिद् भेदेन पठितम्। तत्र संजानीध्वम् इति तृचेन सामनस्य कर्मणि उदकुम्भं सुराकुम्भं वा संपात्य अभिमन्त्र्य सूत्रोक्त-क्रमेण ग्रामे निनयेत्। तेनैव तत्र सायणेन हे सांमनस्यकामा जना इत्युक्तम्। यथा पुरा देवा इन्द्रादयः संजानानाः समानकार्यज्ञानाः पूर्वे सन्तः पूर्वे असुरेभ्यः पूर्वभाविनः सन्तः यजमानैः कल्पितं भागं उपासते प्राप्नुवन्ति। अतो यूयमपि तद्वत्परस्परविरोधपरिहारेण संजानाना इष्टफलं भजतेति भावः।

समानो मन्त्र इत्यस्य ऋग्भाष्यानुसार्य्ययमर्थः एषामेकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतृणां वा मन्त्रः स्तुतिः शस्त्राद्यात्मिका ब्राह्मणानामत्रा-त्विज्यं भवतीति समानमन्त्रत्वेऽपि न दोषः। गुप्तभाषणं वा समान एकविधो-ऽस्तु। तथा समितिः प्राप्तिरपि समानी एकरूपास्तु। अत्रापि शास्त्रोक्त-दक्षिणावैषम्यादिकं न निषिद्ध्यते। ऋत्विजां गणभेदेन दक्षिणाभेदस्य विहितत्वात्। एवमेव 'समा समाभ्यां विषमसमे पूजातः ( गौ. ध. सू. १७।२ ) इत्यादि शास्त्रवचनैः समेषु विषमपूजावद्विषमेषु समपूजापि निषिद्धा ज्ञायते।

मनः मननसाधनमन्तःकरणमपि समानमस्तु। चित्तं विचारजं ज्ञानं सह सहितं परस्परस्यैकार्थेनैकीभूतमस्तु। अहं च वः युष्माकं समानमेकविधमन्त्रं अभिमन्त्रये ऐकविध्याय संस्करोमि। तथा वः युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिना अहं जुहोमि वषट्कारेण हविः प्रक्षेपयामीत्यर्थः।

'समानीव आकूतिः समाना हृदयानि वः समानमस्तु वो मनो यथा वः सु सहा सति।' अयमर्थः-हे ऋत्विग्यजमानाः वः युष्माकं आकूति संकल्पोऽध्यवसायः समानो एकविधोऽस्तु। तथा वः युष्माकं हृदयानि समाना समान्येकविधानि सन्तु। तथा वः मनः अन्तःकरणम्। प्रत्येकापेक्षयैकवचनम्। तदपि समानमस्तु। यथा वः सु सह शाभनं साहित्यं असति भवति। समानमस्त्वित्यर्थः। अस्तेर्लेटि बहुलं छन्दसि असतीति रूपम्।

अथर्वमन्त्रीयसायणभाष्येऽपि समितिरित्यस्य संगतिः कार्य्येषु प्रवृत्तिरिति व्याख्यानम्। समानेन हविषा इत्यस्य ऐक्यजनकेन वः युष्माकं सम्बन्धिना हविषा आज्यादिना जुहोमि आज्यमग्नौ प्रक्षिपामीत्यर्थः

समानी व आकूतिरित्यस्यापि मन्त्रस्य पूर्वोक्तव्याख्यानतुल्यमेव व्याख्यानम्। अथर्वसंहितायाः तृतीये काण्डे षष्ठेऽनुवाकेऽपि सामनस्यार्थकर्मणि विनियुक्ता मन्त्रा उक्ताः। उपाकर्मण्यपि आज्यहोमेऽस्य सूक्तस्य विनियोगः। सूत्रे प्रोक्तम्—अभिजिति शिष्यानुपनीय श्वो भूते सम्भारान् सम्भरति इति प्रक्रम्य गुणकर्मभिर्विश्वकर्मभिरायुष्यैः स्वस्त्ययनैराज्य जुहुयात् इति ( कौशिक सू० १४।३) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः। अन्योऽन्यमभिहर्य्यत वत्सं जातमिवाघ्न्या। हे विवदमाना जना वः युष्माकं विद्वेषाभावोपलक्षितं सांमनस्यं कर्म कृणोमि करोमि। कीदृशं तत् सहृदयं समानैर्हृदयैरुपेतम्। समानचित्तवृत्तियुक्तम् सांमनुष्यञ्च तदेव। संप्रीतियुक्तैर्मनुष्यैर्निर्वर्तितं सांमनुष्यम्। समानज्ञानहेतुभूतं सख्यं करोमित्यर्थः। ततो यूयमपि जातं वत्सं अघ्न्या अहन्तव्या गौरिव अन्योऽन्यं अभिहर्य्यत अभिमुख्येन कामयध्वम्।

'अनुव्रतः पितुः पुत्रः मात्रा भवतु संमनाः।
जायापत्ये मधुमती वाचं वदतु शान्तिवां।'

पुत्रः पितुरनुव्रतः अनुकूलकर्मा भवतु। मातापुत्रादिभिः समानमस्का भवतु। पत्ये जाया मधुमती मधुरां शान्तिवां सुखयुक्तां वाचं वदतु।

'मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।'

स्पष्टार्थो मन्त्रः ।

'येन देवान् वियन्ति नो च विद्विषते मिथः ।
तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ।

येन ब्रह्मणा देवा इन्द्रादयः न वियन्ति विमतिं न प्राप्नुवन्ति मिथो न विद्विषते विद्वेषं न कुर्वते । तत् समानज्ञाननिमित्तं ऐकमत्यापादकं ब्रह्म मन्त्रात्मकं सामनस्यं वः युष्माकं गृहे पुरुषेभ्यः कृण्महे कुर्मः ।

'ज्यायस्वन्तश्चित्तिनो मा वियौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्योऽन्यस्मै वल्गु वदन्त एत । चित्तिनः समानचित्तयुक्ताः संराधयन्तः समानसंसिद्धिका समानकार्याः । सधुराः समानकार्योद्वहनाः इत्थं चरन्तः । यूयं मा वियौष्ट मा पृथग्भूत वियुक्ता मा भवतेत्यर्थः । अन्योऽन्यस्मै वल्गु शोभनं वाक्यं वदन्तः यूयं एत आगच्छत । हे जना अहमपि वः सध्रीचीनान् सहाञ्चतः कार्येषु सह प्रवृत्तान् समानमनस्कान् करोमि ।

'समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारानाभिमिवाभितः ।'

हे सांमनस्यकामाः वः प्रपा पानीयशाला एका भवतु । अन्नभागश्च सहैव भवतु । परस्परानुरागवशेन एकत्रावस्थितमन्नपानादिकं युष्माभिरुपभुज्यताम् । तदर्थमहं वः युष्मान् समाने योक्त्रे एकस्मिन् स्नेहपाशे सह युनज्मि सह बध्नामि । अपि च सम्यञ्च एकफलार्थिनो भूताः समानज्ञाना अग्निं पूजयत । कमिव नाभिं रथचक्रस्य मध्यच्छिद्रम् अरा इव चक्रावयवाः कीलकाः नियत स्थाना यथा परिवेष्ट्य वर्त्तन्ते, तद्वत् ।

'सध्रीचीनान् वः संमनस्कृणोम्येकश्नुष्टीन्तसंवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः सायं प्रातः सौमनसो वो अस्तु ।'

सध्रीचीनान् एककार्य्यकरणे सहोद्युक्तान् संमनसः समानमनस्कान् युष्मान् कृणोमि । तथा युष्माकं एकश्नुष्टिं एकविधं व्यापनं एकविधस्यान्नस्य भुक्तिं वा करोमि । संवननेन वशीकरणेन अनेन सांमनस्य कर्मणा युष्मान् सर्वान् वशीकरोमीत्यर्थः ।

अमृतं द्युलोकस्थं अजरामरत्वप्रापकं पीयूषं रक्षमाणाः ऐकमत्येन पालयन्तः देवा इन्द्रादयो यथा सौमनस्ययुक्ता भवन्ति। एवं वो युष्माकं सायं प्रातस्तदुपलक्षिते सर्वस्मिन्काले सौमनस्यमस्तु। अत्र स्मृतिशास्त्राविरोधेनैव भोजनपानैक्यं विहितम्। अत्र सांमनस्यकामा गणाः गृहाणि कुलानि वेदाधिकृतान्येव ग्राह्याणि, त्रैवर्णिकाणामेव वैदिककर्मस्वधिकृतत्वात्।

यदुक्तम् "म्लेच्छशासकाना-(बादशाह) मादेशेन भारतीयाः क्षत्रियराजानः स्वीयाः कन्यका भगिनीश्चैतेभ्यो दत्तवन्तः। दौर्बल्यादेव तैः सर्वं सोढम्। तैरेव हिन्दूनां मन्दिराणि च ध्वस्तानि सोमनाथ-काशीविश्वनाथमन्दिरादिविध्वंसश्च तत्रत्यानां प्रचुराभिमानभरितानामुपहासमिव कुर्वन् विश्वनाथमन्दिरस्थाने मस्जिदो विद्यमानोऽद्यापि दृश्यते।" इति तद्यद्यपि सत्यमेव। तच्च धर्मत्यागजन्यदुरदृष्टमूलकम्, न धर्मनिष्ठधर्माभिमानादिमूलकम्।

वस्तुतस्तु शास्त्रसदाचारधर्मादिविश्वासविधुराणां नास्तिकानामधर्नास्तिकानां नीतिशास्त्राभ्यासवैधुर्यात् प्रमादाच्च विघटनसेनासैनिकतदुपकरणसंग्रहनिर्माणराहित्येन नैर्बल्यम्. तेन च पराभवः, वर्णाश्रमानुसारिणां स्वस्वधर्मनिष्ठानां ब्राह्मणानां विवेकविज्ञानधैर्यादिषु, क्षत्रियाणां शौर्यवीर्यौजस्तेजःसु, वैश्यानां कृषिगोरक्ष्यवाणिज्यादिषु, शूद्राणां शिल्पश्रमसेवादिषु यथायोग्यं समाद्रियमाणेषु स्वप्नेऽपि पराभवाशङ्का न भवति। महाभारते मात्स्यन्यायप्रवृत्तेर्मूलम् कालक्रमेण रजस्तमः प्रसारेण ज्ञानविज्ञानवैराग्यशैथिल्यं मालिन्यकामक्रोधोद्भवादिकञ्चोक्तम्। सत्त्वविकासकाले ज्ञानविज्ञानप्रभावेण राज्यराजदण्डदाण्डिकादिनैरपेक्ष्येणैव सर्वासु व्यवस्थोक्ता।

> 'न वै राज्यं न राजासीन्न च दण्डो न दाण्डिकः।
> धर्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परम्॥'
>
> (शा०प० ५९।१४)

इति महाभारतवचनात्।

यदुक्तम्—

> "यत्समाजशरीरस्य पादः शूद्रः पृथक्कृतः।
> तन्मूर्ध्नि न कथं कुर्युः पदाघातं विधर्मिणः॥
> स्वाङ्गशूद्रतिरस्कारादेव नूनं द्विजातिभिः।
> प्रापितं भारतं वर्षं शोचनीयामिमां दशाम्॥"

इति तन्न, तादृगारोपस्य मोहमूलकत्वात्। व्यवस्थायास्तिरस्कारहेतुत्वाभावात्।

यथा हस्तपादमुखादीन्यङ्गानि योग्यतानुसारेण पृथक्कार्ये विनियुज्यन्ते। न तावता तत्र कस्याप्यवमानम्, भोजनाय मुखं प्रवर्त्तते, रक्षणाय बाहू, संग्रहाय वितरणाय चोदरम्, तथैव श्रमशिल्पसेवाद्यर्थं शूद्रो विनियुज्यते, न चात्रापमानं कस्यापि, सहजकर्मत्यागेनैव दोषापत्तिसंभवात्। धर्मतद्बोधकशास्त्राचार्यविरोधप्रसारादेव धर्मभावना शैथिल्यम्। विधर्मिणां प्रलोभनादिभिश्च जना धर्मान्तरमङ्गीकुर्वन्ति।

केचित् सामाजिकधार्मिकनियमोल्लङ्घनेन दण्डा भर्त्सिता जातिच्युताश्च धर्मान्तरं प्रविश्य पूर्वधर्मं धर्मानुयायिनश्च विरुन्धन्ति, पराजिता न्यायालयमुपालभन्ते, जातिच्युता जातिं धर्मभ्रष्टा धर्ममुपालभन्ते, 'अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते' इति न्यायात्। कालक्रमेण ज्ञानविज्ञानशैथिल्यात् नीतिशास्त्रभ्यासवैधुर्य्यात् बलार्जनशक्तिसैन्यादिसंकलनप्रमादाच्च दौर्बल्यं जायते। ततो राज्यनाशो, मन्दिरादिध्वंसनम् जातम्। तत्र धर्मनिष्ठा शास्त्रनिष्ठा वा न पतनकारणमिति मन्तव्यम्। विवेकहीनतया शक्तिशैथिल्येन चात्याचारान् पश्यन्तोऽपि जनास्तत्प्रतीकारं कर्त्तुं न क्षमन्ते। तदा वृत्तिसंस्कार-बाहुल्ये सति शौर्य्यवीर्य्यरक्तौष्ण्यञ्च क्वापि प्रविलीयते। अनेका दुर्घटनाः प्रवादाश्च प्रवर्त्तन्ते।

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥' (म० २।२०)

इति मानववचनमतिगर्वेण कथयन्तो विद्वांसो न लज्जन्त इति महदाश्चर्य्य"मिति तत्तुच्छम्। विपत्काले परिस्थितौ विपरीतायामपि स्थायिचारित्रस्य गौरवशीलत्वे तदुक्तैरादरणीयत्वात्। सूर्य्योऽपि कदाचिदस्ताचलं गच्छन् निस्तेजा इव भवति, न तावताऽपि तस्य प्रचण्डप्रकाशापलापः कर्त्तुं शक्यः।

## विधवाविवाहचर्चा

यदुक्तम् "पण्डिता विधवाविवाहं शास्त्रविरुद्धं मन्यन्ते। म्लेच्छाश्च बहिष्कृतास्ताः स्ववधूः अकुर्वन्। ताभ्यश्च क्षेत्रभूताभ्योऽपत्यानि भूयांसि हिन्दूधर्म-

संस्कृतिगौरवविघातकानि म्लेच्छरूपाण्युत्पादयामासुः। तेनैव वंगदेशे म्लेच्छ-बाहुल्यं जातम्। शास्त्रदृष्ट्या विधवाविवाहे एककलासदृशलघुपापमस्ति, परन्तु व्यभिचारम्लेच्छकर्तृकहरणादिकं तु षोडशकला सदृश महत्पापमस्ति। महतः पापस्य निस्तरणाय लघुपापकरणेऽपि न हानिः। 'सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डितः, इति न्यायेन महापापं परिहृत्य लघुपापं समाश्रयेत्' इति, तत्तुच्छम् भिन्नाश्रयत्वात्। दौर्बल्ये सति विधवानां कुमारीणां सधवानामपि हरणादिकं संभवत्येव। ततो दौर्बल्यपरिहारायैव प्रयत्नो युक्तः, न तु विधवाविवाहेन तद्दौर्बल्यनिवृत्तिः। तस्य तद्धेतुत्वात्। संयमे स्वबलाधायकत्वमेव।

वस्तुतस्तु वातावरणशोधनमन्तरा कुमार्य्योऽपि उच्छृङ्खला भवन्ति, सदाचारवातावरणनिर्माणेन तु विधवा अपि सदाचारिण्यो भवन्ति।

यदुक्तम् "यदा लब्धसंन्याससवैराग्य-धर्मपालन-दीक्षा अपि संन्यासिनो विरागिणो मठादिसम्पत्तिमासाद्य स्वयमेतत्पतिता भूत्वा लक्षाधिकाः पुत्र-कलत्रादिमन्तः गोस्वामिनः संयोगिनो गृहस्था बभूवुः। तदा वराकीणां विधवानान्तु कैव कथा? पतिहीनां युवतिं विधवां सर्वेऽपि विषयलोलुपा जनाः वाञ्छन्ति।

'समुत्सृष्टामिषं भूमौ प्रार्थयन्ति यथा खगाः।
प्रार्थयन्ति जनाः सर्वे पतिहीनां तथा स्त्रियम्॥'

(म० भा० आ० प० १५८।१२)

अत एव बहिर्मुखा युवतयो विधवाः विषयवासना पूर्त्यै एव स्वेच्छयैव स्वकुलमर्य्यादाविरुद्धमपि यत्रतत्र स्वसम्बन्धं गुप्तरूपेण योजयामासुः, योजयन्ति च। क्वचित् कस्यचित्प्रतिष्ठितब्राह्मणस्य पत्नी रजकस्य पत्नी संवृत्ता। गुर्जरेऽपि काचिद् ब्राह्मणी विधवा श्वसुरगृहेतीव पीडिता मुसलमानस्य पत्नी संवृत्ता। अनेकाश्च विधवा विद्रोहं कृत्वा यवनम्पतिं धृतवत्यः। तस्माद् विषयासक्तानां युवतीनां विधवानां स्वजातीययोग्यविधुरैः सहयोजनं तदनर्थापेक्षया वरतरमिति' तदप्यविचारितरमणीयम्। यतो संसारेऽनादिकालमारभ्य धर्मनीतिव्यवस्थायां सत्यामपि जनाः मिथ्याभाषणं

व्यभिचार चौर्य्य हत्याञ्च कुर्वन्ति। न च तावता धर्मनीतिव्यवस्थैव समापनीया भवति। तथैव लोकपरलोककल्याणकामनया विधवाविवाहावरोधो विहितः। मनुष्येतरेषु पशुषु विवाहव्यवस्थैव नास्ति। अत एव तत्र विधिनिषेधाभावात् पूर्णस्वातन्त्र्यमेवास्ति। पशुत्वापेक्षया मनुष्यत्वे धार्मिकनियमस्यैव वैशेष्यं भवति।

'धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः' इत्युक्तेः।

अत एव शास्त्रप्रामाण्याभ्युपगन्तृत्वमेव मनुष्यत्वं भवति। शास्त्रैकसमधिगम्यौ धर्माधर्मौ भवतः। नतु बाह्यहानिलाभमात्रानुमेयौ। विधवाविवाहश्च शास्त्रे सर्वथा निषिद्ध एव।

ननु विधवाव्यभिचारदर्शनात तत्र संकोचो युक्त इति चेन्न, तथात्वे यतीनां विरागिणाञ्च व्यभिचारं दृष्टवा यतिधर्मेऽपि संकोचापत्तिप्रसङ्गात्। न च तत्र संकोचो दृष्टः, आरूढपतितानां निन्दाश्रवणात्। तथा भूतानां पृथक संस्था निर्माणम्, तेष्वेव तेषां भोजनविवाहादिव्यवस्था यथा भवेत्तथैव प्रयतितव्यम्। यासां येषां वा शास्त्रोल्लघनेन पातित्यं जातं तेषामपि पृथक् संस्थानिर्माणे दोषाभावात्। तावताऽपि यथा यतिधर्मे पुनर्विवाहाद्यनुमतिर्न संभवति तथैव विधवाविवाहप्रतिषेधेऽपि न संकोचः संभवति।

किञ्चैतदसकृदुक्तम्—सदाचारवातावरणनिर्माणेन सधवाविधवासु सर्वत्रैव सदाचारसद्भावना प्रसरिष्यति। तदभावे तु सधवानामपि कुमारीणामपि च दुराचारप्रवृत्तिर्भविष्यत्येव। प्राप्तमेवैतत्पूर्वम् यन्मेवाडवासिनां क्षत्रियाणां वीरगतिप्राप्तावपि तेषां विधवाः पत्न्योऽग्निज्वालामेव प्रविष्टवत्यो, नतु व्यभिचारिण्यो जाताः। 'स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः' इत्यस्यापि तदेवाभिप्रेत्य समाधानान्तरं न कृतम्।

'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः'

इतिरीत्या श्रेष्ठजनसदाचारपालनादर्शस्थापनमेव सर्वत्र दुराचारनिवृत्त्युपायो न तूच्छृङ्खलता समर्थनं, न वा धर्मोल्लङ्घन प्रोत्साहनम्। अन्यथाऽर्जुनप्रस्तावानुसारेण युद्धाकरणसमर्थनमेव कृतं स्याद्भगवता। परिणामेऽपि कौरवपाण्डववीराणां, मेवाडवीराणां वीरगतिप्राप्तावपि तत्पत्नीषु

व्यभिचारगन्धलेशोऽपि न प्रवृत्तः। तस्मान्निरोधेनैवोच्छृङ्खलता निवृत्तिर्भवति न तत्प्रोत्साहनेन। उत्सृष्टामिषमिति दृष्टान्तस्तु स्वाभाविकस्थितिवर्णनेन तदुपायकरणमेव प्रोत्साहयति, स्वाभाविककामकर्मनिवारणायैव वैदिककामकर्मविधानात्।

'अविद्यया मृत्युं तीर्त्वा, विद्ययाऽमृतमश्नुते' इति श्रुतेः।

यदुक्तम् "मृतपत्नीकाः पुरुषाः कथं न ब्रह्मचर्य्यव्रतं परिपालयन्ति? युवतिभिर्विधवाभिः किमपराद्धम्? पित्रादिगृहेषु भ्रातृपत्नीनां देवरादिपत्नीनां ननान्दृणाञ्च विविधवस्त्राभूषणपरिधानकेशविन्यासादिधारणपूर्वकं विलासमयहावभावपरिहासादिकं विधवाया दुर्भाग्यस्य सूचकान् विलक्षणकटाक्षपातांश्च विलोक्य मानसमतीव दूयते। विधवानामपि हृदये काचिद् व्यक्ता पिपासा देहस्य कापि बुभुक्षा, तासामप्यन्तः काश्चनोर्मय उच्छलन्ति। तत एवाद्यत्वे स्वेच्छयापि हिन्दूविधवा म्लेच्छैः सार्द्धमपि संगता भवन्ति। प्राचीनकालेऽपि हिन्दूविधवा म्लेच्छानाभीरान् स्वेच्छया संगतवत्यः।

कलत्रस्य बहुत्वाद्धि रूपं तत्सुततस्ततः।
प्रयत्नमकरोत् पार्थो जनस्य परिरक्षणे।
मिषतां सर्वयोधानां ततस्ताः प्रमदोत्तमाः।
समन्ततोऽवकृष्यन्ते कामाच्चान्याः प्रवव्रजुः।
जग्मुरादाय ते म्लेच्छाः समन्ताज्जनमेजय।' इति
(महाभारत० मौशलपर्व अ० ७।५४८।५९६)"

तदपि न, भावानवबोधात्। तथाहि—व्यक्तिगतदोषैः शास्त्रीयसिद्धान्तपरिहारस्यायोग्यत्वात्। विषयवासनानां प्राबल्यं सत्य तथापि तन्निरासायैव शास्त्रधर्मतन्नियमादिमहत्त्वविधानात्। पाशविककामकर्मज्ञानलक्षणमृत्युनिरसाय वैदिककामकर्मज्ञानविधानमित्युक्तमेव। भारतीययादवपत्नीनां तु कासाञ्चित् शापग्रस्तानामेव स्वच्छया म्लेच्छादिवरणं संवृत्तम्। देवीभागवते स्पष्टमिदं यत्—इन्द्रप्रेरिताश्चाप्सरसः तपश्चरतो नरनारायणयोस्तपो भञ्जनाय प्रयत्नशीला आसन्। नारायणेन वरवरणाय प्रेरिता नारायणमेव पतित्वे वृतवत्यः। अन्यप्रसङ्गेनापि ताः श्रीकृष्णेनैव शप्ताः। 'अन्ते बर्बरैर्गृहीता भविष्यथ' इति।

अर्वाचीनानां प्राचीनानां वा घटनानामनुरोधेन न धर्माधर्मनिर्णयः। धर्मविरुद्धानामपि घटनानां संभवात्। अत एव 'यानि मेऽनवद्यानि तानि त्वयोपास्यानि, नो इतराणि' इति श्रूयते ( तै० उप० )

तथा च कामक्रोधादिमूलिकाभिः प्रवृत्तिभिर्न धर्मस्याधर्मत्वं नवाऽधर्मस्य धर्मत्वं सम्भवति।

## वृद्धविवाहक्रमः

यदुक्तम् 'वृद्धयुवतिविवाहोऽपि तादृशानर्थस्य हेतुस्तदनुगुणान्येव बहून्युदाहरणानि प्रदर्शितानि। किं केनचिद्युवकेन जर्जरितया वृद्धया विवाहः कृतः ? किं कुत्रापि श्रुतं दृष्टं वा ? वृद्धेन स्वामिना युवत्याः कीदृशः स्नेहः ? स्नेहं विना वैयक्तिकमपि सुखं न संभवति। पण्डिताश्च निन्दनीयस्य स्वार्थस्य सिद्धये इत्थमुपदिशन्ति। वृद्धो वा, रुग्णो वा, कुष्ठी वा, हीनाङ्गोऽपि वा, विरूपो वा, मूर्खो वा, पतिर्न हातव्यो युवत्या कदाचन, एष धर्मः सनातनः। वृद्धा वा, हीनाङ्गाऽपि वा, कुष्ठा वा विरूपाऽपि पत्नी न हातव्या यूना पत्या कदाचनेति नोपदिशन्ति। 'सदृशीं भार्य्यामुपेयात्' इतिवत् 'सदृशं पतिमुपेयात्' इति नोपदिशन्ति।

नव्यास्तु—वृद्धः षष्ठिवर्षीयः सदृशीं षष्ठिवर्षीयामुपेयादित्येवार्थं वर्णयन्ति। बलात् प्रतिरुद्धा मानसक्षुधालक्षणा विषयवासना येन केनापि साकमुत्तमेनाधमेन वा, म्लेच्छेन वा गन्तुं तां प्रेरयत्येव। तदुक्तं द्रौपद्या—

'पञ्च मे पतयः सन्ति मह्यं षष्ठोऽपि रोचते।
पुरुषाणामभावे हि सर्वा नार्य्यः पतिव्रताः'। इति।

तदपि न विचारचारु, यतो वृद्धयुवतिविवाहोऽपवाद एव। यत्र क्वचित् पत्न्यां मृतायामग्निहोत्रहोमलोपप्रसङ्गस्तत्रैव पुरुषस्य पुनर्विवाहोऽनिवार्य्यो वंशच्छेदप्रसक्तौ वा, अग्निहोत्रहोमलोपस्य वंशविच्छेदस्य चानर्थहेतुत्वात्। न च पत्यौ मृते पत्न्या अपि पुनर्विवाहः किन्न स्यादिति वाच्यम्, तस्यास्तदविधानात्। पत्नीनां तु पातिव्रत्यपालनेनैव सर्वोत्तमा सद्गतिर्भवति। अत एव नाग्निहोत्रकरणाय वंशप्रवर्त्तनाय चोढानां पत्नीनां पुनर्विवाहविधानम्।

एतेन पुरुषवत् स्त्रीभिरपि कुतो न पुनर्विवाहः कार्य्य इति प्रत्याख्यातम्। 'वृद्धाभिः कुतो न युवकैः सार्द्धं विवाहः क्रियत' इत्यपि कुशकाशावलम्बनम्, प्रकृतिवैचित्र्येण धर्मवैचित्र्यात्। पुरुषा एकस्मिन् वर्षे बह्वीषु बहून् गर्भानाधातुं शक्नुवन्ति, स्त्रियश्चैकमेव गर्भमाधातुं प्रभवन्ति। स्वभावशरीरादिवैचित्र्यात् पुरुषाणां स्त्रीणाञ्च नियमा धर्मा अपि विलक्षणा एव भवन्ति। नात्रसाम्यसम्पादनाय यतनीयम्। अन्यथा 'स्त्रीणामष्टगुणः काम' इति रीत्या तासु दयां विधायैकपुरुषेण सन्तोषाभावे बहुपुरुषसम्बन्धोऽपि दयालुभिः समर्थनीयः स्यात्। यथा त्वयैवोक्तम्।

"पञ्च मे पतयः सन्ति मह्यं षष्ठोऽपि रोचते इति।"

परं न च तत्संगतम्, नियन्त्रणमूलिकायाः संस्कृतेस्तदननुमतत्वात्।

यदुक्तम् "यथा संन्यासधर्मो विरागिणः कृते उचितोऽस्ति, सरागस्य कृतेऽनुचितस्तथैव युवतिविधवायाः सकामायाः विषयासक्तायाः कृते प्रभूतानिष्टनिवारणाय पुनर्विवाहो युक्तः। विगतपतिप्रेमाढ्याया, विषयोपरताया, निष्कामायाः सत्सङ्गभक्तिज्ञाननिष्ठाया पुत्रादिसन्तानवत्याः पुनर्विवाहोऽनुचित एव" इति तत्तुच्छम्, वैषम्यात्। दृष्टान्ते

'विरक्तः प्रव्रजेद्धीमान् सरक्तस्तु गृहे वसेत्'

इति शास्त्रोक्ता व्यवस्था विद्यते। परमत्र सरागायाः पुनर्विवाहो विरागायास्तु नेति शास्त्रीया व्यवस्था नास्त्येव। प्रत्युत

'न विवाहविधावुक्तं विधवावेदनं पुनः।'

'नामापि नैव गृह्णीयात् पत्यौ प्रेते परस्य तु'॥

इत्यविशेषेणैव सर्वासां कृते पत्यौ प्रेते पत्यन्तरसम्बन्धनिषेधो दृश्यते। अन्यथा स्त्रीणामष्टगुणितकामवत्त्वेन सबलपातकायाः सन्तुष्टाया एकपतिसम्बन्धनियमो निर्बलपतिकायाः अतृप्तायास्त्वनेकपुरुषसम्बन्धोऽपि विधेयः स्यादेव। यदि तु शास्त्रनिषिद्धत्वात्तदनुचितमिति तदात्रापि निषेधः समान एव।

केचन मन्त्राः

यदुक्तम्—

"इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम्।
विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि॥"
(अथर्ववेद १८।३।१)

इत्यस्य हे मर्त्य मरणधर्मन् मनुष्य इयं पुरोवर्त्तिनी नारी युवतिः सकामा स्त्री पतिलोकं पतिस्थानं वृणाना सहधर्मचारिणीत्वे संभजमाना पुराण पुरातनं धर्मं प्रत्यक्षपतिसहचारलक्षणं पालयन्ती प्रकर्षेण इतं अस्माद् भूलोकाद् विनिर्गतं अनु पश्चात् त्वा त्वां उपनिपद्यते समीपं नितरां गच्छति। अत एव त्वं तस्यै सकामायै तव साहचर्य्यं प्राप्त्यै प्रजां पुत्रादिरूपां सन्ततिं द्रविणञ्च धेहि प्रयच्छ। मर्त्यपदेन मृतः कथं संबोध्यः स्यात्? इह इति मनुष्यलोकबोधकवचनेन च प्रेतं पतिं अनु पश्चात् त्वामन्यं योग्यं पतिं वृणाना इति योजनेन सकामाया विधवायाः कृते स्पष्टतः विधवाया पुनर्विवाहः प्रतीयते। एवमेव 'उदीर्ष्व नार्य्यभिजीवलोकमितासुमेतमुशेष एहि हस्तग्राभस्य दिधिषोस्त्वमेतत् पत्युर्जनित्वमभिसंबभूथ' ( ऋ० १०।१८।८ )( अथर्व १८।३।२ ) ( तै० आ० ६।१।१४ )

हे नारि इतासुं गतप्राणं मृतमेतं पतिमुपशेषे उपेत्य शयनं करोषि। अर्थात् मृतपतिं प्रागनुभूतं विषयोपभोगप्रदं तत्सामीप्यञ्चानुस्मृत्यासहायभूता शोकेनाभिभूता च सती शय्यायां पतितासि। अतस्त्वमस्मात् मृतपतिस्मरणलक्षणात् समीपात् उत्तिष्ठ तं विहाय जीवलोकमभि जीवन्तं योग्यं युवकमानवसमूहमभिलक्ष्य एहि आगच्छ त्वं हस्तग्राभस्य पाणिग्राहवतो दिधिषोः पुनर्विवाहेच्छोर्द्वितीयस्य पत्युः एतत् जनित्वं जायात्वं भार्य्यात्वं अभि संबभूथ आभिमुख्येन सम्यक् प्राप्नुहि। द्विरूढाया द्वितीयवारं विवाहितायाः स्त्रियाः स्वामी पतिः दिधिषुः।

'भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः।
धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः॥'

सकामाया विधवायाः कृतेऽयं मन्त्रः पत्यन्तरविधायकोऽस्तीति निश्चप्रचमिति तत्तुच्छम्, सूत्रविरुद्धत्वात्। तथाहि-अन्त्येष्टौ विनियोगः। उत्तरतः पत्नीं धनुः क्षत्रियाया तामुत्थापयेद् देवरः पतिस्थानीयोऽन्तेवासी वा जरद्दासो वा उदीर्ष्व नारि अभि जीवलोकमिति वर्त्ता वृषले जपेत् १८ इति सूत्रे मन्त्रयोरनयोरन्त्येष्टौ विनियोगः प्रतीयते। १६, १७ सूत्राभ्यामित्यपि ज्ञायते यत् अन्त्येष्ट्यवसरे सहगमनोद्यतां पत्नीं देवरोऽन्तेवासी जरद्दासो वा तत उत्थापयति। पुत्रपौत्रादिलक्षणं जीवलोकमभिवीक्ष्य त्वमात्मानं रक्ष पतिसहगमनं मा कुरु इति सान्त्वयति। मृतस्य पत्युरन्त्येष्टिसमय एव अयं पतिर्मृतः हित्वैनं त्वमुत्तिष्ठ जीवलोकमभिवीक्ष्य कञ्चिदन्यं युवानं

पतित्वेन स्वीकुर्विति पुनर्विवाहप्रस्तावं कश्चिद्राक्षसाधम एव समुत्थापयितुं शक्नोति, न भारतीयो मनुष्यो भारतीयाया नार्य्याः समक्षं तथा कर्त्तुं शक्नोति ।

यदुक्तम् "मर्त्य इति मृतः कथं स बोधयितुं शक्यः" इति तत्तुच्छम्, स्वधिते मैनं हिंसीरित्यचेतनस्यापि स्वधितेः संबोधनदर्शनात् । किञ्च मर्त्य-शब्देन च येन देहस्त्यक्तः स चेतन एव जिघृक्षितः । स कथं न सम्बोध-नार्हः ? पत्युरन्त्येष्टिकाले प्रायेण न काचिदपि नारी पत्यन्तरं कामयते । ततश्च पतिगृहं वृणानेत्यर्थोऽप्यसंगत एव । बहुषु मनुष्येषु सत्सु मर्त्यपदेन को मनुष्योऽत्र संबोधनाय इत्यपि न संगच्छते । पतिलोक इत्यनेन पूर्वसिद्धस्य पत्युरेव लोको गृह्यते, न भाविनः पत्युः । उपस्थितं परित्यज्यानुपस्थितक-ल्पने मानाभावात् । अन्त्येष्टिप्रसङ्गे मृतस्यैव मनुष्यस्य ग्रहणम्, प्रसङ्गोपात्त-मपि । नारिपदेन युवतिः सकामा इति कथं गृहीतम्, तत्र बीजाभावात् । पुरातनं धर्मं प्रत्यक्षपतिसहचारलक्षणमित्यप्यसंगतम्, पुरातने धर्मे मन्वा-दिभिः पत्यन्तरनामग्रहणस्यापि निषिद्धत्वात् ।

यदुक्तम् 'इहेति मनुष्यलोकबोधकवचनेन प्रेतं पतिम् अनु पश्चात् त्वा-मन्यं योग्यं पतिं वृणाना इति योजनेन इति तदपि न क्षोदक्षमम्, एतादृशी योजना कथं संगता । अनुपालयन्तीत्यत्र तस्यानुशब्दस्य निराकाङ्क्षस्यात्र योजयितुमशक्यत्वात् । त्वामन्यं पतिं वृणानेत्यर्थस्य ग्रहणे बीजाभावात् । सिद्धान्ते तु इहेति निर्देशेन तु धर्मपत्न्यै त्वामिह लोके निवासार्थमनुज्ञां दत्त्वा प्रजां पूर्वविद्यमानां पुत्रादिकां धनञ्च धेहि सम्पादय वैधव्यपालनाय पुत्रादि-स्वसन्तानरक्षणाय योगक्षेमनिर्वाहकधनसंपादनाय त्वमनुजानीहि इत्यर्थः संगत एव ।

यदुक्तम् 'एकस्यैव मन्त्रस्य सकामनिष्कामविधवाभेदेन परस्पर-विरुद्धार्थबोधकत्वम्' इति तत्तुच्छम्, तथात्वे वाक्यभेदापत्तेः । मीमांसक-रीत्या वाक्यभेदो महान् दोषः । तथाचोक्तमन्त्रस्यायमर्थः—हे मर्त्य व्यक्तदेह जीवात्मन येयं नारी मृतस्य तव भार्य्यास्ति सा पतिलोकं वृणाना कामयाना प्रेतं त्वां उपनिपद्यते त्वत् समीपे नितरां प्राप्नोति । अर्थात् सा त्वां पतिं सह-गमनेन वैधव्यधर्मपालनेन वा शरीरत्यागानन्तरं पुनरपि तव साहचार्य्यं कामयते । कीदृशी पुराणं विश्वमनादिकालप्रवृत्तं कृत्स्नं स्त्रीधर्ममनुक्रमेण

पालयन्ती। पतिव्रतानां स्त्रीणां पत्या सहैव परमो धर्मः। तदुक्तं रघुवंशे श्री सीतया —

साहं तपः सूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये।
भूयो यथा मे जननान्तरेऽपि त्वमेव भर्ता न च विप्रयोगः॥

तस्यै पत्न्यै त्वमिह लोके निवासार्थमनुज्ञां दत्त्वा प्रजां पूर्वविद्यमानां पुत्रादिकां द्रविणं धनञ्च धेहि सम्पादय वैधव्यधर्मपालनाय पुत्रादिसन्ततेर्धनस्य च पालनाय अनुजानीहि।

उदीर्ष्वेति-हे नारि इतासुं गतप्राणं मृतमेतं पतिमुपशेषे उपेत्य शयनं करोषि। अतस्त्वमस्मात् स्थानादुत्तिष्ठ हस्तग्राभस्य पाणिग्राहवतः पत्युः जीवलोकं पुत्रादिलक्षणमभिपश्य। जीवानां पुत्रपुत्रादीनां लोकं स्थानं गृहमभिलक्ष्य उदीर्ष्व अस्मात् स्थानादुत्तिष्ठ। ईरगतौ इतासुं गतासुं अपक्रान्तप्राणं एवं पतिमुपशेषे तस्य समीपे स्वपिषि। तस्मात्त्वमेहि आगच्छ यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतः दिधिषोः गर्भस्य निधातुः तव अस्य पत्युः सम्बन्धादागतं इदं जनित्वं जायात्वमभिलक्ष्य संबभूव संभूतासि अनुमरणनिश्चयमकार्षीः। तस्मात्तन्निश्चयं विहाय पुत्रादिसंतोषायागच्छ। अयमेवार्थोऽन्त्येष्टिविनियुक्तस्य मन्त्रस्य युक्तः। मृतं पतिं विहाय त्वं जीवन्तं कञ्चिद् युवकमभिलक्ष्य एहि पुनर्विवाहेच्छोर्जायात्वं भार्याभावमाभिमुख्ये सम्यक् प्राप्नुहि इत्यर्थको मन्त्रः कथमन्त्येष्टिकाले वक्तव्यः, श्रोतव्यो वा भवेत्? संपूर्वस्यापि भवतेः सकर्मकत्वाभावेन तादृशार्थस्यायुक्तत्वात्।

यदुक्तम् "द्वितीयवारं विवाहितायाः स्त्रियाः स्वामी पतिर्दिधिषुर्भवतीति, तत्तुच्छम्, अन्त्येष्टिकाले त्वद्रीत्यापि द्वितीयविवाहप्रस्ताव एवोपस्थितः, नत्विदानीमपि सा द्वितीयवारं विवाहिता, तथा च कथं दिधिषुत्वं संभवति? नहि पुनर्विवाहोच्छोरेव दिधिषुत्वं सम्भवति पुनर्विवाहेच्छोरनूढया विवाहेऽपि दिधुषुत्वापत्तेः। किञ्च पाणिग्राभस्येति पदेनैव पत्युर्ग्रहणसिद्धौ तदर्थकस्यैव दिधिषुपदस्योपादानानुपपत्तेः। अतो गर्भनिधातैवात्र दिधिषुशब्दार्थः। पुनर्विवाहितायाः पतिर्दिधिषू दीर्घोकारान्तः शब्दः। इह मन्त्रे तु दिधिषुरिति ह्रस्वोकारान्तः। स च धातुमिच्छुर्दिधिषुरिति यौगिक एव, न रूढः।

अयमेवार्थः सायणादिभाष्यानुमतः। तथाहि तृतीयेऽनुवाके सप्तसूक्तानि। तत्रप्रथम सूक्तस्य आद्ययाचि तौ भार्यां प्रेतेन सह संवेशयेत्—

'इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम्।
धर्मं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ॥१॥

(अ० सं० का० १८ अ० ३ सू० ३)

इयं पुरोवर्तिनी नारी पतिलोकं पत्या अनुष्ठितानां यागदानहोमादीनां फलभूतं स्वर्गादिस्थानम् वृणाना सहधर्मचारिणीत्वेन संभजमाना। मर्त्य हे मरणधर्मन् प्रेतं प्रकर्षेण गतम् अस्माद्भूलोकाद्विनिर्गतं त्वा त्वां उपनिपद्यते समीपे नितरां गच्छति। अनुमरणार्थं प्राप्नोतीत्यर्थः। पुराणं पुरातनं धर्मं सुकृतम् अनुपालयन्ती आनुपूर्वेण सम्प्रदायाविच्छेदेन परिपालनमनुपालनम्। स्मृतिपुराणादिप्रसिद्धधर्मस्य अनुमरणजन्यस्य अनुपालनाद्धेतोरित्यर्थः। स्मर्य्यते हि—

'भर्त्तारमुद्धरेन् नारी प्रविष्टा सह पावकम्।
व्यालग्राही यथा सर्पं बलादुद्धरते बिलात् ॥' इति।

तस्यै तथाविधायै अनुमरणं कृतवत्यै इह अस्मिन् भूलोके जन्मान्तरे लोकान्तरेऽपि प्रजां पुत्रपौत्रादिरूपाम्। द्रविणं धनञ्च। धेहि प्रयच्छ। एव मन्वादिसम्मतोऽयमर्थः।

उपनिपद्यमाना सा यदि इह लोके पुनर्जीवितुमिच्छेत् तदा द्वितीययर्चा प्रेतेन सह संविष्टां तामभिमन्त्र्योत्थापयेत्—

'उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि संबभूथ ॥ २ ॥

(अथर्वसंहिता १८।३।२)

हे नारि जीवलोकं लोक्यते अनुभूतये जन्मान्तरकृतधर्माधर्मफलमस्मिन्निति लोकः भूलोकः जीवानां जीवतां लोको जीवलोकस्तमभिलक्ष्य। उदीर्ष्व। उद्गच्छ। पत्युः सकाशादुत्तिष्ठेत्यर्थः। गतासुम्। एतं पतिं। उपशेषे। पर्वमदृष्टार्थमनुगमनमुक्तम्। इदानीं शास्त्राविरोधिदृष्टफलानुरोधेन तत उत्थानं प्रतिपाद्यते। उपशयने दृष्टप्रयोजनं नास्तीत्यतः एहि पत्युः सकाशादागच्छ। हस्तग्राभस्य पाणिग्रहीतुः। दिधिषोः धारयितुः तव। पत्युः। इदं। जनित्वम् अपत्यादिरूपेण जन्मत्वम। अभिसंबभूव अभि-

संप्राप्तासि इति सायणभाष्यविरोधात्। अतः परं तृतीयचतुर्थीभ्यां ऋग्भ्यां चितौ पार्श्वतः परिणीयमानां गाम् अनुमन्त्रयते—

अपश्यं युवतिं नीयमानां जीवां मृतेभ्यः परिणीयमानाम्।
अन्धेन यत्तमसा प्रावृतासीत् प्राक्तो अपाचीमनयं तदेनाम्॥३॥
(अ० सं० १८।३।३)

युवतिम्। नीयमानां शवसमीपं प्राप्यमाणाम्। जीवां जीवन्तीम्। मृतेभ्यः मृतपुरुषार्थं। परिणीयमानां दारुचित्यग्न्यादिसहितं शवं परितः प्रसव्यं नीयमानाम् गाम् अनुस्तरण्याख्याम्। अपश्यम् पश्यामि। जीवदवस्थापन्नाया युवतेर्गोः शवपरिणयनम् अयुक्तमिति जनामीत्यभिप्रायः। अनुस्तरणी सा गौः यत् यस्मात्। अन्धेन दृष्ट्युपघातकेन गाढेन। तमसा अज्ञानलक्षणेन। प्रावृता प्रकर्षेण वेष्टिता आसीत्। हिताहितविभागं स्वयं न जानातीत्यर्थः। तत् तस्माद्धेतोः। एनाम् गाम्। प्राक्तः पूर्वदेशात्। अपाचीम् शवात् पराङ्मुखीम् अस्मदभिमुखीम्। अनयम् प्रापयामि।

'प्रजानत्यघ्न्ये जीवलोकं देवानां पन्थामनु सञ्चरन्ती।
अयं ते गोपतिस्तं जुषस्व स्वर्गंलोकमधिरोहयैनम्' ॥४॥
(अ० सं० १८।३।४)

हे अघ्न्ये अहन्तव्ये गौः। जीवलोकम् भूलोकम्। प्रजानती प्रकर्षेण जानाना। देवानामिन्द्रादीनाम्। पन्थाम् पन्थानम् मार्गं यज्ञलक्षणम् अनुसञ्चरन्ती अनुलक्ष्य गच्छन्ती क्षीरदध्यादिहविर्निष्पादयन्ती त्वमागच्छेति शेषः। ते तव अयम्। गोपतिः गोस्वामी। तम्। जुषस्व सेवस्व। एवं मृतं पुरुषम्। स्वर्गम् लोकम्। अधिरोह्य प्रापय। अत्र स्पष्टं सूत्रानुसारेण चितौ पार्श्वतः परिणीयमानाया गोरनुमन्त्रणम्। तस्या एव चतुर्थे मन्त्रे अघ्न्ये इति सम्बोधनम्। अघ्न्येति गोनामप्रसिद्धम्। गोपतिशब्देन स्पष्टमेव वृषभग्रहणम्। एवं प्रकरणविरुद्धं शब्दार्थविरुद्धप्रलपनं न जिह्वेतीति चित्रमेतत्।

यदुक्तम्—"अपश्यं युवतिं नीयमानां जीवां मृतेभ्यो परिणीयमानाम्।
अन्धेन यत् तमसा प्रवतासीत प्राक्तो अपाचीमनयं तदेनम्।

प्रजानन्त्यघ्ने जीवलोकं देवानां पन्थामनुसञ्चरन्ती ।
अयं ते गोपतिस्तं जुषस्व स्वर्गं लोकमधिरोहयैनम् ॥'
( अथर्व सं० १८।२।३-४ )

युवतिं यौवनमदोन्मत्तां जीवां जीवन्तीं ग्राम्यसुखे जीवितुमभिलषन्तीं मृतेभ्यो नीयमानां त्यक्तप्राणेभ्यः पतिसकाशादतिदूरे प्राप्यमाणां तत् प्रबलेच्छामनुरुद्धयान्येन तरुणेन तया स्वीकृतेन पत्या सह परिणयेन विवाहेन संयुज्यमानाम् अहं मन्त्रद्रष्टा । अवश्यं पश्यामि । यत् यस्मात् या विधवा नारी प्राक् अन्धेन तमसा अज्ञानशोकादिलक्षणेन प्रावृतां प्रकर्षेण वेष्टिता समाक्रान्ता आसीत् । तस्मात् तामेनां अपाचीं मृतपतिसकाशात् अपाङ्मुखीं पराङ्मुखीं कृत्वा अर्थात् अस्मदभिमुखीं प्राक्तः पूर्वदेशात् प्रगतिशीलां वा अनयम् प्रापयामि । हे अघ्ने अहन्तव्ये जीवलोकं जीवानां युवकयुवतीनां लोकं मिथः स्नेहसुखार्पणादिपूर्वकं दर्शनम् 'लोक दर्शने' इति स्मरणात् । प्रजानती प्रकर्षेण तल्लाभेच्छाजनकज्ञानयुक्ता सती देवानां मिथुनेन सञ्चरतां पन्थां मार्गमनुसञ्चरन्ती सदानुसरणं कुर्वती । अयं वर्त्तमानः गोपतिः गवामिन्द्रियाणामधिपतिः । समर्थस्तरुणस्तव पाणिग्रहीता द्वितीयः स्वामी वर्त्तते । तं जुषस्व प्रीत्या सेवस्व । एवं ग्राम्यसुखादिप्रदानेन स्वर्गं लोकं तत्र त्वमधिरूढा सती त पतिमपि अधिरोहयेत्यर्थः । कामिनोर्ग्राम्यसुखतल्लीनतैवात्र स्वर्गाधिरोहः प्रत्येतव्यः ।'' इति

तन्मदम्, यतिर्भूत्वाऽयं लेखकः ग्राम्यसुखस्यैव स्वर्गत्वं मन्यते । तद्दृष्ट्या वेदेऽपि तथैव स्वर्गशब्दस्य ग्राम्यसुखमेवार्थः । तदपि मन्दमेव ।

'अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥'

इत्यादि वचनैः ग्राम्यसुखविमुखकौमारब्रह्मचारिप्राप्य स्वर्गस्य वर्णनदर्शनात् ।

द्वितीयो वर देवरः' ( ३५७ ) इति निरुक्ताश्रयणे तु भिन्नैव व्यवस्था । तथाहि--काक्षीवत्या घोषाया आर्षं जागतमाश्विनम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

'कुहस्विद्दोषा कुहवस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥१॥
( ऋ० सं० १०।४०।२ )

आश्विना हे अश्विनौ। कुहस्वित् क्वचित् । दोषा रात्रौ। भवथ इति शेषः। कुह क वा। वस्तोः दिवा भवथः । कुह क वा। अभिपित्वं अभिप्राप्तिं करतः कुरुथः। कुह क्वा वा ऊषथुः वसथः। ( किञ्च ) वां युवां। कः यजमानः। सधस्थे सहस्थाने वेद्याख्ये। आकृणुते आकुरुते। परिचारणार्थमात्माभिमुखीकरोति। तत्र दृष्टान्तौ दर्शयति शयुत्रा शयने। विधवेव यथामृतभर्तृका नारी देवरं भर्तृभ्रातरम् अभिमुखीकरोति। मर्यं न यथा च सर्वं मनुष्यम्। योषा सर्वा नारी। संभोगकालेऽभिमुखीकरोति तद्वदित्यर्थः।

यद्यपि 'नारी तु पत्यभावे वै देवरं कुरुते पतिम्' इति (म॰भा० १३।१२।१६) रीत्या पत्यौ मृते पतिसहगमनमेव मुख्यम्, तथापि 'बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति' इत्यादि स्मृत्यनुरोधेन बाला पत्या मृतपतिं नानुगच्छति।

'देवरो दीव्यति कर्मा' ( नि० ३।१।५) देवरो मनुष्यो भर्तुर्भ्राता भवति। देवरः क्रीडामात्रासक्तो बालो भवति। स स्वोदरपूर्त्युपायज्ञानविकलस्तत्पालनार्थं नानुगच्छति।

दुर्गाचार्य्येणोक्तम् 'येन पत्याऽस्मिन् लोके क्रीडिता, तेनैव सह क्रीडार्थं भर्त्तारमनुगच्छति।

'व्यालग्राही यथा सर्पं बलादुद्धरते बिलात्।
तद्वदुद्धृत्य सा नारी तेनैव सह मोदते।
तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश॥'

इत्यादिष्वन्वारोहणमेवोक्तम्।

'दिविरैश्वर्य्यवचने' इति 'पंक्तिविंशति' इति सूत्रस्थभाष्यप्रामाण्येन देवरशब्द ईश्वरार्थकः। तथा च तद्धरणसमर्थः पिता भ्राता पुत्रो वा तमाश्रयेत्। तदुक्तम्

'पितृमातृसुतभ्रातृश्वश्रूश्वसुरमातुलैः।
हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत्॥'इति।

यद्वा देवरशब्दस्य परमात्मार्थकत्वेन परमेश्वरभक्तिपरायणा ब्रह्मचर्येण कालं क्षपयेत् । तदप्युक्तम् ।

'आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥

( म० स्मृ० ५।१५८ )

तद्वियोगात् इत्यत्रत्यस्य विशब्दस्यापि व्याख्या । यथा 'अश्रवं हि' ( ऋ० सं० १।१०९ (२) इति मन्त्रे विजामातृशब्दस्य असुसमाप्तजामातृभावोऽर्थो गृह्यते निरुक्तकारैस्तथैवात्रापि 'असुसमाप्त इव वरोऽभिप्रेतः' इति ( ६।६।१ ) निरुक्तदर्शितैव ग्राह्या—

'अश्रवं हि भूरिदावत्तरा वाँ विजामातुरुत वधा स्यालात् ।
अथा सोमस्य प्रयती युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥'

( ऋ० सं० १।१०९।२ )

कुत्सस्यार्षम् । त्रिष्टुप् । अश्रौषम् अहम् । युवां हे इन्द्राग्नी । भूरिदावत्तरा भूरिदातारौ । कुतः । विजामातुः असुसमाप्ताज्जामातुः । यो हि असमाप्तजामातृभावो भवति स जामातृगुणहीनत्वाद् बहुदानेन कन्या पितृनाराध्य तेभ्य आत्मानं रोचयति । ततोऽपि बहुतरस्य धनस्य दातारौ अध्यश्रौषं भवन्तौ उत वा घा स्यालात् । 'घा' इत्यनर्थकः । स्यालादपि बहुदातारौ युवामहमश्रौषं भवन्तौ । स्यालोऽपि हि भगिनीप्रियचिकीर्षया बह्वेव ददाति । यत एवमहमश्रौषं भवन्तावेतस्मात् कारणात् सोमस्य प्रयतौ प्रदानेन अहं युवाभ्यां स्तोमं जनयामि । उच्चारयामि नव्यं नवतरमन्येभ्यः स्तोमेभ्यः । एवमत्र विजामातृशब्देन 'असुसमाप्तजामातृभावः' उच्यते तस्य बहुदातृत्वादित्युपपत्तिः ।

विजामातेति शश्वद् । प्रसिद्धमेतत् । 'दक्षिणाजाः क्रीता पतिमाचक्षते । स हि विगुणत्वादात्मनः क्रीणाति कन्यामात्मनो भार्यार्थे । तस्मात् 'असुसमाप्त एव' असौ 'वरोऽभिप्रेतः' । 'जा अपत्यं तन्निर्माता' जामाता । स्त्रीत्वं हि मैथुनेन-व्यवहारेणासौ निर्मिणोति । तेनासौ दुहितुः पतिर्जामाता भवति । 'स्याल आसन्नः संयोगेनेति' निदानविदो मन्यन्ते । अथवा 'स्यम्' इति 'शूर्पम्' उच्यते । तस्मादसौ गृहीत्वा विवाहे 'लाजानावपति' तस्मात्स्याल उच्यते । 'शूर्पमशनपवनम्' तेन ह्यशनं पूयते । तस्य पत्युरसुसमाप्तयोगाद्विधवा कथ्यते ।

योगश्च वधूवरयोश्चतुर्थीकर्मण्येव भवति, नतु ततः प्राक् । तथाचोक्तम् गृह्यसूत्रेषु 'तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सहशयीताम् । ऊर्ध्वं त्रिरात्रात् सम्भवः' इति ।

एवञ्च चतुर्थी कर्मणि क्षतात्व, न ततः प्राक् ।। तथा च चतुर्थी कर्मणः प्राक् तस्याः पतिगोत्राद्यप्राप्त्याऽनन्यपूर्वात्वमेव निर्णीयते । तस्या विव 'अनन्यपूर्विकाम्, इत्यनेनापि न विरोधः । तथा च स्मृतयः—

'विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वमागता भर्त्तुः पिण्डे गोत्रे च सूतके ।।
चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः ।
भर्त्रा सयुज्यते पत्नी तद्गोत्रा तेन सा भवेत् ।।
अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि ।
नच मन्त्रोपनीता स्यात् कुमारी पितुरेव सा ।।'
पाणिग्राहे मृते बाला केवल मन्त्रसंस्कृता ।
सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति ।।'

तथा च पराशरः—

'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ।।'

विवाहोत्तर चतुर्थरात्रौ वधूवरयोः संयोगसंभवो विहितः । तदन्यथाऽनुपपत्त्या ।

'त्रिंशद्वर्षोद्वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् ।। ( ९।९४ )

इति मनूक्तविवाहकालाङ्गीकार एव सर्वस्मृति-गृह्यसूत्रसंवादी न त्वष्टवर्षादि विवाहे । अष्टवर्षा शब्दे एकशेषाङ्गीकारस्तु राममिश्राणां प्रौढिवादेनैव, एकशेषसूत्रस्थभाष्यविरोधात् । 'त्र्यष्टवर्षः' इत्यत्र त्रिशब्दोच्चारणवैयर्थ्याच्च । निजदेवरासंभवे तु निरुक्तोपदर्शितयोगार्थोऽङ्गीकार्य्यः—तथाचोक्त पराशरेण—

'नष्टे मृते प्रव्रजिते क्लीबे च पतितेऽपतौ ।
पञ्च स्वापत्सु नारीणां पतिरन्यो विधीयते ।।' इति ।

अत्र चासुसमाप्तपदोत्तरपदभूतसुसमाप्तपदलोपेन 'अपतौ' इत्यत्र निरुक्तसंवादाङ्गीकाराय समासाङ्गीकारे विपदमपि निर्बाधमेवेति तत्त्वम् ।।

अथवा पतिमाचष्टे पतयति पतयतीति पतिस्तस्मिन् पतौ सप्तपदीप्राक्काले वाग्दत्ता पतिस्तस्मिन् मृते प्रव्रजिते पतिरन्यो विधीयते। विधवानाञ्च चतस्रो गतयः। तत्र पत्यौ मृते ब्रह्मचारिणी उत्तमा, ब्रह्मचर्येस्थातुमसमर्था पतिमनुगच्छन्ती मध्यमा, ब्रह्मचर्य्यानुगमनयोरसमर्था पुनर्भूत्वमङ्गीकुर्वती अधमा, पुनर्भूत्वमङ्गीकुर्वन्ती व्यभिचारजातगर्भादिनिःसारयन्ती भ्रूण-हत्यादि दोषाधिक्यादधमाधमा। तत्र तिस्रो गतयो मन्त्रेणोच्यन्ते।

यदुक्तम्—"महाभारतस्य भीष्मपर्वणि ६० अध्याये वर्णितम्।

'अर्जुनस्य सुतः श्रीमान् इरावान् नाम वीर्य्यवान्।
सुतायां नागराजस्य जातः पार्थेन धीमता॥
ऐरावतेन सा दत्ता अनपत्या महात्मना।
पत्यौ हते सुपर्णेन कृपणादीनचेतना॥
भार्य्यार्थं ताञ्च जग्राह पार्थः कामवशानुगाम्।
एवमेष समुत्पन्नः परपक्षेऽर्जुनात्मजः॥'

परपक्षे समुत्पन्न इत्यनेनासवर्णविवाहोऽपि द्योत्यते। अर्जुनस्यार्य्य-वर्णत्वात् नागराजसुतायास्तद्भिन्ननागवर्णत्वात् तयोरवर्णत्वम्।

'स नागलोके संवृद्धो मात्रा च परिरक्षितः।
रूपवान् बलसम्पन्नो गुणवान् सत्यविक्रमः॥
इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम्।
सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः॥
अभ्यवादयदव्यग्रो विनयेन कृताञ्जलिः।
न्यवेदयत चात्मानमर्जुनस्य महात्मनः॥
इरावानस्मि भद्रं ते पुत्रश्चाहं तव प्रभो।
मातुः समागमो यश्च तत्सर्वं प्रत्यवेदयत्॥
तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः।
परिष्वज्य सुतञ्चापि आत्मनः सदृशं गुणैः॥
प्रीतिमानभवत् पार्थो देवराजनिवेशने।
प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत॥
युद्धकाले त्वयास्माकं साह्यं देयमिति प्रभो।'

इरावता कुरुक्षेत्रे शकुनेः भ्रातरो युद्धदुर्मदा गान्धारा सद्यो विनिहताः। स चालम्बुषनाम्ना केनचिद्राक्षसेन निहतः। अनेन विधवाविवाहो ज्ञायते।" इति, तत्तुच्छम्।

पूर्वोक्तप्रमाणैर्विधवाविवाहस्याधमत्वावगमेन विशिष्टपुरुषकर्तृकत्वेऽपि तस्याधमत्वानपायात्। श्रीभागवते-रुक्मिणीपुत्रस्य मातुलकन्योद्वाहमधर्मं जानन्नपि कृष्णोऽनुमेने।

'जानन्नधर्मं तद् यौनं रुक्मिणीप्रियकाम्यया।' इत्युक्तेः।

अत एवेतिहासस्य धर्मेऽप्रामाण्यमिति स्पष्टमेव। एतेनैव केरलाग्रजन्मचरितमपि व्याख्यातम्। केरलीयनम्बूद्रिब्राह्मणा अन्येऽपि वा यद्धर्मविरुद्धमाचरन्ति, न तस्य धर्मे प्रामाण्यम्। ब्राह्मणस्यान्ययुगे ब्राह्मणेतरकन्यापरिणयस्य भोगाङ्गत्वेनाङ्गीकारेऽपि कलौ तन्निषेधात्। अन्ययुगेषु भोगाङ्गत्वेनाङ्गीकारेऽपि धर्मकार्ये तद्ग्रहणं निषिद्धमेव। किञ्च नागानां देवयोनित्वेन मनुष्यनियमानधिकारित्वेनापि देवाङ्गनानामिवार्जुनपरिणयः शक्यसमाधानः।

श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि २१४ अध्याये-गङ्गाद्वारं प्रकृत्य—

'तत्राभिषेकं कृत्वा स तर्पयित्वा पितामहान्।
उत्तितीर्षुर्जलाद्राजन् अग्निकार्यचिकीर्षया ॥१२॥
अपकृष्टो महाबाहुर्नागराजस्य कन्यया।··· — —

उलूप्युवाच—

ऐरावतकुले जातः कौरव्यो नाम पन्नगः।
तस्यास्मि दुहिता राजन्नुलूपी नाम पन्नगी ॥ १८ ॥
तां मामनङ्ग ग्लपितां त्वत्कृते कुरुनन्दन।
अनन्यां नन्दयस्वाद्य—···—····· ·········॥२०॥
एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया।
कृतवांस्तत्तथा सर्वं धर्ममुद्दिश्य कारणम् ॥२३॥

अत्रोपयुपन्यस्तैरुद्धृतेषु श्लोकेषु 'कन्या' 'अनन्या' आदिशब्दैर्विज्ञायते यत् सा अनूढैवासीदिति अक्षतयोनिर्विधवा वा पूर्वोक्तरीत्या विवाहस्याधर्मत्वोक्तेः।

यदपि "त्रावनकोर ( अनन्तशयनपत्तन ) कोचानादिराजानां कुलेष्वपि राजकन्यानां ब्राह्मणैः सह सम्बन्धो भवति। तेभ्यस्तासूत्पन्नाः कुमाराः एव राजसिंहासनाधिकारिणो भवन्ति। न तु राजभिः क्षत्रियैः स्वधर्मपत्नीषु राजमहिषीषु समुत्पन्ना राजकुमाराः" इति, तदपि पारम्पर्य्यानुरोधेन न दूषणम्। कलौ ब्राह्मणानां कृते तदनुचितोऽपि राजकुलस्य पारम्पर्य्यानुरोधेन कल्याणकरमेव योनिप्राधान्येन क्षत्रियत्वमेव तेषां ब्राह्मणोत्पन्नानामपि। यथा व्यासोत्पन्नानामपि पाण्डवादीनां क्षत्रियत्वमिति तद्वत्।

यदुक्तम् "वीजप्राधान्याभिप्रायेण व्यासपुत्रेण विदुरेण किमपराद्धम्? स्वपितृव्यासादिवत् तुल्यन्यायेन तस्य कथं न ब्राह्मण्यव्यपदेशः। यदि योनिप्राधान्यं तत्राभ्युपगम्य मातुः दास्याश्च शूद्रत्वमभिलक्ष्य तस्य शूद्रत्वमभ्युपगम्येत तदा व्यासादिष्वपि तथा कुतो न स्यात्। यतो व्यासस्यापि माता नाविक (मल्लाह) पुत्री मत्स्योदरी शूद्रैवासीत्। सा हि पराशरात् महर्षेर्व्यासस्य पुत्रस्य प्रादुर्भावानन्तरं शंतनोः क्षत्रियस्य सम्राजो महाराज्ञी क्षत्रियाणी सत्यवतीत्यपर पर्य्यायासीत्। विचित्रवीर्य्यादीन् क्षत्रियान् पुत्रान् राजकुमारान् जनयामास। केरलदेशे न वीर्य्यप्राधान्यमपि तु योनिप्राधान्यमेवाभ्युपगम्यते। अत एव पुत्राः पुत्र्यश्च स्वपरिचयाय नाम निर्देशं कुर्वन्ति। अत एव पुत्रास्तदीया वदन्ति। मम पितापन्निकरोऽस्ति परन्त्वहन्तु मेननोऽस्मि। मातुर्मेननरूपापसंज्ञाविशिष्टत्वात्। अत एव ब्राह्मणजन्याः पुत्राः न स्वजनकं पितृसम्पत्तिमाप्तुं समर्था भवन्ति। किन्तु मातुलगृहे वर्धिता रक्षितास्ते भागनेयाः मातुलसम्पत्तिमेवोपभोक्तुं प्रभवन्ति। महाभारते—कर्णपर्वण्यपि—

'तस्मात्तेषां भागहराः भागिनेया न सूनवः।" इति ( अ० ४५।१३ )

तत्तुच्छम्। यतो यत्र नियोगादिना वंशाविच्छेदाय ऋषिभिर्ब्राह्मणैर्वा क्षत्रियादिषु पुत्रा उत्पाद्यन्ते तत्र क्षेत्रजातीया भवन्ति। तथा पाण्डुधृतराष्ट्रयोः क्षत्रियक्षेत्रजत्वेन क्षत्रियत्वं विदुरस्य शूद्रक्षेत्रजत्वेन शूद्रत्वमेव। व्यासस्य तु न शूद्रक्षेत्रजत्वम्। महाभारतरीत्या सत्यवत्या मत्स्योदर्य्याः उपरिचरवसुवीर्य्यात् मत्स्यां जातत्वेन क्षत्रियजातित्वेन क्षत्रियत्वमेव। महर्षेः पराशरस्य सत्यसंकल्पत्वेन तत्संकल्पविशेषाद् व्यासस्य ब्राह्मणत्व-

मेव। व्यासस्यापि सत्यसंकल्पत्वेन तत्सङ्कल्पानुरोधेनापि नियोगोत्पन्नानां सन्तानानां क्षेत्रजातीयत्वेन विदुरस्य शूद्रत्वमेव। प्रायेण संततीनां क्षेत्रप्राधान्यं स्वाभाविकम्, बीजप्राधान्यन्तु महर्षीणां सिद्धानां संकल्पवशादपवादत्वमेव। भागिनेयानां भागहरत्वं तु केरलेषु सदाचारप्राप्तत्वेन युक्तमेव।

यत्तु—अग्रजन्मशब्दस्य विविधार्थनिरूपणप्रसङ्गे—

'अग्रे प्राग् यस्य जन्मासौ अग्रजन्मा निरुच्यते।
परत्वञ्चाग्रजन्मत्वे स्यातां सप्रतियोगिके॥
अग्रत्वमिह सर्वेषां परत्वापेक्षिकं मतम्।
सर्व एवाग्रजो लोके स्वापेक्षोत्तरजन्मनः॥
तस्मादत्राग्रजन्मेति वृद्धवर्गोऽभिधीयते।
भवन्त्येवं समाजेषु सर्वदैवाग्रजा नराः॥
सदैवाग्रजवृद्धानां परजेषूपदेष्टृता।
प्रकृत्यैवेष्यते लोके चेयमस्ति परम्परा॥

विद्यासामस्त्यसिद्धये वृद्धसेवा चादिष्टैव। वृद्धाश्च ज्ञानवृद्धा एव मुख्या' इति तन्न, यतो योगजत्वेन भ्रातृष्वग्रजत्वानुजत्वशब्दस्य प्रसिद्धया अग्रजन्मशब्दस्य तत्र प्रसिद्धत्वेऽपि ब्राह्मणेषु तस्य योगरूढत्वमेव, रूढिर्योगमपहरतीति न्यायात्। 'मातुरग्रेऽधिजननात्, इत्यादि स्मृतेश्च। त्रिगुणेषु सत्त्वस्य ज्येष्ठत्वेन तत्प्रधानस्य ब्राह्मणस्याग्रजत्वमित्यपि न विरुद्धम्। सत्त्वमात्रप्राधान्येन जन्मना शूद्राणामप्यग्रजन्मत्वं तु योगरूढिविरुद्धत्वादनादेयमेव।

# वर्णसम्बन्धिविचाराः

दीर्घतमसवृत्तान्तः

यत्तु महर्षेर्दीर्घतमसोऽन्धस्य वृद्धस्य चरित्रप्रसङ्गे —

'शूद्रयोनौ मया हीमे जाता काक्षीवदादयः।
अन्धं वृद्धं च मां दृष्ट्वा सुदेष्णा महिषी तव॥
अवमन्य ददौ मूढां शूद्रां धात्रेयिकां मम।'

(म० भा० आ० प०)

इत्यादिपर्वस्थवचनैः नियोगसाधनाय शूद्रायामपि ब्राह्मणोत्पत्तिसाधनाय च प्रयत्नः, सोऽपि निरर्थक एव। सिद्धेन दीर्घतमसा तपोबलेन शूद्रायामपि ब्राह्मण्यं सम्पाद्यैव तत्र ब्राह्मणा एवोत्पादिताः। इदमप्यपवादस्थलमेव, तादृक्सामर्थ्यस्यान्यत्रेदानीमदर्शनात्।

यदुक्तं 'तादृश्यां सिद्धयां सत्यां स्वकलेवरस्य वृद्धत्वान्धत्वनिवारणे युवत्व-सुन्दरत्व-चक्षुष्मत्त्वसम्पादने च सा सिद्धिः कथं नोपयुक्ते'ति तत्तुच्छम्, आप्तकामस्य महर्षेस्तादृश्या इच्छाया एव नियामकत्वात्। पुत्राद्युत्पादने तु बलिप्रार्थनया तदनुग्रहायैव तत्प्रवृत्तिः। एवमेव भगवान् व्यासोऽपि धृतराष्ट्राद्युत्पादनप्रसङ्गे प्रोक्तवान्। यदि मे दुःसहं रूपं गन्धञ्च सोढुं शक्ष्यति तदा योग्यपुत्रलाभो भविष्यति। तत्रापि सामर्थ्ये सत्यपि तादृगवधारणं तदिच्छैव मूलम्।

कक्षीवतो वृत्तान्तः—

यदप्युक्तम्—

"कक्षीवांस्तु ततो गत्वा सह पित्रा गिरिव्रजम्।
दृष्ट्वा स्पृष्ट्वा पितुर्वै स ह्युपविष्टश्चिरं तपः॥
ततः कालेन महता तपसा भावितस्तु सः।

विधूय मातृजं कायं ब्राह्मण्यं प्राप्तवान् विभुः।
ब्राह्मण्यं प्राप्य कक्षीवान् सहस्रमसृजत् सुतान् ।"
[ मत्स्य अ० ४८ ]

उक्तरीत्या तपसा कक्षीवतो ब्राह्मण्यप्राप्तिस्मरणात् कर्मणैव वर्णव्यवस्थेति, तदपि तुच्छम् ।

तत्र तपःप्रभावेण मातृजकायविधूननपूर्वकं ब्राह्मण्यप्राप्तेरुक्तत्वात्, तस्य च सिद्धान्तेऽपीष्टत्वात् । विशेषतोऽन्यत्रैतत् सम्बन्धे पर्याप्तविचारः कृतः ।

यदप्युक्तं "परशुरामः क्षत्रियान् त्रिःसप्तकृत्वो हत्वा स्वब्राह्मणसंघवर्धनाय अन्यान् कैवर्त्तनिषादादीन् महाशूद्रानपि ब्राह्मणांश्चकार । तत्पुराणे स्पष्टं प्राक्प्रदर्शितम्" तदपि तुच्छम्, धर्मसंरक्षणाय कृतावतारे भगवति तादृग्रागद्वेषकल्पनायोगात् । कैवर्त्तप्रायाः ब्राह्मणा एव तु तेन संशोध्य तेषु ब्राह्मण्यमाविर्भावितमिति तु तत्प्रसङ्गे समाहितमेव ।

## क्षत्रियोत्पत्तिप्रसङ्गः

यदपि च परशुरामेण क्षत्रियेषु विनाशितेषु ब्राह्मणैरेव विधवासु क्षत्रियासु बहवः क्षत्रिया उत्पादिताः ।

'एवं निःक्षत्रिये लोके कृते तेन महर्षिणा ।
ततः प्रभृति सर्वाभिः क्षत्रियाभिः समन्ततः ।
उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः ।
पाणिग्राहस्य तनया इति वेदेषु निश्चितम् ।"
( वराहपुराणे अ० ३७ ३९।४० )

एतेन केचित्पामराः विधवाविवाहं, कर्मणा वर्णव्यवस्थाञ्च साधयितुमीहन्ते, तत्तुच्छम्; नियोगविध्यनुसारेण स्वोच्चवर्णेन स्वगोत्रजेन वा पुत्रोत्पादनस्यान्ययुगेष्वनुमतत्वात् । सत्यसंकल्पानां महर्षीणां संकल्पबलेन पाणिग्राहजातीयानां सन्ततीनामुत्पादनेऽपि नात्र विधवाविवाहः साधयितुं शक्यः; इतिहासस्य धर्मेऽप्रमाणत्वात् ।

"न विवाहविधावुक्तं विधवावेदनं पुनः ।" ( म० ९।६५ )
इति मनुस्मृतिविरोधाच्च । मनुना नियोगस्यापि निन्दितत्वात् ।

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥"

( म० ९।६६ )

कलिवर्ज्यत्वाच्च तत्साधनप्रयासो वेदादिशास्त्रतात्पर्य्याज्ञान-विजृम्भित एव।

यदुक्तम्—वर्णानां मिथः सांकर्य्यं पुरातनकालादेव सम्प्रवृत्तमासीत्। तत एवार्जुनेन युद्धस्यैक प्रबलमनिष्टं फल दर्शितम्।

संकरो नरकायैव'—'स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः। इति।

विधवासु युवतिषु प्रबलकामदोषसमुन्मत्तासु विभिन्नवर्णनियोगात् जायमानाः वर्णसंकरजाः प्रजाः कुलस्य नरकं दातुं प्रभवन्तीति। भगवांस्तु तत्समाधानमकृत्वैव क्षत्रियधर्माय युद्धाय तं प्रवर्त्तयामास। तत्रोपहासमुखेनैव भगवतोक्तं वर्णशंकरतायाः शङ्का शास्त्ररहस्य-समाजपरिपाटीज्ञानशून्येन जनेनोद्भाव्यते, त्वया कथं क्रियते ? किं भवतां पाण्डवानां वर्णसाङ्कर्य्यं नास्ति ? भवत्पितरि पाण्डौ तदुत्पादके भवत्पितामहे व्यासेऽपि किं तन्नास्ति ? तच्च भवदादिषु समभीष्टभूषणरूपमेव जातम्। तत एव भवन्तः सत्यप्रतिज्ञाः, धर्मनिष्ठाः, शूरवीराः, समुदारचरिताश्च, विशालबुद्धित्वेन व्यासोऽपि संस्तुत एव। अष्टादशपुराणाभारतनिर्माता वेदव्यसनकर्त्ता निखिलार्य्यप्रदेशललामभतस्तस्य च पुत्रो महावीतरागः शुकः।

तदुक्तमेव केनचित्

'कानीनस्य मुनेः स्वबान्धववधूवैधव्यविध्वंसिनो
नप्तारः किल गोलकस्य तनयाः कुण्डाः स्वयं पाण्डवाः।
ते वै पञ्च समानदारनिरतास्तेषां कथाकीर्तनात्
पापं नश्यति वर्धते च सुकृतं धर्मस्य सूक्ष्मा गतिः ॥"

इति शङ्कातत्समाधानयोरुभयोरपि अपसिद्धान्तत्वेन तुच्छत्वात्। सत्यसंकल्पस्य भगवतो व्यासस्य सङ्कल्पवशात् विचित्रवीर्यादिक्षेत्रेषूत्पन्नानां सन्ततीनां पाणिग्राहजातीयत्वेन धृतराष्ट्रादिषु क्षत्रियत्वानपायात्। युधिष्ठिरादयस्तु महामहिमवैभवानामचिन्त्याद्भुतशक्तिशालिनां धर्म-पवनेन्द्राश्विदेवानां सङ्कल्पवशात् सुतरां मातृजातीयत्वेन क्षत्रिया एव। एतेषु च

कर्मादिसाङ्कर्याभावात् सांकर्यशङ्कालेशोऽपि नास्ति, जन्मना सह क्षत्रियगुण-कर्मणाञ्च तेषु प्रतिष्ठितत्वात् । कर्मप्रयुक्तमपि साङ्कर्यं शास्त्रोक्तमेव ।

'अर्थाश्रयाद्वा कामाद्वा परकर्मनिषेवणात् ।
स्वकर्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः ॥'
(वा० स्मृ०)

धर्मशास्त्रेषु ब्राह्मणादिमातापित्रादिजन्यानामेव ब्राह्मणत्वादिकमुक्त-मित्यप्युक्तमेव । तस्माद् वर्णसांकर्यं न दूषणं किंतु भूषणमेवेति गीतातात्पर्य-कल्पनं व्यामोहमूलकमेव । श्रुति स्मृति-पुराणादिशास्त्रेषु विधवावेदन-कुण्ड-गोलकादीनां निन्दितत्वात् । शास्त्रीयनियोगविधानेन महर्षिव्यासधर्मेन्द्रादि-जनितानां धृतराष्ट्रादीनां कुण्डगोलकत्वाद्यभावात् । विधिमन्तरास्वैरितया-जनितानामेव तथात्वादित्याद्यप्युक्तमेव ।

## कर्मणा क्षत्रियत्वप्राप्तिविधिः

यदुक्तम्—

'यस्तु विप्रत्वमुत्सृज्य क्षात्रं धर्मं निषेवते ।
ब्राह्मण्यात् स परिभ्रष्टः क्षत्रयोनौ प्रजायते ॥'

क्षत्रयोनौ इत्यस्य क्षत्रियवर्णे इत्येवार्थः । वर्तमानकालप्रयोगात् तस्मिन्नेव जन्मनि न जन्मान्तरे । एतेन कर्मणा वर्णव्यवस्था सिद्ध्यति ।

'क्षत्रियो वा महाभागे वैश्यो वा धर्मचारिणि ।
स्वानि कर्माण्यपहाय शूद्रकर्म निषेवते ॥
स स्वस्थानात् परिभ्रष्टः वर्णसंकरतां गतः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रत्वं याति तादृशः ॥'

इत्यादिष्वपि बोध्यम्

तस्मात्तद्गुणधर्माणां जीवननिर्वाहसाधनानाञ्च मिथोऽसंकीर्ण-व्यवस्थैव समुचिता वर्णव्यवस्था । पादत्राणस्थापनस्थाने वस्त्रादिस्थापनं तत्स्थाने च पादत्राणादि स्थापनमव्यवस्थैव । तेन कर्मसांकर्य्यनिवारणं नितान्तमपेक्षितम् । समानशीलव्यसनेषु विवाहः सख्यञ्च युक्तम् ।

'विवादश्च विवाहश्च समयोरेव शोभते ।'

इत्याद्युक्तेरिति तत्सत्यम्, तथाहि—

'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।'
'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः'

इत्यादि रीत्या जन्ममूलकवर्णव्यवस्थायामेव कर्मसाङ्कर्यस्य सामञ्जस्येन कर्मणा वर्णव्यवस्थाया असिद्धेः ।

'हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः ।
परस्परादिनः स्तेनाः प्रेतान्त्यस्त्रीनिषेविणः ॥
धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः ।
मधु दंशः, पयः काकः, रसं श्वा, नकुलो घृतम् ॥
मांसं गृध्रो, वपां मद्गुस्तैलं तैलपकः ! खगाः ।
चीरी वाकस्तु, लवणं वलाका, शकुनिर्दधि ॥

( मनुः अ० १२।५९, ६२, ६३ )

इत्यादि वचनेषु जन्मान्तरीयफलत्वेऽपि वर्तमानप्रयोगदर्शनात् । न तु तस्मिन्नेव जन्मनि कर्मणा वर्णपरिवर्त्तनम् । नहि धान्यं हृत्वा तस्मिन्नेव जन्मन्याखुर्भवन् दृश्यते ।

न वा मांसं हरन् तत्क्षणमेव गृध्रो जायमानो दृश्यते । तथैव क्षत्रयोनौ प्रजायत 'इत्यादिष्वपि बोध्यम ।

'मणिमुक्ताप्रबालानि हृत्वा लोभेन मानवः ।
विविधानि च रत्नानि जायते हेमकर्त्तृषु ॥'

( मनु० १२।६१ )

अत्र च हेमकर्तृशब्देन हेमकारजातीय उक्तः । नहि हेमकार्य्यकरणाद्धेमकारो भवति । तस्माद्रथकारजातिवदेव हेमकारजातिरपि बोद्धव्या । कृमिक्रव्यादादिजातिप्रसङ्गेन वर्णितस्य हेमकर्तृशब्दस्य रथकारशब्दवज्जातिपरत्वस्यैव निश्चयात् । एतेन 'स द्विजो वैश्यतामेति' इत्यादीनि सर्वाण्यपि वचनानि तत्तद्वर्णोचितकर्मकरणेन जन्मान्तरे तत्तद्वर्णप्राप्तिबोधकान्येव ज्ञातव्यानि । अनापद्येव स्वकर्मणां त्यागेन परकर्मनिषेवणाद् वर्णसांकर्य्यं ज्ञातव्यम् । आपदि तु तथानुमतत्वेनादोषात् । योनिशब्दस्य वर्णपरत्वे मानाभावाच्च पूर्वोक्तव्याख्यानमपव्याख्यानमेव मन्तव्यम् ।

शास्त्रविधानविपरीतरीत्या जनितानामेव सांकर्य्यम । अतएव व्यास-

पाण्डुपाण्डवादीनां शास्त्रविधानानुसारेण दिव्य-पराशर-व्यासादिधर्मादि-जनितानां महामहिमप्रभावशालित्वं न वर्णसाङ्कर्यस्य भूषणत्वेन तादृक्कल्पनाया नास्तिस्यमूलकत्वात् । पादत्राणादिस्थापनं यत्र विहितं तत्र वस्त्रादि-स्थापनवदेव येषां वर्णानां लौकिकं जीविकादिकं पारलौकिकञ्चाग्निहोत्रा-दिकं विहितं तैस्तान्येवानुष्ठेयानीति तु युक्तमेव । परं येषां कर्मणा वर्णव्यवस्था तेषां तु कर्मणैव वर्णो भविष्यति । कर्मसु प्रवृत्तेर्नियामकाभावात् स्वातन्त्र्यमेव स्यात् । ततस्तेषां स्वधर्म-परधर्म-व्यवस्थैव न भविष्यति । निश्चिते स्थाने सत्येव व्यवस्था भवति । यथेष्टपरिवर्त्तनशक्यत्वे तु तत्रैव कदाचित् पादत्राणं विन्यस्यते । कदाचिच्च भोजनं विन्यसितव्यमेव । तस्माज्जन्मना नियता वर्णव्यवस्थाऽभ्युपेतव्या । तदुचितो धर्मः स्वधर्मस्तद्भिन्नस्तु परधर्म इति व्यवस्थापि तदैव संपत्स्यते । तत्रापि सम्पदापद्भेदेन जीविकारूपेषु कर्मसु कदाचित् परिवर्त्तने सत्यपि तदापदपगमे स्वधर्मनिष्ठतैव समाद्रियते । वर्णमूलकेषु वेदाध्ययनतदर्थानुष्ठानादिषु तु न कदाचिदपि परिवर्त्तनम् । नहि जातुचिद् ब्राह्मणक्षत्रियौ वैश्यस्तोमे, विप्रवैश्यौ वा राजसूये प्रवर्त्तेते । राज्यकरण-निमित्तकं राजत्वं तु न राजसूयाधिकारप्रयोजकमितीहैवान्यत्र स्पष्टम् ।

यत्तु ब्रह्मकर्मानुसारेण चातुर्वर्ण्यमकल्पयत्' इति साधनाय—

'ब्रह्मा स्वयम्भूर्भगवान् दृष्ट्वा सिद्धिं तु कर्मजाम् ।
मर्यादां स्थापयामास यथारब्धाः परस्परम् ॥' इति

( वायु० पु० ८।३४ )

वचनमुद्धृतं, तदपि मन्दम् । जन्मान्तरीयकर्मभिरेव ब्राह्मणादि-योनिप्राप्त्या जन्ममूलकवर्णव्यवस्थायामपि कर्मजत्वस्यानपायात् ।

आम्रबीजदृष्टान्तः ।

यदप्युक्तं 'यथा मधुराम्रबीजाज्जातस्तरुर्मधुराण्येव जनयेच्चेत्तदाऽयमाम्रवृक्ष इति शिष्टैः प्रोच्यते । यदि कटूनि चाम्लानि च फलान्युत्पादयेत्तदा कथं विचारकैरप्याम्रवृक्षोऽभिधीयेत ? तथैव जन्मजातिकृते ब्रह्मक्षत्रवर्गाणां परस्परं भेदेऽभ्युपगतेऽपि कश्चन स्वभावकृतो विशेष उपलभ्येत, शतशो व्यभिचरितत्वान् नतु तथोपलभ्यते । ब्राह्मणब्रुवा अपि नितान्तं बुद्धिहीना अनृतमायादिपराः पयोमिश्रितपयोविक्रयिणः

भोजननिर्माणादिश्वववृत्तिपराः, भूयांसश्च क्षत्रियाः कर्षकाः किङ्करा गवाश्वादिपालका शौर्य्यपराक्रमादिभावशून्या वणिग्वृत्तिमाश्रिताः, अक्षत्रिया अपि बलपराक्रमशालिनः प्रबलशत्रुजेतारः, अनेके शूद्रा अपि ब्राह्मणोचितशीलबुद्धिवैभवशालिनः। तथाचानेन शमशौर्य्य-व्यापारचातुर्य्य-सेवाभावादिगुणमूलको यज्ञो युद्धवाणिज्य-श्रमादिकर्ममूलक एवायं वर्णविभागो युक्तः। तेनैव समाजसंघटनं राष्ट्रोन्नतिसाधकं भविष्यति। नात्र शास्त्रविरोधगन्धोऽप्यस्ति।" इति, तदपि शास्त्रतात्पर्य्याज्ञानविजृम्भितम्, विषमोपन्यासात्। तथाहि किं मधुराम्रबीजोत्पादितस्तरुः कटून्याम्लानि फलानि जनयन् दृश्यते। न जनयेच्चेत्कथं स दृष्टान्तमर्हति, जनयेच्चेत्कथं न जन्मना वर्णव्यवस्था सिद्धयेत्?

वयं तु पश्यामः। समुचितोपचारैर्मधुरजलदुग्धादिसेकैर्भूमिविशेषगुणैश्चाम्लादप्याम्रबीजाज्जातात्तरोरपि मधुराणि फलानि जायन्ते। एवमेव विपरीतभूम्यादि संसर्गेण च मधुरादपि फलाज्जातात्तरोराम्लानि फलानि जायन्त एव। तावताऽपि न तस्यानाम्रत्वममूढःकश्चिद्विवक्षति। तथैव शास्त्रविधानानुसारेण ब्राह्मणाज्जातस्य यथावत्संस्कृतस्य शिक्षितस्य शुद्धवातावरणपोषितस्य मुख्यमेव ब्राह्मण्यम्, शमदमादिमत्त्वञ्च भवत्येव। ब्राह्मणाद्यथा कथञ्चित् ब्राह्मण्यां जातस्यासंस्कृतस्याशिक्षितस्यायोग्यवातावरणपोषितस्य च भिन्नकर्मत्वे मौर्ख्ये च सति विद्यातपसोरभावेन मुख्यब्राह्मण्याभावेऽपि योनिजत्वेन जातिब्राह्मण्यं तु भवत्येव। यथोक्तमेव सङ्गादिविशेषात् सिंहस्यापि शौर्य्यक्रौर्य्यादिहीनत्वेन जातिसिंहत्वम्, शौर्य्यादिसाहित्येन मुख्यसिंहत्वं, शौर्य्यादिगुणयोगात्त्वसिंहे देवदत्तादिमनुष्येऽपि गौणं सिंहत्वं भवत्येव। श्रुतिस्मृतिपुराणेषु यथा जन्ममूलिकैव वर्णव्यवस्था तथा प्रदर्शितमेव। स्वाभाविक्या व्यवस्थैव समाजराष्ट्रसंघटनोत्थानादिकं संभवति न कृत्रिमया।

## क्षितिमोहनसेनमतनिरासः

यत्तु–'भारतवर्ष में जातिभेद' इति क्षितिमोहनसेनलिखितपुस्तकाश्रयेणाब्राह्मणानां बहूनां ब्राह्मणत्वापादनमुक्तम्, तच्च सर्वथा निर्मूलमेव, ब्राह्मणादिविद्वेषमूलकञ्च। एवमेव क्षत्रियादिसम्बन्धिन्योऽपि दुष्कल्पना द्वेषमूलिका एव। इदानीं आङ्गलविद्याप्रभाविताः भारतीयाः पाश्चात्यानां

भारतीयजातिद्वेषिणामन्धानुकरणपरायणा ईर्ष्याद्वेषादिभिः केचिद् ब्राह्मणादयोऽपि जातिबहिष्कृता निम्नजातीया वर्णसंकरा वा 'अशक्तास्तत्पदं गन्तुं ततो निन्दां प्रकुर्वते' इति न्यायेन स्वसमानानेव स्वतोऽप्यपकृष्टानेवा सर्वान् पश्यन्ति।

यत्तु यज्ञादिकार्य्यसिद्धये कांश्चिदब्राह्मणान् कश्चिद्राजा ब्राह्मणान् सम्पादयामासे'ति तत्त व्याहतमेव। यज्ञादिकार्य्येषु ब्राह्मणानामेवार्त्विज्य-विधानात। तच्च ब्राह्मण्यं न कस्यचिदिच्छातन्त्रम्, तथात्वे वेदाध्ययन-तदर्थानुष्ठानाधिकारानधिकारविवेकस्य निरवकाशत्वापत्तेः।

### शाकद्वीपिवृत्तान्तः

शाकद्वीपिब्राह्मणसम्बन्धिनी कल्पनाऽपि निर्मूलैव। भविष्यपुराणे १३९ तमेऽध्याये सूर्योपदेशेन कृष्णपुत्रसाम्बसमानीतानां सूर्य्यपूजानियुक्तानां तेषां माहात्म्यातिशयवर्णनात्। सूर्य्येणैवोक्तम्।

'जम्बूद्वीपात् परो यस्माच्छाकद्वीप इति स्मृतः।
तत्र पुण्या जनपदाश्चतुर्वर्णसमन्विताः ॥७२॥
मगाश्च मगगाश्चैव मानसो मन्दगास्तथा।
तत्राद्यवर्णोऽह्यव्यङ्गो वेदवेदाङ्गपारगः ॥७३॥
न तेषां सङ्करः कश्चित् धर्माश्रयकृते भवेत्।
अष्टादशकुलैर्युक्तो मगो नाम द्विजोत्तमः॥'

तानेव समानाय्य साम्बश्चन्द्रभागातीरे स्थापयामास।

### मध्वाचार्यवृत्तान्तः

यदप्युक्तम् 'मध्वाचार्य्या श्रीरामानुजाचार्य्याश्च सूत्रेभ्यः पटानिव सुवर्णेभ्यः आभरणानीवोपादानकारणेभ्योऽब्राह्मणेभ्यो ब्राह्मणान्निर्ममु'रिति तन्न, अप्रामाणिकत्वेन तदस्वीकृतत्वात्।

यदुक्तम् 'यदीयं स्वभाविकी जन्मकृता वर्णव्यवस्था स्यात्तदाऽवश्यं भारतनिर्विशेषं सर्वेष्वपि यूरोपादिदेशेष्वपि स्यात्। न खलु परमेश्वरेण भारतीया एवोत्पादिता नत्वन्यदेशीया इति केनचिद्वक्तुं शक्यते। नत्वन्यत्र वर्णव्यवस्था दृश्यते' इति, तदपि तुच्छम्। श्रीभागवतादौ भारतस्यैव तद्वै-शेष्यवर्णनात्। पञ्चमस्कन्धे भारतवर्णनप्रसङ्गे तत्र वर्णाश्रमवतोऽभिभार-

तीयाभिः प्रजाभिर्वर्णाश्रमलक्षणेन भगवानुपास्यते। वस्तूनां नियतकालदेशत्वञ्च दृश्यते। नहि कोकिलकूजनं सर्वदा भवति, न वा काश्मीरकुङ्कुमादयः सर्वत्रोत्पद्यन्ते। किन्तु देशकालविशेषेष्वेव, तथा दर्शनान्नियतदेशकालोत्पत्तय एवेति मन्तव्यम्। नहि भारत इवान्यत्रापि भगवतः रामकृष्णादिवत्पूर्णावतारवत्तापि। तथैव वर्णव्यवस्थापि भारतस्यैव वैशेष्यम्। कर्मणापि वर्णव्यवस्था नहि सर्वत्र दृश्यते तर्हि कर्ममूलकवर्णप्रतिपादनायासोऽपि व्यर्थ एव। आधुनिकाः परमसुधारकास्तु कथञ्चिदपि वर्णव्यवस्था सर्वथा हानिकरीत्येव प्रतिपादयन्ति।

चातुर्वर्ण्यभारतसमीक्षा पुस्तकस्य २४ तमे पृष्ठेऽनिच्छन्नप्यङ्गीकरोति तल्लेखको यद् 'अस्माकं धर्मशास्त्राण्यपि ह्यस्माकमार्य्यदेश एव तत्तद्वर्णधर्मान् जन्मत एव तत्तद्वर्णविभागांश्च बोधयन्ति, न तु सर्वेषु देशेषु' इदमेव सत्यं शिरस्यधिरुह्य कदाचित्सत्यं वाचयतीत्यस्योदाहरणम्।

यदुक्तम् 'गुणकर्मानुरोधिनी तु वर्णव्यवस्था सर्वत्रैव विद्यते' इति तदसत्यमेव। यतो न वैज्ञानिकानां शिक्षकाणां लेखकानान्तत्र ब्राह्मण्यव्यवहारा, नवा तेषां भोजनविवाहादिनियमाः सन्ति। एवमेव शूरवीराणां सैनिकानाञ्च न क्षत्रियजातित्वेन संघटनव्यवहारो, नवोद्योगपतीनां प्रामाणिकानां व्यापारिकाणां श्रमोपेतानाञ्च वैश्यशूद्रत्वव्यवहारः। 'गुणकर्मविहीनेन जन्मना नास्ति वर्णता' इत्यादिकन्तु प्रमत्तगीतमेव। श्रुतिस्मृत्यादिविरुद्धत्वात्।

## उत्कृष्टवर्णप्राप्तिकारणानि

यदप्युक्तम् 'निकृष्टवर्णस्योत्कृष्टवर्णत्वप्राप्तौ न केवलं तप एव प्रयोजकम्, किन्तु विविधानि कारणानि। यथा ब्रह्मणः पुत्रा जन्मत एव सात्त्विकाः। ब्रह्मभावोपेता ब्राह्मणाः संस्कारेण भरद्वाज-जाबालाद्या अनृतादिदोषनिवृत्तिपूर्वकसत्यब्रह्मचर्य्यादिगुणाधानलक्षणेन संस्कारेण ब्राह्मणाः सम्पन्नाः। विश्वामित्रादयस्तपसा ब्राह्मण्यं गताः। विद्यया चेतरापत्यकवषकक्षीवदादयः, वृत्तौ ऋषभपुत्राद्याः कर्मविशुद्धा ब्राह्मणा बभूवुः। भृग्वादिवरदानेन वीतहव्यादयो लोकसंस्थानुमत्या शाकद्वीपादिवासिनः 'सवालक्खी' विश्रुता चित्पावनादयश्च राजाज्ञादि व्यवस्थया आन्ध्रद्राविडादयो—ब्राह्मणत्वतां याताः।

व्रात्यस्तोमादिभिः शुद्ध्या बौद्धीभूताः शङ्कराचार्य्यादिभिर्ब्राह्मण्यं नीताः। रामानन्दादिभिश्च म्लेच्छाः संस्कृत्य हिन्दवः कृताः। शौनकाद्याश्च भिन्नवृत्ति-समाश्रयात् ब्राह्मणक्षत्रियादयो जाताः। विधर्मिणः शकाद्याः प्रतिज्ञया जन्म-जातिपरिवृत्तौ चातुर्वर्ण्यमुपागताः। विश्वामित्रस्य शापाच्च तत्पुत्रा म्लेच्छतां गताः। वैश्वामित्राश्च वेदमन्त्रद्रष्टृमधुच्छन्दः प्रभृतयो ब्रह्मवंशकर्त्तारो ब्राह्मणा जाताः। यदोस्तु यादवाः-तुर्वसोर्यवनाः स्मृताः शनकैस्तु क्रियालोपात् क्षत्रि-यादयो वृषलत्वं गताः। एवं यवनाङ्गलादिशासनसमये भयाद्वा लोभाद्वला-त्काराद्वा उत्तमवर्णप्रयुक्तोपेक्षणावमानादितः सम्यगार्य्यभावशिक्षणाभावाद्वा-भारतेऽनार्य्यतां गता' इति।

तदेतच्छास्त्रलोकवृत्तान्तानवबोधविजृम्भितम्। ब्राह्मणमातापित्रादि-जन्यत्वस्यानुगतब्राह्मण्यप्रयोजकत्वसंभवेऽननुगतानेकप्रयोजकाङ्गीकारे माना-भावात्। अनुगतकारणञ्चेहैवान्यत्र द्रष्टव्यम्। तपसा वरशापादिभिश्च पूर्ववर्णीयदेहारम्भकपरमाणुविघटनपूर्वं ब्राह्मणादिवर्णीयनूतनपरमाणुसंघटन-क्रमेण ब्राह्मण्यादिनिर्माणानि प्रामाणिकान्यपवादस्थलीयान्येव। भरद्वाज-जाबालादयस्तु जन्मब्राह्मणा एवेत्युपपादितमेव। कर्मविशुद्धा ब्राह्मणा अपि तपोलक्षणेन कर्मणा पूर्वदेहारम्भकपरमाण्वादिविघटनेन मुख्यं ब्राह्मण्यं सदाचारेण गौणं वा ब्राह्मण्यं गता इत्येव मन्तव्यम्। वीत-हव्यादयस्तु सिद्धभृगुवचनप्रभावात्, चित्तपावनादयस्तु भगवदवतारभूतस्य सिद्धतमस्य परशुरामस्य तपःप्रभावाद् ब्राह्मणाः सन्त एव भ्रष्टाः पुनः संस्का-रेण ब्राह्मण्यमुपनीताः। शाकद्वीपिनस्तु जन्मब्राह्मणा एव। बौद्धाद्या ब्राह्मणादय एव सन्तः संस्कारेण संशोध्य ब्राह्मण्यादिकमुपनीता इत्यादि पूर्वमुक्तमेव। शका-दयस्तु ब्राह्मण्यं गता इति मिथ्यैव। सिद्धानां तपोवरशापेष्वेव नहुषस्याजग-रत्वमिव वर्णस्य वर्णान्तरत्वसम्पादनक्षमता, नान्यत्र। वैधब्राह्मणादिमाता-पित्रादिजन्यता तु स्वाभाविकी ब्राह्मण्यादिप्रयोजिका। म्लेच्छानां हिन्दुत्वं तु भागवतप्रोक्तस्य त्रिंशल्लक्षणस्य धर्मस्य मानवमात्रकल्याणकारित्वेन वेदादि-हिन्दुशास्त्रोक्तधर्मस्य स्वाधिकारानुसारेणानुष्ठातुः हिन्दुत्वसम्भवेन न विरुद्धम्। तावताऽपि न तेषां ब्राह्मण्यम्, वेदतदर्थानुष्ठानाधिकारित्वप्रयोजकजन्म-मूलकब्राह्मण्यस्याभावात्। मानवमात्रसुलभसामान्यधर्मस्य भक्त्यादि लक्ष-णस्य हिन्दुधर्मस्य ग्रहणे मानवमात्रस्याधिकाराभ्युपगमात्।

'तपः श्रुतञ्च योनिश्चेत्येतद् ब्राह्मणकारकम्।'

इति महाभाष्ये —

'जन्मशरीरविद्याभिराचारेण श्रुतेन च।
धर्मेण च यथोक्तेन ब्राह्मणत्वं विधीयते॥
चित्रं कर्म यथानेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्विधिपूर्वकैः॥'

इति पराशरमाधवीयेऽङ्गिरस उक्तिः।

'सुक्षेत्राच्च सुबीजाच्च श्रेष्ठो भवति संभवः।
अतोऽन्यतरतो हीनादवरो नाम जायते॥

इत्यादिभिः शौर्य्यक्रौर्य्यविशिष्टस्य सिंहयोनिजातस्य मुख्यसिंहत्वमिव तपःश्रुतादिविशिष्टस्य ब्राह्मणयोनिजातस्य मुख्यं ब्राह्मण्यम्। तद्धीनस्य योनिमात्रस्य तु जातिब्राह्मणत्वमुक्तमेव।

यदुक्तम् "'त्रीणि यस्यावदातानि योनिर्विद्या च कर्म वै' इत्यत्र अवदातत्वं शरीरसौष्ठव-गौरादिवर्ण-बल-स्वास्थ्य-सदाचार-बुद्धिमत्वादिकम्। यथा गोर्गवेन्द्रस्य चोभयोरपि सौष्ठवात्तज्जन्यवत्सस्यापि सौष्ठवं जायते" इति, तन्मन्दम्, शरीरसौष्ठवादीनां ब्रह्मणक्षत्रियादिसर्वसाधारणसौष्ठवहेतुत्वेन ब्राह्मण्यं प्रत्यसाधारणकारणत्वासंभवात्। तस्माद्योनेरवदातत्वं साङ्कर्य्यप्रयोजकावैधसंसर्गशून्यत्वे सति वैधसम्बन्धवत्त्वमेव।

## योनेर्जातिपरत्वसाधनम्

यदप्युक्तम् "योनिरत्र न जातिः, किन्तु विशुद्धसन्तानजननविशिष्टभूमिः सती माता यत्रेदमुक्तं

'मातुरग्रेऽधिजननमिति (म० २।१६९)

तदपि मन्दम्; ब्राह्मणयोनिं क्षत्रिययोनिं वेत्यादौ श्वयोनिं सूकरयोनिं'मित्यादिष्विव योनिशब्दस्य जातिपरत्वनिश्चयात्।

जात्या व्यवहारस्तुल्यत्वेऽपि गुणकर्मवैषम्याद्देवादिभेदप्रतिपादनमत्रिस्मृत्यादिषु तु युक्तमेव। देवदत्तस्य मनुष्यस्यापि शौर्यादिगुणैः सिंहत्वव्यपदेशवद् देवादिगुणैर्देवत्वादिव्यपदेशस्य युक्तत्वात्।

'सन्ध्या स्नानं जपो होमो देवतानित्यपूजनम्।
आतिथ्यं वैश्वदेवञ्च देवब्राह्मण उच्यते॥,

एवमेव च--

'शाके पत्रे च मूले च वनवासे सदा रतः ।
निरतोऽहरहो भक्तौ स विप्रो मुनिरुच्यते ॥'

अत्रापि मुनिगुणत्वेन गुणकृतमेव मुनित्वमुक्तम ।

'वेदान्तं पठते नित्यं सर्वसंगं परित्यजेत् ।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते ॥'

अत्र विप्रस्य विप्रगुणयुक्तत्वेन मुख्यं विप्रत्वमुक्तम्, सिंहगुणयुक्तत्वेन सिंहस्य मुख्यसिंहत्ववत् ।

'धैर्य्य-शौर्य-बलोपेतो राष्ट्ररक्षासमुद्यतः ।
संग्रामे विजयी यः स्यात् स विप्रः क्षत्र उच्यते ॥
कृषिकर्मरतो यश्च गवां च प्रतिपालकः ।
वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते ॥
कैङ्कर्य्यवृत्तिमान् यश्च विक्रेता क्षीरसर्पिषाम् ।
दम्भपाखण्डसंयुक्तः स विप्रः शूद्र उच्यते ॥
चोरश्च तस्करश्चैव पिशुनो दुःखदस्तथा ।
मत्स्यमांसे सदा लुब्धो विप्रो निषाद उच्यते ॥
ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः ।
तेनैव च स पापेन विप्रः पशुरुदाहृतः ॥
दुराचाररतो नित्यं विरुद्धं बहुभाषते ।
धूर्त्तः क्रूरः शठश्चैव स विप्रो म्लेच्छ उच्यते ॥
क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः ।
निर्दयः सर्वभूतेषु विप्रश्चाण्डाल उच्यते ॥'

(अत्रिस्मृतिः ३७३...३८३)

कर्मणा वर्णव्यवस्थायां सत्यां कथं क्षत्र-वैश्य-शूद्र-निषादादि गुणवतां विप्रत्वसंभवः? तस्माज्जन्मनैव वर्णव्यवस्था प्रतिपत्तव्या । गुणैश्च तत्र गौणानि क्षत्रवैश्यत्वादीन्यपि संगच्छन्ते । अतएव जात्यैव ब्राह्मणत्वादिव्यवहार उत्तमगुणैरुत्कर्षोऽधमगुणैश्चापकर्षश्च संगच्छते ।

ब्राह्मणेन ब्राह्मण्यामुत्पन्नः प्रागुपनयनात् जात इत्यभिधीयते । उपनीत

मात्रो व्रतानुचारी वेदानां किञ्चिदधीत्य ब्राह्मणः। एकां शाखामधीत्य श्रोत्रियः। अङ्गाध्यायी अनूचानः। कल्पाध्यायी ऋषिकल्पः। सूत्रप्रवचनाध्यायी भ्रूणः। चतुर्वेदाध्ययनाद् ऋषिः। अत ऊर्ध्वं भूदेवः। (बौधायनगृह्यसूत्रे प्रथमप्रश्ने अ० १ सू० १८) इत्यत्रापि ब्राह्मणमातापितृजन्मस्यैवोक्ताः संज्ञा भवन्ति, नतु यस्य कस्यापि। संस्कारादिमात्रैः शुभगुणकर्मणामुत्कर्षाधायकत्वेऽपि न त्रैवर्णिकव्यवस्था, अन्यथा विपरीतगुणवतां ब्राह्मणत्ववाचोयुक्तेरसम्भवापातात्।

शूद्रोऽपि शीलसम्पन्नो ब्राह्मणादधिको भवेत्।
ब्राह्मणो विगताचारः शूद्राद्धीनतरो भवेत्॥' (भविष्ये १।४४।३१)

धर्महीनो ब्राह्मणः शूद्रादपि हीनः, शीलसम्पन्नः शूद्रो ब्राह्मणादप्युत्तम इत्युक्तिरपि शीलाचारप्रशंसापरैव, नतु जन्मजातिप्रत्याख्यानपरा। व्यावहारिकी जातिस्तु जन्ममूलिकैव प्रचलति। अतएव निकृष्टगुणकर्मयुतोऽपि स्वपुत्रो न केनचित्त्यज्यते, न वा दायानर्हो भवति। एवमेवोत्तमगुणकर्मविशिष्टोऽपि नान्यपुत्रः स्वपुत्रत्वेन दायभागित्वेन वाङ्गीक्रियते। विवाहादिसम्बन्धोऽपि जन्ममूलकजातिमालम्ब्यैव प्रवर्त्तते।

विवाहादिसम्बन्धे सुधारकाः स्वातन्त्र्येण कथञ्चिद् व्यवहरन्तोऽपि दायाभागसम्बन्धे तु जन्ममूलिकामेव जातिं व्यवहरन्ति।

यदुक्तम् अस्मिन् समये शिक्षायास्तद्व्यवसायादिकर्मणश्च समानत्वेन जातिकृतवर्णविभागस्थितिरतिदुर्लभा, वर्णविभागप्रयोजकशिक्षाकर्मभेदविलोपात्। साम्प्रत विश्वविद्यालयेषु च ब्राह्मणत्वादिजातिभिः पृथग्व्यवह्रियमाणानामपि छात्राणां पाश्चात्यभाषाग्रन्थादिकमधीयानानां समानवेषभूषादिमतां भोजनालयेष्वविशेषं भुञ्जानानां चलचित्रमन्दिरेषु तत्तदश्लीलदर्शनश्रवणतत्पराणामुच्छृङ्खलवैदेशिकोपन्यासादिकं पठतां पाश्चात्यभाषारीतिनीतिभोजनादिव्यवहारेऽच्छनुद्धिं धारयमाणानां परस्परं मैत्रीभावनया विवाहादिग्रन्थ्या च युज्यमानानां मध्ये वर्णविभागो नैव दृश्यते।

'अयञ्च युगधर्मो हि वर्त्तते कस्य दूषणम्।'

इति रीत्या भगवदुपवनसदृशेऽस्मिन् भारते वर्षे भगवत्प्रेरणया यद्भवति तत्प्रतिरोद्धुं कः शक्नुयादिति विचार्य शिष्टा मौना एव भवन्तीति तदपि मन्दम्, विप्रतिषिद्धत्वात्।

परमेश्वरे तदीये शास्त्रे युगादिव्यवस्थासु ये न श्रद्दधते त एव जन्ममूलिकां वर्णव्यवस्थामपलपन्ति। ते च नहि प्रारब्धदैवादिवादाश्रयेण भगवत्कृतं सर्वमिति मत्वोदासते। आस्तिका अपि धर्मग्लान्यधर्माभ्युत्थाननिवृत्तये श्रौतस्मार्त्तलक्षणस्य धर्मस्य संस्थापनाय च सर्वदा प्रयतन्त एव। लौकिकदृष्ट्या तद्वैफल्येऽपि अदृष्टपुण्यफलप्राप्त्यनपायात्।

धर्मकार्य्ये यतन् शक्त्या यदि नाप्नोति तत्फलम्।
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः॥'

इति महाभारते भगवदुक्तेः।

तमिस्रायां प्रकाशसम्पादनवत् शीतबाहुल्ये चौष्ण्यसम्पादनवच्चास्मिन्नेवाधर्मबहुले काले वा धर्मसंस्थापनमुचितम्।

'स्थापयध्वमिमं मार्गं प्रयत्नेनापि भो द्विजाः।
स्थापिते वैदिके मार्गे सकलं सुस्थिरं भवेत्॥
यश्च स्थापयितुं शक्तो नैव कुर्य्याद्विमोहितः।
तस्य हन्ता न पापीयानिति वेदान्तनिर्णयः॥
यः स्थापयितुमुद्युक्तः श्रद्धयैवाक्षमोऽपि सन्।
सर्व्वपापविनिर्मुक्तः सम्यग्ज्ञानमवाप्नुयात्॥"

इति व्यासतात्पर्य्यनिर्णयोद्धृतस्कान्दवचनेभ्यश्च प्रतीतेः।

किञ्च नहि शिक्षा कर्म च वर्णभेदप्रयोजकम्, जन्मभेदस्यैतत्प्रयोजकत्वात्। अध्ययनाध्यपनादिपराणामपि क्षत्रियादीनां ब्राह्मणत्वाभावात्, युद्धादिपराणामपि द्रोणादीनां क्षत्रियत्वाभावाच्च।

यदुक्तम् —"स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः' इत्यंशस्य साङ्कर्य्यं न दोषाय किन्तु गुणायैवेति मत्वैव समाधानमकृत्वा भगवता मौनमास्थित इति"। तत्तुच्छम्, तथाकल्पने बीजाभावात्, 'तस्माच्छास्त्रं प्रमाणान्ते कार्य्याकार्य्यव्यवस्थितौ' इति गीताविरोधाच्च, 'अशोच्यानन्वशोचस्त्वम्' इति तेन कृतसमाधानत्वाच्च।

तथाहि-यदि त्वं स्वाधिकारानुरूपं युद्धरूपं क्षात्रधर्मं त्यक्त्वा बन्धुबान्धवपुत्रमित्रादिविनाशवियोगादिभिया स्वधर्मविरोधिभैक्ष्यभोजनादौ प्रवर्त्स्यसे तदा तव श्रेष्ठस्य तथाचरणात् कुलस्त्रियोऽपि स्वधर्मं त्यक्त्वा

वैधव्यमन्तराप्यन्यसंसर्गेण संकरानुत्पादयिष्यन्ति । 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन' इति लोकव्यवहारदर्शनात् । यदि तु त्वं प्राणपणेन रागादिराहित्येन स्वधर्मपालने दृढो भविष्यसि तदा कुलस्त्रियो विधवा भूत्वा सहगामिन्यो भविष्यन्ति । ब्रह्मचर्य्यव्रतपालनेन तपस्विन्यो वा भविष्यन्ति, न दुराचारिण्यः । तस्माद्धर्मग्लान्यधर्माभ्युत्थाननिवृत्तिपूर्वकधर्मसंस्थापनकामेन धर्मानुष्ठानतत्परेण भाव्यम्, न स्वधर्मत्यागोन्मुखेन भाव्यम्, महाभारतपर्य्यालोचनयेदमेव सिद्ध्यति । युद्धान्ते बह्व्यश्च व्यासप्रसादेन स्वपतिसमागमेन कृतार्थास्तद्गतिं गताः । न काश्चिदपि विधवा भूता दुराचारिण्यो वर्णसंकरमुत्पादितवत्यः ।

मेवाड़प्रान्तेऽपि यासां पतयो देवरा भ्रातरः पितरः श्वसुराश्च रणप्राङ्गणे वीरगतिं गतास्ता अपि पाटलपुष्पसदृशानि स्वशरीराण्यग्निज्वालाजटिलासु चितासु दाहयित्वा पूर्वमेव स्वर्गं गत्वा तानुपतस्थिरे । न तासु काचिदपि स्वैरिणी, न वा साङ्कर्य्यस्रष्ट्री जाता । तत्कस्य हेतोः सम्बन्धिपुरुषाणां दृढधर्मनिष्ठत्वात् । यासां तु पतयो भ्रातरः पितरः श्वसुराश्चोच्छृङ्खला दुराचारास्तासु सधवाश्च कुमार्य्योऽपि दुराचारिण्यो दृश्यन्ते । 'यद्यदाचरति श्रेष्ठः' इति न्यायादेव तथात्वमिति मन्तव्यम् ।

यदुक्तम् विधवाविवाहः साङ्कर्य्यञ्च युगधर्म इति तत्तुच्छम्, धर्मस्य वेदचोदनालक्षणत्वेन तद्विरुद्धस्य धर्मत्वासंभवात् ।

यदुक्तम्—"साम्यवादानुसारेण विराट्पुरुषस्य मुखादिरूपेण ब्राह्मणाद्यवस्थानकथनेन यद्ब्राह्मण्डे तत्पिण्डे इति न्यायेन समष्टिविराडुदर इव व्यष्टिदेहेऽपि विद्यावलसंग्रहश्रमशक्तयः सम्पादनीयाः । यथामुखबाहूरुपादाख्यान्यङ्गान्यविच्छिन्नान्येव भवन्ति तथा तदाश्रिता विद्यावलादिशक्तयोऽप्यविच्छिन्ना एव फलाय कल्पन्ते । ज्ञानेन्द्रियाश्रये मुखे शिरसि सवले सत्येव वलपराक्रमाद्याश्रया बाहूदरपादाः साफल्यमधिगच्छन्ति । ब्रह्मचर्य्यशिक्षणचित्तैकाग्र्यादिभिः शिरसः प्राबल्यम्, व्यायामपुष्टान्नभक्षणादिभिर्वक्षसो बाह्वोश्च प्राबल्यम्, उदरस्य बाह्यान्नादिसंग्राहकत्वं, रसनिर्मातृत्वं, यथायोग्यं तत्तदवयवेषु रसप्रापकत्वञ्च, पादयोश्चाभीष्टदेशप्रापकत्वं, श्रमसाध्यकार्य्यनिर्वाहकत्वञ्च सुव्यक्तमेव । स्वाङ्गेषु स्थितानां विज्ञानादिशक्तीनां विकासाय सर्वैरपि यतनीयमेव ।

यस्य शिरसि मुखे च ब्राह्मणत्वप्रयोजकप्रकृष्टविद्याशान्तिसंयमादिशक्तिः, बाह्वोर्वक्षसि च क्षत्रियत्वसम्पादकप्रभूतबलपराक्रमादिशक्तिः, उदरे ऊर्वोश्च वैश्यत्वप्रयोजकवित्तार्जनसंग्रहणवितरणशक्तिः, पादयोश्च शूद्रत्वप्रयोजकसेवाश्रमादिशक्तिश्च विकसिता भवेत्तस्यैव पूर्णमानवत्वम्। स एव पुरुषार्थचतुष्टयाधिकारी। अतस्तासां शक्तीनां समुच्चय एवाभीप्सितार्थसाधकस्तास्वन्यतमहीनो नाशेषमभ्युदयमवाप्तुं शक्नोति मानवः। यथा बलधनादिमन्तरा केवलया विद्यया स्वपररक्षणदेशस्वातन्त्र्यस्वधर्मरक्षणशत्रुपराजयादिकं कर्तुं न पारयति। ततो विद्यया सार्द्धं बलधनादीनामपि भवत्यपेक्षा। विद्याविहीने बलधनादिभिरपि केवलैः कार्य्यं न चलति। परिश्रमहीना यन्त्रादिकलाप्रावीण्यरहिताश्च विद्याबलधनवन्तोऽपि नितरां सीदन्ति। निरायतयो धनधान्यादिकमपि प्राप्तुं न शक्नुवन्ति। तस्माच्चातुर्वर्ण्यस्य मानवस्वभावेषु निहितत्वात् सर्वोऽपि मानवश्चतुर्वर्ण एव। विद्या-बल-धन-श्रमादिलक्षणाश्च यस्य शक्तीरव्याप्यैव सर्वोभ्युदयवान् पूर्णो भवति। अतः सर्वोऽपि ब्राह्मणादिगुणान् स्वस्मिन् सम्पाद्य ब्राह्मणः क्षत्रियो वैश्यो शूद्रश्च भवेत्।

यतो विराटपुरुषस्य मुखादयोऽवयवास्तच्छक्तयश्चाविच्छिन्ना एव। व्यष्टिपुरुषेऽपि मुखादयो विच्छिन्ना एव। ततस्तेष्वविच्छिन्नाङ्गेषु वर्त्तमानानां विद्यादिशक्तीनां समुच्चय एव युज्यते।

श्रीकृष्णस्य चरित्रे सर्वेऽपि गुणाः लभ्यन्ते। तत्र सर्वोपनिषत्सारभूतगीतोपदेष्टृत्वेन ब्राह्मण्यम्, बलशौर्य्यादिमत्त्वेन क्षत्रियत्वम्, गोरक्षणगोवर्धनक्षेत्रसमृद्धिकरत्वेन गोपालसंज्ञाधारकत्वेन च वैश्यत्वम्, विजयहयतनुमार्जनरथसञ्चालनादिश्रमकर्तृत्वेन, युधिष्ठिरराजसूये समागतमहापुरुषपादप्रक्षालनादिकर्तृत्वेन च शूद्रत्वं प्रकटीकृतम्। सति चैवमंशिभूते पितरि रूपाकृतिस्वभावकर्मधनादिकं यद्यद् दृष्टं तत्तदंशभूतेषु पुत्रेष्वपि समानतयावगम्यतेऽनुभूयते च। तेन ब्राह्मणोऽस्य मुखमासीत् युक्तित एवायमर्थः। अन्यथा परमात्मनो मनुष्याणामिव मुखाद्यवयवाभावात् कथं मुखादिभ्यो विज्ञानविरुद्धा ब्राह्मणाद्युत्पत्तयो भवेयुः ?

'अपाणि पादो जवनो ग्रहीता पश्यन्त्यचक्षुः स शृणोत्यकर्णः'।

इति श्रुतिभिस्तस्य निराकारत्वप्रतिपादनात्। परमेश्वरमनभ्युपगच्छद्भिः सांख्यमीमांसकादिभिः कथं परमेश्वरमुखादिभ्यो ब्राह्मणाद्युत्पत्तिरूपोऽर्थः स्वीकार्य्यः स्यात्?" इति, तदपि न, सृष्टिवर्णनपरस्य मन्त्रस्य ब्राह्मणादिगुणसंग्रहविधानपरत्वासंभवात्। 'पद्भ्यां शूद्रोऽजायत' 'चन्द्रमा मनसो जातः' इति पौर्वापर्य्यानुरोधेन सृष्टिप्रतिपादनपरत्वमस्य मन्त्रस्य स्पष्टमवगम्यते।

नचैवात्र ब्राह्मणादिगुणविधानं संभवति, परस्परविरुद्धत्वात्। ब्राह्मणस्य त्यागो मुख्यो धर्मः, वैश्यस्य च संग्रहो धर्मः, ब्राह्मणस्य सर्वराहित्यम्, क्षत्रियस्य सर्वसाहित्यम्, ब्राह्मणस्य तपो धर्मः, शूद्रस्य सेवैव धर्मो न तपः, तस्य तपोनिषेधात्, क्षत्रियस्य राजसूयाधिकारो, न ब्राह्मणादीनाम्, वैश्यस्तोमे नान्येषाम्, वाजपेये ब्राह्मणक्षत्रिययोर्नान्ययोः। एवमेव रथकारनिषादस्थपत्यादिकर्तृकेषु यागेषु तयोरेवाधिकारो नान्येषाम्। 'ब्राह्मणो यजेत्' 'राजा राजसूयेन' 'वैश्यो वैश्यस्तोमेन यजेत, निषादस्थपतिं याजयेत्' 'वर्षासु रथकारोऽग्नीनादधीत'।

'शमेन सिद्धिं मुनयो न भूभृतः'

जपस्तपस्तीर्थयात्रा प्रव्रज्यामन्त्रसाधनम्।
देवताराधनञ्चैव स्त्रीशूद्रपतनानि षट्।

इत्यादि वचनेभ्यः। यथाकथञ्चिदुत्तमगुणग्रहणे तु सर्वेभ्य एव संभवति। अतएव दत्तात्रेयेनावधूतेन पिङ्गलाजगरादिभ्योपि गुणाः संगृहीता एव। नैतावता पिङ्गलाजगरादिबुभूषा युज्यते। काकचेष्टा बकध्यानं शुनां निद्रा तथैव च इति काकादिगुणा अनुकरणीया भवन्ति। न तावताऽपि सर्वो। ब्रह्मादिः काकादिर्वा बुभूषति। किञ्च न काकादिगुणा एव काकादयः, धर्मधर्मिभेदेन भेदात्। तथैव न ब्राह्मणादिगुणा एव ब्राह्मणादयः। तथा च संग्राह्यब्राह्मणादिगुणसंग्रहेणापि न सवर्णसंकीर्णैः संभवति। यथा मुखं न बाहू, बाहू वा न मुखम् पादौ नोदरम् तच्च न पादौ, तेषां स्वरूपकार्य्यगुणादिभेदात्। प्राण्यङ्गत्वेन तुल्यत्वेऽपि कार्य्यादिभेदाद्यथा भेदस्तथैव समाजस्याङ्गत्वेन ब्राह्मणादीनां तुल्यत्वेऽपि स्वरूपकार्य्यादिभेदाद् भेद एव युक्तः। किञ्च सर्वस्य सर्ववर्णत्वे वर्णव्यवस्था स्वधर्म परधर्म व्यवस्था च न स्यात्। न चेष्टापत्तिः, स्वधर्मेत्या-

णपरधर्मसेवयोरनिष्टहेतुत्वस्मरणात्। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इति गीतोक्तेः।

किञ्च सर्वो मननध्यानपाठादिभिः शमं विद्याञ्चाभ्यस्यति। न च तावतापि सर्वो ब्राह्मणत्वेन व्यपदिश्यन्ते। सर्वोऽपि शत्रुविघाताय, श्वकाकादिविद्रावणाय वा दण्डलोष्टादिभिः प्रयतमानोऽपि न क्षत्रियो भवति। जीवनोपयोगिवस्त्रान्नादिसंग्रहणे जीरकलवणहरिद्रादिक्रयणायापणे गच्छति। सर्वोऽपि स्वार्थे श्राम्यति, स्वगृहमार्जनादौ प्रवर्त्तते। सर्वोऽपि स्वगुह्यक्षालनादौ मलमूत्राद्यपाकरणे प्रवर्त्तते। तावताऽपि न सर्वो वैश्यः शूद्रोऽन्त्यजो वा भवति, तथात्वेऽव्यवस्थाऽपातात्। श्रीकृष्णोऽपि न ब्राह्मणो, नवा वैश्यादिः, किन्तु क्षत्रिय एवासीत्। भीष्मोऽपि शमादिसम्पन्नोऽपि सर्वधर्मब्रह्मादिमर्मज्ञोऽपि न ब्राह्मणः, किन्तु क्षत्रिय एवासीत्। परशुरामद्रोणादयः क्षत्रियधर्माणोऽपि ब्राह्मणा व्यपदिश्यन्ते स्मेत्यन्यत्र प्रपञ्चितमेव।

किञ्च यथा नैकाङ्गस्य पूर्णत्वमन्यनिरपेक्षत्वञ्च संभवत्यङ्गत्वव्याघातात्तथैव विराडङ्गभूतानां ब्राह्मणादीनां पूर्णत्वमन्यनिरपेक्षत्वं न सम्भवति, तथात्वेऽङ्गत्वानुपपत्तेः। यथाङ्गानि परस्परसापेक्षाण्येव प्रभवन्ति तथैव ब्राह्मणादयोऽपि परस्परसापेक्षा एव प्रभवन्ति। तदर्थमेव वर्णव्यवस्था अन्यथाऽव्यवस्थैव स्यात्। अत एव नहि गीतावक्तृत्वेन कृष्णस्य ब्राह्मण्यम्, न वा गोपालकत्वेन वैश्यत्वम्, न वा ब्राह्मणपादप्रक्षालनकर्तृत्वेन शूद्रत्वम् किन्तु जन्मना क्षत्रियत्वम् तदनुरोधेन युद्धप्रजापालनादिधर्मनिष्ठत्वेन मुख्यं क्षत्रियत्वमेव।

यत्तु "मुखादिभ्यो ब्राह्मणाद्युत्पत्तिर्विज्ञानविरुद्धे"ति, तत्तुच्छम्, विकल्पासहत्वात्। तथाहि-किं निराकारत्वेन परेशस्य मुखाद्यवयवाभावात्तदनुपपत्तिः किं वा मीमांसकादिनये परेशाभावात्तदनुपपत्तिरिति। नाद्यः, साकारत्वस्यापि श्रुतत्वाविशेषात्। 'इदं विष्णुर्विचक्रमे त्रेधास्य निदधे पदम्।' (ऋ० सं०) 'बाहुभ्यामुतते नमः' रुद्राध्याये 'शितिकण्ठाः रुद्रा' 'उमासहायं परमेश्वरम्' कैवल्योपनिषदि इत्यादिश्रुतिषु परमेशस्य साकारत्वस्य स्पष्टमुक्तत्वात्। निराकारत्वपक्षेऽपि-अश्रोत्रस्य श्रोतृत्वेना-

चक्षुषो दृष्टत्वेनापाणेर्ग्रहीतृत्वेनापादस्य गन्तृत्वेन श्रोत्रादिशक्तयोऽकामेनाप्यभ्युपेयाः। कार्य्यानुगुणशक्तिमन्तरा कार्य्यानुपपत्तेः। नहि मृदि घटशक्तेरभावे ततो घटनिष्पत्तिः संभवति, जलादपि तदुत्पत्तिप्रसङ्गात्। शक्तीनामुपगमे तु मुखशक्तेर्ब्राह्मणस्य बाहूशक्तः क्षत्रियस्योर्वादिशक्तेः वैश्यादेरुत्पत्त्यभ्युपगमे दोषाभावात्।

यत्तु 'ब्राह्मणस्य मुखादुत्पत्तौ मुखाद्याकारता प्रसङ्ग' इति, तत्तुच्छम्, योन्युत्पन्नानां तदाकारापत्तेरपि समानत्वात्। नान्त्यः, सांख्यादिरीत्या ब्रह्मणोऽप्यसत्त्वेन वेदान्तवेद्यतत्त्वापलापप्रसङ्गापातात्। किञ्च जीवानां कर्मसंस्काराद्यायत्तत्वान्न सर्वशक्तित्वसंभवः। यथासंभवं जीवनोपयोगि गुणसम्पादनन्तु जन्मना वर्णव्यवस्थायामपि संभवत्येव। यथासंभवबुद्धिबलसंग्रहश्रमसम्पादने सर्वप्रवृत्तिदर्शनात्।

यदुक्तम् "मानवोचितसर्वाभिलषिततत्तच्छक्तिसम्पादनेऽमुकव्यक्तिविशेषस्यैवाधिकार इत्येवं प्रतिरोधो न युक्तः,

'नायोग्यः पुरुषः कश्चित् प्रयोक्तैव सुदुर्लभः' इत्युक्तेः।

मानवता विकासे क्रियमाणः प्रतिबन्धः पापायैव प्रभवति, न पुण्याय, अर्थित्वस्य सर्वत्र तुल्यत्वात्" इति, तदपि तुच्छम्, भावानवबोधात्। 'अयोग्यः, पुरुषो नास्ति' इत्यनेन न सर्वस्य सर्वशक्तिमत्त्वं बोध्यते, पुरुषे गर्भधारणस्तन्यदत्वादीनां प्रयत्नशतैरपि सम्पादयितुमशक्यत्वात्। तिले विद्यमानमेव तैलं कारकव्यापारेण व्यज्यते। न सिकतासु व्यापारशतैरपि तैलं व्यज्यते, तदसत्त्वादेव। परमेश्वरस्यैव सर्वशक्तिमत्त्वं न जीवस्य, रज्ज्वादविरोधापत्तेः। न च परमार्थतस्तदिष्यत एवेति वाच्यम्, व्यहारे तदनिष्टापत्तेः। अतएव न सर्वः सर्वत्रायोग्यः, कस्यचित् क्वचिद्योग्यताया अवश्यंभावात्। कः कुत्र योग्यः इति ज्ञात्वा यो यथायोग्यं युनक्ति, स, प्रयोक्तैव दुर्लभः। यथा सर्वाणि मूलानि (तृणवीरुदादीनि) कस्यचिद्रोगस्य निवारकाण्यौषधानि भवन्ति, परन्तु नहि सर्वं मूलं सर्वस्य रोगस्यौषधं संभवति। तत एवात्रापि किं कथं कस्यौषधमिति ज्ञात्वा यः प्रयुनक्ति स दुर्लभः। सर्वाणि चाक्षराणि मन्त्रत्वं गच्छन्ति। किन्तु किमक्षरं कथं केन कैर्वा संश्लिष्टं केनविश्लिष्टं कस्य साध्यस्य साधकं भवतीति ज्ञाता प्रयोक्ता च दुर्लभो भवति।

नात्र सर्वेषां पुरुषाणां सर्वेषां मूलानां सर्वेषामप्यक्षराणां सर्वशक्तिमुक्तम्, किन्तु किञ्चित् क्वचिच्छक्तमित्येव। अत्र सुप्रयोक्तापि नहि सर्वाणि मूलानि अक्षराणि पुरुषा वा सर्वत्र प्रयुज्यन्ते। तदुक्तम् —

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।
अयोग्यः पुरुषो नास्ति प्रयोक्ता तत्र दुर्लभः॥'
इति शुक्रनीतिः।
अतएवायोग्ययोजने वचनीयतोक्ता।
'कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता॥'
( पञ्चतन्त्रे )

यदप्युक्तम्—'अर्थित्वाविशेषात् सर्वः सर्वत्राधिकरोतीति।' तदपि तुच्छम्, अर्थिनोऽपि समर्थस्यैवाधिकारात्। अतएवार्थी विद्वान् समर्थोऽधिक्रियते' इत्युक्तम्। अर्थिनोऽपि शूद्रस्य यागे ब्राह्मणस्य च राजसूयेऽनधिकारः। तत्रैव 'सामर्थ्यं द्वेधा। लौकिकं शास्त्रीयञ्च। शूद्रे यज्ञनिर्वर्त्तकलौकिकसामर्थ्यस्य सत्त्वेऽपि निषेधबलाच्छास्त्रीयसामर्थ्याभावेन तदसिद्धेः।

यदपि 'वर्णविभाग एव विषमताया उत्तमाधममध्यमभेदकल्पनाया बीजम्। पूर्वमपि वसिष्ठविश्वामित्रपरशुरामसहस्रार्जुनादिषु तन्मूलकः कलहो दृष्टः। इदानीमपि द्रविडकङ्गम-मराठा-पेशवादिषु जातिभेदमूलकः कलहो बद्धमूलो दृश्यते। जातिसम्प्रदायादिभेदादेव पूर्वमपि साम्प्रतमपि दुर्दशाग्रस्ता हिन्दुजातिः। अन्येभ्यो विच्छिन्ना ब्राह्मणा वयं तु भिक्षवः शास्त्रयजमानैकजीवनाः, शौर्यबलपराक्रमादिहीना-राष्ट्रस्वातन्त्र्यरक्षणादिकर्त्तुमक्षमाः। तत्र नास्त्यस्माकमधिकारः। भवतु यः कोऽपि महाराजः स्वदेशीयो विदेशीयो वा, वयन्तु राष्ट्राध्यक्षं जगदीश्वरतुल्यं मत्वा तत्स्तुतिभिर्मनोरथान् पूरयामः। तात्कालिका राजानः क्षत्रियाः बलपराक्रमशालिनोऽपि विद्याविचारहीनाः, स्वसंघटनशून्या, भोगविलासप्रियाः, सुन्दरीकुमार्यादि कृते मिथः कलहायमानाः, युद्धेन शक्तिक्षयं कुर्वाणाः स्वजातिमप्यधःपातयामासुः। तथैव वैश्याः कृषिवाणिज्यादिपराः, वयं वराकाः निर्बला राष्ट्ररक्षणानधिकारिणः। शूद्रा द्विजेभ्यो विच्छिन्ना दूरतोऽपसार्यमाणाः किंकरा किं कर्त्तुं शक्नुमः इति स्वराष्ट्ररक्षापराङ्मुखा जाताः, त्रिविधाः

साधवः, संन्यासिनो, लेखकाश्च व्यक्तभगवद्रूपराष्ट्रस्वातन्त्र्यगौरवगीतलेखन-विमुखा अव्यक्तपरमेश्वरस्यैव चरित्रगीतं वर्ण्यमानाः तस्मिन्नेकस्मिन्नपि विविधनामविग्रहादिप्रयुक्तभेदान् कुर्वणाः परस्परकलहैकबीजं खण्डन-मण्डनलक्षणं सम्प्रदायभेदं भक्तसमुदायभेदञ्च विदधुः। तेषु केचित् सामर्थ्य-शालिनोऽपि विविधचमत्कारप्रदर्शनतत्परा अपि प्रियराष्ट्रस्य संघटना स्वातन्त्र्यादिस्थापने सामर्थ्यशून्या बभूवुः।

समर्थरामदासस्वामी तु तेष्वपवादभूत एव, येन क्षत्रपतिशिवाजी संघटनाय प्रबोधितः। क्षत्रियसमाजे च महाराणा प्रतापः राष्ट्रभक्त आसीत्। संघटनसहायाभावात् सोऽपि विशिष्टं कार्य्यं कर्त्तुं न प्राभवत्। तत एव पवित्रेऽस्मिन्देशे दशकोट्यधिका म्लेच्छाः प्रादुरभवन्। हिन्दुजातौ नीचत्वेन विभाव्यमाना विशिष्टाधिकारेभ्यो बहिष्क्रियमाणाः सर्वथोपेक्ष्य-माणा मुहम्मदेश्वरादि शरणत्वासादनमन्तराऽन्यत् किं कुर्य्युः। ते च साम्प्रतमपि वैरायमाणा हिन्दुजातेः सुखमयीं निद्रामपि प्रणाशयन्ति। तैरेव पूर्वं सधर्मिभिः साम्प्रतं विधर्मिभिः हिन्दूस्थानं पावनमखण्डं भारतपाकिस्ता-नादिरूपेण खण्डितमेव। यत्रान्यधर्मावलम्बिभिरपि बन्धुभावमाविष्कृत्य परमोदार्य्यपुरस्सरं अच्छाधिकारादिप्रदानेन परकीया अपि स्वकीया विधीयन्ते, तत्र परमसंकोचघृणाशीलैः कूपमण्डूकायमानैः कतिभिश्च स्वार्थ-दुरभिमानमौढ्यादिदोषेण स्वकीया अपि परकीया विधीयन्ते, किमतः परं सखेदमाश्चर्यम्, इति, तदपि निःसारम्।

यतो जन्मना वर्णाश्रमव्यवस्थायामपि–'शस्त्रं द्विजातिभिर्ग्राह्यं यत्र धर्मोऽवरुद्ध्यते' इत्येवमादि रीत्या राष्ट्ररक्षणाद्यर्थं ब्राह्मणादीनामपि शस्त्रग्रहण-मुक्तमेव। परशुरामद्रोणकृपाश्वत्थामादिब्राह्मणानामपारबलवीर्य्यादिकं स्मर्य्यते च।

येषां किल—

'अग्रतश्चतुरो वेदान् पृष्ठतः सशरं धनुः।
इदं ब्राह्ममिदं क्षात्रं शापादपि शरादपि॥'

इति प्रसिद्धमेव।

किञ्च सर्वदैव ब्राह्मणा एव शस्त्रादिविद्योपदेशका आचार्य्या आसन्।

किं बहुना; शूद्राणामप्येकलव्यादीनां शस्त्रास्त्रदक्षता स्मर्यते। महाराणाप्रतापस्य सहकारिणो भिल्लकिरातादयोऽपि युद्धविद्याकुशला आसन्।

एतेन वैश्यानामपि शस्त्रास्त्रादिनैपुण्यमनुमातुं शक्यम्।

किञ्च राष्ट्रस्य कार्यं न केवलेन युद्धनैपुण्येनैव चलति। विद्याविवेककृषिवाणिज्यगोपालनादिहेतुकैर्धनसंग्रहैः शिल्पश्रमादिहेतुकैःशस्त्रार्जनादिमन्तरा विजयलाभासंभवात्। सर्वत्र हि बलाधिकारिणामिव विद्याबलशिल्पाधिकारिणामप्यपेक्षाया अनिवार्यत्वात्। कर्मणा वर्णव्यवस्थापक्षे कृत्रिमो विभागः। जन्मना वर्णव्यवस्थायान्तु स्वाभाविकः सः। अपि च यथासामान्येनानेकविद्याकुशलैरपि कुत्रचिद्विद्यायां वैशिष्ट्यं प्रतिपादयिष्यते तथैव जन्महेतुकवर्णव्यवस्थायां तु तत्तद्विद्यासु कौशलं सम्पाद्यापि जन्मना नियतासु विद्यासु कौशलातिशयः संपाद्यते, स्वभावनियतकर्मत्यागे दोषस्मरणात्। पारम्पर्य्येण कौशलमनायासेन सम्पद्यते, मत्स्यानां प्लवनकौशलमिव, पक्षिणामुड्डयनकौशलमिव च। दृश्यन्ते च नाविकानां बाला नौपरिवहणकुशलाः, शिल्पिनां तक्ष्णां शिल्पतक्षणादिक्रियाकौशलसम्पन्नाः। कलहस्तु सर्वथाऽपि मौर्ख्यमूलको, न वर्णव्यवस्थामूलकः। रागद्वेषमौर्ख्यादिभिः कृत्रिमव्यवस्थायामपि कलहो न दण्डवारितः। वयं दीनाः न किमपि कर्त्तुं प्रभवाम इति दैन्यन्तु वैदिकसभ्यतायां दूरोत्सारितमेव। प्रतिदिनं 'शतमदीनाः स्याम शरदः' इति त्रिसन्ध्यमदैन्यमेव प्रार्थ्यते। क्षत्रियस्यार्जुनस्य सुदृढं धर्मनिविष्टं चेत इन्द्रलोकललामभूतयोर्वश्या अपि नापहर्त्तुं प्रभूयते स्म। नरेश्वरस्यादरणीयत्वं तु 'नराणां च नराधिपम्।' 'महती देवता ह्येषा नररूपेण तिष्ठती'त्यादिभिरार्षैर्वचनैरनुमोदितमेव। तावताऽपि न धर्मराष्ट्रघातकानां नृपाणामादरणीयता सिद्ध्यति, महाभारतादौ तादृशस्य नृपस्य निग्रहार्हत्वोक्तेः। रामायणमहाभारतादिलेखकैर्महर्षिभिरपि धर्मब्रह्मनिरूपणप्रसङ्गेनैव शौर्य्य-वीर्य्यवर्धनानि नीतिशिक्षणप्रचुराणि चरित्राण्यपि बहूनि वर्णितान्येव। पद्मादिपुराणेषु, ज्ञानार्णवादितन्त्रागमेषु, मन्वादिधर्मशास्त्रेषु, शुक्रादिनीतिशास्त्रेषु रघुवंशमाघकिरातादिकाव्येषु, बृहत्कथा-पञ्चतन्त्रादिग्रन्थेषु, नानाविधानि धर्मार्थकामकौशलानि वर्णितान्येव। सत्स्वपि व्यासादिमहर्षिषु, सत्स्वपि श्रीकृष्णभीमादियोद्धृषु, सत्स्वपि धनकुबेरेषु शिल्पिवरेषु, यथा सर्वसंहारकं

महाभारतीयं युद्ध प्रवृत्तमेव, समष्टिकर्म संस्कारादेव, तथैव सत्स्वपि शास्त्रज्ञेषु ब्राह्मणादयः प्रमाद्यन्ति, प्रच्यवन्ते च स्वीयेभ्यः परम्पराप्राप्तेभ्यो गौरवेभ्यः। तुलाधारप्रभृतिवैश्यानां, विदुरधर्मव्याधादि-शूद्रान्त्यजानामपि बहुमानं समाजे सर्वदैवासीत्' तथापि ते मर्य्यादां नातिक्रामन्ति स्म। ज्ञानयोगादिसम्पन्नेनापि विदुरेण शूद्रयोनिजत्वेन स्वस्य ब्रह्मविद्योपदेशानर्हत्वं स्पष्टमुक्तम्—

'शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे।'

( इति सनत्सुजाते )

न मर्यादापालनं नीचत्वप्रयोजकम्। म्लेच्छत्वमपि न शूद्रान्त्यजादयो नीचत्वेनाभ्युपगता उपजग्मुः। किन्तु ब्राह्मणोत्तमा विद्वांसश्च लोभमोहाभिभूता म्लेच्छा बभूवुः।

'पण्डिता बहवो राजन् बहुज्ञाः संशयच्छिदः।
सदसस्पतयोऽप्येके ह्यसंतोषात् पतन्त्यधः।'

इति भागवतोक्तेः।

इदानीमपि बहवः पण्डितम्मन्याः साधवः स्वसमाजपारम्पर्य्यधर्म-द्रुहो विधर्मशासनगुणगानपरायणा दृश्यन्ते। तदत्र मौर्ख्यमेव हेतुर्न साधुत्वं, न सम्प्रदायो, न वा ब्राह्मणादित्वम्, कैश्चिदपि वैमनस्यदौर्मनस्य विघटनाद्यप्रशंसनात्।

येषां स्वशास्त्रे धर्मे वा श्रद्धा न भवति त एव ब्राह्मणा वा शूद्रा वा धर्मान्तरमाश्रयन्ते। इदानीं तु शूद्रा अपि न तथा धर्मान्तरे प्रविशन्ति यथा-ब्राह्मणादयः। तत्कस्य हेतोः? शूद्राणां शास्त्रे धर्मे च बद्धश्रद्धत्वात्तदभावाच्चेतरेषाम्। तेनैव च स्वकीया अपि परकीया भवन्ति। शास्त्रे धर्मे च बद्धश्रद्धत्वादाङ्ग्ला अपि स्वकीयमाना दृश्यन्ते।

यदुक्तम् ''कलावाद्यन्तयोः स्थितिरितिवत्
कलौ न ब्राह्मणाः सन्ति कलौ न क्षत्रजातयः।
वणिजश्चैव शूद्राश्च कलौ वर्णद्वयं स्मृतम्।

इत्यपि वक्तुं शक्य" मिति, तदपि तुच्छम्, यथेष्टचेष्टोक्तौ सत्यामप्याप्तोक्तेरमावत्वेनाकिञ्चित्करत्वात्। अत एव महाभाष्ये—

'यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत् स्वर्गं तत्किं क्रतुगतं नयेत्।

इत्यादि भ्राजश्लोकानामप्रामाण्यमेवोक्तम्। तादृगिवायमपि श्लोकः।

वस्तुतस्तु क्षत्रियवैश्ययोः उपनयनवेदाध्ययनादिसंस्काराभावादेव 'कलावाद्यन्तयोः स्थिति' रित्युक्तिः, ब्राह्मणेषु कथं कथञ्चित् संस्कारशेषत्वाच्चतुर्थस्य संस्कारानपेक्षत्वाच्च वस्तुस्थितेर्नेत्रनिमीलनमनर्थायैव, न कल्याणाय। ब्राह्मणानामपि न पतनमिति न वक्तुं शक्यते। तथापि यथा कथञ्चिदुपनयनम् गायत्र्युपदेशमात्रम् सर्वेषु विशिष्टेषु समेऽपि संस्कारा वेदाध्ययनतदनुष्ठानानि च प्रचलन्त्येव। काशीकाञ्च्यादिषु बाहुल्येनान्यत्र विरलविरलतया द्रष्टुं शक्यन्ते।

यदुक्तम्—"सर्वाभिर्विद्याबलधनादिशक्तिभिः समलंकृतपरमसुखपूर्णः सत्ययुगस्तदैवायास्यति यदार्य्यहिन्दुजातिः एकवर्णत्वेनैकधर्मत्वेनैकेश्वरत्वेन सम्प्रदायभेदशून्यत्वेनोत्तमाधमभेदभावनाशून्यत्वेन विभूषिता संघटिता निःस्वार्थप्रेमसूत्रसंबद्धा विशालराष्ट्रहितसंरक्षणतत्परा च भविष्यति।" तदेतदत्यल्पमुच्यते। यतो हिन्दुजातिकल्पनाऽपि किमर्थमुन्मेषमासादयतु? सर्वा मानवजातिरेव वर्णधर्मादिनैरपेक्ष्येण विश्वसंघटनपरायणैव किं न स्यात्! अन्यजातिसत्त्वे तु धर्मेश्वरादिकल्पनाभेदोऽपि प्रसज्येतैव। यदि तु पशुत्वव्यावृत्ता मानवत्वसंपत्तिस्तद्रक्षणार्थं धर्मादिकमपेक्षितं तदा तु धर्ममूलशास्त्रमप्यपेक्षणीयतामर्हत्येव। वेदादिशास्त्रमन्तरा धर्मस्य खपुष्पायमाणत्वात्। वेदादिशास्त्रप्रामाण्याभ्युपगमे तु नैकवर्णत्वैकधर्मत्वादिकं सिद्ध्यति। वेदेषु वर्णभेद-धर्मभेद-दैवतादिभेदानां जागरूकत्वात्।

यदुक्तम् "ऋगादिचतुर्वेदसंहितासु कुत्रापि जातिभेदादेः प्रतिपादनं नोपलभ्यते। 'ब्राह्मणोऽस्य मुखमासी'दित्येक एव मन्त्र आपाततो जातिभेदप्रतिपादकत्वेनावगम्यमानो जातिभेदाभावपरत्वेन योजित एवे'ति, तदपि तुच्छम्, मन्त्रब्राह्मणात्मकेषु वेदेषु धर्मशास्त्रेषु तद्व्याख्यानभूतेष्वितिहासपुराणेषु च चातुर्वर्ण्यस्य निगदव्याख्यातत्वेनोक्तमन्त्रस्य जातिभेदाभावपरत्वेन व्याख्यातुमशक्यत्वात्। नह्येकेनैव नेत्रप्रमाणेनावगम्यमानं रूपमरूपमिति कश्चिदमूढो विवक्षति, प्रमाणान्तरागम्यत्वादेव। ज्योतिष्टोमराजसूयादिविधायकानि

वाक्यान्यप्येकैकान्येव। शाखाभेदेन त्वत्रापि बहून्येव वाक्यानि सन्ति। न च मन्त्राणामेव वेदत्वम् मन्त्रब्राह्मणयोर्वेदनामधेयमिति कात्यायनापस्तम्बादिभिः सूत्रितत्वात्। एतेन गुणकर्मकृतचातुर्वर्ण्यं न जातिकृतमित्यप्यपास्तम्, तस्य समूलमुन्मूलितत्वात्। वाजसनेयिसंहितायास्त्रिंशेऽध्याये बहूनां जातीनां वर्णितत्वाच्च।

यदप्युक्तम्—"भारते राष्ट्रे बलात् यवनक्रिश्चियनादिरूपेण परिणता ये केऽपि स्युः ते सर्वेऽप्यार्य्य हिन्दव एव। हिन्दुस्थानस्य पावनमृत्तिकाभिः येषां शरीराणि निर्मितानि सन्ति ते कथं न हिन्दवो भवेयुः? वयं तु तत्र हिन्दुत्वमेवोद्घोषयामः' इति, तदेतत्प्रलापमात्रम्। हिन्दुस्थानमृत्तिका-निर्मितशरीरकत्वस्य हिन्दुत्वाप्रयोजकत्वात्। तथात्वे वा गृध्रकाकश्वशूक-रादीनामपि हिन्दुत्वापत्तिः स्यात्। हिन्दुत्वमपि वेदादिशास्त्रानुसारेण तदुक्त-धर्मनिष्ठावत्त्वेनैव सिद्धयति, नान्यथा। वेदादिशास्त्रेषु तु चातुर्वर्ण्यानुसारे-णैव धर्मविधानम्। जन्ममूलकब्राह्मण्यादीनामेव वेदाध्ययनतदुक्तधर्माधिकार-निर्णयात्। 'अर्य्यः स्वामिवैश्ययो'रिति पाणिनिव्याकरणानुसारेण स्वामि-वैश्ययोर्नार्य्यत्वं किन्त्वर्य्यत्वमेव। अनार्य्य-दस्यु-प्रभृतीनामपि नार्य्यत्वं संभवति वेदमन्त्रेणैव निषिद्धत्वात्।

अपि च आर्य्यशब्दः श्रेष्ठपरोऽपि सन् जातिपरः परिकल्पितः परैः। 'कृणुध्व विश्वमार्य्य'मिति व्याख्यानप्रसङ्गे तदप्युक्तमेव।

यदुक्तम्—गुणवत्त्वादिभिरुपाधिभिरेव द्रव्यादिप्रतीतिव्यवहारोपपत्तौ सत्यां नैयायिकैः कल्प्यमानद्रव्यत्वादिजात्यभ्युपगमो व्यर्थ एव तथा तत्तद्-गुणकर्मभिरेवोपाधिभिर्ब्राह्मणादिप्रतीतिव्यवहारोपपत्तौ जातिवादिभिः कल्प्यमानब्राह्मणत्वादिजात्यभ्युपगमोऽपि व्यर्थ एवे'ति तदपि तुच्छम्, वेदान्तरीत्या गुणद्रव्यादिनिर्वचनासिद्धया गुणवत्त्वाद्युपाधीनामप्यसिद्धेः। व्यावहारिकगुणादिसिद्धयभ्युपगमे तु लाघवाभावात् समानानुगतप्रतीतिसिद्ध-यर्थं द्रव्यत्वगुणत्वादि जातिकल्पनाया एवं ज्यायसीत्वम्।

ब्राह्मणाद्यनुगतव्यवहारप्रतीतिव्यवहारौ तु सर्वथा ब्राह्मणत्वादिजाति-मूलकावेव। न तत्तद्गुणकर्मोपाधिभिस्तदुपपत्तिः। गुणकर्मशून्येऽपि जाति-मात्रनिबन्धनब्राह्मणादिशब्दव्यवहारदर्शनात्। 'विद्या तपोभ्यां यो हीनो

जातिर्ब्राह्मण एव सः' इतिमहाभाष्यवचनाच्च । अतएव गुणकर्मयुक्त उत्तमस्तद्धीनोऽधमो ब्राह्मण उच्यते, तथात्वेऽन्यत्रापि गुणसत्त्वे मनुष्ये सिंहशब्दप्रयोगवत् । क्वचिद् गौण्या वृत्त्याऽपि ब्राह्मणपदप्रयोगः। जात्यभावे तु गौणमुख्यब्राह्मण्यभेद एव लुप्येत । महाभारतादौ जाति-दुष्परीक्ष्यता कथनेऽपि न तदपलापः संभवति। रत्नविशेषस्य दुष्परीक्ष्यत्वेऽपि तत्सत्त्वाभ्युपगमस्यानिवार्य्यत्वात् ।

'अनादाविह संसारे दुर्वारे मकरध्वजे।
कुले च कामिनीमूले का जातिपरिकल्पना ॥'

इत्येषोक्तिस्तु शास्त्राचार्य्योपदेशानुगुणज्ञानानुष्ठानशून्यानामेव कृते, न शास्त्रैकदृष्टीनाम्। अन्यथा मकरध्वजस्य सर्वत्र दुर्वारत्वे भवतोऽपि पारिव्राज्यब्रह्मचर्य्यादिपालनायासो व्यर्थ एव स्यात् ।

यदुक्तम्—"विद्याबलादिशक्तीनां तारतम्याभावेन समन्वयेऽपि वैशेष्यात्तु तद्वादन्यायेन यत्र विद्यादीनां वैशेष्यं तत्र ब्राह्मणत्वादिव्यवहारः सेत्स्यति। यथा—पाश्चात्त्येषु अध्यापकाः, सैनिकाः, व्यापारिणः, श्रमजीविन इति विभागस्तथैव भारतेऽपि भवन्तु व्यवहाराः" इति, तदपि न. यतो येषां जन्ममूलकवर्णव्यवस्थालोपः सञ्जातः। तत्र तथा तदुपपत्तावपि भारते स्वाभाविक्यां व्यवस्थायां सत्यां कृत्रिमायास्तस्या अभ्युपगमे कारणाभावात्।

यदप्युक्तम्—'मनुस्मृतिनाम्ना भृगुणा ब्राह्मणेनैव मनुस्मृतौ ब्राह्मण्यमाहात्म्यं स्वार्थपरायणतावशात् संयोजितम् तस्मान् मनुस्मृतेरप्रामाण्यमेव' इति तदपि तुच्छम्। त्वदुद्धरणानुसारेणैव मनुना तत्प्रमाणीकरणात्। तदप्रामाण्ये भृगुणा प्रोक्तमित्यत्रैव मानाभावात्। मनुनैव च भृगुप्रोक्तस्य मानवशास्त्रस्य प्रामाण्यं साफल्यञ्चोक्तम्—'एतद् वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः।
एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः॥
(१।५९ म॰ स्मृ॰)

'इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन्, द्विजः।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद् गतिम् ॥' इति।
(म॰ स्मृ॰ ११।१२६)

तस्मादुन्मत्तवद्यदाश्रित्य भृगुप्रोक्तत्वं साधयति तस्यैवाप्रमाणीकरणम्

स्वपादयोरेव कुठाराघातः। उत्थानपतनलेखकस्य रजनीकान्तस्य दृष्टया जन्मकर्मभ्यामुभाभ्यामेव वर्णव्यवस्था न सिद्धयति। कर्ममूलकवर्णव्यवस्थाया व्यावहारिकरूपप्रदानमपि दुष्करम् ( हिन्दु उ० प० २६९ )

यतस्तदनुसारेणैकस्मिन्नेव कुटुम्बे ब्राह्मणश्चाण्डालश्च संभवतः। तथात्वे पारिवारिकं संघटनमुच्छिद्यत एव। एकस्यैव जनस्य कर्मपरिवर्त्तनानुसारेण वर्णपरिवर्त्तने नैकवारं वर्णपरिवर्त्तनमापद्येत, येन महान् व्यतिक्रमः। तेन सर्वथा वर्णव्यवस्था विलोप एव श्रेयस्करः। सुधारकेष्वपि ब्राह्मणादिशब्दव्यामोहो दुस्त्यजः। ब्राह्मणशब्देनैव पूज्यत्वं शूद्रशब्देनैवापूज्यत्वं शूद्रे व्यज्यते। लेखकानां गणकानां न्यायवादिनां ( वकील मुख्तार ) आदीनां कस्मिन् वर्णे संन्निवेशः ?

'यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः।
तं राजा निधनं कृत्वा क्षिप्रमेव प्रवासयेत्॥'
( म० १०।९६ )

'नाब्रह्मक्षत्रमृध्नोति नाक्षत्रं ब्रह्मवर्धते'
ब्रह्मक्षत्रं च संपृक्तमिह चामुत्र वर्धते॥
( म० ९।३२२ )

अनेनैव शासनस्य ब्राह्मणीकरणं संवृत्तम्। अनेनैव गौतमबुद्धादिप्रहारो विफलीकृतः।

'वैश्यशूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्।
तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेतामिदम् जगत्।' (म० ८।४१८)

एतेन मनोः कौटिल्यं स्पष्टं व्यज्यते। जातीनां जन्मसिद्धाधिकारबाधाय निर्मम: प्रहारः। ब्राह्मणानां गुरुत्वात् क्षत्रियाणां सशस्त्रत्वेन दुर्दम्यत्वात् न दमनार्हता, किन्तु विट्शूद्रयोरेव। महानत्याचारो राजभिः संपादितः।

'मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।'

इत्युक्तावपि स्पष्टः पक्षपातः।

'जघन्यकर्मा वैश्यः स्यात् सेवा कर्मा तु पादजः'। विष्णु रहस्ये।

वस्तुतस्तु को ब्राह्मणः, कश्च क्षत्रियः मुखबाहुभ्यामुत्पन्नः ? तत्रान्यरक्तमिश्रणं न वृत्तमिति कथं ज्ञातुं शक्यम् ? यदि वेदानामयमेवाभिप्रायस्तदा तादृशस्यान्यायात्याचारवतो वेदस्य गङ्गासागरे निमज्जनमेव युक्तम् ।

क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान् प्रति सर्वशः ।
ब्रह्मैव सन्नियन्तृस्यात् क्षत्रं हि ब्रह्म संभवम् ।। (९।३२०)

विट्शूद्रायां जन्मनाऽपकृष्टत्वापादनम् पश्चात्तेषामुन्नतिद्वारनिरोधनम्, पश्चात्तेषां धनापहरणमप्युपदिष्टम् ।

'यो वैश्यः स्याद् बहुपशुर्हीनक्रतुरसोमपः ।
कुटुम्बात्तस्य तद्द्रव्यमाहरेद्यज्ञसिद्धये ।।'
(म० स्मृ० ११।१२)

यज्ञेन विविधानि धनानि रत्नानि दिव्यानि भोजनानि ब्राह्मणेभ्य उपनीयन्ते । यैः वैश्यैरेतन्न क्रियते तेषामेवापहरणम् ।

आहरेत् त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः ।
नहि शूद्रस्य यज्ञेषु कश्चिदस्ति परिग्रहः ।।
(म० स्मृ० ११।१३)

यज्ञस्य द्वे त्रीणि वाङ्गानि चेदपूर्णानि तदा तेषां पूर्तिः शूद्रगृहात् कर्त्तव्या । शूद्राणामुपरि ततोऽप्यधिकात्याचारः ।

'शक्तेनापि हि शूद्रेण न कार्यो धनसञ्चयः ।
शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते ।।'
(म० स्मृ० १०।१२९)

विस्रब्धं ब्राह्मणः शूद्राद् द्रव्योपादानमाचरेत् ।
नहि तस्यास्ति किञ्चित्स्वं भर्तृहार्य्यधनो हि सः ।।'
(म० स्मृ० ८।४१७)

दासताबाश्चक्रिकायां पेषणायैवात्याचारपूर्णा इमे नियमाः ।

'भार्य्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ।।'
(म० स्मृ० ८।४१६)

'शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा।
दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वम्भुवा॥'

(म० ८।४१०)

'न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति॥' (८।४१४)

शूद्राणां मासिकं कार्य्यं वपनं न्यायवर्तिनाम्।
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टञ्च भोजनम्॥

(म० स्मृ० ५।१४०)

'न शूद्राय मतिं दद्यान्नोच्छिष्टञ्च हविष्कृतम्।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत्॥'

(म० स्मृ० ४।८०)

यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम्।
सोऽसंवृत्तं नाम तमः सह तेनैव मज्जति॥'

(म० स्मृ० ४।८१)

ततोऽप्यधिकाः पैशाचिका अत्याचाराः, यानधीत्य हृदयानि प्रकम्पन्ते

शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्योऽप्यर्धशतं द्वे वा शूद्रस्तु वधमर्हति।'

(म० ८।२६७)

आश्चर्यमिदं यस्यापराधस्य कृते शतं पणाः (अशीतिभिर्वराटकैः पण इत्यभिधीयते) १२५ ताम्रखण्डानि, वैश्यः सार्धचतुर्दपणकोत्तरं रुप्यकत्रयम् तस्यैवापराधस्य कृते शूद्रस्य प्राणवधः।

'एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः॥'

(म० स्मृ० ८।२७०)

'नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्वतः।
निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः॥'

(म० स्मृ० ८।२७१)

'धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः'
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥'
(म०८।२७२)

'येन केनचिदङ्गेन हिंस्याच्छ्रेष्ठमन्त्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥'
(म०८।२७९)

'पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरेत् कोपात् पादच्छेदनमर्हति ॥'
(म०८।२८०)

सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्त्तयेत् ॥
(म०८।२८१)

अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् ॥
(म०८।२८२)

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ॥
(म०८।२८३)

मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च ।
श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥
( म० ११।१३१ )

'वध्यो राज्ञा स वै शूद्रो जपहोमपरश्च यः ।
यतो राष्ट्रस्य हन्तासौ यथा वह्नेश्च वै जलम् ॥
( अत्रि. १६ )

प्राणानर्थान् तथादारान् ब्राह्मणाय निवेदयेत्
स शूद्रजातिः भोज्यः स्यादभोज्यः शेष उच्यते'
( विष्णु. ५।११ )

'धारणं जीर्णवस्त्रस्य विप्रस्योच्छिष्टभोजनम्।
स्वदारेषु रतिश्चैव परदारविवर्जनम्॥

(हारीत २।१३)

'इत्थं कुर्यात् सदा शूद्रो मनोवाक्कायकर्मभिः।
स्थानमैन्द्रमवाप्नोति नष्टपापः सुपुण्यकृत्॥'

(हा० २।१४)

यस्यैन्द्रपदस्य प्राप्तयेऽश्वमेधशतमनुष्ठीयते तस्य प्राप्तिरत्र मूर्खाणां प्रलोभनार्थं शास्त्रकाराणामियं महती धूर्तता। रोम-ग्रीस-कार्थेज-मिश्र-असीरिया-वैबिलोन-अरब-फारस आदिदेशेष्वपि दासप्रथा आसीत्। परमेतादृशी धूर्तता क्वापि नासीत्।

आर्य्यस्त्र्यभिगमने लिङ्गोद्धारः। अथाऽस्य वेदमुपशृण्वतस्त्रपु-जतुभ्यां श्रोत्रपरिपूरणम्, उच्चारणे जिह्वाच्छेदः, धारणे शरीरभेदः, आसने शयने वा सहासनमभिप्रेप्सुः दण्ड्यः शतम्।

ब्राह्मणशासनेन राजकीयनियमैः विट्शूद्रयोः परमं पारतन्त्र्यं विधाय-पश्चात् मानासिकपरतन्त्र्यसंपादनाय—

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।

एवंविधैर्धूर्ततापूर्णैरुपदेशैः तदुन्नतिमार्गः सर्वथाऽवरुद्धः। यदि कश्चिच्चर्मकारपुत्रो दैवयोगाच्छिक्षितोभूत्वाऽध्यापनकार्यं कर्त्तुं समर्थो भवेत्तदापि तेन तदकृत्वा पादत्राणसीवनादिकार्यमेव कर्त्तव्यम्। ततः शम्बूकस्य तपश्चर्यया शिरच्छेदः रामचन्द्रेण कृतः, ततोऽपि शूद्राः रामनामपरायणा भवन्तीत्याश्चर्य्यम्।

ये व्यपेताः स्वधर्माच्च परधर्मेष्ववस्थिताः।
तेषां शास्तिकरो राजा स्वर्गलोके महीयते॥
आत्मीये संस्थितो धर्मे शूद्रोऽपि स्वर्गमश्नुते।
परधर्मो भवेत्त्याज्यः सुरूपपरदारवत्॥

(अत्रिस्मृति १३।१८)

मौर्ख्यादेतैरेतन्न ज्ञायते यत् नास्ति कश्चिदीश्वरो चातुर्वर्ण्यव्यवस्था-

यको, न वा पूर्वजन्मार्जितानि कर्माणि, ब्राह्मणक्षत्रियाणां कूटनीतिरेव विट्शूद्राणां पतनकारणम्। यदि शूद्रस्य तपश्चरणे न प्राणदण्डः समुचितस्तदा वेश्यापुत्रस्य वसिष्ठस्य तपश्चरणे कथं न दण्डो दत्तः ?

दारिद्र्यवशादेव क्षुत्पिपासादिभिरर्दितैर्वैश्यशूद्रादिभिर्ब्राह्मणीयशासन-विरुद्धमान्दोलनं नोद्भावितम्। अन्त्याः शासकाः कूटनीतिज्ञाः आसन्। तत एव जन्मान्तरविश्वासोत्पादनादिभिः वैश्यशूद्राणां मनांस्यपि स्वायत्ती-कृतानि। असंख्यैर्जातिभेदैरपि तत्पारतन्त्र्यं दृढीकृतम्। तेनैवार्य्यधर्मस्य सार्वभौमसम्पादने बाधोत्पद्यते। यदि कश्चिदार्यो भवेदपि तदाप्यत्र विवा-हादिसम्बन्धालाभात् तेषां पुनः स्वजातिषु परावर्त्तनं भवति। समुद्रबन्धन-पुष्पकयाननिर्माणशाक्षागृहनिर्माणादिकमपि नार्य्यकर्त्तृकं किन्तु वानर-दानवादिकृत तत्सर्वम्।

जीविकानिर्धारणार्थं वर्णव्यवस्था सुप्रजननव्यवस्था वा ? नियम-पालनदृढतार्थं जातिबहिष्कारश्च। अत्र जातिभेदो धर्मसम्बद्धो नान्यत्रैवम्। अन्येषां धर्मदृष्ट्या विभिन्नजातीयाः समाना एव। हिन्दुजातिरद्यापि जीवतीति कथनं निरर्थकम्। यतः सम्मानपूर्णं जीवनमेव जीवनम्। दासभावेन जीवनम् मरणमेव। जैनबौद्धकाल एव धनकुबेराः श्रेष्ठिनः सम्मान्या आसन्। तदानीमेव नन्दमौर्य्यादयः शूद्रवंशीयाः, गुप्तवर्धनादिवैश्यवंशीयाः सम्राजोऽपि सम्पन्नाः। ( ई० पू० ५०० आरभ्य ई० उ० ५०० यावत् ) भूदेवास्तदानीमपि विरुद्धा आसन्। बौद्धशासनेन प्रजानां मुक्तिरेव जाता। परन्तु ब्राह्मणैर्वि-देशीयानां देशगतानामनार्य्याणां च साहाय्येन अनार्य्यान् राजपूतादिक्षत्रिय-पदवीमारोप्य बौद्धराजभिर्युद्धं प्रवर्त्तितम्। तैश्च बौद्धराजानः समूलमुत्पा-टिताः। बौद्धान् वीक्ष्य ब्राह्मणैरपि स्वीयधार्मिकनियमाः शिथिलीकृताः। हिन्दुभिरेतज्ज्ञेयम् यत् तद्दासत्वसम्पादको नान्यः किंतु तथाकथितप्रभुवाणी-रूपो वेदभगवानेव। येन ब्राह्मणोऽस्य मुखमासीदिति राष्ट्रियताध्वंसको मन्त्रः प्रचारितः। येन च वर्णव्यवस्थारूपभेदबीजमुप्तम्। यावद्वेदादिधर्म-ग्रन्था आवेष्टय आबध्य संग्रहालये समुद्रे वा न निःक्षेप्यन्ते, ब्राह्मणक्षत्रियादि नामभिः परिचयदानं राजकीयनियमैर्न वारितं भविष्यति, तावन्नास्याः समुद्धारः संभवति।

वर्णव्यवस्थया तु राजकीयैर्नियमैरन्यजातीयकार्य्याणि नान्यैः शिक्षणीयानि वर्त्तव्यानि वा। तेन क्षत्रिया एवयुद्धविद्याकुशलाः सम्पन्नाः। ब्राह्मणास्तु भोगरागरक्ताः, वैश्यशूद्रास्तु युद्धविद्याबहिर्भूता आसन्। तेन-ब्राह्मणवैश्यशूद्राणां युद्धेऽवरुहकारात् क्षत्रियाणां पराजयेन देश-स्वातन्त्र्यं नष्टम्।

बौद्धानामहिंसया न भारतपतनम्, किंतु बौद्धकाल एव भारतस्य स्वर्णिमकालः। तदानीमेव चन्द्रगुप्तमौर्य्यः, अशोकः, पुष्पमित्र, समुद्रगुप्तः विक्रमादित्यः, स्कन्धगुप्तः हर्षवर्धनकनिष्कादिसम्राज्यप्रादुर्भावः। वैशाली-राज्यसेनापतिना सिंहेन पृष्टः सन् गौतमबुद्ध उक्तवान्—दण्डपात्रं दण्डनीयः। पुरस्कारपात्रं पुरस्करणीयः। अपराधकारणादेवापराधी दण्ड्यः। सत्यस्य न्यायस्य रक्षणार्थं युद्ध्यमानो न प्रत्यवैति। अतएव मुस्लिमशासकैः न बौद्धेभ्यो राज्यं प्राप्तम् किन्तु हिन्दुभ्य पृथ्वीराजादिभ्य एव। हरिजना हिन्दवोऽवमन्यन्ते। धर्मान्तरिता अब्दुलगनी, जोसेफ आदिनामधरिणः सम्मान्यन्ते। जातिभेदनिवारणाय बौद्धैर्जैनैरन्यैश्च कृता यत्ना निष्फला एव। कैश्चिदुपजातिविनाशम् आवश्यकम् इति मन्यते। परं तन्नाशे मूलजातीनां बलवृद्धिः संभाव्यते।

कैश्चित् सार्ववर्णिक-सहभोज-सहविवाह-प्रसारेण तन्नाशः संभाव्यते। परन्तु व्यवहारे तद्दुःशकमेव। यत्र विजातीयानामन्नजलग्रहणमधर्मो मन्यते, तत्र शुद्धान्तःकरणेनान्तर्जातीयविवाहोऽसंभव एव। यस्य जातिरेव धर्मः, जातिरेव स्वर्गः, जातिरेवेश्वरः, जातिरक्षणार्थं यत्र सर्वस्वत्यागः शक्यते कर्तुम्। तत्र सहविवाहादिकं दुःशकमेव। अतः जातिध्वंसकान्दोलनवैफल्यम्। हिन्दूनां धर्मः सर्वाधिकप्रियः। तेन धर्मग्रन्थानामुन्मूलनमेव जातिभेदनाशकारणम्। बुद्धादिवत्सर्वथाशास्त्रप्रामाण्यानङ्गीकार एवावश्यकः। ब्राह्मणादिषु तथा शूद्रान्त्यजेष्वपि जात्युपजातिमूलक उच्चनीचभावो विद्यते। डोम्ब-रजकादी-नामपि क्रमविन्यासो विद्यते। काश्चिदधमा अपि जातयः काश्चिदुत्तमा इति तासामप्युच्चत्वाभिमानः। मुस्लिमबृटिशशासनैरपि वैश्य-शूद्राणां कल्याणं सम्पन्नम् इति।

तदेतत्सर्वमुन्मादविलसितम्, शास्त्रार्थस्यान्यथाग्रहणात्। धर्मकामेष्वासक्तानां धर्मजिज्ञासमानानां श्रुत्यादिप्रामाण्यमवश्यमङ्गीकरणीयम्। चार्वाकप्रायाणां नास्तिकानां शास्त्रप्रामाण्यानभ्युपगमस्तेषामेवाकल्याणाय। यदि कश्चित् चक्षुषि सूर्ये वा न विश्वसेत्तदापि तयोर्माहात्म्यं नापकृष्यते। अयन्तु सुधारकाणां खण्डनायास्तिकप्रयुक्ततर्कोनाश्रयते। तथैवास्तिकानां खण्डनाय सुधारकस्तर्कोनाश्रयते। शास्त्राणि शास्त्रव्यवस्थाश्चोन्मूल्य स्वच्छन्दतां कामयते। यद्यपि बहूनां कर्मणामनुष्ठाने स्वातन्त्र्यमेव समेषां, फलभाक्त्वञ्च यथाकालमेव भवति, तथापि हिंसाचौर्यव्यभिचारादीनि कर्माण्यामुष्मिकफलप्रदान्यपि लोकव्यवस्थापकैरवरोध्यन्ते। तत्प्रसारावरोधाय शोधनाय दण्ड्यन्ते च तत्कर्त्तारः। तद्दृष्टयैव च—

'यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः।
तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत्'॥

एवमादीनि वचनानि।

ब्राह्मणस्य सर्वमित्रत्वादेव शासनस्य ब्राह्मणीकरणं गुण एव न दोषः। स्वधर्मविमुखानां रावणादिब्राह्मणानामपि दण्डविधानं शासनस्य पक्षपातनैरपेक्ष्यमेव सूचयति।

जातीनां जन्मसिद्धाधिकारः कः कथञ्च ज्ञायते, ज्ञानमन्तरा कथमन्यायनिर्णयः? समाजेन शास्त्रेण च अधिकारो निर्णीयते, भारतीयवेदादिशास्त्रैस्तदनुगामिना समाजेन च वर्णाश्रमानुसारिण एवाधिकारा निर्धारिताः। सर्वत्रैव गुरुत्वेन राजत्वेनाद्यापि सम्मानं भवति ब्राह्मणादीनां, परन्तु दुर्मार्गवर्त्तिनां राजन्यानां ब्राह्मणानाञ्चापि शासनं भवत्येव। यदि रक्तसांकर्य्यं न जातमिति प्रमाणशून्यं तदा सर्वत्र रक्तमिश्रणं जातमित्यपि प्रमाणशून्यमेव। सर्वज्ञमन्तरा सर्वाः तद्रक्ततन्मिश्रणादेर्ज्ञातुमशक्यत्वात्। भारतीयेशास्त्रे समाजे च रक्तसांकर्य्यवारणप्रयत्नातिशयाज्जाते च सांकर्य्ये पृथक् संस्थाविभागदर्शनाच्च रक्तसांकर्य्याभाव इति तु प्रामाणिकम्। वेदस्य गङ्गासागरे निमज्जन-तद्दाहादिप्रयत्नास्तु बुद्धिदौर्बल्यमूलका एव।

कर्मणा वर्णव्यवस्थायामेकस्मिन् गृहे ब्राह्मणचाण्डालयोः सत्त्वेन पारिवारिकसंघटनमुच्छिद्यते। प्रतिदिनं वर्णपरिवर्त्तने महान् व्यतिक्रमः। सुधारकेऽपि ब्राह्मणादि शब्दव्यामोहो दुस्त्यज इति सत्यमेवाह।

यच्चायं मन्वादिवचनविहितव्यवस्थाया अन्यायमूलकत्वं मनुते, तत्त कर्मसिद्धान्ताज्ञानमूलकमेव । लोके कर्मभेदेन फलभेदो न दोषाय भवति, तथैवादृष्टकर्मभेदेनापि फलभेदे न दोषः। अन्यथा कश्चित् कथं मनुष्यः, कश्चिच्च पशुः, पक्षी वा जायते, श्वा कश्चित्, सूकरश्च कश्चित् कथं भवति। काको, हंसः, शुकः, पिकः, विविधाः प्राणिनो जायन्ते । यथा निर्हेतुकानि कार्य्याणि लोके नावलोक्यन्ते तथैव तेषां तेषां प्राणिनां विलक्षणानि शरीराणि तत्सुखदुःखतदुपकरणानि च न निर्निमित्तानि भवितुमर्हन्ति। तान्येव तु निमित्तानि पुण्यापुण्यपदभाञ्जि भवन्ति । यथा नानाविधा रोगाः विपत्तयश्चैहिकैरामुष्मिकैश्च पातकैर्जायन्ते, तथैव बलवीर्य्यकान्तिलावण्यादयो गुणाः सम्पत्तयश्च शुभैः पुण्यैर्जायन्ते। पक्षिषु काकादयः, पशुषु श्वसूकरादयोऽशुभैरेव कर्मभिर्जन्यन्ते। सर्वमेव ब्रह्मात्मतयाऽमृतपुत्रतया वा पश्यन्तः परावरदृशस्तदनुसारेणैव व्यवस्था विदधति । सर्वेषां पुण्यानि पातकानि तन्निबन्धनानि जन्मानि तत्कल्याणौपयिककर्माणि च ज्ञात्वा विदधानानि महर्षयः शास्त्राणि च नात्र मनागपि पक्षपातीनि। वैश्यस्य बहुधनस्यासोमपस्य यज्ञादिरहितस्यैव धनहीनब्राह्मणस्य यज्ञादिनिर्वृत्तये धनाहरणे को वा दोषो भातीति तु न विद्मः।

इदानीन्तनास्तु साम्यवादिनः हत्वापि सर्वाहरणमनुमन्यन्ते ।

योऽसाधुभ्योऽर्थमादाय साधुभ्यः सम्प्रयच्छति ।
स कृत्वा प्लवमात्मानं तारयेत्तावुभावपि ।।

इति मनुवचनस्य कम्यूनिस्टैरप्याद्रियमाणत्वात् । यैर्ब्राह्मणादिभिरपि ब्रह्महत्या स्वर्णस्तेयसुरापानादिकं क्रियते, तेषां कृतेऽपि कृच्छ्राणि प्रायश्चित्तानि विहितानि। सुरापानस्य मरणान्तमेव प्रायश्चित्तं भवति। येषां पातकानां प्रायश्चित्तं चोद्यते तेभ्यो विमुच्यन्ते । अचीर्णप्रायश्चित्तव्रतास्तु तद्विपाकरूपेण श्वसूकरचाण्डालादियोनिं दारिद्र्यं व्याध्यादि दुःखजालञ्च प्राप्नुवन्ति । कपूयचरणाः श्वयोनिं सूकरयोनिं चाण्डालयोनिं वा प्रतिपद्यन्ते। सर्वज्ञकल्पा ऋषयो वेदादिशास्त्राणि च समेषां प्राणिनां हिताय दण्डविधानमपि कुर्वन्ति । रागद्वेषविहीनैः शास्त्रैकदृष्टिभिरत्यन्तनिरपेक्षैरेव दण्डो विधीयते। "न शूद्राय मतिं दद्यात्" इत्यस्य वेदपूर्विकां ब्रह्मविषयिणीं मतिं, वैदिककर्मादि

विषयिणीं मतिं वा न दद्यात् इत्येवार्थः। द्विजशुश्रूषा भगवद्भक्त्यादि तत्कल्याणोपयोगि धर्मज्ञानपगम्य तदर्थविधानात्।

दण्डतारतम्यविधानन्तु वस्तुस्थित्यनुरोधेन, न पक्षपातधिया। क्वचिद्-ब्रह्मणादीनामेव दण्डाधिक्यविधानात्। यथानुपदमेवोक्तं सुरापानस्य मरणान्तं प्रायश्चित्तम्।

धर्मोपदेशः पञ्चाध्ययनं प्रणवोच्चारणं शालग्रामार्चनं शूद्राणां निषिद्धत्वादेव दण्डविधानम्। 'यद् वै मनुरवदत्तद् भेषजम्' इति वेदेऽपि मनोरादरो बोध्यते। तस्मादनतिशंकनीयानि मनुवचनानि।

यत्तु 'नास्तीश्वरो न सन्ति पूर्वजन्मार्जितानि कर्माणि' इति तदपि तुच्छम्; त्वदुक्तेरप्रमाणत्वात्। तत्र प्रमाणं तु वेदादिकमुक्तमेव। विश्वं स्वोपादानापरोक्षज्ञानजन्यं कार्यत्वे सति विलक्षणत्वात्, शय्याप्रासादादिवत्, जगद्-वैलक्षण्यहेतुवैलक्षण्यपवकं, विलक्षणत्वात्, चित्रपटवत्, इत्यादिभिरनुमानैश्च परमेश्वरः पूर्वजन्मार्जितानि कर्माणि च सिद्ध्यन्त्येव। प्रमाणैर्व्यवहरन्नपि यः प्रमाणानां प्रामाण्यं नाभ्युपैति, स तून्मत्तवदुपेक्ष्य एव, तस्य शिष्टसमाजबहिष्कृतत्वात्। इह तु शिष्टा ब्राह्मणाः शूद्राः अन्त्यजाश्च शास्त्रप्रामाण्यवादिन एव। वसिष्ठस्य गणिकापुत्रत्वकल्पनाऽन्यत्रैव निराकृता, तत एव तस्य शूद्रत्वं तपश्चरणाद्ब्राह्मणत्वमित्येतत् सर्वं मूढजन्तुजल्पितमेव।

यदुक्तं 'जातिभेदादार्यधर्मस्य सार्वभौमसंपादने बाधा संपन्ना' तदपि प्रतारणामात्रम्, नास्तिकस्य तवेश्वरधर्मविमुखस्य कोऽप्यार्यधर्मोऽपि, यस्य सार्वभौमभावे बाधा समागता?

यदुक्तं समुद्रबन्धनादिकं वानरादिकृतं नार्यकृतम् इति नार्यगौरवावहं तदिति; तदपि तुच्छम्। ते वानरा अपि येषामार्याणां दास्यं कुर्वन्ति स्म किं तेषां माहात्म्यं नास्त्येव?

यदुक्तं बौद्धकाल एव धनकुबेराः श्रेष्ठिन आसन्। स एव कालः समृद्धिकालः तदपि तुच्छम् यतः बौद्धप्रभावादेव जातिव्यवस्था यत्र शैथिल्यमुपगता तत्रैव धर्मपरिवर्त्तनेन इस्लामधर्मविस्तारः। यत्र तु जातिव्यवस्था दृढासीत् तत्र हिन्दवो न धर्मान्तरमुपगताः। तत एव पश्चिमपञ्जनदप्रदेशे सीमान्ते वंगदेशे च इस्लामधर्मविस्तारः। यत्र उत्तरप्रदेशादौ जाति-

व्यवस्था दृढासीत्तत्र न तत्प्रसर इतीतिवृत्तवेत्तृभिरङ्गीकृतत्वात्। तस्मात् बौद्धप्रचारैर्वर्णाश्रमव्यवस्थाशैथिल्यमेव भारतपराभवकारणमिति निष्प्रपञ्चम्।

यत्तु सहभोज-सहविवाहादिजातिनाशकोपायानां दुष्करत्व निष्फलत्वञ्च उक्तम्, तत्तु सम्यगेव परधर्मग्रन्थोन्मूलनमपि धर्मान्धमुगलान्धानुकरणमेव, न तावताऽपि न त्वदिष्टसिद्धिः, तस्यापि निष्फलत्वावगमात्। डोम रजकादिषु त्वदुक्तरीत्या जातिभेदमूलकभोजनविवाहादिभेदस्य बद्धमूलत्वात्।

सत्यार्थप्रकाशे एकादशे समुल्लासे तल्लेखकेनाप्युक्तम् 'मनुष्य-पशु-पक्षि-वृक्ष-जलजन्त्वादिजातय ईश्वरकृताः। पशुषु गवाश्वहस्त्यादयः, वृक्षेषु वटपिप्पलाम्रादयः, पक्षिषु हंस-काक-बकादयः, जलजन्तुषु मत्स्य-मकरादयो जातिभेदाः, मनुष्येषु ब्राह्मणक्षत्रियवैश्यशूद्रान्त्यजा जातिभेदा ईश्वरकृताः।

( संस्कारविधौ उपनयनप्रकरणे ७८।७९ पृ० )

'यज्ञार्थमग्नि-ब्राह्मणक्षत्रिय-वैश्यगृहेभ्य आनयेदित्याह न शूद्रगृहात्'

ये ब्राह्मणेतराः किञ्चित्पठित्वाध्ययनाध्यापनलेखनोपदेशादिकार्य्येषु संलग्नाः सन्तोऽपि स्वस्यापठितब्राह्मणतुल्यमपि सम्मानमनुपलभ्य खिद्यन्ते त एवेर्ष्याविशेषवशात् कर्मणा वर्णव्यवस्थां समर्थयन्ते। अन्ये ब्राह्मणाः सन्तोऽपि वर्तमानशिक्षादीक्षाप्रभावाज्जातिनियमोल्लङ्घिनो धार्मिकैः स्वजातीयैश्च बहिष्कृतास्तेऽपि तथैव कर्मणा वर्णव्यवस्थामालपन्ति। अन्ये स्वशास्त्रीयसिद्धान्तज्ञानविधुरा विरुद्धमतसंसर्गिणः, अपरे जन्मना वर्णविरोधिषु संमानप्रतिष्ठार्थिकलाभप्रेप्सया जन्मना वर्णव्यवस्थां खण्डयन्ति, कर्मणा च तां समर्थयन्ते। तथा च रागद्वेषादिदूषितसमर्थितत्वान्न कर्मणा वर्णव्यवस्था धार्मिकसिद्धान्तः। अद्वेषरागिभिः सद्भिः सेवितस्यैव मनुना धर्मत्वोक्तेः।

'विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः॥
हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत॥'

( मनुः २:१ )

## चातुर्वर्ण्यसिद्धिः

कैश्चित्तु—"हत्वी दस्यून् प्रार्य्यं वर्णमावत्"

( ऋ० सं० ३।३४।९ )

'यो दासं वर्णमधरं गुहाकः' ( ऋ० सं० २।१२।४ )

इत्यादिषु आर्य्य इति, दास इति वर्णद्वयस्यैव चर्चितत्वात् वेदेषु चातुर्वर्ण्यं नास्त्येव। 'उभौ वर्णावृषिरुग्रः पुपोष (ऋ० सं० १।१७९।६) इति स्पष्टं वर्ण-द्वयमुक्तम्। ब्रह्म राजन्य-वैश्य-शूद्राद्यनेकानि नामानि वेदेष्वायान्ति, परं तेषां वर्णपदेन व्यपदेशो वेदे क्वापि न दृश्यते" इत्युच्यते, तन्न, 'चत्वारो वै वर्णा ब्राह्मणो राजन्यो वैश्यः शूद्रः' (शतपथ॰ ५।५।४।९)

'चत्वारो वै पुरुषाः ब्राह्मणो राजन्यो वैश्यः शूद्रः'

(मैत्रायणी सं० ४।४।६)

ब्रह्म-क्षत्रिय-वैश्य-शूद्रा इति चत्वारो वर्णास्तेषां ब्राह्मणः प्रधान इति वज्रसूचिकोपनिषदि, इत्थं चातुर्वर्ण्यस्य स्पष्टं वर्णनात्। वेदेषु आर्य्यशब्देन ब्राह्मणादिवर्णत्रयं विवक्षितम्। दासशब्देन शूद्र उक्तः।

'तिस्रः प्रजा आर्य्या ज्योतिरग्रा' (ऋ० सं० ७।३३।७)

इति मन्त्रवर्णात्। अत एव 'प्रार्य्यं वर्णमावत'

(ऋ० सं० ३।३४।९)

इत्यादिना आर्य्यं उत्तमवर्णं त्रैवर्णिकम् इति दासं वर्णं इत्यत्र च दासं वर्णं शूद्रादिकं इत्यर्थमाहुः सायणाचार्य्याः।

'उभौ वर्णौ ऋषिरुग्रः पुपोष' इत्यत्र तु नार्य्यदासवर्णौ विवक्षितौ, प्रकरणविरुद्धत्वात्। किन्तु कामः तपश्चेत्युभौ वर्णौ विवक्षितौ। अत एवाहुः सायणाचार्य्याः 'उभौ वर्णौ वर्णनीयावाकारौ कामश्च तपश्च पुपोष' तेन वेदे ब्राह्मणक्षत्रियादिनामानि वर्णपराण्येव। वर्णो द्विजादौ शुक्लादौ' इत्यमर-कोशाच्च।

यदुक्तम् 'एकवर्णमिदं पूर्वं विश्वमासीद् युधिष्ठिर।
कर्मक्रियाविभेदेन चातुर्वर्ण्यं प्रतिष्ठितम्॥

इति महाभारतीयवचनेन एकवर्णस्यैव कर्मादिभेदेन चातुर्वर्ण्यव्यवस्था प्रवृत्तेति तदपि न, श्लोकार्थानवबोधात्। तथाहि—इदं विश्वं पूर्वं सृष्टेः प्राक् एकवर्णम् एकमेवाद्वितीयं ब्रह्माकारमेवासीत्। कर्मक्रियाविभेदेन पूर्वसृष्टि-कालिककर्मक्रियासंस्कारानुसारेण 'चातुर्वर्ण्यं भगवता पूर्वं सृष्टं स्वयंभुवा।'

(म० भा० अनु० १४३।२)

इति महाभारतानुरोधात्तथैवार्थो युक्तः । पूर्वश्लोके गुणशब्दाभावाद् गुण-कर्मानुरोधिनी वर्णव्यवस्थेति वाचोयुक्तिरसङ्गतैव । एवमेव "भविष्य-पुराणीयब्राह्मपर्वणि ४२ अध्यायानुसारेण यथैकस्मात् पितुरुत्पन्नाश्चत्वारः पुत्रा एक जातीया एव भवन्ति तथैव परमेश्वरादुद्भूता मनुष्या अप्येकजातीया एव । तत्र जातिभेदो नास्त्येव । यथोदुम्बरवृक्षस्य मूलमध्याग्रेपूत्पन्नानि फलान्येक-वर्णान्येव तथैव विराजो मुखबाहूरुपज्जाः सर्वेऽप्येकजातीया न तत्र जातिभेदः" तदप्यविचारितरमणीयमेव । एकपितुरुत्पन्नेष्वपि स्त्रीपुरुषनपुंसकेषु जाति-भेददर्शनात् । सर्ववर्णेषु सर्वत्रैव मनुष्यत्वजातेरेकस्या अपि दर्शनात् । परन्तु नैतावता तत्रावान्तरजात्यपलापः कर्तुं शक्यः ।

किञ्च देव-ऋषि - पितृमनुष्य - पशु-पक्षि-कीट - पतङ्ग-वृक्ष-पाषाणादी-नामपि एकः परमेश्वर एव पितेति किं तेष्वपि जाति-भेदो नास्ति ? एकस्मिन्नपि देहे मुखबाहूरुपादादीनां स्वरूपव्यवहारादिभेदोनापाकर्त्तुं शक्यते । परमेश्वरसृष्टौ भेद एव नास्तीति भाषणं प्रत्यक्षापलाप एव । भविष्य-पुराणीयवचनस्य तात्पर्यन्तु मृद्विकारेषु घटशरावोदञ्चनादिवत् मृन्मात्रत्वस्यैव परमेश्वरविकारेषु तदनन्यत्वविवक्षैव । 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति ब्रह्मसूत्रन्यायात् ।

केचित्तु 'चिप्स फाम दि जर्मन वर्क शाप' भाग २।१ ६७ मैक्समूलरस्यो-द्धरणेन कथयन्ति यत् 'एतदुक्ता वर्णव्यवस्था वेदेषु नास्त्येव । वेदेषु ब्राह्मणस्य श्रैष्ठ्यं शूद्रस्यापकर्षश्च नोल्लिखितौ । समेषां भोजनपानविवाहादिप्रतिषे-धोऽपि तत्र नास्ति । मैक्समूलरस्य वाक्यमृषिवाक्यवत् प्रमाणमुपगम्य ते कथयन्ति यत् वैदिककालस्य बहोः कालादनन्तरं स्मार्तकाले वर्णव्यवस्था प्रचालिता तदपि तुच्छम्, 'दासं वर्णमधरं गुहाकः' ( ऋ० सं० ) तिस्रः प्रजा आध्याः ज्योतिरग्रा' ( ऋ० सं० ) दैव्यो वर्णो ब्राह्मणः असुर्यः शूद्रः ( तैत्तरीय ब्रा० प्रपा० १ ) 'क्षत्र वा अन्वशो वैश्यश्च शूद्रश्चानुगासमो ब्राह्मणाग्रजं कदाचन ब्राह्मणश्च क्षत्रियश्च वैश्यश्च शूद्रश्च पश्चादन्वितः' ( शतपथे ६।४।४।११-१३ ) 'शूद्रार्य्यौ चर्मणो व्यायच्छेते तयोरार्य्यं वर्णमुज्जापयन्ति यदार्य्यं वर्णमुज्जाययन्ति आत्मानमेव तदुज्जाययन्ति ( ताण्ड्यब्रा० ५।६।१४-१६ ) 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' ( तै० सं०

७।१।१।६) इत्यादि वैदिकैः प्रमाणैर्ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां वर्णत्वं तत्रोत्कर्षापकर्षश्च स्पष्टं सिद्ध्यति। न शूद्रो दुह्यादसतो वा एष सम्भूतोऽसन् स्यात् (मैत्रायणी सं० ४ ।१।३।२२) इतिमन्त्रे यज्ञोपयोगि दुग्धदोहनस्य शूद्रकर्तृकता निषिद्धा। ततो भोजनपानविवाहादिव्यवहारस्तु सुतरां निषिद्धः सिद्ध्यति।

'मनुर्वै यत् किञ्चावदत्तद्भेषजं भेषजतायाः' ताण्ड्यब्राह्मणः (२३।१६) वेद एव मनोरुपदेशस्य भेषजरूपतां वक्ति। तदा मनूक्ताया जन्ममूलिकाया वर्णव्यवस्थायाः सुतरामादरणीयता सिद्ध्यति।

एवं वेदकालपुराणकालादिकल्पना तु पाश्चात्यानां तच्छिक्षितानां भारतीयानाञ्च कपोलकल्पनैव। यतो वेद एव शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्यौतिषपुराणेतिहाससूत्रादीनामुल्लेखो दृश्यते। तथाहि-तत्रापरा ऋग्वेदः यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति (मुण्डक १।५) ऋग्वेदं भगवोऽध्येमि इति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् (छा० ७।१।२) 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणविद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि' (बृहदारण्यक २।४।१०)

यद्यपि शंकरभगवत्पादीयभाष्यानुसारेण ब्राह्मणेष्वपीतिहासपुराणादीन्यन्तर्भवन्ति। तथापि देवताधिकरणीयतद्भाष्यानुसारेणैव तन्मूलकान्यार्षाण्यपि पुराणेतिहासादीनि प्रमाणान्येव। वेदवदेव तान्यप्यनादीन्येव। न्यायभाष्यकारवात्स्यायनमहर्षिदृष्ट्याऽपि वेदवर्णितरूपाण्येव ब्राह्मणादीनि पुराणानि रामायणभारतादीनि चेतिहासास्तथा भूतान्येव।

## द्विजमात्रस्य शस्त्रग्रहणानुमतिः।

यदुक्तं जन्मना वर्णव्यवस्थायां जन्मना क्षत्रियाणामेव युद्धधर्मस्तेषां पराजयेऽनायासेन देशपराजयो भवति' तदप्यसत् राष्ट्ररक्षार्थं समेषां वर्णानां युद्धं स्वधर्म इति मनुना स्पष्टमुक्तत्वात्। "

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुद्ध्यते।
द्विजातीनां च वर्णानां विप्लवे कालकारिते॥
आत्मनश्च परित्राणे दक्षिणानाञ्च सङ्गरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति॥"

( मनु ८।३४८।-३४९ )

साधारण्यां स्थितौ तु 'इष्टापूर्तं ब्राह्मणस्य, युद्धं वै राजन्यस्य' (तैत्तरीय-ब्रा. १।)

किञ्च देशस्य चतुर्थो भागः सदा युद्धोद्यतः स्यादिति न भारतापकर्षहेतुः। तथा भूताया व्यवस्थाया अद्याप्यन्यत्र दर्शनात्। अपिच प्राचीनकाले परशुराम द्रोणाचार्य कृपाचार्य अश्वत्थामादीनाम्, आधुनिकेऽपि काले पेशवाजातीयानां ब्राह्मणानां झाँसो राज्या लक्ष्मीदेव्याश्च पराक्रमाः प्रसिद्धा एव। वाल्मीकिप्रभृतयो महर्षयो युद्धे प्रत्यक्षमसंलग्ना अपि कुशलवादीनां युद्धविद्याशिक्षका आसन्नेव। असाधारण्येन विद्यावैशारद्यं ( स्पेशलिस्ट ) तु विषयविशेष एवोपपद्यत इत्यद्यापि महानुभावानां सत्तां प्रमाणयति।

वर्णक्रमेण दण्डव्यवस्था—

यदप्युक्तम् वर्णमूलकमेव शास्त्रीयवर्णविधानव्यवस्थायां वैषम्यम्। एकस्मिन्नेवापराधे ब्राह्मणस्याल्पतमो दण्ड, शूद्रस्य सर्वाधिको दण्डः, कस्मिंश्चिन्महत्यपराधे ब्राह्मणस्य प्राणदण्डनिषेधः।' ( संवर्त्त संहिता १५२-१५४ १६६।१६८ ) ( आपस्तम्ब प्रश्न पटले १७ खण्डे २७।२९ ) इति।

तत्र, धर्मशास्त्रीयदण्डव्यवस्थायाः शास्त्रैकगम्यमदृष्टं मनोविज्ञानञ्चाश्रित्य प्रवृत्तत्वात्। यथा अग्निहोत्रादियज्ञ-गायत्र्यादि जपजन्यं फलं शास्त्रैकगम्यं तथैव ब्रह्महत्या सुरापान-गुर्वङ्गनागमनादीनामपि फलं शास्त्रैकगम्यमेव। तत्तत्प्रायश्चित्तान्यपि शास्त्रगम्यान्येव। तथैव वर्णभेदमाश्रित्य विहितदण्डव्यवस्थाया अपि शास्त्रैकगम्यतैव।

मनोविज्ञानदृष्ट्यापि एकस्मिन्नेव कर्मणि प्रवृत्तेषु योग्यतानुरोधेन दण्डविधानानि उपयोगीनि भवन्ति। कश्चित्तत्रोपानत्ताडितोऽपि पुनस्तत्रैव सज्जते। अन्यः कश्चित्संभावितः स्वल्पभर्त्सनयैव ग्लान्या म्रियते।

'संभावितस्य चाकीर्तिर्मरणादतिरिच्यते' इत्युक्तेः।

अस्मच्छरीरेऽपि पृष्ठे लगुडप्रहारोऽपि नगण्यो भवति अक्षिपात्रे सूक्ष्मतन्तुकणोऽपि तीव्रवेदनावहो भवति। निरपेक्षा निष्कामा महर्षयः पक्षपातराहित्येनैव दण्डव्यवस्थामकार्षुः। अतः क्षत्रियादीनां कृते साम्राज्यादि-सुखम्, वैश्यानां कृते धनाधिपत्यम्, शूद्राणां कृते विविधशिल्पाधिपत्यम्, ब्राह्मणानाञ्च कृते सर्वत्यागपूर्वकं तपोमयजीवनयापनं संन्यासञ्च व्यदधुः। सुरापानादिषु क्षत्रियादीनां कृते सामान्यमेव प्रायश्चित्तम्। ब्राह्मणानां कृते तु प्राणत्यागमेव दण्डं विहितवन्तः। अभक्ष्यभक्षणेऽपि शूद्र-वैश्य-क्षत्रिय ब्राह्मणानामुत्तरोत्तरमधिकाधिकदण्डविधानम् कृतवन्तः।

'अभक्ष्यभक्षणे दण्ड्यः शूद्रो भवति कृष्णलम्।
ब्राह्मण-क्षत्रियविशां चतुस्त्रिद्विगुणं स्मृतम्॥'
(मत्स्ये पुरा० -२२६।१८६-१९)

एवमेव सवर्णागमने शूद्रापेक्षया वैश्यादीनां दण्डाधिक्यम्।

'शूद्रः सवर्णागमने शते दण्ड्यो महीक्षिता।
वैश्यस्तु द्विगुणं राजन् क्षत्रन्तु त्रिगुणं तथा।
ब्राह्मणश्च भवेद्दण्ड्यस्तथा राजंश्चतुर्गुणम्॥'
(मात्स्ये २२६।१७+१८)

वस्तुतस्तु धर्मशास्त्राणि वेदमूलकान्येवेति तत्र पक्षपातकल्पनं व्यर्थमेव। वेदे च ब्राह्मणावगूरणताडनरक्तस्रावादिकं निषिद्धम्।

'ब्राह्मणाय नावगुरेत् न निहन्यात् न लोहितं कुर्यात् एतावता हैनसा भवति। (तै० सं० २।६।१०)

'न ब्राह्मणो हिंसितव्यः' (अथर्व स० ५।१८।६)

'यो ब्राह्मणं देवबन्धुं हिनस्ति, न स पितृयाणमप्येति लोकम्।'
(अथर्व सं० ५।१८।१३

'इष्मा राजा मन्यमानो ब्राह्मणं यो जिघत्सति।
परा तत्सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते॥'
(अथर्व सं० ५।१९।६)

'तद्वै राष्ट्रमास्रवति नावभिन्नमिवोदकम्।
ब्रह्माणं यत्र हिंसन्ति तद्राष्ट्रं हन्ति दुच्छुना॥'
(अ० सं० ५।१९।८)

'तं वृक्षा अपसेधन्ति छायां नो मोपगा इति ।
यो ब्राह्मणस्य सद्धनमभिनारद मन्यते ।'

( अ० सं० ५।१९।६ )

परमपुरुषस्य समष्टिसमाजरूपस्य विराजो मुखस्थानीयस्य ब्राह्मणस्य ताडनं यथा निषिद्धं तथैव व्यष्टिशरीरस्यापि ब्राह्मणरूपे मस्तके ताडनं निषिद्धम् । अपराधिनस्ताडनप्रसङ्गे पृष्ठादिभागे ताडनीयमुत्तमांगे मुखादौ न ताडनीयमिति मनुनोक्तम्—

'भार्यापुत्रश्च दासश्च प्रेष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वावेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥'

( मनुः।८।९९।३०० )

अत्रापि पक्षपातारोपश्चेत्ताहशस्य हितावहस्य तस्येष्टत्वात् । राज्ञा ब्राह्मणस्यावध्यत्वेऽपि शास्त्रेण सुरापाने ब्राह्मणस्य मरणान्तं प्रायश्चित्तं विहितमेव । शूद्रस्तु तस्मात्प्रायश्चित्तान्मुक्त एव । गुरुतल्पगामित्वेऽपि मरणान्तमेव ब्राह्मणस्य प्रायश्चित्तम् ।

कैश्चित्तु 'वर्णव्यवस्थया भारते ताहङ्मानवा उत्पादिता ये अस्पृश्या भवन्ति, येषां दर्शनेनापि हिन्दूनामपावित्र्यं जायते । एतया भारते भ्रातरो भ्रातॄणां हन्तारः संवृत्ताः ।' ( कण्टम्परेरी इण्डियन फिलास्फी ३६८ ) तदपि वर्णव्यवस्थाविद्वेषमूलकत्वेनोपेक्षणीयम्, अस्पृश्यताया व्यभिचारमूलकत्वात् । व्यभिचारश्च सर्वत्र सभ्यसमाजे निन्द्य एव ।

सदाचारश्चापि सर्वत्रादरणीयः । अतो व्यभिचारनिवृत्तये सदाचाराभिवृद्धये शास्त्रीया व्यावहारिकाश्च नियमा अपेक्षणीया एव । तदभावे भ्रातृदुहितृभगिन्यादिष्वपि व्यभिचारप्रसक्त्या मानवता मूलभूताया विवाहव्यवस्थाया एव लोपेन पशुत्वापत्तेः । तेन रक्तसाङ्कर्यवर्णसाङ्कर्याद्यनर्थनिवर्हणायैव जातिभेदादिनियमा व्यवस्थापिताः । वेदेऽपि 'तद्य इह कपूयाचरणास्ते श्वयोनिं शूकरयोनिं चण्डालयोनिं वा प्रपद्यन्ते' इति निषिद्धाचरणहेतुकचण्डालयोनिप्राप्तिरुक्ता । तथापि नान्त्यजादिजातिमूलको द्वेषो

भारतीयशास्त्रे क्वचिदप्युपलभ्यते। तेषाम् जातिविभागेऽपि जीवननिर्वाह व्यवस्था सुरक्षिता। पञ्चमहायज्ञेषु प्रतिदिनं भोजनात् प्रागेव चाण्डालस्यापि बलि ( आहार ) दानं नियतम्। धर्मव्याधप्रभृतयोऽन्त्यजा अपि परमादरणीया आसन्नेव। महर्षयोऽपि धर्मव्याधस्य सम्मानं कुर्वते स्म। इदानीमपि ब्राह्मणादयो धर्मव्याधस्योपदेशमङ्गीकुर्वन्त्येव। धर्मव्याधेनापि जातिद्वेषमूलका उपदेशा न जातु कृताः।

'स तस्या आद्यैर्द्वादशभिरक्षरैर्ब्राह्मणमजनयत्।

दशभिर्दशभिर्विट्क्षत्रे।

तस्माद् ब्राह्मणो मुख्यो भवति।

तूष्णीं शूद्रमजनयत् तस्माच्छूद्रो निर्विद्योऽभवत्।'

( अव्यक्तोपनिषद् ५ )

पद्यहवा एतत् श्मशानं यच्छूद्रस्तस्माच्छूद्रसंनिधौ नाध्येतव्यम्।'

मत्तो हि शूद्रः सृष्टः' इति च ब्रह्मसूत्रशाङ्करभाष्ये ( १।३।३८ )

उद्धृतश्रुतिवचनबलादेव ब्राह्मणक्षत्रियवैश्यशूद्राणामुत्पत्तिभेदः कर्मभेदश्चाङ्गीकृतो नात्र रागद्वेषादिमूलको भेदः। निषिद्धकर्मानुष्ठानेन पापोत्पत्त्या नरकादिदुःखोपभोगो भवति। अतएव तेषां तेषां कल्याणार्थमेव निषिद्धकर्मप्रवृत्तिरोधायैव दण्डविधानमपि। तदपि प्रायश्चितरूपमेव। व्रतादिरूपप्रायश्चितमन्तरापि दण्डविधानेन निष्किल्विषत्वं सम्पद्यते। ब्राह्मणैः सुरापानादिनिमित्तकमरणान्तप्रायश्चित्तं स्वेनैव कर्तव्यम् राज्ञा ब्राह्मणवधस्य निषिद्धत्वात्। शूद्रस्य शम्बूकस्य स्वधर्मविरुद्धतपश्चरणात् ब्राह्मणपुत्रमरणं जातम्। महर्षिभ्यस्तादृङ्मर्यादोल्लङ्घनरूपकर्महेतुकं तदिति ज्ञात्वा भगवता रामेण शम्बूको दण्डितः। समुचितदण्डविधानाद् ब्राह्मणपुत्रस्य पुनर्जीवनं संवृत्तम्। यैस्तु शम्बूकस्य तपसा ब्राह्मणपुत्रस्य मरणं तद्वधेन तदुज्जीवनं न मन्यते तेषां मते श्रीरामकर्तृकशम्बूकवधोऽपि निराधार एव सिद्ध्यति। यदि तत्र रामायणं प्रमाणं तदा तत्रापि तदेव प्रमाणमस्त्येवेति कुतोऽर्धजरतीयाश्रयणम्।

अपि च कर्मणा वर्णव्यवस्थावादेऽप्युक्तकथा असमता स्यात्। कर्मणा तत्त्वे तु शम्बूकस्य ब्राह्मणत्वमेव स्यान्न शूद्रत्वमिति कुतस्तस्य वधः स्यादित्यपि विभावनीयम्।

वेदाध्ययननिषेधोऽपि शास्त्रमूलको न द्वेषमूलकः । श्रोत्रियब्राह्मणस्यापि मातृदुहितृभगिन्यादीनामपि तन्निषेधात् । न तत्र द्वेषः कल्पयितुं शक्यः, तासां प्रेमास्पदत्वात् । तास्वपि पुरुषाणां द्वेष एव जात इति कम्युनिस्टकल्पनं तु सर्वथा निराधारमेव । वेदार्थरहस्यस्य पुराणेतिहासादिद्वारास्त्रीशूद्रादीनामप्युपदेशव्यवस्था तु विद्यत एव । तैश्च तद्द्वारा समुन्नतयो मोक्षश्चाधिगन्तुं शक्यन्ते । शम्बूकेन च स्वस्य शूद्रत्वं तपसा सदेहस्य स्वर्गप्राप्त्युद्देश्येन तपश्चरणं स्वीकृतम् ।

'शूद्रयोन्यां प्रजातोऽस्मि तप उग्रं समस्थितः :
देवत्वं प्रार्थये राम सशरीरो महायशाः ।।२।।
न मिथ्याऽहं वदे राम देवलोकजिगीषया ।
शूद्रं मां विद्धि काकुत्स्थ शम्बूको नाम नामतः ।।३।।
(वा॰ रा॰ उ॰ का ७६ )

अत्रिस्मृतौ च - वध्यो राज्ञा स वै शूद्रो जपहोमपरश्च यः ।
यतो राष्ट्रस्य हन्तासौ यथा वह्नेश्च वै जलम् ।।'

स्वधर्मानुष्ठानमेव भगवदाराधनम् । तदुपेक्ष्य निषिद्धाचरणेनैव तस्य दण्डो दत्तः ।

यदप्युक्तम् वर्णव्यवस्थाऽत्याचारेणैवोद्विग्नाः कोटिकोटिसंख्याका हिन्दवो यवना क्रैस्तवाश्च सञ्जाताः । परं 'कृण्वन्तो विश्वमार्यमित्युपदेशशीलो हिन्दूधर्मो नैकमपि यवनं वा क्रैस्तवं वा हिन्दूधर्मे दीक्षितवान्' तदपि न, मिथ्याप्रलोभनादिभिरेव धर्मान्तरस्वीकारस्यैतिहासिकत्वात् । तेनैव नान्त्यजादीनां किन्तु ब्राह्मणक्षत्रियादीनामपि धर्मान्तरस्वीकरणं दृश्यते । उच्चपदप्रेप्सया धनकाम्यया स्त्रीरागैश्च ब्राह्मणा अनेके विद्वांसो महामहोपाध्यायाश्च क्रैस्तवधर्मे दीक्षिताः । न तेषां वर्णव्यवस्थाकृतं कष्टमासीद्येन तत्कल्पयितुं शक्यम् ।

'कृण्वन्तो विश्वमार्यम्' इति मन्त्रांशस्य सर्वस्यार्यत्वसम्पादनं नार्थः । सर्वेषु पशुपक्षिवृक्षादीनामपि सत्त्वात् । न च विश्वशब्दस्य सर्वमनुष्यपरत्वमपि संभवति । वेदे आर्यदासभेदेन मनुष्यद्वैविध्यस्याङ्गीकृतत्वात् । नहि निसर्गतोऽनार्यस्यार्यत्वसंपादनम्, तस्य कृत्रिमत्वेनाताात्त्विकत्वात् ।

वस्तुतस्तु प्रकरणविरुद्धोऽयमर्थः। यतो यस्य सूक्तस्यायमंशः तस्य सूक्तस्य पवमानसोमो देवता निध्रुविकाश्यपऋषिः। येन मन्त्रेण यस्याः स्तुतिः या वा सम्बोध्यते सैव तद्देवता ऋषिश्च स्तोता भवतीत्यर्थस्य (७।१।१) निरुक्ते प्रतिपादनात् तेन स्तोत्रा पवमानसोमोऽत्र स्तूयते। तेन विश्वं समस्तं सोममस्मत् कर्मार्थं आर्य्यं भद्रं कृण्वन्तः अराव्णो अदानशीलानपघ्नत अभ्यर्षन्ति अभिगच्छन्ति।

अनार्याणां नार्य्यत्वं संभवतीति वेद एवोक्तम्—

'अहमत्कं कवये शिश्नथं हथैरहं कुत्सभावमाभिरूतिभिः।
अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे॥'
(ऋ. सं १०।४९।३

अहम् इन्द्रः। अत्कम् आच्छादक शत्रुपुत्रम्। कवये उशानसे ऋषये, तस्य सुखवासाय हथैः बहुप्रकारैः प्रहारैः। शिश्नथम् ताडितवानस्मि। अहम्। कुत्सम् एतन्नामकमृषिम् अभिरूतिभिः बधादिरूपैः। आवम् अरक्षम्। शुष्णास्य एतन्नामकस्यासुरस्य श्नथिता हिंसिता। वधः वज्रम्। यमम् प्रहरणाय नियमितवानस्मि। अहम्। आर्यम् आर्याणां देयम्। नाम। दस्यवे। न। ररे दत्तवानस्मि। इत्यर्थकेन मन्त्रेण सिद्ध्यति यदिन्द्रो दस्यवे आर्यनामापि न ददातीति।

यत्तु वर्णव्यवस्थायां सवर्णासवर्णयोर्भेदेन तयोरुत्कर्षापकर्षाभ्यां राष्ट्रस्य पूर्णस्वातन्त्र्यमेव व्याहतम्भविष्यति। तत इदानीं तु वर्णभेदमपोह्य क्रैस्तवमौहम्मदैःसाकमप्यभेदः संपादनमावश्यकमिति तदेतद्व्याहतम्। यतो वर्णव्यवस्थापनोदनेन हिन्दूनां यवनादिषु संनिवेशे हिन्दूधर्मलोप एव स्यात्। ततः कुतो विश्वस्यार्यत्वसम्पत्तिस्वप्नपूर्तिः?

यदप्युक्तम् 'वर्णव्यवस्थायां सत्यां हिन्दुत्वलोपोऽवश्यंभावी, हिन्दुत्ववर्णव्यवस्थयोः सहावस्थानासंभवात्। हिन्दुत्वरक्षणमिष्टं चेत् वर्णव्यवस्थासमापनीयैवेति, तन्न, कोटिकोटिवर्षेभ्यः उभयोः सहभावित्वदर्शनेन तद्विरोधकल्पनस्य मौर्ख्यमूलकत्वात्। यत्र वर्णव्यवस्थाया विलोपस्तत्र हिन्दुत्वाभावात्। वर्णव्यवस्थालोपे हिन्दुत्वलोपप्रसङ्गस्यैव प्रामाणिकत्वात्।

केश्चित्तु-'वर्णव्यवस्थापनं दण्डविधानायत्तं न स्वाभाविकम् । नहि केचित्सद्गुणास्तत्र तिष्ठन्ति । येषां बलेन तत्स्वत्वमनिवार्यं स्यात । मनुष्यप्रकृतिर्विपरीतत्वात् । सा न स्वपद्भ्यां स्थातुं शक्नोतीति, तदपि निःसारम् । तथात्वे तन्निवारण-प्रयत्नस्य वैयर्थ्यात् । दृश्यन्ते चानेके तदर्थं प्रयतमानाः । तद्नाशं विलोक्य चिन्ताविष्टाश्चानेके रजनीकान्त-सन्तराम प्रभृतयः ।

वस्तुतस्तु काचिदपि तादृशी व्यवस्था नासीन्नास्ति, न भविष्यति या नियममन्तरा तदुल्लङ्घनावरोधकदण्डविधानमन्तरा च स्वसद्गुणेनैव प्रचलेत् । संसारे सर्वा अपि शासनव्यवस्था निग्रहानुग्रहसापेक्षा एव प्रचलन्ति । तदर्थमेव सर्वत्र कार्यपालिका न्यायपालिका आरक्षिदलानि सेना-कारावासादिव्यवस्था दृश्यन्ते । तथाभूता व्यवस्था तु चार्वाकस्यैव शोभते या स्वयमेव प्रचारमन्तरा सर्वत्र संसारे प्रवर्धते ।

वस्तुतो यथा जलस्याधोगामिनी प्रवृत्तिः स्वभाविकी प्रयत्नानपेक्षा च, तदुन्नयनायैव प्रयत्नापेक्षा भवति, तथैवाधोगामिनी प्रवृत्तिर्मानवानामपि स्वभाविकी । ऊर्ध्वाभिमुखी कल्याणमयी प्रवृत्तिस्त्ववश्यं नियन्त्रणमपेक्षते । तदर्थमेव सर्वत्र सच्छिक्षासदाचारप्रसारव्यवस्था भवति । नानाविधेषु प्रतिबन्धेषु सत्स्वपि जनानामधोगामिनी प्रवृत्तिर्जायते । वर्णव्यवस्था प्रकृति-सिद्धाऽनादिप्रवृत्ता विपरीतेऽपि काले फलदा सती प्रचलत्येव । तदनुगुणायां शासनव्यवस्थायां सम्यक् प्रवर्ततेऽन्यदा क्षीणशक्तिः कथञ्चिदेव जीवति । विविधदोषसंसृष्टा विनाशाभिमुखीव तिष्ठति ।

कैश्चित्तु "जीविकासाधककर्मवरणमेव वर्णशब्दार्थः । स च न वंश-विशेषजन्ममूलकजातिनिबन्धनः । तेन कर्मणैव वर्णव्यवस्था युक्ता, न जन्मना, तस्या अव्यावहारिकत्वात् सङ्घर्षहेतुत्वादध्यात्मशास्त्रविरुद्धत्वाद-हितकरत्वाच्च । जन्मना वर्णव्यवस्थायामैक्यबुद्ध्यभावात् संघशक्तिह्रास-परस्परस्नेहाद्यभावादीर्ष्यामात्सर्यद्वेषादिविततिः । कर्मणा तत्त्वे तु तद्वैप-रीत्येन संघटन-संवदन-संगमनादि विस्तृतिः । यदि कर्मणा सा न भवेत्तदा 'पृथिव्यां सर्वमानवा' इति मनूक्तदिशा मानवधर्मस्य सर्वोपकारकत्वं कथं भवेत्" इति, तदप्यविचारितरमणीयम्, विपरीतस्यैव सुवचत्वात् । जीविका-

वरणे यथेष्टाचाराभ्युपगमे सर्वत्रसङ्करावश्यम्भावित्वेन संघशक्तेरुच्छेद एव स्यात्। तस्माज्जन्ममूलकजात्यैव जीविकावरणनियमनमप्यावश्यकमेव। कर्मणा व्यवस्थाऽपि शास्त्रे जन्मनिबन्धनैवोक्ता। अतएव ब्राह्मणादिवर्णभेदेन कर्मभेदः। क्षत्रियस्यैव राजसूयाधिकारो नान्येषाम्। ब्रह्मक्षत्रियविशां वैदिकेषु कर्मस्वधिकारो न शूद्राणाम्। वैदिकेषु कर्मविशेषेषु च रथकारनिषादस्थपतीनामेवाधिकारो नान्येषाम्। तावताऽपि न कर्मणां महिमापचीयते। न केवलं वर्णानामपि तु संसारसृष्टिस्थितिप्रलयानामपि कर्ममूलकत्वाङ्गीकारात्। यदि प्राक्कालिकैः कर्मभिरेव ब्राह्मणादियोनिषु जन्म प्राप्त्या ब्राह्मणादिवर्णप्राप्तिस्तदापि कर्म्म वर्णव्यवस्था वर्णयितुमशक्या।

परन्तु नैषा पद्धतिः कर्मवर्णवादिसंमता। तद्रीत्या तु जन्मानन्तरम् जीविकावरणाद्वर्णलाभः। जन्ममूलकमिति प्रश्नस्तु तेषामसमाधेय एव। अतएव कर्मणा जन्म, जन्मना वर्णः, वर्णानुरोधीनि च कर्माणीत्येव शास्त्रसंमत पन्थाः। तदुक्तम्—

'कर्मप्रकारेण तथा जात्या जात्यां प्रजायते।
तिष्ठेत् कर्मफलं यावत् व्रजेत्कर्मक्षये पुनः॥"
(म० भा० शा० प०)

'सति मूले तद्विपाको जात्यायुर्भोगाः" अत्र जन्मायुर्भोगानां प्राक्तनानि कर्माण्येव मूलम्। तेन प्राक्तनकर्मानुसारि जन्ममूलिकैव वर्णव्यवस्था। स्ववर्णानुसारेण जीविकार्थं लौकिककर्मकरणमैहिकामुष्मिकफलाय च शास्त्रैकगम्यश्रौतस्मार्तधर्माचरणमनिवार्य्यमेव। आपत्काले तत्त्यागे परधर्मानुष्ठाने च पातित्यम्। तत एव

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।" (गीता १८।२५)
'सहजं (जन्मना सहजातं) कर्म कौन्तेय सदोषमपि न त्यजेत्'॥ (१८।४८)
'श्रेयान् स्वधर्म विगुणः पर धर्मात्स्वनुष्ठितात्॥' (३।३५)
'स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।"
(स्वस्य भावो जन्मलाभः, तेन सहजातेन, (शास्त्राचारादिभिर्निबद्धः।

'कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत्।'
'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥' गी० ३।३५

वरं स्वधर्मो विगुणः न पारक्यः स्वनुष्ठितः।
परधर्मेण जीवन् हि सद्यः पतति जातितः॥
(मनु. १०।९०)।

इत्यादीनि वचनानि सङ्गच्छन्ते। तेन जन्मानन्तरं क्रियमाणैर्जीविकासाधकैः कर्मभिर्न वर्णनियमनम्, किंतु जन्म-वर्ण निबन्धनानि प्राक्तनानि कर्माण्येव। तात्कालिककर्मानुरोधेन वर्णव्यवस्थाङ्गीकारे तु स्वधर्म परधर्मभेद एव विपरिलुप्येत। जन्मना वर्णव्यवस्थायां तु यस्य यस्मिन् वर्णे जन्म जाततद्वर्णानुसारी धर्मस्तस्य स्वधर्मो भवति, तद्भिन्नस्तु तस्य परधर्मो भवति।

## विविधभेदभिन्ना सृष्टिः

पूर्वं जडचैतन्यभेदेन, सृष्टिद्वैविध्यम्। जडसृष्टावपि महत्तत्त्व-महंतत्त्वं, पञ्चतन्मात्रा इन्द्रियाणि मनश्च। पृथिव्यामपि सुवर्णरजतलौहताम्रादिभेदेन नैकविधा धातवः।

चैतन्यसृष्टौ उद्भिज्ज-स्वेदजाण्डजजरायुजभेदेन चातुर्विध्यम्। वृक्षेषु निम्बाम्रपनसादिभेदा अन्नेषु यवगोधूमादिभेदाश्च दृश्यन्ते। पक्षिष्वपि शुकपिकमयूरादिभेदः, पशुषु गोमहिषहस्त्यादिभेदा देवेष्वपि विद्याधराप्सरोगन्धर्वकिन्नरपिशाचगुह्यकभेदास्तथैव मनुष्येष्वपि ब्राह्मणक्षत्रियवैश्यशूद्रभेदाः सन्त्येव, 'ब्राह्मणोऽस्य मुखमासीत् बाहूराजन्य' इत्यादि मन्त्रवर्णात्। अत्र परमेशस्य मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिरुक्ता।

ननु ब्राह्मणादीनां मुखादिरूपतैव प्रोक्ता न मुखादिभ्य उत्पत्तिरुक्तमन्त्रेण सिद्ध्यतीति चेन्न,-पद्भ्या शूद्रो अजायत' इत्यनुरोधेन—

'लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रञ्च निरवर्त्तयत्॥' (म. १।३१)

इति मनुना मुखादिभ्य उत्पत्तिवर्णनात्।

यज्ञसिद्ध्यर्थमनघान् ब्राह्मणान् मुखतोऽसृजत्।
असृजत्क्षत्रियान् बाह्वो वैश्यानप्यूरुदेशतः॥
शूद्रांश्च पादयोः सृष्ट्वा तेषाञ्चैवानुपूर्वशः।
यथा प्रोवाच भगवान् ब्रह्मयोनिः पितामहः॥ इति हरीतश्च-अ. १

यदुक्तम्–मुखादिभ्यो ब्राह्मणादिमुत्पत्तावभ्युपगम्यमानयां ब्राह्मणानां मुखा-

कारापत्त्या वर्त्तुलत्वापत्तिः, क्षत्रियाणां भुजाकारापत्त्या प्रलम्बमानत्वादिकं स्यात्, कार्य्यस्य कारणसारूप्यदर्शनादिति चेन्न। तथात्वे समेषां योनेरुत्पत्त्या योन्याकारत्वापत्तेः। नहि बटवीजसमानाकृतिरेव वटवृक्षो भवति। तथा गोधूमयवाद्याकारास्तद्वृक्षा दृश्यन्ते।

पुराणेषु 'ब्रह्माननं' ( श्री० भा० २ स्क १।३७ ) इति बचनेन-विराट्पुरुषस्याननं ब्रह्मा प्रोक्तः। तस्मादेव ब्राह्मणानामुत्पत्तिरुक्ता। एवमेव मनुनाप्यङ्गीकृतम्। तथाहि—

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च॥ ( मनुः १।३५ )

एवमेव 'इन्द्रादयो बाहव आहुरुस्राः।' श्री० भा० २।१।२६ )

इति भागवते परमेश्वरस्य बाहव उक्ताः इन्द्रादयः तेभ्य एवेन्द्रचन्द्रसूर्य्यादिभ्यः सूर्य्यचन्द्रवंशीयानां क्षत्रियाणामुत्पत्तिः प्रसिद्धैव।

यदुक्तम् अस्य मुखं किमासीत् किं बाहू इत्यादि रूपेण प्रश्नाः सन्ति तदनुरूपेणोत्तरेण भाव्यम्। तथा ब्राह्मणोऽस्य मुखं बाहूराजन्य इत्येवोत्तरं युक्तम्। उत्पत्तिवर्णनन्तु प्रश्नादनुरूपमेव' इति. तन्न, भावानवबोधात्। तथाहि पुरुषमेधयज्ञप्रसङ्गेनेदं पुरुषसूक्तमायातम्। तत्र-

'तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये॥ ( शु. यजु. ३१।९ )

इति मन्त्रे इतिहासवर्णनम् पुरुषयज्ञवर्णनम् सृष्टिवर्णनञ्च। तथा च ब्राह्मणोऽस्य मुखमिति प्रथमान्तवर्णनेन ब्राह्मणादीनां मुखरूपता। पद्भ्यामित्यनुरोधेन मुखादीनां पञ्चम्यन्तरूपमपि स्वीकार्य्यम्। तेन मुखादिजत्वाद् ब्राह्मणादीनां मुखादिरूपता ज्ञायते। तेनेश्वरमुखपूजादिप्रसङ्गे ब्राह्मणादिपूजा सिद्ध्यति। 'चन्द्रमा मनसो जात' इत्यादि रूपेण सृष्टिवर्णनं स्पष्टमेव।

यदुक्तम्—पश्वादिभेदवन्मनुष्येषु भेदोनोपलभ्यते तत्सत्यम्। पश्वादिवद्बाह्यभेदाभावेऽपि तदभ्यन्तरभेदसत्वेन जातिभेदे बाधाभावात्। हीरकादिरत्नभेदस्य साधारणजनागम्यत्वेपि रात्निकगम्यत्वत् ब्राह्मणादिभेदस्यापि विशिष्टमहर्ष्यादिगम्यत्वम्, वेदादिशास्त्रोपदेशगम्यत्वञ्च। जातिभेदसत्त्वादेवैकं हीरकरत्नं बृहदाकारमपि स्वल्पमूल्यलभ्यम्।

अपरं लघ्वपि बहुमूल्यं भवति । यथा वा लोहधातौ सामान्यतयैकरूपेऽपि काष्र्णायस-कान्तिसारादिभेदेन महान् भेदः । तथापि सर्वे भेदाः नहि सर्वगम्या भवन्ति । यथा तत्तद्विशेषज्ञा एव तत्तद्भेदान् जानन्ति तथैव तपःश्रुतयोनिविशिष्टा एव ब्राह्मणादिभेदान् जानन्ति । अतएव परशुरामः कर्णस्य धैर्य्यमालोक्य क्षत्रियत्वं ज्ञातवान् । गौतमश्च सत्यवादित्वेन जाबालस्य ब्राह्मणत्वं बुबुधे । तदुक्तम् —

पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा ।

न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति ॥ ( मनुः ३।१० )

गुणाधिक्येनोत्कर्षः तन्न्यूनत्वेन चापकर्षो भवति । घृतदुग्धाक्तत्वेन चणकबीजान्मधुरचणकोत्पत्तौ सत्यामपि नहि गोधूमत्वं भवति न वा गुणरहितस्यापकृष्टस्यापि गोधूमस्य चणकत्वं जायते । नह्याम्रस्य लघुत्वेन जम्बीरत्वं सम्पद्यते, न वा निम्बस्य दीर्घकाण्डवत्त्वेऽपि तालवृक्षत्वं भवति, तथैव साद्गुण्यवतोऽपि शूद्रस्य ब्राह्मणत्वं न संभवति, न वा दुर्गुणस्यापि ब्राह्मणस्य शूद्रत्वं संपद्यते । हंसस्य लघुत्वेऽपि न बकत्वं न वा बकस्य शुकत्वं काकस्य कोकिलत्वं कोकिलस्य वा काकत्वम् । बहुक्षीराया अपि महिष्या न गोत्वमल्पक्षीराया अपि गोरजात्वं न संभवति । जातेः कर्ममूलकत्वेन कर्मक्षयमन्तरा न जातिपरिवर्त्तनं संभवति ।

तदुक्तम् 'सति मूले तद्विपाको जात्यायुर्भोगाः' ( यो. सू. पा. २।१३ )

यः प्रारब्धकर्म परिवर्त्तने समर्थः स एव शूद्रत्वं ब्राह्मणत्वं वा निराकृत्य शूद्रत्वं ब्राह्मणत्वं वा संपादयितुं शक्नोति । सतु गर्दभमपि मनुष्यं निर्मातुं शक्नोत्येव । ईश्वरोऽपि नियमानुसारेणैव कार्य्यं करोति, न यथेच्छम् । अत एव नान्यकृतैः कर्मभिरन्यः संसृज्यते । कर्मफलयोः समानाकरण्यनियमात् । यथा-केनचिन्न्यायशास्त्रिपरीक्षोत्तीर्णो, केनचिच्च बी. ए. परीक्षोत्तीर्णो तयोः परस्परं संमत्याऽपि प्रमाणपत्रपरिवर्त्तनं न संभवति, तथैवयाभ्यां स्वस्वकर्मभिः ब्राह्मण्यं शूद्रत्वं वा प्राप्तम् तयोरिच्छायामपि जातिपरिवर्त्तनं न संभवत्येव । कश्चित् एम. ए. परीक्षोत्तीर्णः स्वच्छवासा धूमशकटस्थतृतीयश्रेणीभाटकप्रमाणपत्रं गृहीत्वा प्रथमश्रेण्या आसन्द्यामास्थितः विवेचकेन (चेकर) तृतीयश्रेणीभाटकपत्रं दृष्ट्वा ततो निष्कासितः । तत्रत्यान्यापेक्षया

वावदूकोऽपि विद्वानपि प्रमाणपत्राभावान्निष्कासितः । तत्सत्त्वादन्येषां तदवस्थानम्। तथैव कर्मवशाद्येषां ब्राह्मणादियोनौ जन्म तेषामेव तत्कोटौ प्रवेशो, नान्येषाम् साद्गुण्यवतामपि तत्कोटिप्रवेशः।

ननु यवनादिधर्माङ्गीकारे जातिपरिवर्त्तनं दृश्यत एवेति चेन्न जातिशब्दस्य जन्मार्थकत्वेन पूर्वदेहत्यागदेहान्तरग्रहणेनैव जन्मप्राप्तिसंभवेन तदन्तरा तदसंभवात् । यवनधर्माङ्गीकारेण व्यवहारदृष्ट्या तस्याब्राह्मणत्वेऽपि यावद्देहपातं तस्यापि ब्राह्मणत्वानपायात् । हरिणव्याघ्रादिमरणेऽपि मृतशरीरमपि हरिणादिकमेव प्रत्येति जनः। मृतोपि व्याघ्रोऽव्याघ्रो गर्दभो वा भवति । तथा च यावद् ब्राह्मणदेहारम्भकपरमाणुविघटनपूर्वकजात्यन्तरारम्भकपरमाणुसंघटनेन जात्यन्तरं नारप्स्यते तावदधमब्राह्मण्यमेव स्थास्यति, तेनैव तदन्नादिकमग्राह्यं भवति। मधुरमोदकादिर्मूत्रादिनालिकास्पर्शेन यथाऽग्राह्यो भवति तथैव प्रकृतेऽपि ज्ञेयम् । मूत्रविन्दुस्पर्शेन पानीयकलशस्याशुद्धिःसर्वैरप्यभ्युपेयत एव।

यदुक्तम् 'यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासी' दित्यादिमन्त्रस्यायमर्थः -- सर्वशक्तिमान् पुरुषः परमेश्वरः यस्य सामर्थ्यं कतिधा अनेकधा विविधमकल्पयन् । अस्य मुखं किमासीत् । अस्यमुख्यगुणैः संसारे किमुत्पन्नम् किं बाहू बलवीर्यशौर्यादिभिः किमुत्पन्नम्, किमूरू व्यापारादिभिर्मध्यमगुणैः किमुत्पन्नम् किं, पादौ मौर्ख्यादिभिरपकृष्टगुणैः किमुत्पन्नमेतत्प्रश्नचतुष्टयस्योत्तरम् ब्राह्मणोऽस्य मुखमासीदित्यादिना अस्य पुरुषस्याज्ञानुसारं विद्यासत्यभाषणादिभिः श्रेष्ठगुणैः, कर्मभिश्च ब्राह्मणो ब्राह्मणवर्ण उत्पन्नः। मुख्यैर्गुणकर्मभिः सहितो मनुष्यो ब्राह्मण उच्यते । तस्येश्वरस्य बलपराक्रमादिभिर्गुणैर्युक्तो मनुष्यः राजन्यः क्षत्रियो भवति । कृषिव्यापारविविधभाषाज्ञानपशुपालनादिभिर्वैश्यो भवति। मौर्ख्यादिभिः गुणैः शूद्रो वर्णो जायते' इति तदेतदापातरमणीयम्, व्याकरणकाव्यकोषादिविरुद्धत्वात्। यथा लवणार्थकस्य क्षारस्य क्षारमित्यर्थः, ऊँट इत्यस्य उष्ट्र इत्यर्थः तथैव मुखमित्यस्य मुख्यमित्यर्थः प्रमाणविरुद्ध एव। बाहू इत्यस्य बलपराक्रमादिरपि नार्थः, यथा स्थाली शब्दस्य कोविदारो नार्थः, मषकस्य गजो नार्थस्तद्वत् । ऊरू इत्यस्य कृषिव्यापारादिरपि नार्थः, पद्भ्याम्

इत्यस्यापि ईश्वरस्याऽपकृष्टा गुणा इति नार्थः, निष्प्रमाणत्वात् । यथा करपादिकाया न्यायाधीशो नार्थः यथा स्थालीशब्दस्य माघमासीयवृष्टयन्तरीयमौण्ड्यं नार्थस्तद्वत् ईश्वरे मौर्ख्यादयो निकृष्टा अपि गुणा भवन्ति सर्वधर्मविरुद्धम् । मौर्ख्यादिगुणावत्त्वे परमेश्वरस्यापि मौर्ख्यमापत्स्यते । ईश्वरे निकृष्टा गुणाः सन्तीति न कैश्चिदपीश्वरवादिभिरभ्युपेयते । मन्त्रार्थस्तु मनुः (१।३१) (हरीत १।१२-१३) सायणमहीधरादिभिश्च लिखित एव युक्तः ।

यदुक्तम्---

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः ।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः । ( मनुः २।२८ )

इति स्वाध्यायव्रतादिभिर्ब्रह्मसम्बन्धो देहो भवति' इति, तदपि तुच्छम्, भावानवबोधात् । स्वाध्यायादिभिर्ब्रह्मप्राप्तियोग्या तनुर्भवतीत्येवार्थः । ब्राह्मी इत्यस्य ब्राह्मणदेह इति नार्थः प्रमाणविरुद्धत्वात् । गुणस्वभावावपहाय केवलैः कर्मभिः ब्राह्मण्यप्राप्तिरिति गुणकर्मस्वभाववादिसिद्धान्तविरोधश्च । यदुक्तम्–

शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ।

क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च ॥ ( मनु १०।६५ )

इति रीत्या गुणकर्मानुसारेण जातिपरिवर्त्तनं मनुसंमतं' तदतीव मन्दम्, तत्र गुणकर्मप्रसङ्गाभावात् ।

शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते ।

अश्रेयाञ्श्रेयसीं 'जातिं' गच्छत्यासप्तमाद्युगात् ।।' इति ।

तदव्यवहित (श्लोके ६४) ब्राह्मणात् शूद्रकन्यायां जाता पारसव जातीया कन्या भवति । सापि चेद् ब्राह्मणेनोढास्यात्ततोऽपि ब्राह्मणादेव कन्यैव जायेत, सापि ब्राह्मणात् कन्यामेव जननेदेवं सप्तमी कन्या मातृदोषमपहाय शुद्धा ब्राह्मण कन्या भवति । शूद्रो ब्राह्मणतामेति इत्यस्यायमेवार्थः । यदि च शूद्राया ब्राह्मणात् पुत्रः स्यात् । स चापि शूद्रया संसृष्टः पुत्रं जनयेत् । सोऽप्येवं शूद्रायां पुत्रं जनयेत्तदा सप्तमः शुद्धः शूद्रो भवति अयमेव ब्राह्मणश्चैति शूद्रतामित्यस्यार्थः । एवमेव क्षत्रियवैश्ययोरपि ज्ञातव्यम् ।

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।

व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥'याज्ञ आ.अ.९६

इतिरीत्या ब्राह्मणस्य सप्तमे क्षत्रियस्य षष्ठे वैश्यस्य पञ्चमे पर्य्याये वर्णपरिवर्त्तनं भवति। मूर्धावसिक्तादीनां पूर्वोक्त रीत्यापञ्चमे षष्ठे पञ्चमे पर्य्याये शुद्धपितृजातिप्राप्तिर्भवति। यदि तदुत्पन्नकन्यानां ब्राह्मणादिभिरुत्कृष्टवर्णैः सम्बन्धो भवेत् वैपरीत्येनोत्कृष्टजातिनाशो निकृष्टजातिप्राप्तिश्च भवति। रजोवीर्य्यपरिवर्त्तनेन प्राकृतिकजातिपरिवर्त्तनमन्यत्रापि प्रमीयते। यथा छाग्यां मृगस्य वीर्येण जातायां मृगेणैव गर्भाधानं स्यादेवं पुनः मृगणैव संबन्धे सप्तमे पर्य्याये शुद्धःमृगो भवति। एवमेव मृग्यां छागेन गर्भाधाने कृते कन्योत्पद्येत पुनश्च छागेन संबद्धा स्यात्तत्रापि सप्तमे शुद्धा छागजातिरुत्पद्यते।

यथाकाष्ठमयो हस्ती यथा काष्ठमयो मृगः।
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति॥(मनु०अ० १४७)

इति वचनेनापि नाध्ययनादिगुणयुक्तब्राह्मण्यं तद्रहितस्याब्राह्मण्यं सिद्ध्यति। तदर्थस्तु यथा काष्ठमयो हस्ती काष्ठमयो मृगो नाम मात्रेण हस्त्यादयो भवन्ति न कार्यक्षमाः, तथाऽध्यायनादिशून्यो ब्राह्मणो नाममात्रेण ब्राह्मणो भवति न ब्राह्मणोचितकार्य्यकरणक्षमः। मनूक्तरीत्या तु जन्मनैव ब्राह्मणस्य श्रैष्ठ्यमुक्तम्।

'भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥ (मनुः १।९६।)

अत्र जन्मनैव ब्राह्मणस्य श्रैष्ठ्यमुक्तम्।

ब्राह्मणेषु च विद्वांसः विद्वत्सु कृतबुद्धयः।
कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः॥ (१।९७ मनुः)

ब्राह्मणेषु विद्वांसः श्रेष्ठाः इत्यनेन विद्वांसोऽपि ब्राह्मणा भवन्तीति सिद्ध्यति।

'ब्राह्मणो जायमानो हि पृथिव्यामधिजायते।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये॥ (म० १।९९)

जायमान एव ब्राह्मणः पृथिव्यां श्रेष्ठ उक्तः।

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतंमहत्॥
प्रणीतश्चाप्रणोतश्च यथाग्निर्दैवतंमहत्॥ (म० ९।३१७)

अत्र गुणकर्मरहितोऽपि ब्राह्मणो जन्मना भवतीति स्पष्टमुक्तम्।

यत्तु-'जन्मना जायते शूद्रः संस्कारैः द्विज उच्यते ।
वेदपाठी भवेद्विप्रः ब्रह्म जानाति ब्राह्मणः ।'

इत्यनेन गुणकर्मादिमूलकं ब्राह्मण्यमुच्यते तदपि न क्वापि स्मृतिष्वस्य श्लोकस्यानुपलम्भात् ।

'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च ।। ( अत्रि-१३८ )

अत्र तद्वैपरीत्येन जन्मनैव ब्राह्मण्यमुक्तम् ।

'धर्मचर्य्यया जघन्यो वर्णः पूर्वपूर्ववर्णमापद्यते जातिपरिवृत्तौ ।' 'अधर्मचर्य्यया पूर्वो वर्णो जघन्यं वर्णमापद्यते जातिपरिवृत्तौ' इति आपस्तम्बसूत्राभ्यामपि धर्मचर्य्ययोत्कृष्टवर्णप्राप्तिरधर्मचर्य्यया निकृष्टजातिप्राप्तिश्च जातिपरिवृत्तौ जन्मपरिवर्त्तन एवोक्ता । अत्र जातिशब्देन जन्मैव प्रोक्तं न तु जातिः'स्तस्यानित्यत्वात्तदाश्रयव्यक्तिसत्त्वे परिवर्त्तनानर्हत्वात् ।

यच्चाप्युक्तम् 'ब्राह्मणस्त्रयाणां वर्णानामुपनयनं कर्त्तुमर्हति, राजन्यो द्वयस्य, वैश्यो वैश्यस्यैवेति शूद्रमपि कुलगुणसम्पन्नं मन्त्रवर्जमित्येके' इति सुश्रुतसूत्रस्थानीयवचनेन ब्राह्मणस्त्रयाणां क्षत्रियो द्वयोर्वैश्योवैश्यस्योपनयनं कृत्वाऽध्यापयितुमर्हति । कुलगुणसम्पन्नस्य शूद्रस्यापि वेदमन्त्रवर्जमध्यापनमित्येके इति शूद्राणां वेदाध्ययनं सिद्ध्यतीति तन्न; मनुस्मृतिविरोधात् । चिकित्साग्रन्थ सुश्रुतस्य मन्वादिविरुद्धशूद्रोपनयनब्राह्मणेतराचार्य्यत्वबोधने सामर्थ्याभावात् ।

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः ।
मन्त्रवर्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च, ( १०।१२७ मनुः )

इत्यनुरोधेन मन्त्रब्राह्मणात्मकवेदरहितस्ववर्णोचितकर्माचरणेनैव तेषां प्राशस्त्योक्तेः ।

किञ्च गुणकर्मस्वभावानुरोधेन ये वर्णव्यवस्थां कलयन्ति तैरपि गुणपदेन किं सत्त्वरजस्तमांसि गृह्यन्ते, नैयायिकोक्ता वा चतुर्विंशतिगुणाः, इन्द्रियाणि, तद्विषया वा, रज्जुर्वा । किमत्र विवक्षितमिति नोक्तम् । एवं कर्मशब्देनापि नैयायिकानामुत्क्षेपणापक्षेपणादयः, सञ्चितप्रारब्धक्रियमाणादयो, दर्शपूर्णमासचातुर्मास्यादयो वा लौकिकानि वा कर्माणि गृह्यन्त इति विशिष्य नोक्तम् ।

यदि षडङ्गवेदाध्ययनं तदनुगुणानामग्निहोत्रदर्शपूर्णमासचातुर्मास्यज्योतिष्टोमादीनामनुष्ठानं शमदमादयश्च स्वभावा ब्राह्मण्यप्रयोजकाः स्वीक्रियेरन् तदा नाद्यत्वे कोपि ब्राह्मण्यमासादयितुं शक्नुयात्। एवमेव क्षत्रियवैश्यशूद्रादीनामपि दौर्लभ्यमेव। यथा कथञ्चित्सामान्यकर्मणां वर्णव्यवस्थाप्रयोजकत्वे अव्यवस्थैव स्यात्, कर्मणां क्षणिकत्वात्। कश्चिदपि मलक्षालनादिसमयेऽन्त्यजो गृहमार्जनादिसमये शूद्रः, सन्ध्याभजनादिसमये ब्राह्मणः, श्वादिनिवारणार्थं दण्डग्रहणे क्षत्रियः, शाकादिक्रयणसमये वैश्यः स्यात्।

किञ्च राजसभया विद्वत्सभया प्रदत्तब्राह्मण्यादिप्रमाणपत्रोपलम्भात् प्रागेव अष्टवर्षं बालमेव ब्राह्मणमुक्त्वोपनयनं विदधाति श्रुतिः। तेन स्पष्टं ज्ञायते यज्जन्मनैव ब्राह्मण्यादिकं भवति, न तु गुणकर्मादिसापेक्षं प्रमाणपत्रसापेक्षं वा तत्। दशदिवसीयस्य बालकस्य गुणकर्मादिमूलकं ब्राह्मण्यादिकं सर्वथा दुर्ज्ञेयमेव। तथापि जन्मसिद्धब्राह्मण्यादिसापेक्षं नामकरणं विधीयते। शर्मान्तं ब्राह्मणस्य, वर्मान्तं क्षत्रियस्य, गुप्तान्तं वैश्यस्य नामकरणं विधीयते। सुधारकैर्दयानन्दादिभिश्च ब्रह्मक्षत्रविशामेवोपनयनादिकमङ्गीक्रियते तेषामेव च वेदारम्भसमावर्त्तनादिमुक्तम्, न शूद्राणाम्। तथा शूद्राः उपनयनवेदाध्ययनादिकं विना कथं ब्राह्मणाः क्षत्रिया विशो वा भविष्यन्ति? यदि च द्वित्राणि प्राकृतानि पुस्तकानि पठित्वैव सर्वजातीयेभ्यो ब्राह्मण्यादिकं सम्पादयिष्यते तदा तन्माहात्म्यमतीव न्यक्कृतं भविष्यति।

यच्च गुणकर्मानुरोधेन ब्राह्मण्यादिकं निर्माय बालकबालिकादिपरिवर्त्तनेन वंशोच्छेदसेवादिविच्छेदादिशंकानिवारणं कृत तत्तुच्छम्। ब्राह्मणपुत्रस्य चर्मकारपुत्रत्वसंपादने चर्मकारपुत्रस्य ब्राह्मणत्वसम्पादने ममत्वाभावापत्त्या लोकव्यवहारविच्छेदध्रौव्यात्, वेदादिप्रमाणशून्यत्वाच्च। समेषां समानाधिकारप्रदानं निष्प्रमाणमेव।

'मन्वादिभिस्तु—अध्यापनमध्ययन यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः, (म. १,८८)

इत्यादिभिरग्रजन्मनो ब्राह्मणस्य षट्कर्माण्युक्तानि। आधुनिकैस्तु य एतानि करोति तस्य ब्राह्मण्यमुच्यते। एवमेव क्षत्रियादीनां यानि कर्माणि मन्वादिभिरुक्तानि तेषामेव करणात्कस्यचित्क्षत्रियत्वमुच्यते। लोकविरुद्ध-

मपि तत्। लोके शासनाधिकारिभिर्येषु कार्येषु ये नियुक्तास्त एव तानि कर्तुं प्रभवन्ति। नहि तत्कार्यकरणक्षमत्वेऽपि स्वेच्छया कश्चित्तत्र प्रवर्तितुं प्रभवति। नहि शक्तत्वादेव कश्चिन्न्यायधीशो राज्यपालो वा भवति। स्वेच्छया कस्यचित्तद्व्यवहारे दण्डयत्वमेव भवति।

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशं गच्छति सान्वयः॥' (म. २. १६८)
'न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद्बहिष्कार्यः.........' (म. २. १०३)॥

इत्यादिवचनैरपि न कर्मणा शूद्रवर्णत्व भवति। त्वतल्वतुप्रत्ययविरोधात्। तथा 'साहित्यसंगीतकलाविहीनः। साक्षात्पशुः पुच्छविषाणहीनः।' इति वस्तत्तुल्यतैव विवक्षिता। नहि साहित्यसंगीतहीनानां नैयायिकवैयाकरण-मीमांसकानां साक्षात्पशुत्वं घासादिभोक्तृत्वं च संभवति।

किञ्च गुणकर्मभिर्वर्णव्यवस्थायां ब्राह्मणादिजातिचतुष्टय एव स्याद्वेदे तु अतिकुष्टासमागवम्(मु० पृ० ३०।५) क्षत्रियायां वैश्याज्जातस्यापि जात्यन्तरत्वे व्यवहारो दृश्यते। एवमेव 'नृत्ताय सूतम्।' 'मेधायै रथकारं' क्षत्रिया ब्राह्मण्यां जातस्य सूदस्य, माहिष्येण करिण्यां जातस्य रथकारस्य वर्णनं दृश्यते। तपसे कौलालं, मायायै कर्मारम् ३०७ (कुम्भकारलोहाकरौ) नदीभ्यः पौञ्जिष्ठम्, क्षीकाभ्यो नैषादं (३०।८) पुष्ट्यै गोपालम्, वीर्यायाविपालम् ३०।११ मेधायवासः पल्पूली प्रकामाय रजमित्रो ३०।१२ साध्येभ्यश्चर्मन्नम् ३०।१५ इत्यादिषु अन्त्यज-पुल्कस-निषाद-रजक-चमकार-भिल्ल-किरातादि-जातिवर्णनं दृश्यते। एवं वेदोक्तवर्णसंकरजातिविचारेण गुणकर्ममूलकवर्णव्यवस्था स्वत एवापैति।

यदुक्तं—जीविकाभेदाज्जातिभेद इति तदपि तुच्छम्। जातिभेदस्य धर्मशास्त्रेषु शुक्रशोणितभेदमूलकत्वोक्तेः। जात्यनुरोधेन च जीविका प्रोक्ताः।

वैश्यायां शूद्रसंसर्गाज्जातो वैदेहिकः स्मृतः।
अजानां पालनं कुर्यान्महिषीणां गवामपि।
दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत्॥(औशनसत २१)
वश्यायां शूद्रतश्चौर्य्याज्जातश्चक्री च उच्यते।

तैलपिष्टकजीवी तु लवणं भावयन् पुनः ॥ (औशनसत ६)
ब्राह्मण्यां वैश्यसंसर्गाज्जातो मागध उच्यते ।
वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः ॥इति॥

कक्षीवतः सम्बन्धे सायणेन उसिक् संज्ञायामङ्गराजस्य महिष्या दास्यां दीर्घतमसा उत्पादितः कक्षीवानस्य सूक्तस्य ऋषिः इत्युक्तम् । तत्र केचित् कृताभिषेका महिषीभोगिन्योऽन्याः नृपस्त्रियः । (अमर २, श्लोक ५ मनुष्यवर्गः) इति कोषप्रामाण्येनोशिजो महीषोभिन्नत्वेऽपि अकृताभिषेकत्वात् संज्ञात्वमेव न दासीत्वम् ।

इतिहासे तु—

सन्तु राजा बलिर्नाम सर्वधर्मविदांवरः ।
अपश्यन्मज्जनगतः स्रोतसाभ्यासमागतम् ॥ ४२ ॥
जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः ।
ज्ञात्वा चैवं स वव्रेऽथ पुत्रार्थे भरतर्षभ ॥ ४३ ॥
सन्तानार्थं महाभाग भार्यासु मम मानद ।
पुत्रान्धर्मार्थकुशलानुत्पादयितुमर्हसि ॥ ४४ ॥
एवमुक्तः स तेजस्वी तं तथेत्युक्तवानृषिः ।
तस्मै स राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ॥ ४५ ॥
अन्धं वृद्धं च तं मत्वा न सा देवी जगाम ह ।
स्वान्तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ॥ ४६ ॥
तस्यां काक्षीवदादीन् स शूद्रयोनावृषिस्तदा ।
जनयामास धर्मात्मा पुत्रानेकादशैव तु ॥ ४७ ॥

(म० भा० आदि पर्व अ० १०४)

इह दीर्घतमसः बलिदास्यां शूद्रयोनौ काक्षीवदादीनामुत्पत्तिरुक्ता । तत्रैव तस्मात्सुदेष्णायामङ्गवङ्गकलिङ्गपुण्ड्रसुह्मानां पञ्च पुत्राणामुत्पत्तिरुक्ताः । अन्यच्च कक्षीवान् दीर्घतपसः पत्न्यां ब्राह्मण्यामेवोत्पन्नः । सायणरीत्या तु-सुदेष्णाप्रहिता उसिक्नाम्नी दासी ऋषिणा मन्त्रपूतजलेनाभ्युक्ष्य ब्राह्मणकन्यैव सम्पादिता, तदुत्पन्नत्वात् तस्य ब्राह्मण्यमेव ।

तरुणीं रूपसम्पन्ना प्रद्वेषीं नाम ब्राह्मणीम् ।
स पुत्रान् जनयामास गौतमादीन् महायशाः ।:

( म० भ० आदिपर्व अ० १०४।२४)

या भार्य्या दीर्घतमसः प्रद्वेषी परिकीर्तिता ।
तस्याः पुत्रास्त्रयश्चासन् गौतमः कक्षिवान्कलिः ।।
सर्वे वेदस्य द्रष्टारो बभूवुर्वेदपारगाः ।
पुत्रान् तपस्विनो दृष्ट्वा प्रद्वेषी मुमुदे भृशम् ।।

( स्कान्दे सह्याद्रिखण्डे ३५ अध्याये )

अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ।

इत्यादि मन्त्रेष्वपि विप्रः कक्षीवानुक्तः ।

तेन प्रद्वेषी पुत्रः कक्षीवानेव वेदमन्त्रद्रष्टा न दासी पुत्रो मन्त्रद्रष्टा। कक्षीवतो विप्रत्वे तत्पुत्री घोषाऽपि मन्त्रद्रष्ट्री ब्राह्मणी निश्चितैवेति तच्छूद्रत्वं दूरतोऽपास्तम् ।

एवं महर्षेर्वाल्मीकेः शूद्रत्वमपास्तम् वेदितव्यम् ।

'अहं पुरा किरातेषु किरातैः सह वर्धितः ।
जन्ममात्रद्विजत्वं मे शूद्राचाररतः सदा ।।'

अध्यात्मरामायणे अयोध्याकाण्डे ६ सर्गे स स्वयमात्मनो जन्मना द्विजत्वमुक्तवान् ।

'एतदाख्यानमायुष्यं सभविष्यं सहोत्तरम् ।
कृतवान् प्रचेतसः पुत्रस्तद्ब्रह्माप्यन्वमोदत ।।'

इत्युत्तरकाण्डे वाल्मीकीये तस्य प्रचेतसः पुत्रत्वमुक्तम् । प्रचेतास्तु ब्रह्मणो मानसः पुत्र इति—

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च ।। ( मनुः १।३५ )

इति वचनसिद्धम् ।

विश्वामित्रस्य क्षत्रियस्य ब्राह्मणत्वमित्यपि भ्रान्तिमूलकम् । महाभारतेऽनुशासनपर्वणि भीष्मेणोक्तब्राह्मण्यमन्यजातिजातेन प्राप्तुं न शक्यमित्याकर्ण्य युधिष्ठिरेणोक्तम्—

ब्राह्मण्यं यदि दुष्प्रापं त्रिभिर्वर्णैर्नराधिप ।
कथं प्राप्तं महाराज क्षत्रियेण महात्मना ॥ १ ॥
विश्वामित्रेण धर्मात्मन् ब्राह्मणत्वं नरर्षभ ।
श्रोतुमिच्छामि तत्त्वेन तन्मे ब्रूहि पितामह ॥ २ ॥
(म० भा० अनु० अ० ३)

तदुत्तरत्वेनोक्तम्—गाधिनृपस्य सत्यवती पुत्री ऋचीकेन महर्षिणोढा मातुः प्रेरणया सा च मातुः स्वस्य च सन्तानार्थं महर्षिं प्रार्थितवती। महर्षिश्चोक्तवान् ऋतुस्नातया त्वन्मात्राऽश्वत्थस्त्वया च तथा भूतयोदुम्बरः परिरब्धव्यः। तथैव कृतवतीभ्यां ताभ्यां पृथक्पृथक् चरुं निर्माय त्वया त्वन्मात्रा पृथक् पृथक् चरुविशेषौ भक्षणीयौ इति प्रबोध्य दत्तवान्। मात्रा च पुत्र्याश्चरुरत्युत्तमैर्मन्त्रैरभिमन्त्रित इति मत्वा तमेव जग्राह, स्वीयश्च पुत्र्यै दत्तवती। महर्षिः सत्यवतीं दृष्ट्वा चरुपरिवर्त्तनं वृक्षपरिरम्भणव्यत्ययश्च ज्ञात्वोक्तवान्।

तस्मात्सा ब्राह्मणं श्रेष्ठं माता ते जनयिष्यति ॥ ४० ॥
क्षत्रियं तूग्रकर्माणं त्वं भद्रे जनयिष्यसि ॥ ४१ ॥
(म० भा० अनु० प० ४, ४०।४१)

सत्यवत्याः प्रार्थनया सन्तुष्टः 'पुत्रो ब्राह्मणः, पौत्रस्तु क्षत्रियकर्मा भविष्यति' इति महर्षिः प्रोवाच।

विश्वामित्रं चाजनयद् गाधिभार्य्या यशस्विनी ।
ऋषेः प्रसादाद्राजेन्द्र ब्रह्मर्षिं ब्रह्मवादिनम् ॥
(म० भा० अ० प० ४।४७)

नह्यत्र क्षत्रियस्य गाधेर्वीर्य्याद्विश्वामित्रस्य जन्म किन्तु महर्षेश्चरुप्रभावादेवेति स्पष्टं विज्ञायते। अतएव भारते—जन्मनैव विश्वामित्रस्य ब्राह्मण्यमुक्तम् 'ब्रह्मर्षिं ब्रह्मवादिनम्' इति क्षत्रियकन्यायां ब्राह्मणाद्यद्यपि मूर्धावषिक्तः पुत्रो भवति तथापि जमदग्निमहर्षेरनुग्रहाद् ब्राह्मण एव जातः। विश्वामित्रश्च महता तपसा क्षेत्रदोषमपोह्य शुद्धं ब्राह्मण्यं प्राप्तवान्।

इदमार्षं प्रमाणञ्च ये यजामह इत्यपि ।
तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः ॥ ३३ ॥

शीलेन स्वभावेन तत्त्वदर्शिनो जातिं परिचिन्वन्ति।

'चण्डालं पतितं दृष्ट्वा शवमन्त्यजमेव च ।
उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत् ॥'
( संवर्त० १८४ )

'असंस्पृष्टेन संस्पृष्टः स्नानं तेन विधीयते' । ७१ अत्रिस्मृतिः ।
चण्डालस्पृष्टैः स्पृष्टेऽपि निशि स्नानं विधीयते ।
न वसेत्तत्र रात्रौ तु सद्यः स्नानेन शुद्धयति ॥
'दिवाकीर्तिमुदक्याञ्च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुद्धयति ॥' मनु अ० ६ ।
चण्डालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः ।
अपपात्राश्च कर्तव्या धनमेषां श्वगर्दभम् । ५१ मनु० अ० १० )
'नीचैर्दासा उपसर्पन्तु भूमिम्' ( अथर्व ५।११।६ )
वेदेऽपि भिन्नस्थानोपसर्पणमुक्तम् ।
यद्वा दासी आर्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः'
( अथर्व ) ( १२,३१३ )

शूद्रस्पृष्टदुग्धमाहिताग्नेर्निषिद्धम् । तैत्तिरीये ।
'एकशय्याशनं पङ्क्तिभाण्डपङ्क्त्यन्नामिश्रणम् ।
याजनाध्याने योनिस्तथा च सहभोजनम् ॥
नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सह ।'

मिताक्षरोद्धृतबृहस्पतिवचनम्—

'देवयात्राविवाहेषु यज्ञप्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यते ॥
फले काष्ठे रथे मञ्चे नौकायां पशुवृक्षयोः ।
तृणौधजनसंघाते स्पर्शदोषो न विद्यते ॥'
( अत्रिस्मृतिः २४७ )

संसारे प्रकृतिवैचित्र्यं दृश्यते । हिंगुसंसर्गेणाहिफेनस्य मादकत्वं नश्यति । जीरकयोगेन च हिङ्गुगन्धो नश्यति । पुरुषस्पर्शे लज्जावती म्लायते । दृष्टिदोषे वृक्षा नश्यन्ति । तथैवास्पृश्यस्पर्शनेन धर्मः शुद्धिश्च नश्यति ।

'चौर चाण्डालपतितैश्चोदक्यास्पर्शने तथा ।
शवाद्युपहते चैव प्रतिष्ठां पुनराचरेत् ॥'

सिद्धान्तशेखरे—

'प्रसादे देवहर्म्याणां चण्डाल पतितादिषु ।
अन्तः प्रविष्टेषु तथा शुद्धिः स्यात्केन कर्मणा ॥

गोभिः संक्रमणं कृत्वा गोमूत्रेण च लेपयेत्' वृद्ध हारीत

'रुद्रस्यवाथ विष्णोर्वा प्राकाराभ्यन्तरे यदि ।
रजस्वला वधूश्चैव चाण्डालश्च समागतः ॥
ततो ग्रामोत्सवे हस्तशतान्तरितो यदि ।
तद्देशस्य कलाहानौ राज्ञो मरणमेव च ॥
तद्ग्रामस्य क्षयः प्रोक्तः सस्यानां नाशनं ध्रुवम्'

(कारिकावृत्तिप्रायश्चित्तकाण्डे)

चण्डालमद्यसंस्पर्शदूषिता बह्निनाथवा ।
अपुण्यजनसंपृष्टा विप्रक्षतजदूषिता ॥
सा पुनः संस्कर्तव्या...(हयशीर्षपञ्चरात्रे चर्यापादे १८)
चण्डालः श्वपचो वापि तादृशाः पुल्कसादयः ।
प्रतिलोमास्त्यजादीनां स्तूपिं दृष्ट्वा समाचरेत् ॥

(पाञ्चरात्रपाद्मतन्त्रे चर्यापादे अ० १८)

व्यवस्था च दृश्यते

गर्भागारे तु सेवार्ये वैखानसकुलोद्भवः ।
वेदाध्ययनविप्रेण अर्धमण्डपसेवितम् ॥
यतीनां विष्णुभक्तानां महामण्डपसेवितम् ।
वैश्यशूद्रानुलोमानां ब्रह्ममण्डपसेवितम् ॥
शेषाणां हरिभक्तानां गुपुरं तु विधीयते ।
प्रतिलोमान्त्यजातानां स्तूपि दृष्ट्वा समाचरेत् ॥

(अर्चनानवनीते)

दर्शनं गेहचूडाया दर्शनं गोपुरस्य च ।
अन्त्यजानां तथान्त्यानां विज्ञेयं देवदर्शनम् ।

(शैवसिद्धान्तरहस्ये)

अन्येषामपि सर्वेषां नराणां मुनिपुङ्गवाः ॥
पूजा देवालयं दृष्ट्वा प्रणामस्तस्य कीर्तितः ॥
(सूतसंहिता अ० ५)

अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च ।
शुद्ध्यते पञ्चगव्येन पीत्वा तोयमकामतः ॥ संवर्तः १८१ ।
चाण्डालखातवापीषु पीत्वा सलिलमग्रजः ।
अज्ञानाच्चैकनक्तेन त्वहोरात्रेण शुद्ध्यति ॥ २४ ।
चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।
गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥ परा० अ० ६।
कूपैकपानैर्दुष्टानां स्पर्शसंसर्गदूषणात् ।
तेषामेकोपवासेन पञ्चगव्येन शोधनम् ॥ आपस्तंब अ. ३
ननु 'सहृदयं सौमनस्यमविद्वेषं कृणोमि वः ।
अन्योऽन्यमभिहर्यत वत्सं जातमिवाघ्न्या ॥ अथर्व६।३०।१
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जायापत्ये मधुमतीं वाचं वदतु शान्तिवां ॥ (६।३०।२)
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया (९।३०।३)
समानि प्रपा सह वोन्नभागः समाने योक्त्रे सहवो युनज्मि ।
सम्यञ्चोग्निं सपर्यतारानाभिवाभितः ॥ (अथर्व का-३। सू० ३०।६

इत्यादिभिर्वचनैरविशेषेण सर्वेषामेव स्नानपानादिव्यवहारोऽनुमत एवेति चेन्न, तत्र कुटुम्बेषु जातिषु च साम्मनस्य सम्पत्तये जपहोमाभिमन्त्रणाभ्युक्षणानां विधाने तात्पर्यात् । नैतैः सहभोजनादिकं विधीयते पूर्वोक्तशास्त्रविरोधात् ।

ननु 'अक्षमालावसिष्ठेन संयुक्ताधमयोनिजा ।
सारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥ (मनुः ९।२३)

अनेन वसिष्ठपत्न्या अक्षमालाया अधमयोनिजत्वमुक्तमेवेति चेन्न, यतः मनुपुत्र्या देवहूत्या पुत्रीषु काचिदरुन्धती समासीत् सैवाक्षमालेति । राम·

चन्द्रस्तट्टीकाकारः। अक्षमाला अरुन्धतीत्याह। अक्षमाला अरुन्धती इति वाचस्पत्यभिधाने। तथापि सा स्त्रीत्वात्पापयोनिः।

'येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्राः' इत्युक्तेरथवा क्षेत्रदोषादधमयोनिजात्वम्, तथापि सा वसिष्ठसंगेण तपोब्रह्मचर्यादिभिर्दुष्प्रापं-सप्तर्षिमण्डलं प्राप्ता।

वसिष्ठारुन्धत्योर्दिव्यत्वमपि ज्ञाप्यते। तथाहि—

अथाभिध्यायतः सर्गं दशपुत्राः प्रजज्ञिरे।
भगवच्छक्तियुक्तस्य लोकसन्तानहेतवः॥२१॥
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः॥२२॥
उत्सङ्गान्नारदो जज्ञे दक्षोऽङ्गुष्ठात्स्वयम्भुवः।
प्राणाद्वशिष्ठः सञ्जातो भृगुस्त्वचि करात्क्रतुः॥२३॥
पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः।
अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत्॥२४॥
(श्रीमद्भागवतमहापुराणे ३ स्कन्ध १२ अध्याये।)

गते शतधृतौ क्षत्तः कर्दमस्तेन चोदितः।
यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः॥२१॥
मरीचये कलां प्रादादनसूयामथात्रये।
श्रद्धामङ्गिरसेऽयच्छत् पुलस्त्याय हविर्भुवम्॥२२॥
पुलहाय गतिं युक्तां क्रतवे च क्रियासतीम्।
ख्यातिश्च भृगवेऽयच्छत् वशिष्ठायाप्यरुन्धतीम्॥२३॥
(श्रीमद्भागवतमहापुराणे ३ स्कन्धे २४ अध्याये।)

तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित्।
नोधाविधाय रूपं स्वं सर्वसङ्कल्पविद्विभुः॥४७॥
अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः।
सर्वास्ताश्चारुसर्वाङ्ग्यो लोहितोत्पलगन्धयः॥४८॥
(श्रीमद्भागवतमहापुराणे ३ स्कन्धे २३ अध्याये।)

अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम् ।
पतीन् प्रजानामसृजं महर्षीनादितो दश ॥ ३४ ॥
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च ॥३५॥ मनु अ०-१

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥५॥ मनु अ०-३

सारङ्गा तु पक्षिणी नान्त्यजकन्या । सा च पक्षियोनिगतापि मन्दपाल-संसर्गेणाभ्यर्हणीयतां गता । सत्यवती तु राजकन्येति भारते प्रसिद्धमेव । न परस्त्रियभियात् यथाकालं परिणयाभावेऽपि दोषः । तै० (११।१०।९।८।) साङ्कर्येण निन्द्यजातिसमुत्पत्तिः । साङ्कर्यमूलारयोपासंसर्गस्य निषिद्धत्वात् । तथाहि 'प्रदानं प्रागृतोरप्रयच्छन् दोषी' । ( गो० अ० १८ )

अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ । याज्ञवल्क्यः अ० ६४ ।
'त्रीणि वर्षाण्युदीक्षेत् कुमार्यृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥'
'ब्रह्मचर्य्येण कन्या युवानं विन्दते पतिम् । (म० ९।९०)
अनड्वान् ब्रह्मचर्येण अश्वा घासं निगीर्षति ॥
( अथर्व स० ११।५।१८ )

तत्र शुक्राभावात्तद्धारणलक्षणं ब्रह्मचर्यं कन्याया न संभवति । दशवर्षीया विवाहविधानादध्ययनतदङ्गोपनयनाद्यविधानाच्च न ब्रह्मचर्यं तस्याः संभवति । अनुडुदश्वयोस्तु वीर्य्यरक्षणलक्षणमेव ब्रह्मचर्य्यम् । अतः ब्रह्मचर्य्येण युवानं पतिं कन्या विन्दते इत्येवार्थः । शुक्रधारणेन वेदाध्ययनादिना युवावस्था प्राप्तिर्भवति । ऊनषोडशवर्षीया गर्भधारणनिषेधः सुश्रुतादिभिरुक्तो, न विवाहः, नहि विवाहगर्भधारणयोरैक्यम् ।

यदुक्तम्-देवयान्या विप्रकन्याया ययातिना क्षत्रियेण सार्धमुद्वाहो जात इति, इतिहाससिद्धम् तदपि तुच्छम्, इतिहासस्य धर्मेऽप्रामाण्यात् । किञ्च सञ्जीवनीविद्या प्राप्त्यर्थं शुक्राचार्यतत्पुत्र्याराधनतत्परस्य तदनुग्रहेण प्राप्तविद्यस्य कचस्य पाणिग्रहणार्थं देवयान्या प्रार्थितस्य गुरुपुत्रीत्वात् त्वयि मम गुरुवत् पूज्यबुद्धित्वात् गुरूदरनिवासाच्च पाणिग्रहणातिरिक्तकार्य्यकरणक्षमत्वेन तेन प्रत्याख्यातेति ।

स समावृतविद्यो मां भक्तां भजितुमीहसे।
गृहाण पाणिं विधिवन्मम मन्त्रपुरस्कृतम्॥
(म० भा० आदिपर्व अध्याय० ७७।५)

देवयान्या च तस्मै शापो दत्तः—

यदि मां धर्मकामार्थे प्रत्याख्यास्यसि याचितः।
ततः कच न ते विद्या सिद्धिमेषा गमिष्यति।
(म० भा० आ० प, अ० ७७।१६)

कचेन सापि शप्ता—

'तस्माद्भवत्या यः कामो न तथा स भविष्यति।
ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति॥'

शापग्रस्तत्वाद् ब्राह्मणपतिलाभासम्भवात्। शर्मिष्ठया कूपे पातिताया समुद्धरणाय ययातिना हस्तो गृहीतः। विवाहाय तया प्रार्थितो राजा तदयोग्यं मत्वाह—

'विद्ध्यौशनसि भद्रं ते न त्वामर्होऽस्मि भाविनि।
अविवाह्या हि राजानो देवयानि पितुस्तव॥'
(म० भा० आदि पर्व ८१।१८।

अत्र ब्राह्मणकन्यायाः क्षत्रियेण विवाहोऽनुचित इत्युक्तमेव। कचशापादेव तदनौचित्यमपि जातम्। तपो विशेषात् प्रभावविशेषाच्च तयोर्दोषानावहत्वेऽपि तदन्यत्र तद्दूषणमेव।

'हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।
कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् (मनुः ३।१५)
'असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने।' (मनु० ३।५)

'मम व्रते ते हृदयं दधामि। मम चित्तमनुचित्तं तेऽस्तु। मम वाचमेकमना जुषस्व' विवाहपद्धतौ।

द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः॥ (मनु० अ० १)

लक्ष्मी रूपां कन्यां विष्णुरूपाय वाराय तुभ्यमहं सम्प्रददे इति सङ्कल्पः।

'अर्य्यमणं नु देवं कन्या अग्निमपश्यत्।
स नो अर्य्यमा देवः प्रेतो मुञ्चतु मा पतेः॥'
पितृकुलान्मुञ्चतु पत्युः कुलान् मा मुञ्चतु।
(पारस्करगृह्यसूत्रकां. १ इति)

'अश्मेवत्वं स्थिरा भव'। ऋग्वेदे ध्रुवाहं पतिकुले भूयासम्, चूलिकावत्। पातिव्रत्यं सुकोमलं रक्षणीयञ्च।

पतिं या नाभिचरति मनोवाग्देहसंयुता।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते॥'
(म. ५।१६५)

अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत्।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्॥ ५२॥
(याज्ञवल्क्यः १ अ०)

'अनन्यपूर्विकां लघ्वीं शुभलक्षणसंयुताम्।' (व्य-स्मृति अ०)

अनन्यपूर्वां यवीयसीम्। (गौ स्मृ० अ० ४)

'गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वाऽसमानार्षीमस्पृष्ट-मैथुनाम् यवीयसीं सदृशीं भार्य्याम् विन्देत।' वसिष्ठ अ० ८)

अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषान्तरागृहीताम्। अनेन पुनर्भू-र्व्यावर्त्तते इति पराशरमाधवः।

दुःशीलो दुर्भगो वृद्धो जडोऽरोग्यधनोऽपि वा।
पतिः स्त्रीभिर्न हातव्यो लोकेप्सुरभिपातिकी॥
(भागवते १० स्कन्धे २९ अ० २५ श्लो०)

'पाणिग्रहणिकामन्त्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तकर्मक्रिया हि ताः'
सकृदंशो निपतति सकृत्कन्या प्रदीयते। (म० ८।२६)
सकृदाह ददानीति त्रीण्येतानि सतां सकृत्॥ (मनुः ७९।४७)

धर्मे वेदादीनामेव प्रामाण्यम्—

'वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्' (म० २।१२)

तद्धर्मविरुद्धस्य महदाचारस्यापि न प्रामाण्यम् । पारम्पर्यक्रमागतस्य शास्त्राविरुद्धस्यैव सदाचारस्य प्रामाण्यम् ।

'तस्मिन्देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ।।" (मनुः अ० २।१८)

**दायभागव्यवस्था च**

जन्मना वर्णत्वेनैव चतुर्षु दायभागप्रकारभेदः ।
ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदि स्त्रियः ।
तासां पूर्वेषु जातेषु विभागेऽयं विधिः स्मृतः ॥ १४६
कीनाशो वृषभो यानमलङ्कारश्च वेश्म च ।
विप्रस्योद्धारिकं देयमेकांशश्च प्रधानतः ॥१५० ॥
त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः ।
वैश्याजः सार्द्धमेवांशमंशं शूद्रासुतो हरेत् ॥ १५१ ॥
सर्वं वा रिक्थजातं तद्दशधा परिकल्प्य च ।
धर्म्यं विभागं कुर्वीत विधिनानेन धर्मवित् ॥ १५२ ॥
चतुरोंऽशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः ।
वैश्यापुत्रो हरेद्द्व्यंशमंशं शूद्रासुतो हरेत् ॥ १५३ ॥
यद्यपि स्यात्तु सत्पुत्रोऽप्यसत्पुत्रोऽपि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः ॥ १५४ अ० ९

वेदे शुक्लयजुषि माध्यन्दिनीयसंहितायां त्रिंशदध्याये धर्मशास्त्रेषु च चत्वारो वर्णा अनुलोमजाः प्रतिलोमजाश्च बह्वयो जातयो वर्णिताः ।

**अवगुण्ठनव्यवस्था**

अदृष्टपूर्वा या नार्य्यो पुरादेवगणैरपि ।
पृथग्जनेन दृश्यन्ते तास्तदा निहतेश्वराः ॥
( म० भा० स्त्रीपर्व अ० १०।८ )

'या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥
( श्री० वा० रा० अ० फ० ३३।८ )

दृष्ट्वा न खल्वभिक्रुद्धो मामिहानवगुण्ठिताम् ॥ ६१ ॥

निर्गतां नगरद्वारात् पद्भ्यामेवागतां प्रभो ।
पश्येष्टदारदारांस्ते भ्रष्टलज्जावगुण्ठनाम् ॥ ६२ ॥
वहिर्निष्पतितान्सर्वान् कथं दृष्ट्वा न कुप्यसि ।'(वा०भ०सर्ग११)
व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयम्वरे ।
न क्रतौ नो विवाहे वा दर्शनं दूष्यते स्त्रियः ॥ २८ ॥
सैषा विपद्गता चैव कृच्छ्रेण च समन्विता ।
दर्शने नास्ति दोषोऽस्याः मत्समीपे विशेषतः ॥ २९ ॥
( वाल्मीकिरामायणे युद्धकाण्डे ११ सर्गे । )

'यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव ( ऋ० सं० ८।२६।१३ )' एभिर्वचनैर्ज्ञायते यत् स्त्रीणामनावरण दूषणमेव, अवगुण्ठनादिविधानात् तदभावेनाक्रोशश्रवणाच्च ।

'अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥ २ ॥
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥ ३ ॥
स्वां प्रसूतिं चरित्रञ्च कुलमात्मानमेव च ।
स्वञ्च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥ ७ ॥
( मनुः अ-९ )

'पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥ ५५ ॥
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥ ५६ ॥
( म० ३।५५-५६ )

केचित्तु "ऋग्वेदमन्त्राणां शूद्रोऽपि ( कक्षीवान् ) ऋषिः । ऋग्वेदस्य प्रथम मण्डलीय ११६ सूक्तस्य कक्षीवान् ऋषिः । सच अङ्गराजस्य पट्टमहिष्या दास्यां दीर्घतमसोत्पादितः । ऋ ९।७ सूक्तस्यापि स एव ऋषिः । तस्य पुत्रः शबरः ऋ. १०।१।६६ सूक्तस्य ऋषिः । कक्षीवतः पुत्री घोषा दशम मण्डलीयानेकसूक्तानां द्रष्ट्री ऋषिका । 'सामानो मन्त्रः समितिः समानी'

( ऋ. १०।१९१।२ ) मन्त्रेणापि समेषां ब्राह्मणक्षत्रियवैश्यशूद्राणां समान-मन्त्रत्वोपपादनमपि वेदानां सर्वाधिकारत्वं समर्थयते ।

'तस्यां कक्षीवदादीन् स शूद्रयोनौ ऋषिस्तदा ।
जनयामास धर्मात्मा पुत्रानेकादशैव तु ॥' इति ।

तदपि न क्षोदक्षमम् । 'वेदमाता पावमानी द्विजानां' ( १९।७१।१ ) 'अयं स होता यो द्विजन्मा' ( ऋ. सं. १ १४९।५ ) इत्यादि मन्त्रैर्वेदे द्विजानाम-धिकारश्रवणात् त्रैवर्णिकानामेव यज्ञियत्वं, चतुर्थस्यायज्ञियत्वमित्यपि चोक्तमेव । कक्षीवतः पिता दीर्घतमा न शूद्रः, किन्तु ब्राह्मणः, ऋषिः । 'बीजस्य चैव योन्याश्च बीजमुत्कृष्टमुच्यते' ( मनुः ६।३५ ) इति रीत्या अमोघवीर्याणामृषीणां ब्रह्मवर्चसस्य क्षेत्रदोषेण लोपयितुमशक्यत्वेन दीर्घतमसोत्पादितस्य कक्षीवतो ब्राह्मणत्वमेव न क्षेत्रदोषाच्छूद्रत्वम् । अतएव क्षत्रिया क्षेत्रोत्पन्नत्वेऽपि विश्वामित्रस्य ऋचीकब्राह्मणनिर्मितब्राह्मचरु-प्रभावाद् ब्राह्मणत्वं सम्पन्नम् । उपरिचरवीर्यजातायां सत्यवत्यां ऋषिणा पराशरेण ब्राह्मणेनोत्पादितस्य व्यासस्य ब्राह्मणत्वम् ।

कक्षीवतो माता दासी यद्यप्यासीत् तथापि सा मन्त्रपूतेन जलेन ऋषि-पुत्री कृता । यथा अधमयोनिजापि अक्षमाला वशिष्ठेन संगता परां शुद्धिमुप-गता । मनुः

'अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजा ।
साङ्गी मन्दपालेन जगामाभ्यर्हणीयताम् ॥' ९।२३

ऋषयो मन्त्रपूतेन जलेन शक्त्या पुरुषं पाषाणं पाषाणञ्च स्त्रियं पुरुषं वा कर्त्तुं प्रभवन्ति । तेन न कक्षीवतः शूद्रत्वं संभवति । सायणेनापि कक्षीवतो ब्राह्मणत्वमेवोक्तम् । तथाहि ऋ. १।१२५।१ मन्त्रे ।

ननु कक्ष्यो नाम अश्वबन्धनी रज्जुः । तद्वान् कक्षीवान् । अश्वबन्धनञ्च राज्ञ एवोचितम् । अतोऽयं राजन्यत्वात् प्रतिग्रहो नोपपद्यते । 'याज-नाध्यापने चैव विशुद्धाश्च प्रतिग्रहः ।' ( मनु १०।७६ ) इति स्मरणात् ब्राह्म-णस्यैवाधिकारो न क्षत्रियस्येति पूर्वपक्षेऽपि कक्षीवतः क्षत्रियत्वमेव शङ्कितम्, न शूद्रत्वम् । उत्तरपक्षे च सायणेनोक्तम् यद्यप्यसौ कलिङ्गाख्यस्य राज्ञः पुत्रः तथापि तेन कलिङ्गेन स्वयं वृद्धत्वात् अपत्योत्पादनाय सामर्थ्यमलभमानेन

तदुत्पादनाय याचितो दीर्घतमा ऋषिः अपत्योत्पादनाय प्रेषितया राजमहिष्या अतिजरठेन महर्षिणा सह रन्तुं लज्जमानया स्ववस्त्राभरणैरलङ्कृताम् स्वप्रतिनिधित्वेन प्रेषितामुशिग्नामिकां योषितं दासीमित्यवगत्य मन्त्रपूतेन जलेनाभिषिच्य ऋषिपुत्रीं कृत्वा तया सह रेमे । तदुत्पन्नः कक्षीवान् नाम ऋषिः । एतत्सर्वमस्माभिः पूर्वाध्याये विस्तरेण प्रतिपादितम् । अतोऽस्य क्षत्रियसम्बन्धात् कक्षीवानिति नाम उपपन्नम् । दीर्घतमसः परमर्षेरुत्पन्नत्वे ब्राह्मणत्वात्प्रतिग्रहोऽपि उपपन्नः ।

'दासी' शूद्रैव भवतीत्यपि नेति शर्मिष्ठादि दृष्टान्तेनोक्तमेव । (ऋ. सं. १।५१।१३ ) । भाष्येऽपि सायणेनोक्तम् 'स च अङ्गराजः सर्वज्ञं तं दीर्घतमसमृषिमवगत्य एवमवोचत्-भगवन मम पुत्रो नास्ति, एषा महिषी अस्यां, कञ्चित्पुत्रमुत्पादय इति । स च तथा इत्यब्रवीत् । सा च महिषी राजानं प्रति तथा इत्युक्त्वा अयं वृद्धतरो जुगुप्सितो मम योग्यो नास्तीति बुध्या स्वकीयामुशिक्संज्ञां दासीं प्राहैषीत् । तेन च सर्वज्ञेन ऋषिणा मन्त्रपूतेन वारिणाभ्युक्षिता सती सैव ऋषिपत्नी बभूव । तस्यामुत्पन्नः कक्षीवान् ऋषिः । महाभारतेऽपि —

'औशिजश्चैव कक्षीवान् बलश्चाङ्गिरसः स्मृतः ।
ऋषिर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा ॥
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
एते ब्रह्मर्षयो नित्यमास्थिता दक्षिणां दिशम् ॥'(शा. प. २०८।२७)

औशिजः कक्षीवानयं ब्रह्मर्षिरुक्तः ।

'अहं मनुरभवम् सूर्यश्चाहं कक्षीवान् ऋषिरस्मि विप्रः (ऋ. सं. ४।२६।१)

अत्र वेदेनैव कक्षीवान् ऋषिः विप्र उक्तः । अतएव तत्पुत्रः शबरः पुत्री च घोषा सुतरां ब्राह्मणावेवेति मन्तव्यौ । शबरस्तस्य नामासीन्न जातिः ।

ननु विप्र शब्दोऽत्र मेधाविपरो न जातिपरः इति चेन्न, विप्रादिशब्दानां विशेषणत्वेऽन्यबोधकत्वेऽपि विशेष्यत्वेन ब्राह्मणजातिवाचकत्वावगमात् ।

विप्रं न जातवेदसम् । [ ऋ० सं० १।१२७।१ ]

अत्र जातप्रज्ञं ब्राह्मणमित्येवार्थः, वेङ्कटमाधवसायणादिभिस्तथैव व्याख्यातत्वात् ।

'तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने। [मनु० २।११५ ]

अत्रापि विशेष्यत्वाद् ब्राह्मणजातिपर एव विप्रशब्दः।

'विप्रक्षत्रियविट्शूद्राश्चातुर्वर्ण्यमिति स्मृतम्'

( अमरकोषः २।७।४ )

विप्रशब्दो ब्राह्मणपर्यायवाचकः।

'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।

विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय एव च।'

( अत्रिस्मृतिः १४१ )

जन्मना ब्राह्मणो विद्यया विप्रत्वं यातीत्युक्तम्।

'यश्च विप्रोऽनधीयानः' ( मनुः २।१५७ )

विप्राणां ज्ञानतो ज्यैष्ठ्यम्' ( म० २।१५५ )

'अर्हत्तमाय विप्राय' ( मनु० ३।१२८ )

'भस्मीभूतेषु विप्रेषु' ( मनु० ३।९७ )

'विप्रसेवैव शूद्रस्य' ( म० १०।१२३ )

'विप्रस्य त्रिषु वर्णेषु' ( म० १०।१० )

'विप्रस्य विदुषो गेहे' ( म० ४।१११ )

'विप्रः शुद्धत्यपः स्पृष्ट्वा' ( म० ५।९९ )

उक्तपद्येषु विप्रशब्दो ब्राह्मणजातिपर एव, अन्यथा

'अनधीयानो विप्रः' ( मनु० २।१५७ )

'विप्रोऽनूचः' ( मनु० २।१५८ )

'ब्रात्यो विप्रः' इत्यादिषु विरोधादिदोषा अनिवार्य्या एव।

'ऋषिर्विप्रो विचक्षणस्त्व कविः ( ऋ० सं० ६।१०७।७ )

'त्वं विप्रः त्वं कविः' ( ऋ०सं० १८।२ )

'विप्रः कविः' ऋ० सं० ६।८४।५ )

'विद्वान् कविः' ( ऋ० सं० ७।८७ )

मन्त्रेषु विप्रस्य मेधाविपरत्वे पुनरुक्तिध्रौव्यमेव स्यात्।

यदुक्तम् 'समानो मन्त्र इति सर्वेषां समानो मन्त्राधिकार उक्तः' इति तन्न; अत्र मन्त्रपदस्य परामर्शवाचकत्वेनादोषात्।

अनुपनीतानामद्विजानामन्त्रोच्चारणे दोषोक्तेः। तथाहि—

अथ हास्य वेदमुपश्रृण्वतः त्रपुजतुभ्यां श्रोत्रपरिपूरणम्।'

'उच्चारणे जिह्वाच्छेदः' 'धारणे शरीरभेदः' (गो० धर्मसूत्र २।३।४ इति

यत्तु—'इमानि वचनानि अन्यायमूलकानी' ति, तन्न, आर्षवचनस्यानतिशङ्कनीयत्वात्।

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनास्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥'

(पा० शि०)

इतिरीत्या अशुद्धशब्दोच्चारणसम्भवेन अनिष्टापत्तेः। अशुद्धोच्चारयितॄणां विप्राणामपिदो षित्वसम्भवात् न समेषां समानमन्त्राधिकारो युक्तः किमुतानुपनीतानामद्विजानाम्? न च वेदोच्चरणादिभिर्जिह्वाच्छेदादिदण्डविधानमन्यायमिति वाच्यम्, अनुशासनार्थस्य दण्डविधानस्यापेक्षितत्वात्। केषाञ्चिद्रीत्या तु—

'यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्।

'अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥

(श्री० भाग० म० पुरा०)इति

शूद्राध्ययननिषेधार्थं वादरूपमिदम्। तेनाध्ययननिषेध एव तात्पर्यम्, तादृग्दण्डविधानस्यानैतिहासिकत्वात्।

किञ्च 'समानो मन्त्र' इति मन्त्रेण न सर्ववर्णानां वेदमन्त्रे समानाधिकारोऽभिधीयते, तस्य कुटिम्बिनां सौमनस्यविधिशेषत्वात्। (मीमांसाशाबरभाष्ये। ३।५।४३) इति रीत्या तु ऋत्विजां सांमनस्यसंपत्तिपरोऽयं मन्त्रः, वेदानां यज्ञप्रधानविषयत्वात्। यज्ञे च त्रैवर्णिकानामेवाधिकृतत्वात्तेषामेव कृते समानमन्त्रत्वाभिधानम्। 'ब्राह्मणो वैवराजन्यो वैश्यो वा। तेहि यज्ञियाः। न व देवाः सर्वेणेव संवदन्ते, ब्राह्मणेन वैव राजन्येन वा वैश्येन वा।' (शत० ब्रा० ३।१।१।९-१०) अयं स होता यो द्विजन्मा' इति श्रुतिभ्यः। यज्ञसमाप्तौ ऋत्विजो यजमानश्च एतैर्मन्त्रैः प्रार्थयन्ते। 'एषामेकस्मिन्कर्मणि सह प्रवृत्तानां ऋत्विजां स्तोतॄणां वा मन्त्र एकविधोऽस्तु' इति तत्र सायणभाष्यम् 'समानी प्रपा' इत्यपि कुटुम्बिष्वेव चरितार्थम्। 'अरानाभिमित्र अभितः अग्निं अप-

यत (अ० सं० ३।३०।६) 'वत्सं जातमिवाध्न्या' (ऋ० सं० ३।३०।१) रथस्य अरा यथा एकरथसम्बद्धास्तथैवैककुटुम्बसम्बद्धा एकप्रपादिमन्तो भवेयुः। भिन्नभिन्नरथेषु न अराणां सम्बन्धो भवति, तद्वदिहापि बोध्यम्। यथा वा गौः स्वयमेव वत्सं स्नेहेन पयः पाययति तथैवात्रापि सम्बद्धानामेव समानी प्रपा नासम्बद्धानाम्। आर्त्विज्यमपि ब्राह्मणानामेव भवति इति मीमांसायां १२।४३८।३९-४२ तथा ६।६।१८ स्पष्टम् तेषामेव समानमन्त्रता।

केषाञ्चिद्रीत्या तु—

'जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया।
तरुणीं रूपसम्पन्नां प्रद्वेषीं नाम ब्राह्मणीम्।
स पुत्रान् जनयामास गौतमादीन् महायशाः।'
म० भा० १।१७४।२३-२४

गौतमादिष्वेव कक्षीवानपि। तदपि सह्याद्रिखण्डे स्पष्टम्।

या भार्या दीर्घतमसः प्रद्वेषी परिकीर्तिता।
तस्याः पुत्रास्त्रय आसन् गौतमः कक्षिवान् कलिः॥
सर्वे वेदस्य द्रष्टारो बभूवुर्वेदपारगाः।
पुत्रान् तपस्विनो दृष्ट्वा प्रद्वेषी मुमुदे भृशम्। '३५।२६।३०'

प्रद्वेष्या एव नामान्तरमुशिक् इत्यपि। बलेर्दास्यामुशिजि काक्षीवदाद्याः पुत्रा उत्पन्नाः (म० भा० १७४।४८) इति काक्षीवानुत्पन्नः। एवं रीत्या कक्षिवत् काक्षीवतोर्भेदोऽपि प्रतीयते।

क्वचिदार्षेषु शूद्रादिशब्दनिर्देशो भक्त्या वृत्त्या, न मुख्यया वृत्त्या तत्संभवति, यथा ज्योतिषशास्त्ररीत्या ब्राह्मणानामपि तुलसीराम, दयानन्दादीनां शूद्रो वर्णो भवति। भक्ष्यपशुपक्षीदेवादीनामपि ब्राह्मणादि वर्णा भवन्ति। ब्राह्मणेष्वपि—

'देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः।
पशुर्म्लेच्छोऽपि चण्डालः विप्रा दशविधाः स्मृताः॥
( अत्रि स्मृति ३७१ )

ब्राह्मणानामौपचारिक्यो नानासंज्ञाः भवन्ति। न तावता स वस्तुतः पशुर्भवति तद्वदिहापि बोध्यम्।

## सूतस्य ब्रह्मणत्वसाधनम्

एवमेव "केश्चित्पौराणिकसूतस्य रोमहर्षणस्य सूतजातित्वेन प्रतिलोमसंकरत्वमुच्यते। 'क्षत्रियात्सूत एव तु' इति ( मनुः १०।१७ ) क्षत्रियात् ब्राह्मण्यां जातस्य सूतत्वमुक्तम्। बलदेवेन स प्रतिलोभज उक्तः। (भागवते १०।७८।२४) पुरुषोत्तममाहात्म्ये ( २।५ ) स एवं विलोभजमाह। 'सुत्यायामभवत्सूतः' इति अग्निपुराणे तस्य वेदादिवक्तृत्वमुक्तम्। तेन कर्मणैव वर्णव्यवस्था तथा च समेषां वेदाधिकारः" इति।

तन्न, सूतस्य यज्ञकुण्डसमुद्भूतत्वेन जातिसूतत्वाभावात्। हरिवंशस्य ( १।४ ) सौतिशब्दव्याख्यानप्रसङ्गे नीलकण्ठेनोक्तम्। सूतः 'अग्निकुण्ड-समुद्भूत सूत निर्मलमानस।' इति पौराणिकप्रसिद्धेरग्निजो लोमहर्षणः सूतः। तस्य पुत्रः सौतिः, उग्रश्रवाः। ननु ब्राह्मण्यां क्षत्रियात्सूत इति स्मृत्युक्तः तद्धितानर्थक्यापत्तेः। यथा ब्राह्मणपुत्रो ब्राह्मणो भवति तथा जातिसूतपुत्रः सूत एव भवति इति।

सौतिरिति तद्धितप्रयोगो व्यर्थः स्यात्। 'नाहं वरयामि सूतम्' ( म०भा० १।१८९।२३ ) इत्यत्र सूतपुत्रत्वेन प्रसिद्धः कर्णः सूत इत्येवोक्तो न सौतिः। लोमहर्षणस्तु कश्चित्पुमान् ब्रह्मयज्ञे यज्ञकुण्डात्समुत्थितः।

'स सूतो धर्मवक्ता च मत्पूर्वपूरुषः स्मृतः।'
( ब्रह्मवैवर्त्तब्रह्मखण्डे १०।१३४ )

'पुराणं पाठयामास तं च ब्रह्मा कृपानिधिः।
पुराणवक्ता सूतश्च यज्ञकुण्डसमुद्भवः।' ( ब्र० वै० १३५ )

एवमेव शिवपुराणे वायवीयसंहिताया उत्तरभागे ( १।६ ) उक्तम् अत्र सौतिना स्वपिता यज्ञकुण्डसमुद्भूत उक्तः। तादृक्सूतपुत्रत्वादेव क्वचित्सौतिरपि सूतपदेनोक्तः। यथा जनकशब्द उपाधिपरः सीरध्वजादिषु प्रयुक्तः। आद्य शङ्कराचार्य्याणामुत्तराधिकारिणोऽपि शङ्कराचार्य्यनाम्ना ख्याप्यन्ते। तथैव प्रकृतेऽपि बोध्यम्। सूतजातित्वे तद्वधेन बलदेवेन ब्रह्महत्या प्रायश्चित्तं न क्रियेत। प्रतिलोमजशब्दप्रयोगस्तु तिरस्कारार्थः। एव अथवा लोम्नां प्रतिलोमोऽग्निः। तस्माज्जातः प्रतिलोमजः अग्निजः सूतः। वायुपुराणे

'वैन्यस्य तु पृथोर्यज्ञे वर्तमाने महात्मनः।
सुत्यायामभवत्सूतः प्रथमं वर्णवैकृतम्।
ऐन्द्रेण हविषा तत्र हविः पृक्तं बृहस्पतेः॥
जुहावेन्द्राय दैवेन ततः सूतो व्यजायत।
शिष्यहव्येन संपृक्तमभिभूतं गुरोर्हविः॥
अधरोत्तरचारेण जज्ञे तद्वर्णवैकृतम्।
( वायु० १।३३।३६ )

इति रीत्या सुत्यायामभिषवभूमौ यज्ञकुण्डात्समुत्पन्नः पृथोर्यज्ञे ऐन्द्रं हविर्निक्षिप्तं बार्हस्पत्यञ्च हविर्निःक्षिप्तम्। देवेष्विन्द्रस्य क्षत्रियत्वात् बृहस्पतेः ब्राह्मणत्वात् 'स वा एष ब्राह्मणस्यैव यज्ञः यद् एतेन बृहस्पतिरयजत्। ब्रह्म हि बृहस्पतिः' 'ब्रह्म हि ब्राह्मणः' 'अथ राजन्यः यद् एतेन इन्द्रोऽयजत् क्षत्रं हीन्द्रः क्षत्रं राजन्यः' ( शतपथ ५।१।१।११ ) तस्मादैन्द्रेण चरुणा बार्हस्पत्यचरोरभिभूतत्वात् तत्साङ्कर्य्योद्भूतत्वात् लोमहर्षणस्य सूतत्वम्, सङ्करसूतसाम्यात् अग्निकुण्डस्य साक्षात् क्षत्रियत्वाभावात् ब्राह्मणजातिस्त्रीत्वाभावाच्च न मुख्यं सूतत्वम् तदुद्भूतस्य लोमहर्षणस्य। सूतशब्दस्य सप्तमी विभक्तौ सूत्यामिति रूपं भवति न सूत्यायाम् इति।

इह च सूत्यायामिति पाठे तेनाभिषवभूमिरेव तदर्थो न सूतस्त्रीति।

शूद्रश्चेन्न व्यासासनमारोहेत्।
अस्य ब्रह्मासनं दत्तम्।
( भा० १०।७८।३० )

इति तस्मै व्यासासनं दत्तम्। तच्च तस्य शूद्रत्वे विरुध्येत।

'व्यासासनोपवेशाच्च शूद्रश्चाण्डालतां व्रजेत्।
विप्रस्यैवाधिकारोऽस्ति व्यासासनसमाक्रमे।
धर्माणां श्रुतिगीतानामुपदेशे तथा द्विजः' ( १।१।५ )

वंशीधरी टीकायामुद्धृतं सूतसंहितावचनम्। 'सूतानामश्वसारथ्यम्' ( १०।४७ मनुः ) सञ्जयस्य धृतराष्ट्रसारथ्यं प्रसिद्धम्। कर्णस्यापि सूतत्वं प्रसिद्धम्। न चैतेषामुपस्पृश्यत्वादिकम्-हरिवंशे-'एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे।

सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामतिः।
यस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः। (१।५३३-३४)

नीलकण्ठेन च सुत्यां सोमाभिषव-काले अभिषवः सोमवल्ल्याः कण्डनम् रसनिष्कासनार्थम्। अत्र वायुपुराणवाक्ये-सूत्यामिति पाठो नास्ति किन्तु सुत्यायामिति। जातिवाचकात्सूतशब्दात् ङाषि सूतो इति भवति। तस्य च सप्तम्यां सूत्यामिति भवति सूत्याशब्दस्तु संज्ञायां 'समजनिषद्-निपतमनविद् षुञ्' (पा० ३।३।९९) इति सूत्रात् षुञ् धातो संज्ञायां क्यपि, तुकि यपि सुत्या शब्दनिष्पत्तिः। अभिषवस्तदर्थः सुत्याभिषवः सवनं च स इत्यमरकोषश्च तेन यथोक्त एवार्थः।

ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति।
पृषदाज्यात्समुत्पन्नः सूतः पौराणिको द्विज :॥

वक्तावेदादिशास्त्राणां त्रिकालामलधर्मवित्

इति अग्निपुराणस्कन्धपुराण ब्रह्मोत्तरखण्डे

कौटलीये च—वैश्यान्मागधवैदेहकौ (क्षत्रियाब्राह्मण्योः) इति संकरसूतं निरूप्य पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद्विशेषः (३।७।२१) पौराणिकः सूतो ब्राह्मणाद्विशेषः मागधो क्षत्रियाद्विशेषः इति तत्रैव गणपतिशास्त्रि टीकायाम्।

सूतः सुत्यां समुत्पन्नः सौत्येऽहनि महामतिः
इति तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः

इति च विष्णुपुराणप्रथमांशे तृतीयाध्याये। अग्निपुराणकूर्मपुराण-वचनै-र्व्यासशिष्य स्यपौराणिकसूतस्य अयोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणः कथ्यते। तस्य द्विजत्वं विष्णवंशसंभूतत्वञ्च तथैव मागधस्यापि तत्सहपठितस्या-योनिजत्वम्। भविष्यपुराणे प्रतिसर्गपर्वणि शौनकादिभिः सूताय—

सत्यं ब्रह्मन् वदोपायं नराणां कीर्तिकारकम्। (२४।३)

इति ब्राह्मणत्वं लोमहर्षणस्योक्तम्। अनुशासनपर्वणि

देवतानन्तरं विप्रान् तपः सिद्धान् तपोधिकान्।
कीर्तितान् कीर्तयेष्यामि सर्वपापविमोचनान् (१६५।३६)

लोमशो नचिकेतश्च लोमहर्षण एव ।
ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा । (४६।३७)

इति विप्रत्वेन लोमहर्षण उक्तः ।

कूर्मपुराणे च

'त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
त्वं हि स्वायम्भुवे यज्ञ सुत्याहे वितते सति ।
संभूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥' इति

पुरुषोत्तमांशत्वं सूतस्योक्तम् । तेन लोमहर्षणस्य प्रतिलोमजसंकरत्वं सर्वथापास्तम् ।

यदुक्तम् 'सूतस्य ब्राह्मणत्वे शौनकादिभिस्तस्मै प्रणामः कृतः स्यान्नचैवं दृश्यते तस्माच्छूद्र एव सूतः' इति तन्न-'नैमिषे सूतमासीनमभिवाद्य महामतिम् । कथामृतरसास्वादकुशलः शौनकोऽब्रवीत् ' ( भागवतमहात्म्ये १।३ ) इति शौनककर्तृकाभिवादनस्य स्पष्टमुपवर्णितत्वात् । शिवपुराणे विश्वेश्वरसंहितायाञ्च —

'सूत सूत महाभाग व्यासशिष्य नमोऽस्तु ते ।
तदेव व्यासतो ब्रूहि भस्म महात्म्यमुत्तमम्(१।२३।१)इति ऋषिकर्तृकः सूतस्य नमस्कारः । न च श्रीमद्भागवते ऋषीणां सङ्कल्पादेव सूतस्यापि व्यासनार्हत्वं ब्राह्मणत्वञ्चोक्तमिति वाच्यम्, द्रौपदी धृष्टद्युम्नादीनामग्निकुण्डसमुद्भूतत्वेऽपि क्षत्रियत्वसंकल्पेनोत्पादितत्वात् क्षत्रियत्वमिव सूतस्यापि अग्निकुण्डसमुद्भूतस्य ऋषीणां ब्राह्मणत्वसङ्कल्पेन ब्राह्मणोत्तमत्वं युज्यत एव । अग्नेर्भगवन्मुखत्वेन मुखोत्पन्नस्य ब्राह्मणत्ववदग्निसमुद्भूतस्यापि ब्राह्मणत्वमेव ।

'वैश्वानरः प्रविशति-अतिथिर्ब्राह्मणो गृहे' ( कठोपनिषदि १।१।७ )
'ब्राह्मणो वैश्वानरः' ( तै० ब्रा० ३।७।३।२ )
इति ब्राह्मणस्याग्नेश्चाभेद उक्तः । वीरमित्रोदये पृ० ४०६

'मृषा ब्राह्मण कन्याया विवाहेषु समन्वयात् ।
जातः सूतोऽत्रनिर्दिष्टः प्रतिलोमविधिर्द्विजः ॥'

इति उशनो वाक्य व्याख्याने उक्तम । ब्राह्मणकन्यायां विधिहीनेषु विवाहेषु ऊढायां समन्वयात् सजातीयात् जातः । अत्र शास्त्रे प्रतिलोमविधिः-प्रतिलोमधर्मा द्विजो

निर्दिष्टः। सच वेदानर्हः तथाप्येषां स्मार्त्तानां धर्माणां अनुपश्चात्ब्राह्मणं पुरस्कृत्य ब्राह्मणभावेन बोधकः उपदेष्टा भवति। ततश्च विधिविकल- विवाहोढब्राह्मणीजातस्य ब्राह्मणस्यैव सुतरांतस्य प्रतिलोमधर्मस्येदमुपनयनम्, न सूतजातेरिति न विरोधः। न च 'मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात्।' इति सूतस्य छन्दोविषयेऽस्नातत्वोक्त्या तदनधिकारेण शूद्रत्वं ज्ञायते इति वाच्यम्। अस्नातशब्देनापारङ्गतत्वस्यैवोक्तेः। तथा वेदज्ञान सत्त्वेऽपि तत्र पारङ्गतत्वं नास्तीत्येव विज्ञायते। शूद्रत्वेन ततो ब्राह्मणानां विद्याग्रहणमनुपपन्नमेव स्यात्,। 'न हीनतः परमभ्याददीत' इति महाभारत वचनविरोधात्। 'एतद्धस्मवैतद्विद्वान् आह महिदास ऐतरेयः' (ऐतरेयोपनिषदि १।८।२) (छान्दोग्ये ३।१६।७) च महिदासोनामत इतराया अपत्यमैतरेण तेन इतरानाम्न्याः पुत्र आसीत् न तु इतरस्याः शूद्रायाः। इतरशब्दः सर्वनामत्वेनान्यस्य हीनस्य वा वाचको भवति। तथात्वे पञ्चम्यामितरस्या इति रूपं भवति न इतराया इति। श्रीशङ्कराचार्येण सायणाचार्य्येण इतराया इत्येव लिखितम् नेतरस्या इति। तेन महिदासस्य माता इतरा नाम्नी ब्राह्मणी न शूद्रा। 'संज्ञोपसर्जने च विशेषेऽवतिष्ठते' (१।१।२६) इत्यत्र कैय्यटेनोक्तं 'सर्वनामकार्य्यं अन्तर्गणकार्य्यञ्च सर्वनामत्वयुक्तानामेव भवति न तु संज्ञोपसर्जनानाम्।' यत्र सर्वशब्दः कस्यचित्संज्ञा भवति तत्र चतुर्थ्यां सर्वाय इति रूपं भवति, न सर्वस्मै इति, नामविशेषत्वादेव इतराया इति सर्वनामकार्याभावः। किञ्च इतरशब्दस्य किञ्चिद्धीनवाचकत्वे सत्यपि न शूद्रवाचकत्वम्। अत्र तु प्राचीनैराचार्य्यैः इतराया अपत्यमिति समुल्लेखात् संज्ञापरत्वमेव न हीनवाचकत्वमपि। यदीतरा नाममात्रेण तस्याः शूद्रात्वं तदा शबरस्वामिनां मीमांसा भाष्यकाराणामपि शबरजातित्वं सिद्ध्येत्। रामायणे वर्णितो ऋषिर्मातङ्गश्चाण्डालः स्यान्नच तद्युक्तम्, नामपरत्वादुक्तशब्दानाम् तथैव प्रकृतेऽपि बोध्यम्। मृच्छकटिकप्रणेता शूद्रकोऽपि द्विज एव। 'द्विजमुख्यतया कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः।' (१।३) मृच्छकटिक) सुबुद्धिशर्मा मुद्राराक्षसवर्णितः राक्षसो राक्षस एव स्यात्।

सायणाचार्येण तु ऐतरेयब्राह्मणभाष्यभूमिकायां स्पष्टमुक्तम् 'कस्यचिन्महर्ष-

बह्व्यः पत्न्यो विद्यन्ते स्म। तासां मध्ये कस्याश्चित् इतरा इति नामधेयम्। तस्या इतरायाः पुत्रो महिदासाख्यः कुमारः। तदीयस्य पितुर्भार्यान्तर-पुत्रेष्वेव स्नेहातिशयो न तु महिदासे। ततः कस्याञ्चिद् यज्ञसभायां तं महिदासमवज्ञाय अन्यान् पुत्रान् स्वोत्सङ्गे स्थापयामास। तदानीं खिन्नवदनं महिदासमवगत्य इतराख्या तन्माता स्वकीयकुलदेवतां भूमिमनुसस्मार। सा च भूमिदेवता दिव्यमूर्तिधरा सती यज्ञसभायां समागत्य महिदासाय दिव्यं सिंहासनं दत्त्वा तत्र एनमुपवेश्य सर्वेषु कुमारेषु पाण्डित्याधिक्यमवगमय्य एतद्ब्राह्मणप्रतिभानरूपं वरं ददौ। तदनुग्रहात् तस्य मनसा……चत्वारिंशदध्यायोपेतं ब्राह्मणं प्रादुरभूत्। ( ऐ० ब्रा० भाष्ये )। तेन ऐतरेयो महिदासो ब्राह्मण एव।

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्। ३ १७ मनुः।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते। मनुः।

इति निषेधाद् ब्राह्मणस्य शूद्राविवाहो न संभवत्येव।

न च 'अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा (मनुः ९।२३) इति वचनेनाधमयोन्युत्पन्नस्त्रीविवाहोऽनुमत एवेति वाच्यम्, वसिष्ठपत्न्या अरुन्धत्या एवाक्षमालात्वेन तस्याश्च देवहूत्यां कर्दमादुत्पन्नत्वेनाधमयोनिजत्वाभावेऽपि महर्षियोन्यपेक्षया क्षत्रियासमुद्भूतत्वेन स्त्रीत्वेन चाधमयोनिजत्वोपपत्तेः। भागवते—

'अदुष्टापतितां भार्यां यौवने यः परित्यजेत्।
सप्तजन्म भवेत् स्त्रीत्वम्॥' ( पराशरस्मृतिः ४।१६ )

इति पापकृत्त्वेन पापयोनित्वमुक्तम्। 'येऽपि स्युः पापयोनयः। स्त्रियो…' (९।३२) गीतायाञ्च तदेवोक्तम्। 'किं पुनर्ब्राह्मणाः पुण्या' इति ब्राह्मणानां तदपेक्षया पुण्ययोनित्वमुक्तम्।

एतेन ( भारत में जातिभेद पुस्तके ) क्षितिमोहनसेनेन यत् 'ऋषिणा स्वीयायां ब्राह्मणपत्न्यामुत्पन्नान् पुत्रानुत्सङ्गे समुपवेश्य तत्त्वान्युपदिष्टानि। शूद्रायामुत्पन्न ऐतरेयश्चोपेक्षितः' इत्युक्तम्, तन्निर्मूलम्। ऋषिपत्न्या इतरानाम्न्याः शूद्रात्वे प्रमाणाभावात्।

कश्चिदृषिः कण्ववंशप्रसूतात् पर्वतमहर्षेरुत्पन्नः। तस्य रात्रिः इतरा

चेति द्वे पत्न्यौ इति वंशब्राह्मणे (९।५।३) उक्तम्। तत्र यथा रात्रिशब्देन रात्रिनाम्नी स्त्री विवक्षिता तथैव इतरा शब्देनापि इतरानाम्नी स्त्री विवक्षितेति स्पष्टम्। सायणेनापि इतरा नाम्ना ऋषिपत्नी निर्गीतेत्युक्तमेव। लिङ्गपुराणे उत्तरभागे २५८ अध्याये स्पष्टमेतत्।

कश्चिद् द्विजो महाप्राज्ञस्तपस्तप्त्वा कथञ्चन ७।१६।
पुत्रमेकं तथोत्पाद्य संस्कारैश्च यथाक्रमम्।
योजयित्वा यथाकालं कृतोपनयनं पुनः।१७

नहि शूद्रापुत्रस्य संस्कारः संभवति।

अध्यापयामास तदा सच नोवाच किञ्चन।
न जिह्वा स्पन्दते तस्य दुःखितोऽभूद् द्विजोत्तमः। १२
वासुदेवेति नियतमैतरेयो वदत्यसौ।
पिता तस्य तथा चान्यां परिणीय यथाविधि १९।
पुत्रानुत्पादयामास तथैव विधिपूर्वकम्।
वेदानधीत्य सम्पन्ना बभूवुः सर्वसम्मताः २।
ऐतरेयस्य सा माता दुःखिता शोकमूर्च्छिता।
उवाच (मम सपत्न्याः) पुत्राः सम्पन्ना वेदवेदाङ्गपारगाः॥
ब्राह्मणैः पूज्यमानास्ते मोदयन्ति च मातरम्।
मम त्वं भाग्यहीनायाः पुत्रो जातो निराकृतिः॥ २१।२२
ममात्र निधनं श्रेयः न कथञ्चन जीवितम्।
इत्युक्तः सच निर्गम्य यज्ञवाटं जगाम वै॥ २२
तस्मिञ्जाते द्विजानां तु मन्त्रा न प्रतिपेदिरे।
ऐतरेये स्थिते तत्र ब्राह्मणा मोहितास्तदा॥ २४
ततो वाणी समुद्भूता वासुदेवेति कीर्तनात्।
ऐतरेयस्य ते विप्राः प्रणिपत्य यथातथम्॥ २५
पूजां चक्रुस्ततो यज्ञं स्वयमेव जगाम वै।
ततः समाप्य तं यज्ञमैतरेयं धनादिभिः॥ २६
ऋग्वेदान् सदस्याह स षडङ्गान् समाहितः।
तुष्टुवुश्च तथा विप्रा ब्रह्माद्याश्च तथा द्विजाः॥ २७

ससृजुः पुष्पवर्षाणि खेचराः सिद्धचारणाः।
एवं समाप्य तं यज्ञमैतरेयो द्विजोत्तमः॥
मातरं पूजयित्वा च विष्णोः स्थानं जगाम वै। २८-२६

अत्र स्पष्टमैतरेयस्य द्विजोत्तमत्वमुक्तम्। इतरायास्तन्नाम्न्याः ब्राह्मण्याः प्रथमपत्न्याः पुत्रस्य जिह्वाऽस्पन्दन दृष्ट्वा तत्पित्राऽन्यो विवाहः कृतः। प्रथमविवाहश्च सवर्णाया एव भवति। 'सवर्णाग्रे द्विजातीनां' मनुः (३।१२) ब्राह्मणक्षत्रियवश्यानां प्रथमविवाहे कर्तव्ये सवर्णा श्रेष्ठा भवति। तेन महर्षेस्तस्य प्रथमपत्नी इतरा नाम्नी तत्सवर्णैव। तस्यास्च पुत्रो महिदासो ब्राह्मण एव न शूद्रः। स्कन्दपुराणे माहेश्वरखण्डस्य कुमारिका खण्डेऽपि—

'अत्र तीर्थवरं पूर्वमैतरेय इति द्विजः।
सिद्धिं प्राप्तो महाभाग वासुदेव प्रसादतः।' (४२।२७)
इत्यर्जुनप्रश्ने नारदेनोक्तम्-
'अस्मिन्नेव मम स्थाने हारीतस्यान्वयेऽभवत्। २८
माण्डूकिरिति विप्राग्र्यो वेदवेदाङ्गपारगः।' अत्र तत्पिता विप्राग्र्य इति स्पष्टमुक्तम्।

तस्यासीदितरा नाम भार्या साध्वी गुणैर्युता।
तस्यामुत्पद्यत सुतस्त्वैतरेय इति स्मृतः॥ ४२।३०

अत्र इतरा नाम्नी साध्वी भार्य्या तस्य महर्षेरासीदित्यपि स्पष्टम्। एतेन सर्वथाप्यैतरेयस्य ब्राह्मणत्वं सिध्यति।

यदुक्तम् 'जुगुप्सितत्वेन इतरेति शूद्रा नामे'ति तन्न, तथात्वे मतङ्गशूद्रकादीनां शूद्रत्वापत्तेः।

'स च बाल्यात्प्रभृत्येव प्राग्जन्मन्यनुशिक्षितम्।
जजाप मन्त्रं त्वनिशं द्वादशाक्षरसंज्ञितम्।
एवं प्रभावः सोऽभूच्च बाल्ये विप्रसुतस्तदा।' ४२।३१

विप्रसुतत्वमत्रापि स्पष्टम्।

'न शृणोति न वक्त्येव न चाध्येति कथञ्चन।
ततो मूकोऽयमित्येव नानोपायैः प्रबोधितः।

ततो निश्चित्य माण्डूकिर्जडोऽयमिति भारत।
अन्यान् विवाहयामास दारान् पुत्रांस्तथादधे।
पिङ्गा नाम च या भार्या तस्याः पुत्रांश्च जज्ञिरे।
चत्वारः कर्मकुशलाः वेदवेदाङ्गवादिनः।

द्विजैः सर्वत्र पूजितः ब्राह्मणपुत्रत्वादेव भगवद्विष्णुना ऐतरेयः श्रौतेषु कर्मसु प्रवर्त्तितः।

त्वञ्च वत्स श्रौतधर्मान् सम्यगाचर श्रद्धया।
यज यज्ञैरवाप्यैव दारान् नन्दय मातरम्। ४२।२२८-२९
साम्प्रतं प्रतिभास्यन्ति वेदाश्चापठिता अपि।
ततस्त्व कोटितीर्थे च यज्ञे वै हरिमेधसः॥
याहि तत्र भविष्यं ते सर्वं मातुरभीप्सितम्। २३७

पूर्वजन्मनि ऐतरेयः शूद्र आसीदिति तेनैवोक्तम्॥

ऐतरेयः स्वजननीं मुदितो वाक्यमब्रवीत्।
पुराहमभवं शूद्रो भीतः संसारदोषतः॥
परिनिष्ठागतं धर्मं ब्राह्मणं शरणं गतः २४०
स कृपालुर्मम प्राह मन्त्रं वै द्वादशाक्षरम्।
सदेमं जप चेत्युक्त्वा तमहं जप्तवान् सदा॥
तेन जाप्यप्रभावेण ममोत्पत्तिस्तवोदरात्।
जातस्मृतिर्विष्णुभक्तिः स्थितिस्तत्र च सर्वदा॥ २४२
इदानीञ्च प्रयाम्येव यज्ञे ते हरिमेधसः।
गेहाय मातरं प्रोच्य स यज्ञे प्रोक्तवान् द्विजः॥
ततो वेदार्थनैपुण्यैस्तेन ते तोषिता द्विजाः।
आवर्ण्यासनपूजाद्यैः पूजयामासुरङ्ग तम्॥
प्रददुर्दक्षिणां सर्वां हरिमेधाः सुतामपि।
वन्दयित्वा स्वजननीं पुत्रानुत्पाद्य चामलान्॥
इष्ट्वा यज्ञैरैतरेयो द्वादशीव्रततत्परः।
वासुदेवानुध्यानेन मोक्षं पश्चादुपागतः॥ ४२।२५०

विष्णुमन्त्रजपप्रभावेण ब्राह्मणगृहे तत्सवर्णायामितरानाम्न्यां पत्न्यां

तज्जन्म जातम्, तेन तस्य ब्राह्मण्यं निश्चप्रचम्। यद्यपि पौराणिके तच्चरित्रे महीपूजनमहिदास इति नाम च नोल्लिखितम् तथापि अन्यस्यैतरेयस्या-प्रसिद्धत्वात् स एव सः। दुष्यन्तशकुन्तलादि चरितेषु रामादिचरितेषु च वर्णपितृभेदाद्वर्णनभेदः संभवत्येव। एतेन 'इतरस्त्वन्यनीचयोः' अमर-कोषानुसारेण नीचजातीया स्त्री इतरा इत्यपास्तम्, पूर्वोक्तप्रमाणैस्तन्नाम्न्या ब्राह्मण्या एव पुत्र ऐतरेय इति सिद्धत्वात्। तेनैव महिदासेति दासान्तनाम्ना तस्य शूद्रत्वमित्यपि खण्डितम्।'हरिदासस्य राजर्षे' रिति युधिष्ठिरस्यापि भागवते दासशब्दप्रयोगवन्महीदेव्या भक्तस्यैतरेयस्य महिदासशब्द-प्रसिद्धेः। शूद्रगणानां महीसन्तानत्वेन तस्य महिदासत्वमित्यपि निरस्तम्। तत्र प्रमाणाभावात्। ब्राह्मणत्वे प्रमाणस्योक्तत्वाच्च। महीति पृथिव्या अधि-ष्ठात्री देवता तया शिक्षितत्वादैतरेयस्य कथं शूद्रत्वं सिध्यति। 'नमो मात्रे पृथिव्यै' ( यजु० सं० ९।२ ) अत्र मही देवताया उपासकः स न पुत्रः। आख्या-यिकायां सायणेन दिव्यमूर्तिधरा इत्युक्तम्। 'पत्युर्नो यज्ञसंयोगे' इति रीत्या यज्ञसंयोग एव पत्नीशब्दनिष्पत्तिः। शूद्राया यज्ञसंयोगाभावात् पत्नीत्वमेव न संभवति। ततश्च शूद्रापत्न्यामुत्पन्न ऐतरेय इति व्यपदेशो नोपपद्यते। 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति श्रुत्या शूद्रस्य यज्ञानधिकारबोधनात्। भूमिदेवताया दिव्यमूर्तिधरत्वन्तु 'भावं तु बादरायणोऽस्ति हि' (१।३।३३) 'अभिमानि व्यपदेशस्तु' सूत्रे तदीयशाङ्करभाष्ये च देवतानां विग्रहवत्त्वं साधितमेव। 'मृदब्रवीत्' 'आपो अब्रुवन्' इति चेतनास्तु अधिष्ठातारो देवा-त्मानो मन्त्रार्थवादादिव्यवहारात् व्यपदिश्यन्ते। धातोः कर्मणः समानकर्तृ-कादिच्छायां वा इति पा० सूत्रादिच्छायां सन् भवति। अश्मा लुलुठिषते, कूलं पिपतिषति, इत्यत्राश्मादीनामचेतनत्वेनेच्छाया असंभवात्। 'आशङ्कायामचेतने चूपसंख्यानम्' इति 'तत्पतनशङ्कायामत्र सन् प्रत्ययो बोध्यः। अन्तेऽथवा सर्वं चेतनावत्। एवं त्वाङ्-कंसकाः सर्पन्ति। शिरीषोऽयं स्वपिति। सुवर्चला आदित्यमनुपर्य्येति। ऋषिः पठति। शृणोत ग्रावाणः ( तै० सं० १।३।१३।१ ) ( महाभाष्यम् ३।१।१।७ ) 'ऋषिर्वेदः सर्वभावानां चैतन्यं प्रतिपादयति। 'आत्मावृत्तदर्शनेनेति भावः' ( प्रदीपः )

'सर्वत्र परिणामदर्शनेन चेतनाधिष्ठानं विना च तदसंभवात् सर्वस्य

तदधिष्ठितत्वं ज्ञायते' (उद्योतः)। एतेन पृथिव्याधिष्ठात्र्या देवताया एव महीत्वम्। तस्याश्च दिव्यमूर्तिधारणसामर्थ्यम्। यथा कुमारीशब्दस्याविवाहितापरत्वेऽपि राजकुमारी इति नामान्तर्गतत्वेन नाविवाहिता परत्वम्, यथा वा गुप्तान्तशब्दस्य वैश्यपरत्वेऽपि अभिनवगुप्ताचार्येति नामान्तर्गतत्वेन न वैश्यपरत्वम्, यथा वा सत्यात् शर्म यस्य स सत्यशर्मा क्षत्रियोऽपि भवति, धर्मो वर्म यस्य स धर्मवर्मा ब्राह्मणोऽपि भवति, अभिनवाद्गुप्त इत्यभिनवगुप्तो ब्राह्मणोऽपि भवति, तथैव मह्या उपासको महीदासोपि ब्राह्मणो भवति। चाणक्येन 'ब्राह्मणोऽहं विष्णुगुप्तः' इत्युक्तम्। स ब्राह्मणत्वा देवराज्ञः श्राद्धे निमन्त्रितः। चन्द्रगुप्तस्तु गुप्तान्तनामापि मौर्य्यः शूद्र एव। केषाञ्चिद्रीत्या क्षत्रियः। यमस्य लेखकः चित्रगुप्तो न वैश्यः, तस्मात्सम्पूर्णनाम्नः पृथगेव शर्म-वर्म-गुप्त-दासादि नामप्रयोगेणैव ब्राह्मणत्वादिकं व्यज्यते न नामान्तर्गतैः शब्दैः। चतुरक्षरो महिदासस्तु नामैव। यथा दासान्तोऽपि कालिदासशब्दो ब्राह्मणपरो न शूद्रापरस्तथैव प्रकृतेऽपि बोध्यम्। दिवोदासस्य सुदासादीनां क्षत्रियत्वमेव। श्रूयते दिवोदासस्य नाम। दिवोदासः कश्चिद्राजर्षिरिति बालमनोरमा। प्राचीनेषु वसिष्ठमन्वादिषु शर्मवर्मादिप्रयोगाभावेऽपि यथा तेषां ब्राह्मणादित्वं तथैव महिदासस्य शर्मान्तत्वाभावे ब्राह्मणत्वमेव।

यदुक्तम् 'मातृनाम्ना प्रसिद्धत्वादैतरेयस्य शूद्रत्वम्' तदपि न, बृहदारण्यके वंशब्राह्मणे गौतमीपुत्रः, भारद्वाजपुत्रः, आत्रेयीपुत्रः, शाण्डिलीपुत्र इति मातृनामप्राधान्येऽपि यथा तेषां न शूद्रत्वं तथैव प्रकृतेऽपि ज्ञेयम्। स्त्रीप्राधान्या वंशा इति मातृनाम्ना निर्देशः 'स्त्रीप्राधान्या'दिति शाङ्करभाष्यम्।

महाभाष्ये पाणिनिर्दाक्षीपुत्रत्वेन, पतञ्जलिश्च गोणिकापुत्रत्वेन प्रख्यातौ। एवं सौमित्र-गाङ्गेय-कौन्तेय-सौभद्रादयो मातृनाम्ना प्रसिद्धाः। ते तु क्षत्रियाः नतु शूद्राः।

वस्तुतस्तु यत्र पुरुषस्यानेका भार्य्या भवन्ति तत्र भेदज्ञानार्थं मातृनाम्ना पुत्राः प्रसिध्यन्ति। तेनैव यथा काश्यपस्य पत्न्यामदित्यां जाता आदित्याः आदितेया वा, दित्यामन्यस्यामुत्पन्ना दैत्याः, विनताया वैनतेयाः, कद्र्वाः काद्र-

वेयाः, दनुपुत्रा दानवाः, प्रसिद्धास्तथैव पर्वतमहर्षेः प्रथमायां पत्न्यामितराया-मैतरेयः प्रसिद्धः।

यदुक्तं पितृनामाप्रसिध्या तस्य शूद्रात्वमिति तदपि न दासी पुत्रादेस्तथा त्वापत्तेः पुराणानुसारेण माण्डूक्यपरनामकस्य पर्वतस्य तत्पितुः प्रसिद्धेश्च।

यैस्तु गुणकर्मानुसारेण वर्णव्यवस्थाऽङ्गीक्रियते तैस्त्वैतरेयस्य शूद्रत्वं न वक्तुं शक्यते, तस्य ऐतरेयब्राह्मणाविष्कारकत्वेन ब्राह्मणोत्तमत्वस्यैव सिद्धेः। कैश्चापकृष्टैर्गुणैः कर्मभिश्च तस्य शूद्रत्वमिति साधयितुं शक्यते।

जन्मना वर्णसिद्धान्ते-कस्माच्छूद्रात् कस्याञ्च शूद्रकन्यायां तज्जन्म इत्यपि तैर्न साधयितुं शक्यते। तस्मात्-भाष्यपुराणाद्युक्त्यनुरोधेन तस्य सुतरां ब्राह्मणत्वमेव। इतराया नीचत्वमपि प्रमाणशून्यम्। इतराया नीचत्वे सर्वनामत्वे इतरस्या अपत्यमिति व्युत्पत्तिः स्यात्। भाष्यकारैश्च इतराया'अपत्यमित्युक्तम्। नीचत्वमपि किं तस्या इति न प्रमाणसिद्धम्। इतराया नीचवाचकत्वे 'एतद्धस्म श्राह महिदास ऐतरेयः' इति गौरवबोधकवाक्ये तत्प्रयोगोऽसंगत एव स्यात्। यदस्माभिरुक्तं तदेकेन नीचस्त्रीपुत्रेणोक्तमिति विपरीतमेवापद्येत। तस्मान्ने-तराशब्दो नीचार्थकः किन्तु संज्ञापरस्तत एव सर्वनामकार्य्याभावः पुराण-भाष्याद्यनुरोधश्च सुरक्षितः स्यात्।

किञ्च 'अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः।
अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः' (मनु० ३।१३६)
ज्यायांसमनयोर्विद्याद् यस्य स्यात् श्रोत्रियः पिता'।
(मनु०३।१३७)

अत्र पितुरुत्तमत्वेऽपि नोत्तमत्वमुक्तम्। पितुर्नीचत्वे पुत्रस्योत्तमत्वेऽपि नोत्तमत्वम्। वेदेऽपि 'ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यम्' (यजुर्वेद वा.सं. ७।४६) आग्नीध्रं प्रति यजमान आह-अहमद्य पितृमन्तं पैतृमत्यं प्रशस्तपितृपिता-महादिमन्तं भवन्तं ब्राह्मणं लभेयेति। 'मातृमान् पितृमानाचार्यवान् पुरुषो वेद' (वृ.अ. उ.) नहि कश्चिदपि पितृमातृविहीनो भवति। तस्मादत्र प्राशस्त्यार्थे मतुपप्रत्ययो बोध्यः। प्रशस्तः पिता अस्य इति पितृमान्, प्रशास्ता माता अस्य इति मातृमान्, पितृमन्तमिति मन्त्रे तु माता च पिता च पितरौ, इत्येकशेषत्वेन पितृमच्छब्देन प्रशस्तमातृत्वं प्रशस्तपितृत्वं च विवक्षितम्। पैतृमत्यमित्यनेन

प्रशस्ताः पितरः पितामहादयो यस्य तमिति व्युत्पत्त्या प्रशस्तपितृपितामहादित्वेन ब्राह्मणस्योत्तमत्वं बोध्यते। नीचमातृत्वेन तु निन्दैव भवति न प्रशंसा। तथात्वे तन्मतस्योपेक्षणीयत्वापत्तेः। नामग्रहणमेव पूजार्थं भवति। यथोक्तम्-'वासुप्यापिशलेः' ( पा० ६।१।९२ ) आपिशलिग्रहणं पूजार्थम्, तथैवारण्यकेऽपि महिदास ऐतरेय इति नामग्रहणं पूजार्थमेव मन्तव्यम्। तच्च नीचपुत्रत्वे व्यर्थमेव स्यात्।

'सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते। ( मनु० २।१४५)

सम्मानार्थमेव मातृनामग्रहणमपि भवति। न चस्त्रीपुत्रत्वोक्त्या न मातृसंमानं भवति।

यदुक्तम् 'एतद्धस्म तद्विद्वान् आह महिदासः' ( ३।१६।७ ) अत्र ऋषित्वाचार्यत्वानुक्त्या ब्राह्मणत्वाभावो बोध्यत' इति तन्न, तत्र यज्ञतत्त्वबोद्धृत्वबोधनाय शत्रन्तविद्वत्प्रयोगस्यैव युक्तत्वेनाब्राह्मणत्वासिद्धेः। गुणकर्मानुसारि-वर्णत्वे विद्वच्छब्देन-ब्राह्मणत्वमेव सिद्ध्यति न शूद्रत्वम्।

'न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते। (मनु० ३।१४)

इति शूद्राभार्याया निषिद्धत्वेनापीतराया न शूद्रात्वम्।

# वेदाध्ययनाधिकारः

कैश्चित्त्वेतैः शूद्राणां वेदेऽधिकारः साध्यते। तत्तु निराधारमेव। न च तेषामधिकारादानेन पक्षपातित्वमेवेति वाच्यम्, चतुर्णामृषीणामेव परमात्मना चत्वारो वेदाः प्रत्ता इति वादिनामपि परमात्मनः पक्षपातित्वाविशेषात्। येषां पुण्यमासीत्तेषामेव तत्प्रदानेन वैषम्यमिति चेत्प्रकृतेऽपि पूर्वपुण्यानुसारेणैव त्रैवर्णिकेषु जन्म जायते। ततः पुण्येनैवात्रापि वेदाधिकारित्वे पक्षपातासिद्धेः। आधुनिकैरपि स्पष्टमुक्तम् 'दासानामनुपयुक्तमतीनां मन्वादिकर्तृकं वेदानाधिकारित्वविधानम् अनुग्रहार्थमेव।' (ऐतरेयालोचने पृ० १७)

## वाल्मीकेर्ब्राह्मणत्वसाधनम्।

वाल्मीकिसम्बन्धेऽपीदानीन्तनरन्त्यजविशेषाणां स पूर्वज इत्युच्यते, तदपि न, 'कृतवान् प्रचेतसः पुत्रस्तद् ब्रह्माप्यन्वमन्यत (वाल्मकिरामायणे ७।१११।११) इति बाल्मीकेः प्रचेतसः पुत्रत्वमुक्तम्। प्राचेतसोऽपि तस्यैव संज्ञा। 'मुनिः प्राचेतसस्तदा (वा० रा० ७।९३।१६) इति। प्रचेतसो ब्रह्मपुत्रत्वञ्चोक्तम्। अश्वमेधसमये बाल्मीकिना स्वयमेव स्वपरिचयो दत्तः। 'प्रचेतसोऽहं दशमः पुत्रो राघवनन्दन। न स्मराम्यनृतं वाक्यम्।" (७।९६।१८) अध्यात्मरामायणेऽयं श्लोकः। अध्यात्मरामायणे तस्य संगतिपरिणामो वर्णितः –

> "अहं पुरा किरातेषु किरातैः सह वर्धितः।
> जन्ममात्रं द्विजत्वं मे शूद्राचाररतः सदा॥
>
> (आध्यात्मरा० ६।६५)
>
> 'शूद्रायां बहवः पुत्रा उत्पन्ना मेऽजितात्मनः।
> ततश्चौरैश्च संगम्य चौरोऽहमभवं पुरा॥

दुर्वृत्तोऽयं द्विजाधमः' इत्युक्त्यापि तस्य द्विजत्वमेव बोधितम्। 'वाल्मीकिर्यस्य चरित चक्रे भार्गवसत्तम।" मत्स्यपुराणे (१२।५१) तस्य भार्गवत्व मुक्तम्। ऋक्षोऽभूद्भार्गवस्तस्माद् बाल्मीकिर्योऽभिधीयते। 'भार्गवपदस्य प्राचेतसत्वेनास्यापि भार्गवत्वम्। भृगोर्वरुणपुत्रात्वात् इति नागेशः। भृगोर्भ्राता

इत्यन्ये। स्कन्दपुराणे ( ५।१।२४ ) ( ७।१।२७८ ) सुमतिब्राह्मणपुत्रो वाल्मीकिरित्युक्तम्। भागवतेऽपि—

चर्षणी वरुणस्यासीद्यस्यां जातो भृगुः पुनः।
वाल्मीकिश्च महायोगी वल्मीकादभवत् किल॥ ( ६।१८।४ )

भृगोर्ब्रह्मपुत्रत्वेऽपि वरुणात् पुनर्जन्म। वाल्मीकिश्च तस्मात्पुनर्जातः। एतौ वरुणस्यासाधारणौ पुत्रौ इति श्रीधरीव्याख्या। वल्मीकस्यापत्यमिति व्युत्पत्त्या गोणीपुत्रादिवदस्य गौणं नाम। यथा शेषावतारः पतञ्जलिः गोणी नामकस्त्रीहस्तसम्बन्धात् गौण्या वृत्त्या गोणीपुत्र आख्यायते, तथैव वल्मीकप्रभवत्वेनास्य वाल्मीकित्वमुक्तम्, 'वल्मीक इति ऋषिविशेषस्य संज्ञा वा, इति रामाभिरामी टीका ( १।१।१ ) दुर्वृत्तत्वेनैव क्वचिच्चाण्डालत्वमुक्तम्, नतु जन्मना, पूर्वोक्तरामायणादिवचनविरोधात्।

'देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः।
पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः स्मृता॥
( अत्रिस्मृतिः ३८१ )

इति रीत्या चाण्डालाचाररतस्य वाल्मीकेश्चाण्डालत्वं ब्राह्मणस्यैव सतो निन्दार्थं गौण्या वृत्त्योक्तम्। मत्स्यपुराणरीत्या वरुणवीर्यस्य वल्मीकनिपतित्वेन वरुणपुत्रत्वमेव तस्य।

भक्तनाभादासविरचितभक्तमालीयप्रियादासीयटीकायां एकषष्टितमस्य भक्तस्य वाल्मीकेः ब्राह्मणस्यैव सतः भिल्लपालितत्वे भिल्लयुवतीसंसर्गेण च दुर्वृत्तता सप्तर्षिसंसर्गेण चोद्धारो वर्णितः। अन्यश्च द्विषष्ठितमो वल्मीकिस्तथैवोक्तः, तस्य च श्वपचत्वमुक्तम्। सर्वथापि रामायणकर्त्ता वाल्मीकिर्ब्राह्मण एवासीत् पूर्वजन्मनि तस्य व्याधत्वं तु स्कन्दपुराणे वैष्णवखण्डे वैशाखमाहात्म्ये २१ अध्याये उक्तम्। वाल्मीकिर्भूत्वाऽन्यजन्मनि स रामायणमकरोत्। वस्तुतस्तत्र ब्रह्मपौत्र एव वाल्मीकिस्तत एव ब्राह्मणः। नारदेन सार्द्धं तस्यविशेषसम्बन्धो रामायणे दृश्यते।

## जानश्रुतिवृत्तान्तः

एवमेव ब्रह्मसूत्रेऽपशूद्राधिकारणे 'अहहारे त्वा शूद्र' ( छान्दोग्य० ४।२।३ ) इति रैक्वसम्बन्धेन जानश्रुतेः शूद्रत्वमाशङ्क्यते, तदपि न, साहित्यसंगीतकला-

विहीनः साक्षात्पशुः पुच्छविषाणहीनः" इत्यादौ यथा साहित्यादिज्ञानशून्यस्य पशुत्वमौपचारिकमुक्तम् तथैव संवर्गविद्याहीनस्य जानश्रुतेः शूद्रत्वमौपचारिकमुक्तम्। यथा तत्र पशुसदृश एव पशुशब्दार्थः तथैवात्र शूद्रशब्दस्य शूद्रसदृश एवार्थः। अतोऽत्र शूद्रशब्दो निन्दार्थो गौण एव। अत एव यौगिकोऽयं शूद्रशब्दो न रूढः, शुचा अभिदुद्राव इति शूद्रः हंसवचनात् संवर्गविद्याहीनत्वात्तस्य शुक् शोक उत्पन्नः। तेनैव संवर्गविद्याप्राप्त्यर्थं सोऽभिदुद्राव। अत एव वच्छब्दप्रयोगाभावेऽपि वच्छब्दो ज्ञातव्यः। अत एव 'नहि वतिमतिदेशो गम्यते' इत्याशङ्क्य महाभाष्यकारेणोत्तरितम् अन्तरेणापि वतिमतिदेशो गम्यते तद् यथा एष ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह तेन मन्यामहे ब्रह्मदत्तवदयं भवतीति।' १।१।५।२२ एवमेव ४।१।४ सूत्रे महाभाष्येऽपि। अतस्मिन् स इत्यस्यानेकान्युदाहरणानि उक्तानि। उपनिषद्वाक्यव्याख्यानावसरे शङ्करभागवत्पादैरुक्तम् 'हंसवचनश्रवणात् शुक् शोक एनमाविवेश। तेनासौ शुचा आद्रवति श्रुत्वा रैकस्य महिमानं आद्रवति इति ऋषिरात्मनः परोक्षज्ञतां दर्शयन् शूद्र इत्याह—'

हंसवाक्यादात्मनोऽनादं श्रुतवतो जानश्रुतेः शुक् उत्पेदे। तां ऋषी रैक्वः शूद्रशब्देनानेन सूचयाम्बभूव आत्मनः परोक्षज्ञताख्यापनाय इति गम्यते, जातिशूद्रस्यानधिकारात्। हंसवचनेन शुचमभिदुद्राव, शुचावाऽभिदुद्रुवे, शुचा वा रैक्वमभिदुद्राव, इत्यवयवार्थः संभवति, रूढ्यर्थस्य चासंभवात्। दृश्यते चायमर्थोऽस्यामाख्यायिकायाम्। अपरस्मिन्सूत्रे च भाष्यम्। इतश्च न जातिशूद्रो जानश्रुतिः, यत्कारणं प्रकरणनिरूपणेन क्षत्रियत्वमस्य। उत्तरत्र चैत्ररथेन अभिप्रतारिणा क्षत्रियेण समभिव्याहारात् 'लिङ्गाद् गम्यते। 'तस्माच्चैत्ररथिर्नाम एकः क्षत्रपतिरजायत' इति क्षत्रपतित्वावगमात् क्षत्रियत्वमस्यावगम्यते। तेन क्षत्रियेण अभिप्रतारिणा सह समानायां विद्यायां संकीर्त्तनं जानश्रुतेरपि क्षत्रियत्वं सूचयति। प्रेषणादैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिः।' अतो न शूद्रस्याधिकारः। उपनीतस्यैव वेदाधिकारं ब्रुवत् शास्त्रमनुपनीतयोः स्त्रीशूद्रयोर्वेदाध्ययनमनिष्टप्रापकं सूचयति। कथं तर्हि तदुपायावगमः पुराणादिभिरिति ब्रूमः। अतएवोक्तम्

'स्त्रीशूद्रद्विजबन्धूनां त्रयो न श्रुतिगोचरा।

इति भारतमाख्यानं कृपया मुनिना कृतम्।'

अतएव यदुच्यते "ब्रह्मचर्य्येण कन्या युवानं विन्दते पति'मिति वेदाध्ययनरूपं ब्रह्मचर्यं कन्याया उक्त' मिति तत्तुच्छम्, उत्तरार्धविरोधात्। 'अनड्वान् ब्रह्मचर्य्येणाश्वो घासं जिगीर्षति।' (अ० सं० ११।५।१८) नह्यनुडुहोऽश्वस्य वा वेदाध्ययनं संभवतिः तस्मादुपस्थसंयमरूपमेव ब्रह्मचर्यमितीह विवक्षितम् तस्यैव सर्वत्र संभवात्।

केश्चित्तु वात्स्यायनरीत्या वृषाश्वसंज्ञकौ पुरुषाविह गृह्येते। तौ ब्रह्मचर्येणैव घासं भोग्यपदार्थं प्राप्तुमिच्छतः।

'तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।

१।२।१३ (याज्ञवल्क्यस्मृतिः)

'नवैताः कर्णवेधान्ता मन्त्रवर्जक्रिया स्त्रियाः।

विवाहोमन्त्रतस्तस्याः।' (या. स्मृति १।१५-१६)

'स्त्रीणाममन्त्रतस्तानि विवाहस्तु समन्त्रकः' (१५३ १ अग्निपुराणे)

'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।' (मनु० २।६७)

'एताः क्रियाः स्त्रीणाममन्त्रकाः तासां समन्त्रको विवाहः।' (बृहद्विष्णुस्मृतिः २५।१३।१४) सायणोऽपि 'किं बहुना पशुजातिरपि ब्रह्मचर्य्येण स्वाभिलषितं फलं लभते, इत्याह। अनड्वान् अनोवहन् पुङ्गवः ब्रह्मचर्य्येण ऊर्ध्वरेतस्त्वादिना धर्मेण अनोवहनादिकं स्वकीयं कार्यं निर्वर्तयन् उत्कृष्टं पतिं लभते। तथा अश्वो ब्रह्मचर्येण घास भक्षणीयं तृणादिकं जिगीर्षति भाक्षितुमिच्छति। अन्यत्र च स एव धर्मब्रह्मज्ञानार्थी वेदाधिकारी यश्च त्रैवर्णिकः पुरुषः। स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावे नाध्ययनराहित्यात् वेदेऽधिकारः प्रतिबद्धः। धर्मब्रह्मज्ञानं तु पुराणादिमुखेन उत्पद्यते। तस्मात्त्रैवर्णिकपुरुषाणामेव वेदमुखेनार्थज्ञानाधिकारः।

दारसंग्रहकर्मणि अधीतसाङ्गोपाङ्गवेदां कन्यां प्रयच्छेत् गृहणीयाद्वेति नैवं विधानं दृश्यते। 'अस्पृष्टमैथुनां भार्य्यां विन्देत्' (वशिष्ठस्मृतिः ८।१) इति तु लभ्यते। तस्मादुपस्थविग्रहलक्षणम् ब्रह्मचर्य्यमिह विवक्ष्यते,न वेदाध्ययनलक्षणं ब्रह्मचर्य्यं विवक्षितम्।

यदुक्तम् 'वृषभाश्वसंज्ञकौ पुरुषावेवेह विवक्षितौ।' इति तद् प न, निष्प्रयोजनत्वात्। तादृग्विवक्षणेऽपि नेष्टसिद्धिः। वृषोऽश्वो वा पुरुषो वेदाध्ययनलक्षणेन ब्रह्मचर्य्येण भोग्यं पाचयितुं समर्थौ उपस्थसंयमलक्षणेन वा? नाद्यः, निरुपपत्तिकत्वात्। वेदाध्ययनमन्तराऽपि शूद्रादयो भोग्यं पाचयन्त्येव। शूद्रादिकन्या अपि वेदाध्ययनमन्तरा युवानं पतिं विन्दन्त्येव। उपस्थसंयमलक्षणेन ब्रह्मचर्येण च सर्वविधपुरुषा भोग्यं पाचयन्ति। कन्याश्च तेनैव स्वास्थ्यसौन्दर्य्यलावण्यादिलाभात् युवानं पतिं विन्दन्ति सोढुं च शक्नुवन्ति। अन्यथा रोगादिग्रस्तत्वात् पुरुषाः कन्याश्च न स्वस्वाभीष्टं साधयितुं शक्नुवन्ति।

केचित्तु 'बृहद्देवता (२।८४-८६) रीत्या गोधा, विश्ववारा, घोषा, अपाला रोमशा, सूर्य्या, ब्रह्मजाया जुहू अदितिः, इन्द्राणी-सामा-उर्वशी-लोपामुद्रा, यमी, रात्रिप्रभृतयोऽनेकाः ऋषिकाः मन्त्रद्रष्ट्र्यो ब्रह्मवादिन्यश्चासन्। तेन स्त्रीणामपि वेदाध्ययनाध्यापनाद्यधिकारः सिध्यत्येवे'ति तदपि न, ऋषीणां मनुष्यभिन्नत्वेन तच्चरिते मनुष्यानधिकारात्। 'मनुष्यदेवऋषिपितृगणाः प्रजापतेर्मानसा आख्याता' इति प्रशस्तपादीयभाष्यानुसारेण मनुष्यभिन्नत्वेन देवर्ष्यादिगणनादर्शनात् 'देवा मनुष्या असुरा पितरः ऋषयः' (अथर्व सं० १०।१०।२६) 'अथातर्पय चतुरश्चतुर्धा देवान् मनुष्यान् असुरान् उत ऋषीन्' (अ० सं० ८।९।२४) 'मनुष्या वा ऋषिषूत्क्रामत्सु' (निरु १३।१२)

ऋषीणां देवतानाञ्च मानुषाणाञ्च सर्वशः।
पृथिव्यां सहवासोऽभूद् रामे राज्ञि प्रशासति॥'
(म० भा० द्रोणपर्व ५९।१२)

इत्यादिनानाविधानि प्रमाणानि मनुष्यभिन्नानृषीन् बोधयन्ति। अतएव मानुषायुरपेक्षया तेषामृषीणामायुरैश्वर्य्यादिवैशिष्ट्यं विज्ञैरनुमन्यत एव। तेनैव ऋषिकाणां दृष्टान्तेन मानुषीणां न वेदाध्ययनाधिकारसिद्धिः। ऋषिकाभिरपि वेदा अधीता इति न सिद्ध्यति। अध्ययनमन्तरैव जन्मान्तरीयसंस्काराद् देवानुग्रहाद्वा तासां सूक्तमन्त्रादिप्रतिभानात्तासामृषित्वम्। तदेवोक्तं दुर्गाचार्यैः 'अनधीतमेव तत्त्वतो ददृशुः' (निरुक्त० २।११।१) नैतावताऽपि सर्वासां वेदाध्ययनाधिकार-

सिद्धिः। न च ताभिर्गुरु मुखाद्वेदाध्ययनं कृतम्, न वा ताभिर्वेदमन्त्रा निर्मिता किंतु केचिन्मन्त्रा मन्त्रांशा वा तासां प्रतिभाताः। यथा वाल्मीकेरबुद्धिपूर्वकमेव 'मा निषाद प्रतिष्ठां त्वमित्यादि प्रथमं काव्यं ब्रह्मणोऽनुग्रहात् स्फुरितम्। गुह्यानामिव विज्ञानमनवस्था सहिष्णुता। यथा वा श्रीज्ञानेश्वरस्य हस्तन्यासादेव महिषोऽपि वेदमन्त्रमुच्चारितवान् तथैव सुप्तप्रतिबुद्धन्यायेन कासाञ्चिदेव वेदप्रतिभानं जायते। ऋग्वेदीय ( ८।६७।५ ) सूक्तं जालगतानां मत्स्यानां मुखेभ्यः प्रादुर्भूतम्। जीवान्तो अभिधेतन मत्स्यानां जालमापन्नामेतदार्षं वेदयन्ते—( नि० ६।२७।१)

'जालेन बद्धा बहवो हि मत्स्याः' ( ८।२६ ) अर्थानुक्रमणी बृहद्देवतायाञ्च ( ६।२९।६ ) तदेवोक्तम्। यथा न तावता मत्स्यानां वेदाध्ययनाधिकारसिद्धिस्तस्तथैव कासाञ्चित् कयाचिद्रीत्या सूक्तमन्त्रादिप्रतिभानेऽपि न सर्वासां वेदाध्ययनाधिकारसिद्धिः।

एवमेव सरमायाः शुन्याः ऋषित्वेनापि नह्यन्यासां शुनीनां वेदाधिकारः सिद्ध्यति। सरमा सुशिक्षिता कुक्कुरी इति श्रामश्रमिमहाशयेनापि स्वीकृतम्। ( ऐतरेयालोचने पृ-३१ )

केचित्तु-अत्र ब्रह्मवादिनीनामुपनयनं अग्नीन्धनं स्वगृहे भिक्षा चेष्यते हारीतस्मृतिश्चैतत्समर्थयते।

पुराकल्पे तु नारीणं मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवाचनं तथा॥'

पराशरमाधवीय आचारकाण्डे ( १।२ ) पृ० ८२ ) उद्धृतैर्वचनैः स्त्रीणां वेदाध्ययनाधिकाविकारः साध्यते। तथाहि-भीमा जाया ब्राह्मणस्योपनीता' ( ऋ. सं. १०।१०९।४ ) इत्यत्र उपनीतेति जायाया विशेषणम्। सद्यो बधूनामपि उपस्थिते विवाहः विवाहकाले कथञ्चिदुपनयनमात्रं कृत्वा कार्यो इति हारीतसंहितायाम्। नहि शूद्रसमाः स्त्रियः। नहि शूद्रयोनौ ब्राह्मणक्षत्रिय-वैश्याः जायन्ते। "तस्मात् छन्दसा स्त्रियः संस्कार्य्याः।" २१०।२० पराशरमाधवः ) । गोभिलसूत्रे च 'यज्ञोपवीतिनीम्' ( २।१।१९ ) इति विशेषणेनापि तदेव गम्यते। म.म. शिवदत्तेनापि सिद्धान्तकौमुद्यां जैमिनीयन्यायमालादिप्पण्यामपि तदेवोक्तम् यज्ञोपवीतवत् कृतोत्तरीयामिति नार्यस्तस्य

णार्थत्वात्। पारस्करगृह्यसूत्रकाले वैदिकमर्यादायाः किञ्चिल्लोपादुपनीतां अनुपनीताश्चे' त्युक्तम्, तन्न, सूक्तमन्त्रादिद्रष्ट्रीणामेव ब्रह्मवादिनीत्वेन तासा दृष्टान्तेनान्यासां तदधिकाराभावस्योक्तत्वात्। हारीतस्मृतेः पद्यमयत्वात्तत्र गद्याभावेनोक्तवाक्यस्य तत्रासंभवात्। तथापि हारीतधर्मसूत्रेऽन्यत्र वा तथाभूतम् वचनमासीदिति पराशरमाधवीयपूर्वपक्षेण ज्ञायते।

ननु असंस्कृताया कन्यायाः कुतो लोकास्तवानघ' इति भ० भा० शल्यपर्वस्थ-(५२।१०) वचने विवाहरहिताया उत्तमलोकाभाव उक्तः। सोऽनुपपन्नः, विवाहरहितानामपि ब्रह्मवादिनीनामुपनयनाध्ययनादिभिरुत्तमलोकसंभवात्। अत एव हारीतेनोक्ताः द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्यो वध्वश्चेति चेन्नैवम् तस्य कल्पान्तरविषयत्वात्। तथा च यमः 'पुराकल्पे कुमारीणामित्यादि' रीत्याऽपि ब्रह्मवादिनीनां यावज्जीवं ब्रह्मचर्यमभिमतम्। तच्च न सर्वसाधारणीनां कृते संभवति।

वस्तुतस्तु नियताः सूक्तद्रष्ट्र्य एव ब्रह्मवादिन्यः। ताश्चादित्याः सिद्धा एव। अतएवोक्तं सायणेन-'तस्य कल्पान्तरविषयत्वात् नेदानींतनी सा कथा। यथा वेदमन्त्रास्तथा ऋषयोऽपि नियताः नहीदानीं कश्चिदृषिर्भवति।' विदुषामिदमपि मतं यत् सद्योवधूव्यतिरिक्तानां ब्रह्मवादिनीनां यावज्जीवं ब्रह्मचर्यं विवाहाभावश्च। तासां पूर्णतासिद्ध्यर्थम् कल्पारम्भे एव ब्रह्मवादिनीनामाविर्भावः। तदानीञ्चेन्द्रब्रह्महत्यांशरूपदोषेण रजस्वलात्व नारब्धं स्त्रीणाम्। अपवादरूपेणान्यदापि क्वचित्कासाञ्चिदाविर्भावः। किञ्चिदपूर्णानां स्त्रीणां पूर्णप्रकृतिकेन पुरुषेणोद्वाहः। रजोहीनाः पूर्णाश्च ब्रह्मवादिन्यो भवन्ति। ताश्च न मनुष्ययोनयः, किन्तु ऋषियोनय इत्यप्युक्तमेव। तासां पतिर्न भवति क्वचित्तदुक्तिस्तु रक्षकाभिप्रायेणैव।

'प्रावृतां यज्ञोपवीतिनी' मित्यस्यार्थस्तु ताः पूर्वसूत्रैरेव स्पष्टं भवति। 'या अकृन्तन्नवयन्' इत्येतया ऋचा (२।१।१८ गो० सू०) इति या अकृन्तन इति मन्त्रमुक्त्वा वरो वध्वै अहतं वस्त्रं उपवस्त्रं) ददाति। सा च दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्ये अंशे प्रतिष्ठापयति। दक्षिणकक्षमन्ववलम्बं भवति। एव यज्ञोपवीती भवति (१।२।२) एतदेव तस्या यज्ञोपवीतिनीत्वम्। न केवलं वामस्कन्धावलम्बिदक्षकक्षमनवलम्बिसूत्रधारणेनैव यज्ञोपवीती

भवति । वस्त्र कुश-रज्वोरपि तथाकरणे । यज्ञोपवीतित्वस्य यज्ञोपवीत कुरुते वस्त्रं वा कुशरज्जुमेव (१।२।१ गो० सू०) इत्यादिनोक्तत्वात् ।

वैखानसगृह्यसूत्रेऽपि 'या अकृन्तन' इति 'वस्त्र' इति वस्त्रमेवोक्तं न यज्ञोपवीतम् । गोभिलगृह्यकारिकायामपि 'पतिः कन्यां परिदध्यात् अधौत-नव्यवाससा अकृन्तन इति पठन् द्वितीयेनापि वाससा प्रावारयेत् । परि-धत्तेति मन्त्रेण वोपवीतवत् । सोमो ददत् पठेन्मन्त्रम् वासो विन्यासविशेषे यज्ञोपवीतमित्यापस्तम्बे हरदत्तः । 'दक्षिणं बाहुमुद्धरते अवधत्ते सव्यम् इति यज्ञोपवीतम् (तै० आरण्य०) आपस्तम्बधर्मसूत्र० (१।१५।१) दक्षिणं बाहुमूर्ध्वं धृत्वा सव्ये बाहौ लम्बमाने सति यत्वेष्टनं तद् यज्ञोपवीतम् (२।१।१) 'कस्तु इव वासो विन्यासविशेषमात्रं गुणो भवति उपवीत नाम मीमांसा' इति (३।१।२१ शाबरे । गोभिलसूत्रे भाष्यकृत्र 'प्रावृतां कृतोत्तरीयाम' कथं प्रावृतां यज्ञोपवीतवत् कृतोत्तरीयाम् स्नातामहतेन आच्छादयित्वा अकृन्तन्निति (१।३।६) खादिरगृह्यसूत्रम् । यज्ञोपवीतवत् वाधूयं वस्त्रं बध्नाति' (२।६८) कौशिकसूत्र इत्यादि प्रमाणान्यपि पूर्वोक्तव्याख्यानुसारीण्येव ।

एवमेव 'भीमा जाया ब्राह्मणस्योपनीता' इत्यपि न ब्राह्मणजायाया उप-नयनविधानपरम्, जायते पुत्ररूपेणास्यामिति जाया इति व्युत्पत्त्या पुत्रवत्या एव जायात्वोक्त्या तस्यामवस्थायां कन्योपनयनवादिनां मतरीत्या नोपनयनं संभवति । भीमेति विशेषणस्य चासंगतेः । नहि जायाया उप-नयनेन भीषणतोपपद्यते । तस्मादत्र सायणानुसारिणी व्याख्यैव युज्यते ।

ततः भीमा शत्रुरूपाणां पापानां भयङ्करी पतिव्रता एषा जाया ब्राह्मणस्य बृहस्पतेः उपनीता देवैः स्थापिता । तपः प्रभावो दुर्धानामपि परमे व्योमन् उत्तमे स्थाने निदधाति खलु । तस्मादेनामपि देवपरिग्रहरूपः तपो महिमा बृहस्पतेरन्तिके उपस्थापयति ।

'ब्रह्म वै बृहस्पतिः' (ऐ० ब्रा० ।३८)ब्रह्मब्राह्मणौ च समानार्थकौ पूर्वमुक्तौ तेन ब्राह्मणस्येति बृहस्पतेरित्येवार्थः । 'सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छत् अहृणीयमानः ।' (ऋ० सं० १०।१०९।२) इति मन्त्रेण स एवार्थो व्यज्यते । सोमो राजा चन्द्रः अहृणीयमान (हृणीङ् लज्जायाम्) अलज्जमानः ब्रह्मजायां बृहस्पतिपत्नीं पुनः प्रायच्छत् प्रत्यर्पितवान् । तेन जायामन्वविन्दत्

बृहस्पतिः सोमेन नीतां ( ऋ० सं० १०।१०९।५ ) इत्यनेनापि स एवार्थः समर्थ्यते। सोमेन नीतां जायां बृहस्पतिरन्वविन्दत। किञ्च ब्राह्मणस्य जाया उपनीता इत्युक्त्या क्षत्रियादिजायानामनुपनीतत्वापत्त्यापि विरोधिनां नेष्टसिद्धिः। अथर्ववेदे च 'भीमा जाया ब्राह्मणस्यापनीता' ( ५।१७।३ ) इत्थं अपनीता इत्येव पाठः।

केचित्तु पारस्करसूत्रानुसारेण कन्यासंस्कारः समर्थ्यते। तच्च तद्विरुद्धमेव। तत्र तु जातस्य कुमारस्य ( १।१६।३ ) इति कुमारस्येत्यनुवृत्त्या बालकानामेवोपनयनं न बालिकायाः। जातस्येत्यनेनैव कार्यसिद्धौ कुमारग्रहणेन जातिपक्षबाधोऽभिप्रेतः। अत एव कर्काचार्येणोक्तम्-'कुमारग्रहणाच्च' अतः प्रभृति स्त्रिया न भवति।

चूडाकरणप्रसङ्गे कुमारमादाय ( २।१।२४ ) उपनयनप्रसङ्गे तं च पर्युप्तशिरसं ( ३।२।५ ) तञ्चेति कुमारोऽभिधीयते इति कर्कभाष्यम्।

'वस्तुतस्तु उपेता नयन्ति' ( ३।२।१२ पार० गृ० सूत्र० )

अथ स्योना पृथिवि इत्यनया ऋचा स्वामिप्रभृतय उपनीताः अनुपनीताश्च सर्वे यथोक्तक्रमेण दक्षिणपार्श्वैः प्रावृतशिरसः संविशन्ति स्वपन्ति (३।२।१-१२) अथ यथासंख्यमनुदेशः समानामिति रीत्या स्वामिप्रभृतय उपनीताः स्त्रियश्चानुपनीता सर्वेऽपि संविशन्ति इत्येव सिद्ध्यति। न चात्र स्त्रीणामुपनीतत्वानुपनीतत्वभेदेन द्वैविध्यं विवक्षितं, प्रयोजनाभावात्।

केचित्तु-"य इच्छेत् दुहिता मे पण्डिता जायेत" इति (१४।९।४।१६) बृहदारण्यकवचनेन स्त्रीणां वेदाध्ययनं साध्यते।

'आत्मज्ञानं समारम्भः तितिक्षा धर्मनित्यता।
यमर्था नापकर्षन्ति स वै पण्डित उच्यते'। (विदुरनीतिः १।२० )
'प्रवृत्तवाक् चित्रकथः अहंवान् प्रतिभानवान्।
आशुग्रन्थस्य वक्ता च यः स पण्डित उच्यते। (१।२३)
'श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा।
असंभिन्नार्थमर्यादः पण्डिताख्यां लभेत सः'। २४

'नावेदविन्मनुते तं बृहन्तं' 'धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।' वेदज्ञानं विना न धर्मब्रह्मज्ञानं संभवति। तदन्तरा च न पाण्डित्यं संभ-

वति। तेन पण्डितशब्देनैव वेदाध्ययनमर्थाल्लभ्यते।" इति तन्न, बृहदारण्यकविरोधादेव। तथाहि पुत्राणां सम्बन्धे वेदसम्बन्धो दृश्यते। 'य इच्छेत् पुत्रो मे वेदमनुब्रुवीत' (१४।६।४।१३) पुत्रो मे द्वौ वेदौ अनुब्रुवीत' १४ 'पुत्रो मे पण्डितो विजिगीथः समितिंगमः भाषिता जायेत। त्रीन् वेदान् अनुब्रुवीत' १५ 'सर्वान् वेदान् अनुब्रुवीत' १७ इति पुत्राणां सम्बन्धे वेदसम्बन्धः श्रुतः। दुहितृसम्बन्धे पण्डिता इत्येवोक्तम्। पुत्रस्य सम्बन्धे पण्डित इत्युक्त्यनन्तरमपि वेदसम्बन्ध उक्तः। दुहितुस्तु पण्डितेत्युक्त्यैव समाप्तिः। तथाचोक्तं शङ्करभगवत्पादैः— 'दुहितुः पाण्डित्यं गृहतन्त्रविषयमेव, न तु वेदविषयम्, तस्या वेदेऽनधिकारात्।' यद्येवं न स्यात्तर्हि जातिपक्षमाश्रित्य पुत्रशब्देनैव पुत्रीणामपि ग्रहणं स्यात्। ततः पृथक् दुहितृशब्दप्रयोगात्तत्र च वेदसंबन्धानिर्देशात् केवलपण्डितशब्दनिर्देशाच्च तद्वादः सर्वथैव खण्डितः। बुद्धिमत्त्वमेव पाण्डित्यम् 'शास्त्राण्यधीत्यापि भवन्ति मूर्खाः, इति शिष्टोक्तेः। पञ्चतन्त्रे-'वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा' इत्युक्तेः। प्रजागरप्रकरणस्थविदुरवाक्यैस्तु पण्डितस्य लक्षणमुक्तं न पण्डितायाः। तस्मात् पाण्डित्यम् गृहतन्त्रविषयमेव सेवाधर्मपराणां तासां सेवौपयिक ज्ञानस्यैवापेक्षितत्वात्।

'नास्ति स्त्रीणां पृथग् यज्ञो न व्रतं नाप्युपोषणम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते।' इति।

मनुरीत्या पत्युः पृथग् यज्ञादिनिषेधो ज्ञायते। स्त्रीशूद्रयोः सत्यपि धर्मब्रह्मोपायबोधार्थित्वे हेत्वन्तरेण वेदाधिकारस्य प्रतिषिद्धत्वात्। उपनीतस्यैव अध्ययनाधिकारं ब्रुवत् शास्त्रमनुपनीतयोः स्त्रीशूद्रयोर्वेदाध्ययनमनिष्टप्राप्तिहेतुरिति बोधयति। अतएवोक्तम्

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।' इति,

सायणरीत्या च तदेव समर्थ्यते। 'तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वादिति जैमिनिसूत्रभाष्ये शबरस्वामिना चोक्तम्—'अतुल्या हि स्त्री पुंसा। अतुल्यता च द्वेधा अविद्यात्वात् स्त्रीत्वाच्च।' एतेन वेदाध्ययनं तासां निषिद्धमेव ज्ञायते।

केचित्तु "पुमांसं पुत्रमाधेहि" ( अ० सं० ६।१७।१० ) अत्र पुमांसमिति विशेषणात् पुत्रशब्दो जातिपरो ज्ञायते। अत्र पुत्रमिति पुलिङ्गनिर्देशेनैव

पुंस्त्वसिद्धौ तद्व्यर्थमेव स्यात्'' इति, तन्न, तत्र पुमांसमित्यस्य शरबोधनपरत्वात्। यथा 'पुरुषो भव' 'सुरूपं वा कुरूपं पुमानित्येवमुच्यते' (म०६।१४) अन्यथा पूर्वोक्तशतपथोद्धरणेषु पुत्रशब्दस्य जातिपरत्वे 'य इच्छेत् दुहिता मे पण्डिता स्या' दिति पृथक् दुहितृनिर्देशो व्यर्थ एव स्यात्।

यदुक्तम् ''यथा स्वर्गकामो यजेत्' इत्यत्र मीमांसायां (६।१।६) जातिसूत्रप्रवृत्तिस्तथैव 'अष्टवर्षं ब्राह्मणमुपनयीत' इत्यत्रापि तत्प्रवृत्त्या कुमारीणामपि यज्ञोपवीतादिकं कथं न स्यात्?'' इति, तन्न, यागादिसम्बन्धे जातिसूत्रस्योपयोगेन स्त्रीणामपि पत्या सार्धमधिकारसिद्धावपि उपनयनसम्बन्धे तद्प्रवृत्त्या तत्र स्त्रिया अधिकारासिद्धेः। तत्सूत्रस्य यागाधिकरणस्थत्वात्। अत एवोपनयनवेदाध्ययनादिसम्बन्धे 'संस्कारस्य तदर्थत्वात् विद्यायां (वेदे) पुरुषश्रुतिः' (मी० द० ६।१।५)। 'तस्मात् जातिं तु बादरायणोऽविशेषात्' 'तस्या स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्' (६।१।८-२० मी० द० जै० सू०) इत्यादिना यागाद्यनुष्ठाने स्त्रीणामधिकारः साधितः। 'स्त्री चाविशेषात्' (कात्यायन श्रौ० सू० १।१।७) 'दर्शनाच्च' २। 'तुल्यफलत्वाच्च' ६। इतिसूत्रैः स्वर्गकामादिशब्दस्य जातिपरत्वेन स्त्रीणापि पुंस इव वैदिककर्मणि अधिकार उक्तः। नतु तावता तासां वेदाध्ययनाधिकारःसिद्ध्यति, संस्कारवेदाध्ययनसम्बन्धे पुरुषशब्दश्रवणात्। 'तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः' (अथर्व सं० ३।३०।४) इतिपुरुषेभ्यो ब्रह्मसंज्ञानं वेदज्ञानाधिकारसमर्पणात्। शूद्रस्य पुरुषत्वेऽपि अपशूद्राधिकरणविरुद्धत्वात्तन्निषिद्धम्। नच यज्ञसम्बन्धादेव वेदाध्ययनाधिकारसिद्धिरिति वाच्यम्, यथा उत्सर्गरूपेणनिषादस्थपतेर्यज्ञानधिकारित्वेऽपि 'निषादस्थपतिं याजये' दिति श्रुतिबलात् तस्यापवादभूताधिकारित्वाभ्युपगमेन तस्य संस्कारवेदाध्ययनमन्त्रोच्चारणाद्यभावेऽपि ऋत्विग्भिस्तदर्थं सर्वं संपाद्यते तथैव प्रकृते स्त्रीणां वेदाध्ययनाभावेऽपि पत्या तत्तत्कार्यसंपादने दोषाभावात्।

'यश्च परार्थं यजति स ऋत्विक्' (जै० सू० ६।३।२६)

'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (पा० १।३।७२) इत्यनुसारेण यथा ऋत्विककर्तृककर्मणां यजमानः फलं भुङ्क्ते। तथैव पतिकर्तृकाणां कर्मणां पत्नी फलं भुङ्क्ते। अतएव 'पत्युर्नो यज्ञसंयोगे' (पा० ४।१।३३) इत्युदाहरणे

दीक्षितः वशिष्ठस्य पत्नी वशिष्ठवत् कयज्ञस्य फलभोक्त्री इत्यर्थः, दम्पत्योः सहाधिकारात् इति लिलेख। अत एव 'तस्या यावदुक्तमाशीर्ब्रह्मचर्य्यमतुल्यत्वात्' ( जै० सू० ६।१।२४ ) सूत्रस्थशाबरभाष्ये स्पष्टमुक्तम्। अतुल्या हि स्त्री पुंसा। यजमानः पुमान् विद्वांश्च। पत्नी स्त्री च अविद्या च। यदि एवं हि एतद् अतुल्यत्वमेतद् अतो भवति क्रत्वर्थेषु यानि याजमानानि श्रवणानि तेषु उपादेयत्वे श्रवणादिविवक्षितम्। यच्च वेदाध्ययनसाध्यं तत्राविद्यात्वात्सा नाधिकृता। ( पुं ) लिङ्गत्वेन तेषु पत्नी न स्यात्। तत्पत्न्या अध्ययनस्य प्रयोजकं ( स्त्रीत्वात् ) स्यादिति यद्युच्येत, तन्न असत्यपि प्रयोजकत्वे तस्य निर्वृत्तिर्भविष्यति। अस्ति हि तस्य निर्वर्त्तकं...तस्मात्प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनः प्रसवे न किञ्चिदपि प्रमाणम्। अतस्तदपि पत्नी न कुर्य्यात्।

एतेन यदुक्तम् 'सूत्रेऽतुल्यत्वं न विद्याभावेन, किन्तु राजसंनिधानेऽमात्यस्येव, गुरुसंनिधाने शिष्यस्येव, पतिसन्निधानेऽस्वतन्त्ररूपाप्राधान्येनैवे' त्यप्यपास्तम्, भाष्यविरोधात्, याज्ञिकपद्धतिविरोधाच्च। न ह्यप्राधान्येन मन्त्रोच्चारणं वार्य्यते। ऋत्विग्गणेषु अप्रधानानामपि तदुच्चारणदर्शनात्। यज्ञे तु पत्नी पतिवन्मन्त्रान्नोच्चारयति इति हि पद्धतिः। कुमारिलभट्टपादाश्च तत्रैव टुप्टीकायाम्—यजमानकाण्डे ये मन्त्रास्ते यजमानेनैवोच्चारणीयाः। स हि विद्वान्। इतरा पत्नी तु अविद्या। अन्यथाऽनुपपत्त्या अध्येष्यते इति चेत् सापि अन्यथानुपपत्तिर्यजमानविद्वत्तयैव क्षीणा। तदीयेनैवाध्ययनेन निराकाङ्क्षत्वान्न प्रतिषिद्धमध्ययनं करिष्यति। एवञ्चेत् याजमानमिति अन्यतरस्मात् तद्धितोपपत्तौ कृतायां येऽपि अमन्त्रवन्तः पदार्थास्तानपि यजमान एव करिष्यति। यद्यपि तेषु स्त्रियः अविद्वत्त्वं नास्ति दोषः। तथापि शाबरमेव व्याख्यानं युक्तम्। अन्यच्च भट्टपादेनैवोक्तम्--ब्राह्मणमुपनयीत इत्याचार्यकरणे आत्मनेपदं भवति। माणवकस्य तु उपादीयमानत्वात् लिङ्गसंख्ये विवक्षिते। तस्मात्पुंसोऽध्ययनं विहितमितरस्या विधानाभावात् अवैधता। न चान्यथानुपपत्त्या अध्ययनं तस्या अन्यथापि ( पुंविद्वत्तया ) उपपद्यमानत्वात्। अतः प्राप्तोऽध्ययनप्रतिषेधः।

शास्त्रदीपिकाकारादिभिरपि तदेवोक्तम् ४।१।३३ महाभाष्यस्योद्योतेऽपि 'रुद्रपत्न्यादिर्गार्हभोक्तृत्वाच्च यज्ञस्वामित्वं भाष्यीया बोध्यम्।

'कथं हि स्त्री सभायां साध्वी स्यात्' (४।१।१५) इति महाभाष्यवचनमभिलक्ष्य कैयटेनोक्तम् 'यज्ञसभायां विदुषां पुरुषाणां साधुत्वाधिकारात्।' इति।

यदप्युक्तम्-'प्रज्ञानात्मकेन तपसा तात्कालिकेनैव ब्राह्मण्यप्राप्ति' रिति तन्न, तथात्वेऽपि तस्या असाधारणाया घटनाया सर्वत्रासंभवात्। तथा च साधारणानां गुणकर्मादिप्रयुक्तवर्णव्यवस्थासिद्ध्यसंभवात्।

केचित्तु कवषस्यैतिहासेन शूद्रत्वं प्रसाध्य शूद्राणां वेदाध्ययनाधिकारञ्च साधयित्वा तत्र 'यथेमां वाचं कल्याणीमावदानि, इति मन्त्रेण शूद्रान्त्यजादीनां वेदाध्ययनाधिकारं वर्णयन्ति, तदपि तुच्छम्, समुद्धृतब्राह्मणप्रघट्टकेन तदसिद्धेः। 'यथेमां वाच'मिति मन्त्रस्तु न तत्समीहितसाधकः, तस्यान्यपरत्वात्।

'यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याँ शूद्राय चार्याय च स्वाय चारणाय च प्रियो देवानां दक्षिणायै दातुरिहभूयासम्। अयं मे कामः समृद्ध्यताम्। उपमादो नमतु।' (यजुर्वेद सं० २६।२)।

स्वामिदयानन्दनरीत्या परमेश्वरो वक्ति-हे मनुष्याः! यथाहमीश्वरः मनुष्याणां भुक्तिमुक्तिप्रदायिनीं कल्याणीं ऋगादिवेदचतुष्टयात्मिकां वाचं वाणीमावदानि उपदिशामि तथैव युष्माभिरपि समुपदेष्टव्यम्। यथाहं दक्षिणाया दातुस्तत्संसर्गिणां देवानां विदुषां प्रियो भूयासं मम कामः समृद्ध्यताम् तथा अदः परोक्षं सुखं प्राप्यताम् तथा भवन्तोऽपि भवेयुः। कामाः सुखञ्च भवद्भ्योऽपि प्राप्यन्ताम्। ननु जनेभ्य इत्यत्र जनिशब्देन त्रैवर्णिकानामेव-ग्रहणम्, सर्वत्र वेदेषु तेषामेवाधिकारावगमात् इति चेन्न, ब्रह्मराजन्याभ्यामित्यादिना परमेश्वरेण ब्राह्मणादिसर्वेषामधिकारबोधनात्। शूद्रस्य स्वाय स्वकीयभृत्यस्त्र्यादिभ्यः, अरणायेति शूद्राय यथाहमावदानि तथैव भवन्तोऽपि सर्वेभ्यो वेदमुपदिशन्तु।

सर्वोऽप्ययमर्थोऽविचारितरमणीय एव। तथाहि-अत्र मनुष्या इति सम्बोधनं मन्त्रे नास्ति। किं मनुष्याः ब्राह्मणादिभ्यो भिन्नाः परमेश्वरेणोपादिश्यमानेभ्यो जनेभ्योऽपि किं भिन्नाः? संबोध्यमानेभ्योऽपि किं वेदा उपदिष्टा नवा? तदुपदेशदानात् पूर्वमयं मन्त्रो वेदे आगतो नवा?

यदि संबोध्यमानाः संमुखस्थाः पुरुषा एव ब्राह्मणादयस्तर्हि युष्मभ्यमहं वेद-वाणीमुपदिष्टवानस्मि तथैव भवन्तोऽप्यन्येभ्य उपदिशन्तु इत्येवमन्तिमस्य वेदस्यान्तिमे मन्त्रे वक्तव्यमासीत्, नादौ नवा मध्ये तत्कथनसंभवः, अथवेयम-धिकारिचिन्ता प्रथमवेदस्य प्रथमे मन्त्रे कर्तव्या न मध्ये, तत्र तस्या अप्रसक्तेः किञ्चैवमस्य मन्त्रस्य मनुष्या एव देवता भवेयुः, प्रतिपाद्यस्यैव देवतात्वात् । अहमीश्वर इत्यपि मन्त्रान्न सिद्ध्यति, तद्वाचकपदस्य मन्त्रेऽभावात् । मन्त्र-प्रतिपादकस्यर्षित्वं प्रसिद्ध्यति । नचास्येश्वर ऋषिः प्रसिद्धः । स्त्रीसेवकादिश्च कस्य शब्दस्यार्थः ? शूद्रादिभिन्नस्य तस्यासिद्धत्वात् । यदि तन्मतरीत्या वर्ण-चतुष्टयातिरिक्तोऽन्त्यजो वर्णः पञ्चमो वा वर्णो नास्त्येव तदा कथमरण-शब्देन तद्ग्रहणसंभवः ? किञ्चानेन मन्त्रेण वेदाध्ययनाधिकारसाधने वेदान्त-दर्शनस्यापशूद्राधिकरणं विरुद्ध्यते । (१९) यागे शूद्रस्यानधिकारनिरूपणपरक (अ० ६ अधिकरण ७) जैमिनिदर्शनविरोधाच्च । 'अवि वा वेदनिर्देशात् । अपशूद्राणां प्रतीयेत' (६।१।३३ जै.सू.) अत्र वेदनिर्देशाच्छूद्राणामनुपनयनमु-क्तम् । 'तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्' (ज० सू० ६।१।२४)अतुल्या हि स्त्रीपुंसा अतुल्यता च द्वेधा, स्त्रीत्वादविद्यात्वाच्चे' ति शाबरभाष्यरीत्या स्त्रीणामपि वेदाध्ययनानधिकारः ।

'वेदमाता प्रचोदयन्तां पावमानी द्विजानाम् ।' (अथर्व सौ०सं० १९।७१।१) वेदे द्विजानामेवाधिकारः । अस्मिन्मन्त्रे स्पष्टं वेदशब्दः । 'यथेमा'मिति मन्त्रे तु वाचमित्येव विद्यते, न वेदवाचमिति । एतेन वेदवाचामध्ययने द्विजानामेवा-धिकारः 'यथेमा'मिति मन्त्रोक्तवाचि तु समेषामधिकारः । 'अयं स होता यो द्विजन्मा' (ऋ० सं० १।१४९।५) इत्यत्र च द्विजस्यैवाधिकारित्वश्रवणम् । गृह्यसूत्रेषु सर्वासु च स्मृतिषु त्रैवर्णिकानामेवोपनयनसंस्कारो विहितो न शूद्राणाम् । उपनयनञ्च वेदाध्ययनाङ्गमिति कथं तदन्तरा तदधिकारः । न च 'आवदानी'त्युत्तमपुरुषप्रयोगादीश्वरोऽत्र वक्तेति वाच्यम् । 'अग्निमीडे पुरोहित' (ऋ० सं० १।१।१) मित्यत्रापि तथात्वापत्त्या परमेश्वरस्याग्निपूजकत्वापत्तेः । अग्निशब्दस्यापि परमात्मपरत्वे स्तुत्यस्तोत्रोरैक्यापत्तेश्च । 'यथेमा'मिति मन्त्रस्य त्वीश्वरो देवता न तु ऋषिः प्रतिपाद्यस्यैव देवतात्वेन नात्र प्रतिपादक ईश्वरो भवितुं शक्नोति ।

किञ्चास्मिन् मन्त्रे परमेश्वरस्य वक्तृत्वेऽस्यैव मन्त्रस्य 'अहं देवानां प्रियो भूयासम्'। 'दक्षिणाया दातुः प्रियो भूयासम्' 'अयं मे कामः समृद्ध्यताम्' 'अदो मामुपनयतु'इत्यंशा विरुद्ध्येरन्। नहि पूर्णकामस्येश्वरस्य कामपूर्तिप्रार्थना युज्यते। ततः पूर्वस्मिन्नपि 'सकामान् अध्वनः कुरु संज्ञानमस्तु मेऽमुना' (२६।१ यजु० सं०) संज्ञानमध्वनां सकामत्वञ्च प्रार्थितम्। नचैतन्नित्यज्ञाने पूर्णकामे परमेश्वरे संभवति। नहीमामिति शब्देन वेदलक्षणाया वाचो ग्रहणं संभवति।

किञ्च निराकारस्य वागादिरहितस्येश्वरस्य कथं ब्राह्मणादिभ्यो वेदोपदेशः संभवति। किं सर्वेभ्यः परमेश्वरेण वेदा उपदिष्टाः केभ्यश्चिदेव वा? अन्त्ये के ते? प्रथमे कुतो वेदानभिज्ञा अनेके? किञ्चास्य मन्त्रस्येतिहासरूपत्वे ततः प्राक् तदभावादनित्यत्वमपि वेदानां स्यात्? किञ्चार्य्यानेव पाठयति सर्वान् वा? प्रथमे तस्य सङ्कीर्णता। यदि तथात्वेऽपि न सङ्कीर्णाशयता तर्हि द्विजानामेव पाठनेऽपि कुतः सङ्कीर्णाशयता? सर्वेषामेव यदि पाठनं स्यात् तदा ब्रह्मराजन्यादीनामिव खिष्ट्रीयमोहम्मदादीनामपि कुतो न नामनिर्देशः? अन्यथा जनेभ्य इत्येवोक्तं स्यात्। यदि च परमात्मा सर्वानेव वेदं पाठयति। पाठनसमये च आर्य्या एवासन् नान्ये तर्हि कथमिदानीमन्ये समागताः? किमीश्वरस्य स्वशिष्यानुकूल्यसंपादने सामर्थ्यं नासीत्?

किञ्च स्त्रीसेवकयोरपि ग्रहणमुक्तं पूर्वव्याख्यात्रा। परमत्र तद्बोधकपदं नोपलभ्यते। स्वाय इति पदस्य कया युक्त्या स्त्रीसेवकावर्थ इति चिन्त्यम्? किमीश्वरस्य निराकारस्य स्त्रीसेवकावपि विद्येते?

एवमरणशब्दस्यातिशूद्रोऽर्थ इत्यपि निष्प्रमाणमेव। वस्तुतः स्वाय स्वकुलजाताय अरणाय अन्यकुलजाय इत्येवार्थो निरुक्तादिसंमतः।

किञ्च गुणकर्मानुरोधेन वर्णव्यवस्थामभ्युपगच्छतां प्रतिकूलोऽप्ययमर्थः। तथाहि—जन्मना ब्राह्मण्याद्यभ्युपगमे सिद्धान्तहानिः, गुणकर्मादिभिस्तत्त्वे वेदाध्ययनात्प्राक् तदनुरूपवेदाध्ययनगुणाभावे कथं ब्राह्मण्यादिनिर्णयः? एवं क्षत्रियवैश्यादीनामपि जन्मना क्षत्रियादित्वानभ्युपगमे ब्राह्मणादीन् वेदानध्यापयति परमेश्वर इति कथं ज्ञायते?

किञ्च वैषम्येण पाठनं साम्येन वा? प्रथमे पक्षपातित्वापत्तिः। पक्षपातोऽपि जन्ममूलकः, कर्ममूलको वा? प्रथमे जन्मना वर्णव्यवस्थासिद्धिः, द्वितीये वेदाध्ययनात्पूर्वं कथं गुणकर्मभेदः? यदि प्राक्तनकर्ममूलको भेदस्तर्हि पूर्वजन्मकर्मसिद्धत्वात् पूर्णव्यवस्थाया जन्मनैव सिद्ध्यापत्तिः। साम्येन पाठने कथं न समेषामेकवर्णत्वम्?

किञ्च शब्दतोऽध्यापिता वेदा अर्थतो वा? प्रथमे कथमर्थज्ञानम्? द्वितीये तदर्थात्मकस्य ब्राह्मणभागस्यापि परमात्मोपदिष्टत्वाद्वेदत्वापत्तिः। अध्येतृषु अग्निवायुसूर्याङ्गिरसामप्यन्तर्भावे कथं न त्वायेतिमन्त्रे तन्नामनिर्देशः? कथं वा तद्रीत्या तेष्वेकैकस्यैकवेदोपदेष्टृत्वम्। परमोपदिष्टवेदविस्मरणानन्तरं तदुपदेशे वेदेषु क्रमिकेतिहाससत्त्वे वेदानित्यत्वापत्तिः।

किञ्च श्रीदयानन्दानुयायिमते पूर्णविद्वत्वं ब्राह्मण्यम्। मौर्ख्यं शूद्रत्वम्। तथा सति विद्वद्भ्यो वेदपाठनं व्यर्थमेव, तत्फलस्य पूर्वमेव सिद्धत्वात्। पूर्णविद्वत्त्वाभावे ब्राह्मण्याभावः, तदभावे कथं ब्राह्मणेभ्यस्तत्पाठनम्? एवमत्यन्तमूर्खेभ्योपि वेदपाठनं व्यर्थमुपदेष्टुरल्पज्ञत्वञ्च। यदि योग्येभ्यः पाठनमयोग्येभ्योऽपाठनं तर्हि मनुष्यमात्राय वेदोपदेश इति रिक्तं वचः। अरणपदेनातिशूद्रो गृहीतस्तेन ततोऽतिमूर्खेभ्योऽयोग्येभ्यस्तत्पाठनं सिद्ध्यति तेन सुतरां तन्मते परमेश्वरस्याल्पज्ञत्वम्।

किञ्च ब्रह्मराजन्याभ्यामित्यादौ ब्राह्मणादिशब्दस्तत्तद्वर्णेषु रूढो यौगिको वा? प्रथमे सर्वत्र वेदे यौगिकार्थग्रहणसिद्धान्तोऽपास्तः। द्वितीये पञ्चानामपि वेदाधिकाराभ्युपगमे कथं वर्णभेदः? सृष्ट्यादौ युद्धवाणिज्याद्यभावेन कथं क्षत्रियादिभेदः?

किञ्च श्रीदयानन्देन 'तेषामेव (चतुर्णामृषीणामेव) पूर्वपुण्यमासीत्। अतः खल्वेतेषामेव हृदये वेदानां प्रकाशः कर्तुं योग्योस्ति' इति ऋग्वेदभाष्यभूमिकायामुक्तम्। इह पुनः मनुष्यमात्राय वेदोपदेश उच्यत इति विप्रतिषिद्धमेतत्। किञ्च सत्यार्थप्रकाशे २५ पृष्ठे अशुभलक्षणानामकुलीनानां शूद्राणामतिशूद्राणाञ्च मन्त्रसंहिताधिकारस्तु दूरे अन्यशास्त्राधिकारोऽपि निषिद्धः। पुनश्च ४४ पृष्ठे वेदाध्ययने मनुष्यमात्राधिकारसमर्थनम्। एतद्विप्र-

निषिद्धम्। ब्राह्मणादीनामिव शूद्रादीनामुपनयनविधानञ्च वेदेषु न दृश्यते इति तदनुयायिनोऽपि मन्यन्ते।

किञ्च वेदपठनपाठनाद्यधिकार आर्याणामुक्तः शूद्रश्चानार्य्य उक्त इति कथं तस्य तदधिकारः। अरणशब्देनोत्तमलक्षणसम्पन्नायातिशूद्राय वेदोपदेश उक्तस्तेनाधमलक्षणायातिशूद्राय वेदोपदेशो न सिद्ध्यति। ततश्च 'मनुष्यमात्रस्य वेदाधिकार' इति विरुद्ध्यते। एवं स्वाय शब्देनापि तदितरस्त्रीसेवकेभ्यो वेदोपदेशो वारितः स्यात्।

संवादेष्वाह वाक्यं यः स तु तस्मिन्भवेदृषिः।

यस्तेनोच्येत वाक्येन देवता तत्र सा भवेत्' (वृहद्देवता २।८८)

'यस्य वाक्यं स ऋषिः' (२।४ सर्वानुक्रमणी) 'मन्त्रस्य वाच्यं देवता' (उव्वटः) आदिरीत्या प्रतिपाद्यो देवता भवति, प्रतिपादकस्तु ऋषिः। तथा च यथेमां वाचं कल्याणीमिति मन्त्रे ईश्वरः परमात्मा वा देवता स्तुत्यः प्रतिपाद्यो वा स्तोता प्रतिपादको वा न ऋषिस्तु लौगाक्षिः स्तोता प्रतिपादकः। तथाचावदानीति क्रियायाः कर्त्ता नेश्वरः, किन्तु ऋषिः परमात्मा तु स्तुत्यः।

अत उव्वटाद्यनुसार्य्येवात्रार्थः। अनुद्वेजिनीं दीयताम् भुज्यताम् इत्येवमादिकां ब्रवीमि। तथा च नात्र वेदवाचो ग्रहणम्, न वा तेन समेषां वेदाध्यनाधिकारः सिद्ध्यति। अपि च (प्र० व० सं० २६।१) प्रथममन्त्रे अष्टमीभूतसाधनी इत्युक्तम्। तत्रोव्वटः 'अष्टमी च वाक् भूतसाधनी भूतप्रज्ञप्तिकरी। महीधरस्तु 'भूतानि साधयति वशीकरोति भूतसाधनी' इत्याह। यथेमामिति मन्त्रेऽपि इमामिति सर्वनाम्नासन्निकृष्टत्वात् सैव गृह्यते, न वेदवाणी, सर्वस्या वेदवाचोऽसन्निकृष्टत्वात्। 'इदमस्तु सन्निकृष्टे समीपतरवर्त्तिनि चैतदोरूपम्।' इत्युक्तेः। वेदवाण्या जिघृक्षितत्वेऽस्य मन्त्रस्य प्रारम्भे अन्ते वा निवेशनीयत्वापत्तेः। अतः पूर्वोक्ता अनुद्वेजिता वागेव इदं शब्दग्राह्या। तथा च सा भूतसाधनी वागृषेरेव नेश्वरस्य। तथाच नेश्वर आवदानि इति क्रियायाः प्रयोक्ता, किन्तु ऋषिरेव परमेश्वरस्तवस्य मन्त्रस्य देवता न ऋषिरित्युक्तमेव। तथाचानेन मन्त्रेण ऋषिः परमेश्वरं प्रार्थयति—हे ऋतप्रजात! यज्ञार्थं प्रजात इति वेङ्कटमाधवः। यज्ञपूर्त्तये व्यक्तवृहस्पते वृहत्या भूतसाधन्या दीयतां

भुज्यताम् इतिवाण्या स्वामिन्नीश्वर यथाहं यजमान ऋषिः यज्ञे दीयतां भुज्यतामिमां सुखकरीं वाणीं विप्रक्षत्रविट्शूद्रेभ्यः स्वीयाय परकीयाय सर्वान्प्रति आवदानि वक्तुं शक्तः स्याम ईदृक् चित्रं धनं मह्यं देहि। 'तदस्मासु द्रविणं धेहि चित्रमिति अग्रिममन्त्रेण सम्बन्धात्।

इह यज्ञे दक्षिणायै दातुः प्रियो भूयासम्। दक्षिणाया दातुश्च प्रियः स्याम्, सर्वेभ्यो यथेष्टं भोजनं धनञ्च पुष्कलं दीयते।

'जाम्बूनदं कोटिसंख्यं ब्राह्मणेभ्यो ददौ तदा।
दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम्।
कस्मैचिद्याचमानाय ददौ राघवनन्दनः।' (वा. रा. १।१४३)
'दीयतां दीयतामन्नं वासांसि विविधानि च।' (१।१४।१४)

तस्माद् यज्ञार्थमृषिभिरीश्वरो राजानश्च धनानि प्रार्थ्यन्ते। एवमेव नूनं सति प्रतिवरं जरित्रे दुहियादिन्द्र दक्षिणा माघोनती शिक्षास्तोतृभ्योमीतिधग्भगो न बृहद् वदेम विदथे सुवीरा (ऋ० सं० २।११।२१) अत्र मन्त्रे धनार्थमिन्द्रः प्रार्थितः। हे इन्द्र मह्यमेतावद्धनं देहि येन विदथे यज्ञे बृहद्वदेम दीयतां भुज्यताम् इयं वागेव बृहती वाक्। दुर्गाचार्य्येण तदेवोक्तम्ः सा दक्षिणा यजमानायाप्रतिदुग्धाम्। धनं नोस्तु येन बृहद्वदेम महदूर्जितं वदेम दीयताम् भुज्यताम्। अस्मभ्यं तद् वसो दानाय राधः धन समर्पयस्व बहु वसव्यम् इन्द्र यच्चित्रं श्रवसा अनुधन प्रतिदिनं बृहद् वदेम विदथे सुवीराः एवमेव यज्ञे दीयताम् भुज्यतामिति कल्याणीं वाचमावदानि ब्राह्मणादिभ्यः स्वपरेभ्यः सर्वेभ्यः एषैव वाक् भूतसाधनी भूतवशकरणी भवति।

'दीयतां दीयतामेषां भुज्यतां भुज्यतामिति।
एवं प्रकाराः संजल्पाः श्रूयन्ते स्म च नित्यशः।

इत्येवं रामायणभारतादिषु सैव वाक् प्रसिद्धा।

किञ्च यज्ञप्रतिपादकोऽयमध्यायो न वेदाध्ययनाधिकारविधायकः। तदुक्तमुव्वटेन 'अग्निष्टोमाग्निसौत्रामण्यश्वमेधपुरुषमेधसर्वमेधपितृमेधप्रवर्ग्योपनिवत्संबद्धा मन्त्रा व्याख्येयाः। ते इह उच्यन्ते। षड्विंशोऽध्यायः। अश्वमेधाग्निष्टोमशेषपरिशेषस्तत्रान्नदानदक्षिणादानादिकं क्रियते। किञ्च आवदानि इति लोट् लकारः, 'आशिषि लिङ्लोटौ'

इत्यादि सूत्रानुसारेण आवदानीति प्रार्थना। अहं वदामीति न तदर्थः किन्तु अहमेव कल्याणीं वाचं वदामीति प्रार्थनैव। सा च यजमाने उपपद्यते न पूर्णकामे परमेश्वरे, तदनुसारिण्य एव सर्वा अपि क्रियाः 'आवदानि' 'भूयासम्' 'समृद्ध्यताम्' 'उपनमतु' इत्यादयः। लिङ्लोटौ समानार्थकौ दीयतां भुज्यतामितीमां वाचमावदानि। इह प्रियो देवानां भूयासम् यज्ञे दक्षिणाया दातुः प्रियो भूयासम्। अयं मे कामः समृद्ध्यताम्। मामदः फलं धनं वा उपनमतु। अस्य मन्त्रस्येश्वरो देवता। तेनेयं प्रार्थना यजमानस्य युज्यते। सिद्धान्तरीत्या प्रथम-द्वितीय-तृतीयमन्त्राणाञ्चेश्वरो देवता। दयानन्दीय-वैदिकयन्त्रालयप्रकाशितयजुर्वेदसंहितायामपीश्वरो देवता। तत्रैव तृतीयो मन्त्रः 'बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम्।' (शु० यजु० सं० २६।३) अस्यापि देवता ईश्वर एव। यदि तृतीये देवतात्वादीश्वरः प्रतिपाद्यस्तदा ततः पूर्वतनस्य द्वितीयमन्त्रस्यापि देवतात्वादीश्वरः प्रतिपाद्य एव। यदि तृतीयमन्त्र ईश्वर-प्रतिपादकस्तदा द्वितीयेऽपि स प्रतिपादक एव। न चेश्वरो धनार्थं बृहस्पतिं प्रार्थयत इति श्लिष्यते। 'देवानां प्रियो भूयासम्' 'अयं मे कामः समृद्ध्यताम्'इत्यादिरपि नेश्वरस्य प्रार्थना संभवति, तस्याप्तसमस्तकामत्वेन पूर्णकामत्वात्। एवं यदि परमेश्वरः प्रतिपाद्यो न प्रतिपादकस्तदा अहमीश्वरो यथा वेदचतुष्टयात्मिकां कल्याणीं वाचं ब्राह्मणादिभ्यो वदामि इत्याद्यर्थोऽपास्त एव; प्रातिपदिकस्य लौगाक्षिनामकस्यर्षेरेव प्रतिपादकत्वेनाहं पदार्थत्वात्। ऋष्यादिर्जीवो चित्रं द्रविणं धेहीति प्रार्थयत इत्यर्थः श्लिष्यते। दीयतां भुज्यतामिति बृहती वाक्। वाग् वै बृहती तस्याः पतिः बृहस्पतिः अस्या वाचः पूर्त्तिरीश्वराधीना नेश्वरो बृहस्पतिस्तस्मात्परमेश्वरः प्रार्थयते।

यदुक्तम् परेशनिर्मितेषु यथाग्निसूर्यचन्द्रादिपदार्थेषु सर्वेषामधिकारस्तथैव वेदा अपि सर्वेषां हितार्थं प्रकाशिताः परमात्मनेति तेष्वपि सर्वेषामधिकारः स्यात् इति, तन्न कारागारेषु कालकुटीरादिनिवेशितानामपराधिनां जन्मान्धानामुलूकादीनाञ्च सूर्यप्रकाशोपयोगाभावात्। तथैव कर्मविशेषेण शूद्रत्वं गतानामपि वेदाधिकाराभावे दोषासंभवात्।

वस्तुतस्तु सूर्य्यादिप्रकाशप्राप्त्यर्थमुपनयनादिकं नापेक्षितम्। तच्च त्रैवर्णिकानामेव विहितम् न शूद्राणाम्। अतएव 'वेदमाता' द्विजानाम् (अथर्व सं० शौनक १९।७१।१) इति द्विजानामेवाधिकारः सिध्यति। तस्माद्विषमो दृष्टान्तः। यथा कन्या परेशनिर्मिताऽपि विशिष्टानामेवोपयोगार्हा तथैव वेदा अपि निर्दिष्टविशिष्टाधिकारिणामेवोपयोगार्हाः।

यदुक्तम् "न केवलं मन्त्रवाच्यत्वादेव देवतात्वम्। किन्तु देवो दानाद्वा द्योतनाद्वा दीपनाद्वा' इति निरुक्तानुसारेणोपदेशदातृत्वात् वेदप्रकाशनाच्चात्र मन्त्रे परमेश्वरस्य देवतात्व"मिति तत्तुच्छम्, तथात्वे सर्वेषां मन्त्राणां परमेश्वरदेवताकत्वापत्तेः। तथात्वे चेश्वरः-'अग्निमीडे पुरोहित' (ऋ० सं० १।१।१) मित्यत्रेश्वर एवाग्निस्तोता स्यात्। प्रकृतमन्त्रे चेश्वरस्यैव समृद्धिकामत्वापत्तिश्च स्यात्। विशेषतश्चैतयोरेव मन्त्रयोः परमेश्वरो देवता इत्युक्तेरपार्थत्वात्।

वस्तुतः अनुक्रमणीरीत्या मन्त्रवाच्यस्यैव देवतात्वम्। यथा सांख्यीयगुणानां सांख्यदृष्ट्या व्याख्या युक्ता न 'अदेङ् गुणः' इति व्याकरणानुसारेण। एवमेव यस्य वाक्यं स ऋषिः, या तेनोच्यते सा देवता इति परिभाषाया एव तत्रादरणीयता। 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति' (७।१) इति निरुक्तेनापि तदर्थस्य समर्थनात्। द्वयोर्मन्त्रयोरीश्वरप्रकाशितत्वादीश्वरदैवतत्वेऽन्येषां मन्त्राणामनीश्वरप्रकाशितत्वापत्तिश्च स्यात्। तस्मात् द्योतनात् दीपनात् इत्यादिभिरपि स्तुत्यर्थस्य दीप्यतेः प्रकाशनार्थस्य च दीप्यतेः स्तूयमानत्वात् प्रकाश्यमानत्वात् वाच्यः स्तुत्य एव देवता स्वीकर्तव्या। प्रकृतमन्त्रयोश्च स्तुत्यत्वात्प्रकाश्यत्वात् परमेश्वरो देवता संभवति।

यदुक्तम् 'कल्याणीवाक्पदेन सर्वत्र वेदवाचो ग्रहणम्, तन्न प्रमाणाभावात्। न च यजमानस्यैव दक्षिणादातृत्वेन तस्यैव दक्षिणाया दातुः प्रियो भूयासमिति प्रार्थना न युज्यत इति वाच्यम्। अत्र मन्त्रे लौगाक्षिऋषेर्यजमानत्वेन तस्य च निर्धनत्वात्तेन राजा परमेश्वरो वा धनार्थं प्रार्थ्यते। अतो राजा ईश्वरो वात्र दक्षिणा दाताऽभिप्रेतः। तेन यजमानस्य दक्षिणाया दातुरीश्वरस्य राज्ञो वा प्रियो भूयासमिति कामनोपपद्यते।

केचित्तु 'श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥' (म० भा० शांति० ३२७।४६) इति वचनेन सर्ववर्णेभ्यो वेदश्रावणमभ्युपेयते तदपि तुच्छम्, 'मन्त्रः शूद्रे न विद्यते' (म० भा० शा० ६०।३७) 'न च तां प्राप्तवान् मूढः शूद्रो वेदश्रुतीमिव (सभा पर्व ४५।१५) 'भावं न चास्याहमनुप्रदातुमलं द्विजो-मन्त्रमिवाद्विजाय।' (वा० रा० सु० २८।५) इत्यादिविरोधात्। तस्मादिति-हासपुराणश्रवणे चातुर्वर्ण्याधिकारबोधकमेव तद्वाक्यम्। साक्षाद्वेदस्य तु 'ब्राह्मणाय सदा देयं ब्रह्मशुश्रूषवे तथा।' (म० भा० शा० ३२७।४९) इति ब्राह्मणायैव दातव्यमुक्तम्, इति पुराणमपि वेदार्थत्वात्पञ्चमं वेदरूपेण तत्र-तत्र संस्तुतम्।

यन्मते परमेश्वरस्य निराकारत्वेन भाषणासम्भवः तन्मते परमेश्वर-वाणी वेद इति न सम्भवत्येव परन्तु स्वामीदयानन्दः प्रतिपदं स्ववेद-व्याख्याने परमेश्वरः कथयतीत्येव वक्ति। तथा च तस्य स्वसिद्धान्तविरोधः। निराकारत्वात्परमेश्वरस्यावक्तृत्वेन प्रतिपाद्यत्वमेव युक्तम्। किञ्च तन्मते परमेश्वरो भक्तान् ब्रवीति यथाहं देवानां दक्षिणाया दातुश्च प्रियो भूया-सम्, अयं मे कामः समृद्ध्यतामिति तथा युष्माभिः प्रयतनीयम्। किमेव-माप्तकामस्य परमुखापेक्षा युज्यत इति विद्वांसः विदांकुर्वन्तु।

नागेशेन वैदुष्यञ्चोपनयनादिमतां पुंसामेवेति तात्पर्य्यमित्युक्तम्।

'सभेयो युवास्य यजमानस्य वीरो जायताम्' (यजुः सं० २३।२२) इति मन्त्रे सभार्थं पुरुष एव प्रार्थितो न दुहिता। हारीतरीत्या ब्रह्मवादिनीनां यावज्जीवं ब्रह्मचर्य्यं सद्योवधूनां तु गोभिलोक्तं यज्ञोपवीतवद्वस्त्रधारणमेव यज्ञोपवीतम्, 'ओं या अकृन्तन आयुष्मति परिधत्स्व परिधत्त वाससा' इति वस्त्रस्यैव परिधानविधानात्।

यदप्युक्तम्-''पश्चादग्नेः संवेष्ठितं कटं पदा प्रवर्त्तयन्तीं वाचयेत्-'प्रमेति प्रतियातः पन्थाः कल्पताम्' अत्र मन्त्रवाचनमुक्तम् तच्च वेदाध्ययनं साधयतीति, तदपि न, संहिता चतुष्टयस्यैव वेदत्ववादिनां सामाजिकानां रीत्या उक्तमन्त्रस्य वेदत्वाभावात्। सिद्धान्तरीत्या तु अपवादरूपं तत्। अतएव तस्या यावदुक्तमिति पूर्वोद्धतसूत्रे यावदुक्तं

पत्न्या कर्तव्यमित्युक्तमेव। यज्ञे विवाहे वा येषां मन्त्राणामुच्चारणं स्त्रीणां कृते विहितं तेषामुच्चारणं ताभिः कर्त्तव्यमन्यथाऽनुज्ञानं नोत्सर्गः। यथा-यद्यपि यज्ञोपवीतात्पूर्वं वेदमन्त्रोच्चारणे कस्यचिदप्यधिकारो नास्ति तथापि मृतकश्राद्धेऽपवादभूतमनुपनीतमाणवककर्तृकमन्त्रवाचनमनुमतं मनुना। 'नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते।' (मं. स्म. २।१७२) तथैव स्त्रीणां विवाहे मन्त्रोच्चारणं वचनबलादपवाद एव। अतएव याज्ञवल्क्येनोक्तम्।

'तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः' (१।२।१३ या. स्मृ.)

'न वैताः कर्णवेधान्ता मन्त्रवर्जं क्रियास्त्रियाः।
विवाहो मन्त्रतस्तस्याः' (व्या. स्मृ. १।१५-१६)

तत्रापि—

विवाहे यो विधिः प्रोक्तो मन्त्रा दाम्पत्यवाचकाः।
वरस्तु तान् जपेत् सर्वान् ऋत्विग्राजन्यवैश्ययोः॥'

इति गोभिलगृह्यसंग्रहानुसारेण पत्नीपठनीयान् मन्त्रान् वरः स्वयं पठेत्, राजन्यवैश्ययोस्तु ऋत्विक् पठेत्। स्वयं वरो जपेत् अन्तरन्त्याम् (वध्वां) प्रास्याः पतिपात'''पतिलोकं मनसानम्या (गो० गृ० सू० २।१।२१)

यदप्युक्तम्-"भर्तुरतिचारे त्रिरात्रं यावकं क्षीरौदनं वा भुञ्जाना अधः-शयीत् ऊर्ध्वं त्रिरात्राद् अप्सु निमग्नाया सावित्र्यष्टशतेन शिरोभिर्जुहुयात् पूता भवति।' (वसिष्ठ स्मृति २१।५) इति स्त्रीणां सावित्र्या होम उक्तः" इति, तदपि न, अर्थानवबोधात्। तथाहि अस्वातन्त्र्या स्त्री पुरुषप्रधाना अनग्निः अनुदक्या चानृतमिति (५।१ वा० स्मृ०) इत्यनुसारेण तस्याः स्वातन्त्र्याभावोक्त्या जुहुयादित्यस्यान्तर्भावितणिजन्तत्वेन ऋत्विक् पुरोहितादिद्वारा हावयेत् इत्येवार्थः कर्त्तव्यः। तत एव रघुनन्दनभट्टाचार्यस्य स्मृतितत्त्वे ६३४ पृष्ठे ततश्च तत् (स्त्री) कर्मसम्बन्धिमन्त्रेण विप्र-तदीयकर्मकारयितृ-ब्राह्मणी गृह्यते। तेन ब्राह्मणेन तत्र मन्त्रः पठनीयः। वशिष्ठस्मृतौ च सावित्र्याः शिरोभिरित्युक्तम्। शिरोमन्त्रश्च 'आपो ज्योतिरसोऽमृतम्' इति। तस्य च संहिताचतुष्टये पाठाभावान्न तन्मतवादिनां वेदत्वम्।

'अनग्निषु अमन्त्रत्वम् (मीमांसा द. २।१।३४) इति सिद्धान्तरीत्याऽपि

मन्त्रांशस्य न मन्त्रत्वम्, 'वाक्यनियमात्' ( मी. द. १।२।३२ ) इति रीत्याऽपि नियतक्रमाभावान्न तत्र वेदत्वम् । तस्मात्तदुच्चारणविधानेऽपि न तासां वेदाधिकारः सिद्ध्यति । वशिष्ठेन तस्या अनग्नित्वमुक्तम् । तेन ब्राह्मण-द्वारैव होमो मन्तव्यः ।

यदप्युक्तम् 'गोत्रञ्च चरणैः सह' इति वार्तिके शाखाध्येतृवाची शब्दो जातिकार्य्यं लभते इत्यर्थकेन 'कठी' 'बह्वृचा' इत्यादिषु कठशाखाध्येतृत्वेन कठी बह्वृचा इत्यादि प्रयोगसिद्धिः । तेन स्त्रीणां कठादिशाखाध्ययनं सिद्ध्यत्येवे"ति तदपि न, तत्त्वबोधिनीरीत्या तत्प्रयोगस्य ब्राह्मण्यादिनीविषयत्वेन गतार्थत्वात् । ताश्च कल्पारम्भ एव भवन्ति । न तेन तद्भिन्नानां वेदाध्ययनसिद्धिः । अत एव वाचयेत् इति ऋत्विगादिद्वारैव तद्वाचनमुक्तम्; अन्यथा वदेत् इत्येव स्यात् । बह्वृची न स्यात् इति निषेधार्थं प्रयोगसिद्धेः सार्थक्यात् ।

यदुक्तम् "पत्न्या अध्ययनाभावे संस्कृतया वाण्या ऋत्विगुक्तेरप्रबोधात् कथं कर्मानुष्ठान" मिति, तदपि न, मातृभाषया सरलया संस्कृतया च तद्बोधे बाधाभावात् । प्रायेण पुंसामेव विधानबाहुल्यं स्त्रीणां त्वल्पमेव । तच्च वाचनादिना निर्वाह्यमेव । यथा जातकर्मादिसंस्कारेषु 'अश्माभव' परशुर्भव' इत्यादि मन्त्रोच्चारणादिभिस्तस्य हृदि कर्तव्यसंस्कारं पितैव स्थापयति तत्र शिशुर्मन्त्रान् भावान् वान् वेत्येव । यज्ञे कर्मणि प्रयोगनियम' इति भाष्येण प्रयोगनियमो ज्ञायते न ज्ञानम् प्रयोगश्च ऋत्विगादिभिः संपाद्यत एव । संस्कारविधौ श्रीदयानन्देनापि ऋत्विजा पुरोहितेन वा मन्त्रोच्चारणं कर्म च यजमानेन कारयितव्यम्' इत्युक्तम् । ( संस्कार विधि सामान्य प्रकरण २९ पृ० ) यथा यज्ञोपवीतात्पूर्वं माणवकोऽशिक्षितो भवति तथापि गुरुसमाश्रयेण मन्त्रोच्चारणे न विधिभ्रंशस्तथैव स्वरादिज्ञानाभावेऽपि । तच्च नाधर्मः तथैव वरस्य पुरोहितस्य वाश्रयेण मन्त्रोच्चारणे कन्याया अपि न दोषः । कन्योच्चारणीया मन्त्राश्चसौत्रा अल्पीयांसश्च । वैदिकास्तु वरेणैवोच्चारणीयाः । यच्चगोभिलो 'नायज्ञियां वाचं वदेत्' ( १।६।१६ ) इति सूत्रयति स एव 'यदि अयज्ञियां वाचं वदेत् नमो विष्णवे इति ब्रूयात्'

( १।३।२ ) इति तन्निरासरञ्चब्रवीति। विवाहे स्त्री जनस्तु अग्निमभिमुखो वाग्यतः प्राञ्जलिरास्ते आकर्मणः पर्य्यवसानात्' ( १।६।१६ ) तूष्णीमेव तिष्ठति वरः पुरोहितो वातत्कार्यं करोति।

यदुक्तम्—महाश्वेता सीतादिभिः सन्ध्यानुष्ठानात्स्त्रीणां वेदाधिकारः सिद्धयति' इति तदपि कुशकाशावलम्बनम्।

'सन्ध्याकालमनाः श्यामा सन्ध्यार्थेवरवर्णिनी।'

वा० रा० ( ५।१४।४९ ) इत्यादि, तत्र सम्यग्ध्यानस्यैव सन्ध्यात्वेन वेद-मन्त्रोच्चारणानावश्यकत्वात्।

'नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे'

( अथर्व २०।१९।३ ) इति परमेश नामस्मरणमेव स्त्रीणां सन्ध्या मन्तव्या। सामाजिकानां सन्ध्यायामपि 'ओं वाक् वाक्' 'ओं भूःपुनातु शिरसि' 'ओं भूः' इत्यादि मन्त्रा अवैदिकाः संहिताचतुष्टये तदलाभात् रामायणानुसारेण षड्वर्षायाः सीतायाः उद्वाहः उपनयनन्तस्या यावन्न सिध्येत्तावद्वैदिक-सन्ध्याधिकारः कुतस्तस्याः ? 'तस्मादहोरात्रस्य संयोगे ब्राह्मणः सन्ध्यामु-पासीत। उद्यन्तमस्तयान्तमादित्यमभिध्यायन्' ( ४।५ ) षड्विंश ब्राह्मणानु-सारेण सूर्यध्यानमेव सन्ध्या। सा च सूर्याय नमः इति लौकिकैर्मन्त्रैरपि सम्भवत्येव। सन्ध्याकालिकस्नानादि कृत्यमेव सन्ध्येति रामायण-टीकाका-रैश्चोक्तम्। किञ्च यदि महाश्वेतायाः यज्ञोपवीतधारणपूर्वकं सन्ध्यानुष्ठानमनु-करणीयं तदा तस्याः शिवमूर्त्यर्चनमपि स्वीकार्य्यम्। तच्च तत्रादिभिर्नाङ्गी-क्रियते। 'शङ्करार्चनाय स्वयमुद्यतां कादम्बरीम्' इति कादम्बरीग्रन्थतो ज्ञायते।

वस्तुतस्तु महाश्वेतायाः गन्धर्वकन्यायाः दिव्यात्वद् ब्रह्मवादिनीवत्तन्न दोषाय तदेव सा पत्युर्जन्मत्रयं यावन्न वृद्धा जाता। 'न देव चरितञ्चरेत्' इति रीत्या देवचरितस्यानुकरणं निषिद्धमेव। सद्योवधूनां तु विवाहकाले उपनयन मात्रं कृत्वा विवाहः कार्य्यः इति हारीत प्रोक्तसद्योवध्वा उपनयनन्तु नोपनयन संस्कारः, आचार्यकरणाभावात्। किन्तु विधिना पतिसमीपानयनमेव। यथा पुंसामाचार्यसमीपानयनं तद्वत्। यज्ञोपवीतञ्च यज्ञोपवीतवद्वस्त्रधार-णमेवेत्युक्तमेव।

किञ्च 'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥' ( २।६७ )
इत्यादिना मनुरपि वैवाहिकंविधिमेव स्त्रीणामुपनयनं, पतिसेवामेव च गुरुशुश्रूषां ब्रूते।
तथा—'यो मे भर्ता स मे गुरुः' (वा. रा. ५।२४।९ )
'गुरुपितृश्रेष्ठदेवेषु सर्वेभ्यश्च पतिर्गुरुः ।
विद्यादाता यथा पुंसां कुलजानां तथाप्रियः ॥' ( ब्र. वै. पु. ख. ४२।११ )
इत्यादावपि एतस्यैव प्रतिपादनम् ।

यच्च—"पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः' इति वचनात् उपनयनान्तरं वेदाध्ययनार्थं पित्रादिसमीपे निवासः" इति तच्च सर्वमसङ्गतमेव, उक्तमन्वादिवचनविरोधात् ।

'जातिं तु बादरायणस्तस्मात् स्त्र्यपि प्रतीयेत' इदं तु मीमांसासूत्रं 'स्वर्गकामो यजेत' इत्यत्र लिङ्गविशेषनिर्देशात्। 'पुंयुक्तं वैति शायमः' ( ६।१।६ ) इत्येकदेशिपक्षाश्रयेण पुमानेव स्वर्गकामो यागेऽधिक्रियते इति पूर्वपक्षे 'जातिं तु' इति सूत्रेण जात्याश्रयेण स्वर्गकामायाः पत्न्या अपि तत्राधिकारः साधितः। नोपनयनादिषु जातिपक्षाश्रयणम्, बहुप्रमाणविरोधादित्युक्तमेव। अन्यथा 'पशुमालभेत' इत्यत्रापि जात्याश्रयणेन पशुस्त्रिया अप्यालम्भः स्यात्। न च तदिष्टम्। अत एव ( ६।१।८ ) सूत्रे शबरस्वामिना 'स्वर्गकामशब्देनोभावपि स्त्रीपुंसावधिक्रियेते । अतो न विवक्षितं पुंलिङ्गम्, कुतः, अविशेषात्, नहि शक्नोति एषा विभक्तिः स्वर्गकामं विशेष्टुम्। 'स्त्री चाविशेषात्' इति कातीयसूत्रस्यापि स एवार्थः। तत्र कर्कभाष्यम् 'स्त्री चाधिक्रियते । कुत एतत्, अविशेषात् । यस्मात् श्रूयमाणमपि-एतल्लिङ्गं न विशेषकं भवति । उद्दिश्यमानविशेषणं ह्येतत्स्वर्गकामो यजेतेति विधिसंस्पर्शाभावात् । अविवक्षितं लिङ्गं संख्या च । तस्मात्तु स्त्रिया अप्यधिकारः। दर्शनाच्चे' (८) ति 'योक्त्रविधिपरे वाक्ये पत्न्या अधिकारं दर्शयति सा च पुंसा सहाधिक्रियते, न पृथक्। येन एकस्मिन् कर्मणि पत्नीसाध्याः पदार्था दृश्यन्ते। 'पत्नी आज्यमवेक्षते' इति। यजमानसाध्याश्च 'यजमानो वेदं बध्नाति' इति।' 'तुल्यफलत्वाच्च ।' 'स्वर्गकामो यजेत

इत्यनेन यजमानोऽभिधीयते । एवं पत्नी अपि । यथा यागेन यजमानः फलं साधयति तथा पत्नी अपि, विधेयगतं लिङ्गं संख्या च विवक्ष्यते । तत एव पशुना यजेत इत्यत्र पुंस्त्वम् एकत्वञ्च विवक्षितं भवति । तथैवाचार्यकरण-वाक्ये उपादीयमानत्वात् कुमारस्य पुंस्त्वं विवक्षितं भवतीत्युक्तम् ।

किञ्च "न सीतायाः परां भार्यां वव्रे स रघुनन्दनः ।
यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनी भवत् ॥' ( वा० रा० ७।९९।१ )
'रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीम् ।
ईजे यज्ञैः ।' ( कात्यायनस्मृति २०।४ ) ।

इति काञ्चन्या जानक्या सार्द्धं रामेण यज्ञः कृतः । न सा मन्त्रं वक्तिस्म । न वा कर्माणि, करोतिस्म । किन्तु ऋषिभिरेव तत्सर्वं क्रियतेस्म । तथैवान्यत्रापि बोद्धुं शक्यम् ।

न च "पुरा कल्प" शब्दस्य क्षात्रेण कल्पेनेतिवत् प्राचीनशास्त्रविधि-रित्येवार्थ इति वाच्यम्, सृष्ट्यादिप्रणीतमन्वपेक्षयाऽन्यस्य शास्त्रविधेर-भावेन तदर्थत्वात् । तत्र यथा क्षात्रविशेषणेन क्षात्रविधानमर्थस्तथैवात्र पुरेति विशेषणात् समयविशेष एव तदर्थो युक्तः । बहुभिश्चाचार्यैः कल्प-शब्दो युगान्तरविषय उक्त इत्युक्तमेव ।

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वम्' ... ... ... ... ... ॥

इत्ययं श्लोकः ऋग्वेदभाष्यारम्भे सायणेनोद्धृतः । तत्र युगान्तशब्दस्य कल्पान्त इत्येवार्थः । तेन सर्गादिसमये महर्षयः पूर्वं सेतिहासान् वेदादीन् लेभिरे इति सिद्ध्यति ।

''नहि शूद्रासु ब्राह्मणक्षत्रियवैश्या जायन्ते' इति सामाजिकसम्मतं हारी-तवचनम् कर्मणा वर्णव्यवस्थां खण्डयति । कर्मणा तत्त्वे तु कुत्रापि जातस्य कर्मणा ब्राह्मणत्वादिकं स्यादेव । वस्तुतस्तु 'शूद्रासु' इत्यस्य शूद्रसदृशीष्व-संस्कृतासु ब्राह्मणादिकन्यास्वित्येव तदर्थः कर्तव्यः तस्मात्-'स्त्रियः छन्दसा संस्कार्या' इत्यस्यापि छन्दसा विवाहसंस्कारः कार्यः इत्येवार्थः, विवाहस्तु समन्त्रक' इत्युक्तेः । वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः । ( २।६७ ) इति मनूक्तेश्च । चतुर्विंशतिमतसंग्रहे —भट्टोजिदीक्षितश्च स्त्रीणां

विवाह उपनयनस्थानापन्नः। नहि शूद्रसमाः स्त्रियः, 'स्त्रियश्छन्दसां संस्कार्याः' इति हारीतवचनस्य प्रामाण्यवादिनां शूद्राणां वेदमन्त्राधिकारो बाध्येत। तथा च 'यथेमां वाचमित्यादि' रीत्या स्वकपोलकल्पनया वेदेषु सर्वाधिकारप्रतिपादनं व्यर्थमेव स्यात्। सिद्धान्तरीत्या तु 'संस्कारोत्तरं ब्राह्मणा व्याकरणं स्माधीयते' इति महाभाष्यस्य पस्पशाह्निके पुरुषसम्बन्धे संस्कारशब्दस्य उपनयनसंस्कारोऽर्थो गृह्यते। स्त्रीणां सम्बन्धे तु 'रजः पश्यत्यसंस्कृता' (वृ. य. स्मृतौ ३।१८) इत्यादौ विवाहसंस्कारो ग्राह्यः। 'वैवाहिको विधिः स्त्रीणाम्' इति मनूक्तेः।

यथा 'निषादस्थपतिं याजयेत्' इति वेदानधिकारिणोऽपि वचनबलान्निषादस्थपतेः सर्वं मन्त्रोच्चारणादिकमृत्विक्करोति तथैव स्त्रिया यजनादिकमपि वरो ऋत्विग्वा सम्यक् सम्पादयति। तदुक्तं स्मृतितत्त्वे ६३४ पृष्ठे—

'अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते।

इति वराहपुराणवचनादयं विधिः शूद्रकर्तृकमन्त्रपाठरहितः।' ततश्च तत्कर्मसम्बन्धिमन्त्रेण विप्रः तदीयकर्मकारयितृब्राह्मणो गृह्यते। तेन ब्राह्मणेन मन्त्रः पठनीयः। तथैव स्त्रीणां कृते वरः सर्वं मन्त्रादिसाध्यं कर्म कुर्यात्। यथा वा अन्नप्राशने 'ओं अन्नपते अन्नस्य नो देहि' (यजुः सं॰ ११।८३) कर्णवेधे 'भद्रं कर्णेभिः शृणुयाम देवाः' (ऋ. सं. १।८९।८)। मन्त्रौ बालेन पठनीयौ, तथापि तदानीं बालस्य तदसामर्थ्यात् यज्ञोपवीताभावेनानधिकाराच्च तत्पित्रादिभिः पठ्यते तथैव स्त्रीसाध्यं कर्म पतिः करोति।

यदुक्तम् "कुमारशब्दस्य जातिपरत्वादेव कुमारा विशिखा इव' इत्यनेन कुमाराणामिव कुमारीणामपि चौलकर्म सूच्यते" इति तदपि न, तथात्वे 'त्वं कुमार उत वा कुमारी' (ऋ. सं. १०।८।२७) इत्यत्र कुमारशब्दात्पृथक् कुमारीपदवैयर्थ्यापत्तेः, प्रकृते तु कुमार्यश्च कुमाराश्चेत्येकशेषत्वात् 'कुमारा विशिखा इवे'इति कुमारीणामपि सूचनं संभवति जातिपक्षानाश्रयणेनापि।

यत्तु "यो वाऽऽगमिष्यति स व्यापादयिष्यति ते' इत्यादौ यः सः इति पुल्लिङ्गश्रवणेऽपि जातिपक्षाश्रयणेन स्त्रीपुंसावुभावपि विवक्ष्येते 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य चे' त्यादावपि पुल्लिङ्गदर्शनेऽपि जातिपक्षाश्रयणेन स्त्रीपुंसोरुभयोरपि ग्रहणम्। तथैवाष्टवर्षं ब्राह्मणमुपनयीत" इत्य-

मूल मुद्रणे लुप्तः

त्रापि जातिपक्षाश्रयणेनोभय. . तन्न, संस्कार॰ सम्बन्धे मीमांसाविरोधस्य च ॰यणेऽन्यस्मृतिविरोधश्च स्यात्। तथाहि तथा त्वेऽष्टवर्षीया ॰ गुरुकुलवासश्च स्वीकार्य्यम्। तथात्वे पतिसेवा गुरौ वास इत्यादि विरोधः। पिता पितृव्यो भ्राता वा नैनामध्यापयेत् परः।' इति यमस्मृतिविरोधश्च स्यात्।

पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता॥
( यमस्मृतिः ३।२२ )

इति स्मृतेर्निर्विषयत्वापत्तिश्च, आचार्यकुलस्थितायास्तस्या रजोदर्शनेऽपि तद्वचनाविषयत्वात्। उपनयनवत्या विवाहसंस्काराभावेऽपि नासंस्कृतात्वं न वा वृषलीत्वं संभवति, तथात्वे तद्बोधकं वचनं व्यर्थमेव स्यात्।

तस्माद्यत्र जातिपक्षबाधको न भवेत्तत्रैव जातिपक्षाश्रयणं युक्तम्। 'अमन्त्रिका तु कार्येयं स्त्रीणामावृतशेषतः (१२।२६) पद्ये पुंसः इत्यादौ तु जातिपक्षो बाध्यत एव तथैव 'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।' ( मनु० २।६७ ) 'एताः क्रियाः स्त्रीणाम् मन्त्रिकाः' (बृहद् विष्णुस्मृतिः २६।१३) 'तासां समन्त्रको विवाहः' ( २।१४ ) 'आवृतैव स्त्रियाः कुर्यात्'-अमन्त्रकं' ( जै गृ. सू. १।११ ) 'आवृतैव कुमार्य्यै'। ( आश्वला० गृ० १।१५।१२ )। आश्वलायनसू० १।१९।५ 'इत्यत्र 'समन्त्रकेऽनुष्ठानप्रकारेऽन्यत्र विहिते तस्यैव मन्त्रवर्जितस्य वचनमावृत्' इति हरदत्तः। आपस्तम्बगृ० आवृतश्च आस्त्रीभ्यः। ( १।२-१५ ) इत्यत्र मन्त्ररहिता क्रिया आवृत उच्यते इति हरदत्तवृत्तिः। एवं स्त्रियाविमन्त्र तु कार्य्यं ( बृ. पाराशरस्मृतिः ४।१४७ ) इत्यादि बाधकवचनैः अष्टवर्षं ब्राह्मणमित्यत्र जातिपक्षो बाध्यते। यदोक्तवचनैः कन्यानां कर्मसु मन्त्रपाठोऽपि निषिद्धस्तदा वेदाध्यनाधिकार प्रदमुपनयनं कथं तासां सिध्यति। यदि जातिपक्षः सर्वत्राबाधितः स्यात्तदा

'केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः॥" ( मनुः २।६५ )

इति रीत्या कन्यानां षोडशादिषु वर्षेषु केशान्तः कारयितव्यः। स च नेष्यते वादिभिः। ततोऽत्र जातिपक्षो बाधित एव मन्तव्यः।

जातिप ...नामप्युनयनविवाहादिप्रसज्येत। दशरथस्य चत्वारो पुत्रा ज ...स्य पुत्रश्च जाताः इत्यप्यर्थं स्यात्।

'कुमारं जातं' ( आश्वलायनः १।१२।१५ ) इत्यत्र हरदत्तः 'कुमारस्येत्यनुच्यमाने जातिमितिलिङ्गस्याविवक्षितत्वात् कुमार्य्या अपि प्राप्नोति। तन्निवृत्त्यर्थं कुमारग्रहणम्। तस्माद् 'ब्राह्मणो न हन्तव्यः' इत्यादिषु जातिविवक्षणेऽपि यत्र संस्कारसम्बन्धे स्त्रीणां निषेधस्तत्र न तदाश्रयणं युक्तम्। अतएव वेदेऽपि 'मम पुत्राः शत्रुहणो अथोमे दुहिता विराट्।' ( ऋ. सं. १०-१५६।३ ) इत्यत्र पुत्रशब्दात् पृथक् दुहितृग्रहणम्। 'यदि स्त्री यदि पुमान्' ( अथर्व ५।२४।६ ) 'शन्नः करोति नृभ्यः नारिभ्यः' 'सम्राज्ञो एधि श्वसुरेषु सम्राज्ञी उत श्वश्र्वाः' ( अथर्व १४ १।४४ ) 'पुत्रो मे पण्डितः' अथ य इच्छेद्दुहिता मे पण्डिता स्यात्' इत्यादिषु च स्त्री पुंसयोः पृथङ्निर्देशः। स्त्रीणामुपनयने पूर्णब्रह्मचर्य्येऽभ्युपगते अष्टचत्वारिंशद्वर्षपर्यन्तं ब्रह्मचर्यं पालयित्वा पश्चाद्विवाहः प्रसज्येत।

ब्रह्मचर्य्यकृत्योपदेशे स्तनाच्छादनरजोधर्मकर्तव्यादिकस्योपदेष्टव्यम् स्यात्। 'प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते।' ( मनु २।२६ ) अत्र 'पुंस' इति नरः 'पुमांसो वै नरः। स्त्रियो नार्य्यः।' ( ऐ० ब्रा० ३।३४ ) पुंस इत्यत्र मेधातिथिः 'पुंस इति स्त्रीनपुंसकनिवृत्त्यर्थम्।

'पुमान् पुंसोऽधिके शुक्रे स्त्रीभवत्यधिके स्त्रियाः।
समेऽपुमान् पुंस्त्रियौ वा'। ( ३।४६ मनुः )

अत एव स्त्रीणाममन्त्रिकाः क्रिया उक्ताः। मेखलाबन्धनकौपीनधारणहृदयालम्भनादिकं 'मुखेन मुखं सन्निधाय जपति' ( अग्निवेश्म गृह्य १।१।३ ) इति मुखे मुखसन्निधापनञ्च कन्यासु न सम्भवति न वा वादिभिरपि क्रियते।

यदुक्तम् 'स्त्रीप्रत्यये 'आचार्या' 'उपाध्यायी' इत्यादि प्रयोगैरपि स्त्रीणां वेदाध्ययनसिद्धिः।

'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥' ( २।१४० )

इति मनुवचनेन वेदाध्यापनमन्तराऽचार्यत्वासंभवात्' इति, तन्न निषेधार्थमपि प्रयोगसिद्धिसंभवात्। नहि विधानार्थमेव शब्दसिद्धिर्निषेधार्थमपि तदपेक्षितत्वात्। तथा चाचार्या न स्यात्, वद्वृद्धौ न स्यात् इति

निषेधार्थमपि तत्प्रयोगसाधुत्वापेक्षणात् । मनुवचनेत्वाचार्य्यस्य लक्षणमुक्तम्, नत्वाचार्य्यायाः पुल्लिङ्गनिर्देशात् । मनुना तासां विवाहातिरिक्ताः सर्वाः क्रिया अमन्त्रका उक्तास्तदा कथं तेन आचार्यालक्षणम् तथाभूतमुच्येत ।

किञ्च आचार्यलक्षणे 'वेदमध्यापयेद् द्विज' इत्युक्तम्, न चाचार्याया अध्यापनमिष्टम् । तथात्वे या तु स्वयमेवाध्यापिका तत्र ङीष् वाच्यः इत्यनेन उपाध्यायीवदाचार्यी इति स्यात् । तेन आचार्य्या अत्र व्याख्यात्री मन्तव्या । वेदाध्यापकाद्भिन्नोऽप्याचार्यो भवति ।, 'आचार्याणां शत पिता' ( मनुः २।१४५ ) वचनात् । अनेन व्याख्यातृशतादेव पितुरुत्कर्ष उक्तः । नहि वेदप्रदातुः पिता अधिको भवति । उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ( २।१४६ मनु ) इति वचनविरोधात् । तस्मादाचारं ग्राहयति आचिनोति बुद्धिमिति यौगिक एवाचार्य्य शब्दः स्त्रियाम् न तु परिभाषिकः । उपाध्यायी इत्यत्रोपाध्यायोऽपि न मनूक्तलक्षणः । या तु स्वयमेवाध्यापिका इति तत्त्वाधिके वार्तिके वेदस्य वेदैकदेशस्येति वचनाभावात् सीवनवयनादिकलाकौशलविषयमेवाध्यापनं तत्र विवक्षितम् । 'या अकृन्तन् ( अ. सं. १४।१।४५ ) इत्यादौ स्त्रीणां कृते तद्वर्णनात् ।

'स्त्रीणामुपनयनस्थानं विवाहं मनुरब्रवीत् ।
विवाहश्चोपनयनं स्त्रीणामाह पितामहः ॥'

इति माधवीयादिवचनान्यपि तदेव बोधयन्ति ।

'नासां द्विजातिसंस्कारो न निवासो गुरावपि ।' (श्री भागवते १०।२३।४२)

यदुक्तम्—'वेद पत्न्यै प्रदाय वाचयेत होता अध्वर्युर्वा । वेदोसि वित्तिरसि' ( आश्वलायन श्रौ० १।११।१ ) अत्र पत्न्या हस्ते वेदपुस्तकं दत्त्वा मन्त्रविशेषं वाचयेत । 'वेद पत्नी विस्रंसयति । वेदोऽसि येन त्वं देव वेद' (शत ब्रा० १।९।२२-२३) अत्र वेदमुद्घाट्य वेदोऽसीति यजुः ( २।२१ ) मन्त्रं पठेत् । 'पत्नी वेद प्रमुञ्चति' (कत्यायन श्रौ ६।८।२) तस्यै सावित्र्यै सीतायै सह त्रीन् वेदान् प्रददौ प्रजापतिः' ( तै० ब्रा० २।६।१० ) इत्यात्र वेदशब्दस्य वेदमन्त्रलाञ्छितं किञ्चिद् गुटिकाद्रव्यं दत्तवान् इत्यर्थस्तवनर्थ एवे"ति तदपि न, अर्थानवबोधात् । नात्र वेदशब्दस्य ग्रन्थोऽर्थः । सामाजिकवादिसंमते वेदे, वेदोऽसि वित्तिरसि, इति मन्त्रस्यैवाभावात् ।

किञ्च यदि पत्न्या हस्ते वेदो दत्तस्तदा होत्रा अध्वर्युणा वा किमर्थं वाचनीयम्? तत्कर्तृकं वाचनं चेत्पुस्तकदानं व्यर्थमेव। तस्माद्वेदपदं कुशमुष्टिपरम्। 'वेदङ्कृत्वा वेदिं करोती'ति श्रुतेः। वेदोसि (यजु० २.२१) इति मन्त्रे महीधरभाष्यम्-'पत्नी वेदं प्रमुञ्चति' हे कुशमुष्टिनिर्मितपदार्थ त्वं वेदः ऋगाद्यात्मको ज्ञाता वा असि। हे द्योतनात्मक त्वं देवानां ज्ञापकोऽभूः। नहि यजमानपत्नी वेदग्रन्थं मुञ्चति हारवत् स्वाङ्गे धारयति किन्तु कुशमुष्टिमेव, याज्ञिकानां तथैवाचारदर्शनात्। उञ्छादि (पा० सू० ६४) सूत्रे वेदशब्दः कुशमुष्टेः योगदानम्। ग्रन्थराशिरूढो वेदशब्दो वृषादिगणपठित आद्युदात्तः। 'संमार्जनार्थं दर्भमुष्टिनिर्मितपदार्थो वेदः। तं पदार्थम् ऋग्वेदाद्यात्मना स्तौति त्वं वेदोसीति ऋगाद्यात्मको वेदिता वासीति (काण्वसंहिता १।५) इत्यत्र सायणः। 'प्रजापतेर्वाऽस्मश्रूणि यद्वेदः' (तै० ३।३।६।११) 'योषा वै वेदिः। वृषा वेदः' (शतः १।९।२०-२१-२४) इत्यादिवचनेभ्यः।

यदि तत्र वेदशब्दस्य वेदग्रन्थोऽर्थः स्यात्तदा 'वेदं पत्नी निरस्यत' (सत्याषाढ सू० २।५) इत्यत्र पत्नीकर्तृको वेदनिरासोऽप्यभ्युपगन्तव्यः सचानिष्ट एव। 'वेदं प्रमुञ्चति' शब्दस्य वेदपरित्यागः परिधानं वार्थः, न च तद्द्वयमपि प्रकृते घटते। तस्मात्कुशमुष्टिधारणमेवार्थः। 'यजमानो वेदं बध्नाति' (का० श्रौ० १.१।८) 'वेदे पत्नी विस्रंसयति' (शत १।६।२२-२४) इत्यादौ कुशमुष्टेरेव बन्धनं विस्रंसनं वा संभवति। तस्मात्स्त्रियाः 'क्रमेण विधिपूर्वकम्' (मनु २।१७३) इति विधिपूर्वकक्रमिकवेदाध्ययनाभावेऽपि यावदुक्तं केषाञ्चिन्मन्त्राणां पाठनमपवादभूतमिष्टमेव। एतेन 'वेदोऽसि वित्तिरसि वेदो वाजं वीरं ददातु वृषः वृषणवती वेदः पत्नीभ्यो भव' (१।१-४।२५ कात०) इत्यत्रापि कुशमुष्टिरेवार्थः। सीताया वेदत्रयदानमपि सायणोक्तगुटिकादानमेव पतिवशीकाराय तस्यैवापेक्षितत्वात्।

यदुक्तम्-"अग्निं जुहोतिस्म तदा मन्त्रवित् कृतमङ्गला।' (वा० रा० २।२०।१५) अत्र कौशल्याया मन्त्रवित्वहोमकर्तृत्वञ्च स्पष्टं श्रूयते। 'वैदेही शोकसंतप्ता हुताशनमुपागमत्' (सुन्दर का० ५३।२५) अत्र वैदेह्या हवनम् 'तदा सुमन्त्र मन्त्रज्ञा कैकेयी प्रत्युवाच ६१७ (वा. रा. २।१४।५६) अत्र

कैकेय्या वेदमन्त्रज्ञत्वमुक्तम् 'ततः स्वस्त्ययनं कृत्वा मन्त्रविद्विजयैषिणी' ( वा. रा. ४।१६।१ ) इति ताराया मन्त्रज्ञत्वमुक्तम्।

'वाग्यतास्ते त्रयः सन्ध्यां समुपासत संहिताः।' ( वा. रा. २।७।१६ ) अत्र रामलक्ष्मणसीतानां सन्ध्यावन्दनं स्मर्य्यते।

'नदीमेतां शुभजलां सन्ध्यार्थे वरवर्णिनी।'

अत्र सीतायाः सन्ध्यावन्दनमुक्तम्।" इति, तदपि न, पूर्वोक्तवचनविरोधादन्तर्भावितणिचमाश्रित्य जुहोति इत्यस्य ऋत्विग्द्वारा हावयति इत्यर्थकरणे दोषाभावात्। मन्त्रविदिति छलेन पाठपरिवर्त्तनं कृतम्। वस्तुतः मन्त्रवदित्येव पाठः। तत्रैव च—

'प्रविश्य तु तदा रामो मातुरन्तः पुरं शुभम्।
ददर्श मातरं तत्र हावयन्तीं हुताशनम्॥'
( वा. रा. २।२०।१६ )

इत्यव्यवहितपद्यानुरोधेन जुहोतीत्यत्राप्यन्तर्भावितणिच् अवश्यं मन्तव्यः। यद्वा ऋत्विग्द्वारा इत्यध्याहृत्य जुहोति इत्यस्यापि निर्वाहो भवत्येव। ब्राह्मणद्वारा होमं करोति हावयति इत्यनयोरैकार्थ्यसम्पत्तेः। अन्यथा तद्संगतिर्ध्रौव्यम् निश्चप्रचम्। अत एव प्राचीनैः रामाभिरामीयटीकाकारैः 'अग्निहोत्रमन्त्रवद् जुहोति स्म, ज्येष्ठपत्नीत्वात्, ऋत्विजा इति शेषः। तदाह हावयन्तीमिति ( २।२०।१६ ) हावयन्तीं ब्राह्मणैरिति।' 'एतदनुरोधेन पूर्वत्र जुहोति इत्यस्य हावयन्ती इत्यर्थः।' इति शिरोमणिकारः : भूषणकारैरपि तदेवोक्तम्। मनूक्त्यनुसारी चायमर्थः।

पुरोहितं च कुर्वीत वृणुयादेव चर्त्विजः।
तस्य गृह्याणि कर्माणि कुर्य्युर्वैतानिकानि च।' ( ७।७८ )

इति मनुवचनात्। तथा दशरथस्य राज्ञो राजकार्य्यव्यस्ततत्वात्तज्ज्येष्ठपत्न्या ऋत्विग्द्वारा अग्निहोत्रादिसम्पादनं युक्तमेव। रामायणीयवचनान्तरैरपि रामस्य वनगमनसमये कौशल्याब्राह्मणैरेव हवनमन्त्रपाठादि मङ्गलं सम्पादितवतीति ज्ञायते।

'ज्वलनं समुपादाय ब्राह्मणेन महात्मना।
हावयामास विधिना राममङ्गलकारणात्॥' ( २।२५।२७ )

'घृतं श्वेतानि माल्यानि समिधश्चैव सर्षपान्।
उपसम्पादयामास कौशल्या परमाङ्गना ॥' (२।२५।२८)

'उपाध्यायः सविधिना कृत्वा शान्तिमनामयम्।
हुतहव्यावशेषेण बाह्यं बलिमकल्पयत् ॥
मधुदध्यक्षतघृतैः स्वस्तिवाच्यं द्विजांस्ततः।
वाचयामास रामस्य वने स्वस्त्ययनक्रियाम् ॥
ततस्तस्मै द्विजेन्द्राय राममाता यशस्विनी।
दक्षिणां प्रददौ काम्याम्' (२।२५।२९...३१)

'न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः।
होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ॥
नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत्।
तस्माद्वैतानकुशलो होता स्याद्वेदपारगः ॥'
(मनु० ११।३६-३७)

अन्यत्रापि--

नाश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा।
स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्वचित् ॥
अश्लीकमेतत्साधूनां यत्र जुह्वत्यमी हविः ॥
प्रतीपमेतद् देवानां तस्मात्तत्परिवर्जयेत् ॥'
(मनु० ४।२०५-२०६)

इत्यादिषु स्पष्टं स्त्रीकर्तृकहवननिषेधः। यत्र च

'चकार रम्यं कौशल्या मन्त्रैरभिजजाप च।' (२।२५।३९)

इत्यादिषु यत्र स्त्रीकर्तृको जपो दृश्यते, तत्र पौराणिकमन्त्रजप एव मन्तव्यः। यथा रामायणे—

'समित्कुशपवित्राणि वेद्यश्चायतनानि च।
स्थण्डिलानि च विप्राणां शैला वृक्षाः क्षुपा ह्रदाः ॥
पतङ्गाः पन्नगाः सिंहास्त्वां रक्षन्तु नरोत्तमम्।'
(२।२५।७)

'नक्षत्राणि च सर्वाणि ग्रहाश्च सह दैवतैः ।
अहोरात्रे च ते सन्ध्ये पान्तु त्वां वनमाश्रितम् ॥'

इत्यारभ्य १८ द्रष्टव्यानि ।

'वैदेहीशोकसंतप्ता हुताशनमुपागमत् ।'

इत्यत्रापि न होमो विवक्षितः किन्तु हनूमतः शुभकामनया हुताशनप्रार्थनमेव । यथा तथैव—

'लाङ्गूलेन प्रदीप्तेन स एष परिणीयते ।
श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमम् ।
उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ।
यद्यस्ति गुरुशुश्रूषा यदि वा चरितं तपः ।
यदि वाप्येकपत्नीत्वं शीतो भव हनूमतः ॥'
(सुन्दरे ५३-२६-२७)

इत्यादि सन्दर्भस्वारस्यात् । टीकाकारैश्च उपागमत् मनसा प्राप्नोत् । ध्याने नोपासितवती इति शिरोमणिः । यद्वा ज्वलमानमग्निमुपासितवती तिलकः इति यथा—अपत्नीकस्य यज्ञो न भवति तथैवापतिकाया अपि यज्ञो न संभवति । अतएवोक्तं मनुना—

'नास्ति स्त्रीणां पृथग्यज्ञो' (५।१।५५)

मन्त्रज्ञा कैकेयी इत्यत्र मन्त्रशब्दस्य न वेदमन्त्रोऽर्थः, किन्तु षट्कर्णो भिद्यते मन्त्रः । तस्मान्नोतिचतुरा इत्येवार्थः । अतएव टीकाकारैरपि— 'मन्त्रज्ञा स्वकार्यवक्तव्यज्ञा' इति तिलकः । राजनीत्यनुसारेण स्वकार्योचितविचारज्ञा' इति गोविन्दराजः ।

नहि वेद मन्त्रज्ञत्वेन प्रधानमन्त्र्यादीनां मन्त्रित्वम् । ताराऽपि तादृशी मन्त्रज्ञा आसीत् । अद्यापि यैर्मन्त्रैर्मन्त्रिणां मन्त्रित्वं तेषामेव ज्ञात्री तारासीदित्येवार्थः ।

'मन्त्रश्च वैदिकादन्य' इति गोविन्दराजः । त्रयः सन्ध्यामुपासत इत्यत्र तु 'सुमन्त्रेण सहितास्त्रयः' इति तिलककारः । सीताया अपि सन्ध्यौ परमात्मध्यानरूपासन्ध्यौपपद्यत इत्याद्युक्तमेव ।

यदप्युक्तम्-'यज्ञियासः पञ्चजना मम होत्रं जुषध्वम्' इत्यत्र निषादपञ्चमा-

नाम्पञ्च जनानामग्निहोत्रसेवनमुक्तम्" इति तदपि न, तत्र 'गन्धर्वाः पितरो देवा असुरा रक्षांसि' (३।८।१) इति निरुक्तरीत्या गन्धर्वादय एव पञ्चजना इह यज्ञप्रसङ्गे विवक्षिताः। ( ऋ० सं० १।१००।१२ ) इत्यत्र पाञ्चजन्य व्याख्यायाम् 'गन्धर्वाः अप्सरसः, देवाः, असुराः, रक्षांसि पञ्चजना' इति सायणः। 'चत्वारो महर्त्विजो यजमानश्च पञ्चमः।' इति ( यजु० २।२३ ) इत्यत्र महीधरः।

किञ्च 'ये देवा असुरेभ्यः पूर्वे पञ्चजना आसन्' जैमिन्युपनिषद्ब्राह्मण ( १।४१।७ ) 'पञ्च वर्गा देवा उक्ताः।' 'तदद्यवाचः' ( ऋ० सं० १०।५३। ४ ) इति मन्त्रे 'शौचीकस्याग्नेरार्षम्। तस्य विश्वैर्देवैः संवादः' ( नि.३।८।१ ) इत्यत्र दुर्गाचार्य्यः। तेन देवा एवात्र पञ्चजनाः। यद्वा निरुक्तरीत्या पञ्चजन शब्दो मनुष्यमात्रपरः। तथापि यदि सर्वेषां समो यज्ञाधिकारः स्यात्तदा यज्ञिया इति विशेषणं व्यर्थमेव स्यात्ततो 'यज्ञियाश्च मनुष्या ब्राह्मणो वैव राजन्यो वैश्यो वा ते हि यज्ञियाः।' (३।१।१।९ शत०) इति रीत्या त्रैवर्णिकः एव यज्ञियो नान्ये इति न कोऽपि दोषः। सर्वेषामपि ग्रहणे यथायोग्यमेव समेषां यज्ञजोषः। ब्राह्मणस्यार्त्विज्येन, क्षत्रियस्य रक्षया, वैश्यस्य धनेन, शूद्रनिषादयोः सेवया यज्ञियः प्रदेश इति वार्त्विज्ययाजमानभिन्नदेशादिष्वपि यज्ञियपदप्रयोगदर्शनात्।

यत्तु 'सरस्वत्याज्ञया कण्वो मिश्रदेशमुपाययौ।
म्लेच्छान् संस्कृतमाभाष्य तदा दशसहस्रकम्॥
वशीकृत्य स्वयं प्राप्तो ब्रह्मावर्त्ते महोत्तमे।
ते सर्वे तपसा देवीं तुष्टुवुस्तां सरस्वतीम्।
पञ्च वर्षान्तरे देवी प्रादुर्भूता सरस्वती।
सपत्नीकांश्च तान् म्लेच्छान् शूद्रवर्णाय चाकरोत्।
( भविष्य पुराण प्रतिसर्ग ४ खण्ड २१।१६-१७।१८ )

इति पुराणवचनैर्यवनानामपि संस्कृतपाठनमार्य्यत्वनिर्माणञ्च दृश्यते" इति, तदपि न, भावानवबोधात्। तत्र हि मिश्रशब्देन यत्र चातुवर्ण्यं स्पष्टं नासीत्तस्य भारतीयप्रदेशविशेषस्यैव ग्रहणम्। म्लेच्छशब्देन चाव्यक्तवाचो भारतीया एव। कण्वादिभिस्तेषामेव शोधनं कृतम्। 'म्लेच्छ अव्यक्तायां वाचि' (चुरादि) अस्फुटे अपशब्दे च ( भ्वादि ) इति रीत्या अपशब्दभा-

षणमेव म्लेच्छत्वप्रयोजकम्। अत एव म्लेच्छा या भूमेत्यध्येयं व्याकरणमिति महाभाष्यम्। एवमेव तत्रैव—

मिश्रदेशोद्भवा म्लेच्छा कश्यपनैव शासिताः।
संस्कृताः शूद्रवर्णेन ब्रह्मवर्णमुपागताः॥
शिखासूत्रं समाधाय पठित्वा वेदमुत्तमम्।
यज्ञैश्च पूजयामासुर्देवदेवं शचीपतिम्॥ (२०।७२।७३)

इति रीत्याऽपि न मुहम्मदमतानुयायिनां मुसलमानपदवाच्यानामेषा कथा। तदानीं तन्मतस्याभावादेव। किन्तु कण्वशिष्या एव कण्वगमनान्तरं स्वेच्छयैव ब्राह्मणा भूत्वा यज्ञोपवीतादिकं धारितवन्तः। ब्राह्मणेषु प्रविश्य वेदांश्च पठितवन्तः। इदानीमप्यनधिकारचेष्टया केचिदेवं कुर्वन्त्येव। तावताऽपि न तेषां वैधत्वम्। तस्य दैत्यपतत्वेन पुराणस्यानभीष्टत्वात्। तथाहि भविष्यपुराणस्य प्रतिसर्गस्य पर्वणः ४र्थे खण्डे २० अध्याये दससहस्र-वैष्णवैः साकं यज्ञांशब्राह्मणस्य जगन्नाथपुरीगमनमुक्तम्। ब्राह्मणरूपेण जग-न्नाथस्य ब्राह्मणरूपधरस्य तेन संवादः। भयानककलेर्वृत्तान्तश्रवणप्रार्थनया जगन्नाथेन तद्वर्णितम्। म्लेच्छा ब्राह्मणा भूत्वा वेदान् पठन्ति यज्ञान् कुर्वन्ति। बलिदैत्यस्य संकेतेनेन्द्रस्य तेजापहार्थमेव तैरिन्द्रपूजनं कृतमित्यपि तत्र संकेतितम्—

'दुःखितो भगवानिन्द्रः श्वेतद्वीपमुपागतः।
स्तुत्या मां बोधयामास देवब्राह्मणहेतवे॥
प्रबुद्धेमां वचः प्राह शृणु देव दयानिधे।
शूद्रसंस्कृतमन्नञ्च खादितुं न द्विजोऽर्हति।'
तथा च शूद्रजनितैर्यज्ञैस्तृप्तिं न चाप्नुयाम्।
काश्यपे स्वर्गते प्राप्ते मागधे राज्ञि शासति॥
मम शत्रुर्बलिर्दैत्यः कलिपक्षमुपागतः।
निस्तेजाश्च यथा हस्यां तथा वै कर्तुमुद्यतः॥' (७।४।७७)

एवमेव भाषासम्बन्धेऽपि तेनोक्तम्। तदा भगवता उपायाः उक्ताः।

इति श्रुत्वा जगन्नाथो देवराजमुवाच ह।
भगवन्तो द्वादशादित्या गन्तुमर्हन्ति भूतले।

अहं लोकहितार्थाय भविष्यामि कलौ युगे ॥
प्रवीणो निपुणो मिश्रः कुशलश्च कृती सुखी ।
निष्णातः शिक्षितश्चैव सर्वज्ञः सुगतस्तथा ॥
प्रबुद्धश्च तथा बुद्ध आदित्याः क्रमशोऽभवन् ।
धाता मित्रोऽर्यमा शुक्रो मेघः प्रांशुर्भगस्तथा ।
विवस्वांश्च तथा पूषा सविता त्वाष्ट्र विष्णुकौ ।
कीकटे देश आगत्य ते सुरा जज्ञिरे क्रमात् ।
वेदनिन्दां पुरस्कृत्य बौद्धशास्त्रमचीकरन् ।
तेभ्यो वेदान् समादाय मुनिभ्यः प्रददुः सुराः ।
वेदनिन्दाप्रभावेण तेऽसुराः कुष्ठिनोऽभवन् ।
विष्णुदेवमुपागम्य तुष्टुवुर्विष्णुरूपिणम् ।
हरिर्योगबलेनैव तेषां कुष्ठमनाशयत् ।
तद्दोषान्नग्नभूतश्च बौद्धः स तेजसा ऽभवत् ।
बौद्धराजविनाशाय दारूपाषाणरूपवान् ।
अहं सिन्धुतटे जातो लोकमङ्गलहेतवे ।
मन्दिरं रचितं तेन (इन्द्र द्युम्नेन) तत्राहं (विष्णु) समुपागतः ।
मां विलोक्य नरः शुद्धः कलिकाले भविष्यति ।

( भविष्य पुराण ( ३।४।१०-२०-९१ ) एकविंशे अध्यायेऽपि )

तत्प्रश्नानन्तरं जगन्नाथ उवाच—

स्वर्गते काश्यपे विप्रे ते म्लेच्छा शूद्रवर्णकाः ।
यज्ञैस्तमर्चयामासुर्देवदेव शचीपतिम् ॥'

कण्वे काश्यपे वा स्वर्गते ते ऽनधिकारचेष्टां कृतवन्तः । एतेन कण्वस्तेभ्यो यज्ञोपवीतं दत्वा वेदानध्यापयामासेत्युक्तिर्निराधारैव ।

दुःखितो भगवानिन्द्रः सबन्धुर्जगतीतले ।
वेदानाहर्तुमिच्छन्तो ब्रह्मयोनौ बभूविरे ।
जिनो नाम द्विजः कश्चित् तत्पत्नी जयिनी स्मृता ।
कश्यपाददितेरंशाज्जातौ तौ कीकटे स्थले ।

तयोः सकाशात्सञ्जाता आदित्या लोकहेतवे।
तत्रोष्य बौद्धशास्त्राढ्या चक्रुः शास्त्रार्थमुत्तमम्।
वेदान् शूद्रेभ्य आदाय विशालां प्रययुः पुरीम्॥
समाधितो मुनीन्सर्वान् समुत्थाप्य ददुः स्वयम्।
गताः सर्वे सुराः स्वर्गे ततः प्रभृतिभूतले।
म्लेच्छा बभूविरे बौद्धास्तदन्ये वेदतत्पराः।
सरस्वत्याः प्रभावेण त आर्या ऋषयोऽभवन्।
तैश्च देवपितृभ्यश्च हव्यकव्यं समर्पितम्।
तृप्तिमन्तः सुराश्चासंस्त आर्याणां सहस्रकाः।

(भ० पु० २१ अध्यायः)

स्त्रीणामधिकारो यज्ञे इत्येतदर्थं स्त्रिया अप्यधिकरणं मीमांसादर्शने। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्याम्नायते। तत्र पुल्लिङ्गविशेषनिर्देशात्पुंस एव यागाधिकारः। 'लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशायनः' (६।१।६) मीमांसादर्शने यथा 'पशुमालभेत' इति लिङ्गनिर्देशात् पुंपशुरालभ्यते न स्त्री पशुरेवमिहापि स्यादित्याशङ्क्य 'जातिं तु बादरायणोऽविशेषात्तस्मात्स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात्' ८ इति श्रीबादरायण रीत्या स्वर्गकाम इति जात्यर्थमभ्युपगम्य स्त्रिया अप्यधिकार उक्तः, न पुंस एव। स्वर्गकामशब्देन स्त्रीपुंसयोरुभयोरप्यधिकारः पुल्लिङ्गस्याविवक्षितत्वात्। कुतः अविशेषात्। नहि शक्नोत्येषा विभक्तिः स्वर्गकामं लिङ्गेन विशेष्टुम्। स्वर्गे कामो यस्य तं हि लक्षयत्ययं शब्दः। तच्च लक्षणमविशिष्टं स्त्रियां पुंसि च। तस्मात्स्त्री अपि यज्ञेऽधिकृता।

यदुक्तम्-यथा पशुमालभेतेत्यत्र पुंपशुरेवालभ्यते तथात्रापि स्यादिति, तत्र जातिद्रव्ययोः लक्षणत्वेनाश्रवणात्। तत्र तु पशुत्वं यागस्य विशेषणत्वेन श्रूयते। तेन यथा पशुत्वं यागसम्बद्धं तथैव पुंस्त्वमेकत्वञ्च। सोऽयमनेकविशेषणविशिष्टो यागो विधीयते उपादेयत्वेन चोदितत्वाद्यथाश्रुत्येव कर्त्तव्यः। तत्र द्रव्यवन्तः पुमांसोऽधिक्रियन्ते न च स्त्रीणाम् द्रव्यवत्त्वं तासां क्रयविक्रयवत्त्वात् पित्रा विक्रीयन्ते भर्त्रा क्रीयन्ते ताः। एवं द्रव्यः

समानयोगित्वान्न तासामधिकारः। तदर्जितमपि तत्स्वामिनामेवातो निजार्जितेनापि द्रव्येण न तासां द्रव्यवत्त्वम्।

'भार्या दासश्च पुत्रश्च निर्धनाः सर्व एव ते।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्।'

इति स्मरणात् इति पुनरपि प्रकारान्तरेण तासामनधिकारमाशङ्क्य 'फलोत्साहाविशेषात्' १३ 'अर्थेन च समवेतत्वात् १४' इत्यादि सूत्रैस्तासामधिकारः साधितः। फलार्थित्वाद्यागाधिकारे सिद्धे यजेतेति श्रुत्या स्मृतिं संकोच्यापि तासां द्रव्यवत्तां साधयिष्यते। धर्मे चार्थे च कामे च नातिचरितव्येति दानकालिकसंवादाच्च सिद्धयत्येव द्रव्यवत्त्वम्। स्मृत्या तु अस्वातन्त्र्यमेवानेन प्रकारेणोच्यते। क्रयस्य धर्ममात्रत्वान्न वस्तुत्वम्। क्रयो हि उच्चनीचपण्यपणो भवति। नियतं त्विदम् दानं शतमतिरथं शोभनामशोभनां च कन्यां प्रति। तस्मादविक्रयोऽयम्। पत्नी वै पारिणाय्यस्येष्टेरिति स्ववत्तामपि दर्शयति तासाम्। तत्रापि—दम्पत्योः सहाधिकाराधिकरणे 'स्वयंतोस्तु वचनादेककर्म स्यात्' १७ इत्यादि सूत्रैः दम्पत्योः सहाधिकारः साधितः। पुनश्च 'तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्' २४ सूत्रेण तस्या यावदुक्तमाशीर्ब्रह्मचर्यं कर्तव्यमुक्तं न सर्वं याजमानम् अतुल्यत्वात्। अतुल्या हि स्त्री पुंसा। यजमानः पुमान् विद्वांश्च। पत्नी स्त्री चाविद्या च। तेन क्रत्वर्थेषु यानि याजमानानि श्रवणानि तेषूपादेयत्वे श्रवणाद्विवक्षितं लिङ्गं तेन तेषु पत्नी न स्यात्। यानि च क्रत्वर्थानि समन्त्रकाणि तेष्वविद्यात्वात् पत्नी न स्यात्।

ननु तदेव पत्न्या अध्ययनस्य प्रयोजकं स्यादिति चेन्न पुंसास्तन्निर्वर्तकत्वेन तदप्रयोजकत्वात्। यत्क्रत्वर्थं तस्या येन केनचिन्निर्वर्तनीयत्वेनानुपपत्तेरभावात्। तस्मात्प्रतिषिद्धस्याध्ययनस्य पुनःप्रसवे प्रमाणाभावान्न तत् पत्नी कुर्यात्। यास्त्वाशिषो यच्च ब्रह्मचर्यतत्पुरुष प्रतिगुणभूतं न तदन्यतरेण कृते सिद्धयति न तत्रोपादेयत्वेन यजमानस्य श्रवणं तस्माल्लिङ्गमप्यविवक्षितम्। अतः आशीर्ब्रह्मचर्य्यञ्चोभयोरपि स्यात्। यच्चाहत्योच्यते 'पत्न्याज्यमवेक्षते' तदपि पत्न्या कर्तव्यम्।

पूर्वमीमांसायां (६।१।७) अपशूद्राधिकरणे 'चातुर्वर्ण्यमविशेषात्' २५ सूत्रेण यजेत जुहुयादित्यविशेषनिर्देशात् चातुर्वर्ण्याधिकारमाशङ्क्य निर्देशाद्वा

त्रयाणां स्याद्ग्न्याधेये ह्यसम्बन्धः। क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः' २६ सूत्रे 'वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः इति ब्राह्मण-क्षत्रियविशामाधानश्रुतिसद्भावाच्छूद्रस्य तु तदभावान्नाग्निहोत्रादिषु शूद्रोऽधिक्रियते, अग्निमत्त्वादत्र ब्राह्मणादय एव 'अग्निहोत्रं जुहुयात् स्वर्ग-कामः' एवमादिष्वधिक्रियन्ते। आहवनीयादयो न शूद्रस्य सन्ति अविधा-नात्। तेन न तत्र तदधिकार इत्यात्रेयमतेन समाधानमुक्तम्। पुनश्च सर्वमर्थिनमधिकृत्य यजेतेत्युच्यते तस्माच्छूद्रोऽप्यधिक्रियते। कामश्रुतिपरि-गृहीतत्वादग्निस्त्वर्थं प्राप्त एव। वसन्ते ब्राह्मण इत्यादि श्रुतयस्तु निमित्तस्व-भावा न प्रापिकाः। ब्राह्मण आदधाति वसन्ते राजन्यो ग्रीष्मे ब्राह्मणादीनां वसन्तादिभिः सम्बन्धो गम्यते। तथा चादधाति वाक्ये। शूद्राद्व्यावर्तितो भविष्यतीति बादरिमतरीत्या सर्वाधिकारः शङ्कितः।

'निमित्तार्थेन बादरिस्तस्मात्सर्वाधिकारं स्यात्' (२७) तस्यापि खण्ड-नम् 'अपि वान्यार्थदर्शनाद्यथाश्रुति प्रतीयेत' (२८) इति सूत्रेण कृतम्। तथाहि— वसन्ते ब्राह्मणोऽग्नीनादधीते'ति ब्राह्मणादिकर्तृकमाधानमुक्तम्। वसन्तादिकालिकञ्च तत्। शूद्रवर्जितानामवेदमनुमन्यम्। एवमेवाहद्गिरं ब्राह्मणस्य ब्रह्म साम कुर्यात्, पार्थुरश्मि राजन्यस्य, रायोवाजीयं वैश्यस्य; शूद्रस्य साम नामनन्ति। यथा 'पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्ये'ति तथाधाने 'अष्टसु प्रक्रमेषु ब्राह्मणोऽग्निमादधीत, एकादशसु वैश्यः, एवमब्रह्मसामकमव्रतकमक्रमकञ्च शूद्रस्य प्रयुक्तमपि कर्मनिष्फलं स्यात्, तस्मान्न शूद्रस्य यागाधिकारः। 'निर्देशात्तु पक्षे स्यात्' २९ इति सूत्रेण य एवं विद्वानग्निमाधत्ते इति सामान्यशास्त्रेण सर्वाधिकारः आशङ्कितः। यदुक्त मव्रमसामकं शूद्रकर्मनिष्फलं तदपि 'त्रैगुण्यान्नेति चेत्" (३०) 'न काम्यत्वात्' (३१) सूत्राभ्यामनारभ्याधीतेनाभीवर्त्तनाम्ना ब्रह्मसाम्ना चक्षुर्निमित्तमादध्यादित्यनियमितव्रतक्रमेण मस्तु शूद्रस्येति मस्तुव्रतेन सामा-दिमत्त्वं तस्य संभवादस्त्येव शूद्रस्याप्यधिकारः 'संस्कारे च तत्प्रधानत्वात्' (३२) इति संस्कारस्य पुरुषप्रधानत्वात् व्रतस्याङ्गत्वात् पुरुषसामर्थ्यजन-नायोपयोगः। यस्य तु तेन न प्रयोजनं स तदनपेक्ष्यैव यागं निर्वर्तयिष्यति तस्मान्न शूद्रवर्जनम् इति पूर्वपक्षमुत्थाप्य 'अपि वा वेदनिर्देशादपशूद्राणां

प्रतीयते ३३ सूत्रेण तदपोहनम्। नैमित्तिकेऽपि ब्राह्मणादिश्रवणे अशूद्राणां शूद्रभिन्नानां ब्रह्मक्षत्रविशामेव वैदिकेषु कर्मस्वधिकारः। वेदे त्रयाणामेव निर्देशात्। 'वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम् इति त्रयाणामेवोपनयनेन वेदप्राप्तिः। शूद्रस्योपनयनाभावाद्वेदाभावस्ततश्चा-समर्थो यष्टुं शूद्रः 'गुणार्थित्वान्नेति चेन्न' ३४ इति गुणेनाध्ययनेनार्थी शूद्रो-ऽनुपनीतः स्वयमेवैत्याध्येष्यते तथास्य सामर्थ्यं भविष्यतीति पूर्वपक्षं कृत्वा 'संस्कारस्य तदर्थत्वाद्विद्यायां पुरुषश्रुतिः' (३५) सूत्रेण तदपोहः।

तथाहि — विद्यायामेवैषा पुरुषश्रुतिः, उपनयनसंस्कारस्य तदर्थत्वात्। विद्यार्थमुपाध्यायस्य समीपमानयनम् नादृष्टार्थम्। नापि कटं कुड्यं वा कर्त्तुम्। दृष्टार्थमेव सैषा पुरुषश्रुतिः आत्मनेपददर्शनात्। नयतिराचार्य्यकरणे वर्त्तते। तदर्थसम्बन्धादुपनयनमाचार्यकरणप्रयुक्तम्। वेदाध्यापनेनाचार्य्यो भवति, तस्माद्वेदाध्ययने ब्राह्मणादयः श्रुताः, शूद्रस्य न श्रुतं वेदाध्ययनम् अतोऽवेदत्वादसमर्थः शूद्रो नाधिक्रियते यज्ञे। 'विद्यानिर्देशान्नेति चेत्' (३६) इति विद्यानिर्देशात् अनुक्तामपि विद्या-मध्येष्यते तस्मात्तस्याप्यधिकार इति पुनरप्याशङ्क्य 'अवैद्यत्वादभावः कर्मणि स्यात्' (३७) इति प्रतिषिद्धमस्याध्ययनम्। शूद्रेण नाध्येतव्यमिति अतोऽवैद्यः शूद्रः। अनग्नित्वादिभिरपि तदनधिकार एव सिद्ध्यति। 'ब्राह्मणो अग्नीनादधीत' इति श्रुत्या विधानं गम्यते। य ए. विद्वानिति स्तुत्या आनुमानिकं प्रत्यक्षश्रुतादुर्बलम् तस्मान्न शूद्राधिकारः।

'तथाचान्यार्थदर्शनम्' ३८ 'पद्यु वा एतत् श्मशानं यच्छूद्रः। तस्माच्छूद्र समीपे नाध्येय'मित्यनध्ययनं शूद्रस्य दर्शयति श्रुतिः। इत्थं सूत्रभाष्यादिभि पूर्वमीमांसादर्शने पूर्वपक्षोत्तरपक्षाभ्यां शूद्रस्योपनयनवेदाध्ययननिषेधादां वेदत्वादनग्नित्वादव्रतत्वादसामर्त्थ्यादप्रक्रमत्वाच्च भागानधिकारः स्पष्टमुक्तः।

यदुक्तमाधुनिकैर्जैमिनिकालेऽपि वादरिप्रभृतय आचार्य्याः शूद्रादीन् सर्वेषां वेदाध्ययनाग्न्याधानयज्ञानुष्ठानादिष्वधिकारं मन्यन्ते स्म" इति तत्तुच्छम्। मीमांसावृत्तान्तानवबोधात्। तथाहि —पूर्वोत्तरपक्षाभ्यां सिद्धान्तनैशद्याय मीमांसायामनेके पक्षाः परिकल्प्योच्यन्ते।

'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तम् ।
सङ्गतिश्चेति शास्त्रेऽस्मिन् पञ्चाधिकरणं स्मृतम् ॥'

इति मीमांसारीतिस्तदर्थमेव बादर्य्याद्युल्लेखः । न तदाप्तमतम्, वेदविरुद्धत्वात् । जैमिनिव्यासादिविरुद्धत्वाच्च । यथेदानीं केचित् पक्षा मासाः प्रचलन्ति तथैव तदानीमपीति कल्पनयाऽपि न दोषः ।

ब्रह्ममीमांसायामपि शूद्रस्याधिकारसम्बन्धे विचारः ।

'शूद्रस्य तदनादरश्रवणात्तदा द्रवणात्तत्सूच्यते हि' (ब्र० सू० १।३।३४) सूत्रे श्री शङ्करभगवत्पादैरुक्तम्—'यथा मनुष्याधिकारमोद्यदेवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यात् इत्याशङ्कां निवर्तयितुमिदमधिकरणमारभ्यते । तत्रार्थित्वसामर्थ्ययोः सद्भावात् 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः (तै० सं० ७।१।१।६) इतिवद् विद्यायां निषेधाश्रवणात् विद्यायां शूद्रस्याप्यधिकारः स्यात्। कर्मस्वनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यायामधिकारस्यापवादकलिङ्गम् । आहवनीयादीनां विद्यास्वनुपयोगात् । संवर्गविद्यायां हि जानश्रुतेः पौत्रायणस्य शुश्रूषोः 'अह हारेत्वाशूद्र तवैव सह गोभिरस्तु' (छा० ४।२।३) शूद्रशब्देन निर्देशात् लिङ्गबलेनापि शूद्राधिकारः । शूद्रयोनिप्रभवाणां विदुरप्रभृतीनां विद्याविनयसम्पन्नता स्मरणाच्च तदधिकारः सिद्धयति, इति पर्वपक्षं कृत्वा सिद्धान्ते विद्यायामपि शूद्रानधिकारः उक्तः । अधीतवेदस्यैव विद्यायामधिकारः संभवति । शूद्रस्य चोपनयनाभावान्न वेदाध्ययन संभवति तस्मान्न विद्यायां तदधिकारः । मत्त्वर्थित्वं न तदस्ति सामर्थ्येऽधिकारकारणं भवति । सामर्थ्यञ्च न लौकिकं केवलमधिकारकारणं भवति । शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात् । शास्त्रीयस्य सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वान्नाधिकारः सिद्धयति ।

यच्चेदं, शूद्रो यज्ञेऽनवक्लृप्त' इति तन्न्याय पूर्वकत्वाद् विद्यायामप्यनवक्लृप्तत्वं द्योतयति न्यायस्य साधारणत्वात् ।

यदुक्तम् 'संवर्गविद्यायां शूद्रशब्दश्रवणलिङ्गात् तत्राधिकारः स्या' दिति, तदपि न न्यायोक्तेऽर्थे हि लिङ्गद्योतकं भवति न चात्र न्यायोऽस्ति । न स्वतन्त्रं लिङ्गमेवाधिकारकारणं भवति अर्थवादस्थत्वात् । अर्थित्वाच्च

वेदं लिङ्गं शूद्रं क्वचिदपि विद्यास्वधिकर्त्तु मुत्सहते । विधिनात्वेकवाक्यत्वादतत्परस्यार्थवादस्य विरुद्धेऽर्थे प्रामाण्यासंभवात् । ननु किं शूद्रपदं प्रमत्तगीतम् ? न च तद्युक्तम्, साम्प्रदायिकत्वस्य तुल्यत्वादिति चेन्न हंसवाक्यादनादरश्रवणात्, शुचाद्रवणात् तत्सूचकत्वेन शूद्रपदस्य सार्थकत्वात् । तदाह भाष्यकारः तथाहि-'कम्वर एनत्सन्त सयुग्वानमिव रैक्वमात्थ' इत्यस्माद्धंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः शुक् (शोकः) उत्पेदे । तामृषो रैक्वः शूद्रशब्देन सूचयाम्बभूवात्मनः परोक्षज्ञताख्यापनायेति गम्यते जातिशूद्रस्यानधिकारात्। कथं शूद्रशब्देन शुगुत्पन्नेति सूच्यते इति उच्यते । तदाद्रवणात् शुचमभिदुद्राव, शुचा अभिदुद्रुवे, शुचा वा रैक्वमभिदुद्रावेति शूद्रः इत्येवार्थस्य संभवाद्रूढ्यर्थस्य चासंभवात् ।

छान्दोग्येऽयमर्थः स्पष्टः । 'जानश्रुतिः पौत्रायणो बहुदायी श्रद्धादेयो बहुपाक्यः प्रियातिथिर्बभूव ।' अस्य दानशौण्डस्यदानादिगुणतुष्टा देवर्षयः हंसरूपमास्थाय तदनुग्रहाय तस्य निदाघसमये रात्रौ हर्म्यतलस्थस्योपरि मालामाबद्ध्य जग्मुः । तेषामग्रेसरं हंसं सम्बोध्य पृष्ठतः पतन्नन्यतमः साद्भुतमभ्युवाच 'भो 'भो भल्लाक्ष जानश्रुतेरस्य द्युलोक आततं ज्योतिस्तन्मा प्रसाङ्क्षीर्मास्त्वाधाक्षीदिति । तमेवमुक्तवन्तमग्रेसरः प्रत्युवाच कम्बरकम् । उ अरे वराकमेनं सयुग्वानं रैक्वमिवात्थ । रैक्वस्य हि ज्योतिरसह्यं नत्वेतस्य प्राणमात्रस्य । तस्य हि भगवतः पुण्यज्ञानसंभारभृतस्य रैक्वस्य ब्रह्मविदो धर्मस्य त्रैलोक्योदरवर्ति प्राणभृन्मात्रधर्मोऽन्तर्भवति (तद्यथाकृताय विजिताधरेयाः संयन्ति) अथैष हंसवचनादात्मनो निकर्षमुत्कर्षकाष्ठाञ्च रैक्वस्योपश्रुत्य जानश्रुतिः शोकसंविग्नमानसः प्रातर्यन्तारमाहूय रैक्वमन्वेष्टुमादिदेश । स च तत्र तत्रान्विष्वन् क्वचिदतिविविक्ते शकटस्याधस्तात् पामानं कण्डूयमानं तमद्राक्षीत् । तं दृष्ट्वा प्रतिभावान् सविनयमप्राक्षीत् त्वमसि भगवन् सयुग्वा रैक्वेति । तस्य च भावमनुमतिं तैस्तैरिङ्गितैर्गार्हस्थ्येच्छाच्योन्नीय राज्ञे निवेदयामास । राजतं निशम्य गवां षट्शतानि निष्कं हारमश्वतरीरथं चादाय सत्वरं रैक्वं प्रतिचक्रमे । गत्वा तत्सर्वं समर्प्य भगवन् मामनुशाधीति प्राह—

तमेवं वादिनं रैक्व उवाच 'अहहारेत्वा शूद्र तवैव सह गोभिरस्तु' अह इति निपातः, साटोपमामन्त्रणे। हारेण युक्ता इत्वा गन्त्री रथो हारेत्वा गोभिः सह तवैवास्तु। किमेतावन्मात्रेण धनेन गार्हस्थ्यानुपयोगिनेति तद्भावः। राज्ञा पश्चात् कन्या सहित बहुधनमानीय दत्तम्। तदा स तस्मै संवर्गविद्यामुक्तवान्। प्रकृते च शूद्रशब्देनात्मनः परोक्षज्ञताचिख्यापयिषया शुचं सूचयामास। यद्यपि 'योगाद्रूढिर्बलीयसी' तथापि प्रकृते जातिशूद्रस्याप्रसङ्गात् अवयवार्थस्य च सम्भवाद्यौगिक एवार्थो ग्राह्यः। उत्तरत्र जानश्रुतेः क्षत्रियत्वावगतेश्च नात्र जाति शूद्र परः शूद्र शब्दः इति 'क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्' ब्र. सूत्र ३२ उत्तरत्र चैत्ररथेनाभिप्रतारिणा क्षत्रियेण समानाभिहारात् क्षत्रियत्वं ज्ञायते।

'अथ ह शौनकञ्च कापेयमभिप्रतारिणं च काक्षसेनिञ्च परिविषयमाणौ ब्रह्मचारी विभिक्षे' ( छा० ४।३५ ) अभिप्रतारिणश्च चैत्ररथित्वं कापेययोगादवगम्यते।

'एतेन वै चित्ररथं कापेया अयाजयन्' (ताण्ड्य ब्राह्मण२०।१२।५) इति श्रुत्वा चित्ररथस्य कापेययोगोऽपि गम्यते। समानान्वयानाञ्च प्रायेण समानान्वया याजका भवन्ति। 'तस्य चैत्ररथिर्नामैकः क्षत्रपतिरजायत' इति च क्षत्रपतित्वावगमात् क्षत्रियत्वं तस्यावगम्यते। तेनाभिप्रतारिणः क्षत्रियत्वं ज्ञायते। तेन सह समानायां विद्यायां सकीर्तनाज्जानश्रुतेरपि क्षत्रियत्वं सिद्ध्यति। ब्रह्मचारिभिक्षयाऽपि क्षत्रियत्वमस्य ज्ञायते। नहि जातु ब्रह्मचारी शूद्रात् भिक्षते।

क्षत्रप्रेषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वं ज्ञायते। 'संस्कारपरामर्शात् तदभावाभिलापाच्च' इति ३६ ब्रह्मसूत्रेणापि शूद्रस्य विद्यानधिकार उक्तः। तथाहि-विद्याप्रदेशेषु उपनयनादयः संस्काराः परामृश्यन्ते। 'ते ह भगवन्तं पिप्पलादमुपसन्नाः' (प्र. उ. १।१) 'तान् हानुपनीयैव' (छा० ५।११।७) इत्येवमादिषूपनयमपूर्वक एव विद्योपदेशः श्रूयते। शूद्रस्य च संस्काराभावोऽभिलप्यते। 'शूद्रश्चतुर्थो वर्ण एक जातिः' मनु १०।१८४ इत्येकजातिस्मरणात्। 'न शूद्रे पातकं किञ्चित् न च संस्कारमर्हति' (यजु० १०।१२) इति संस्कारनिषेधस्मरणाच्च। 'तद्भावनिर्धारणे च प्रवृत्तेः' ३७

सत्यवचनेन शूद्रत्वाभावे निर्धारिते जाबालमुपनेतुमनुशासितुञ्च गौतमः प्रववृते। 'नैतदब्राह्मणो विवक्तुमर्हति। समिधं सोम्याहर। उपत्वानेष्ये न सत्यादगाः।' (छा० ४।४।५) इति श्रुतिलिङ्गात्। तस्मादपि शूद्रनधिकारः सिध्यति। 'श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च' ब्र० ८ इत्यत्रापि वेदाध्ययनप्रतिषेधात्। तदर्थज्ञानानुष्ठानयोर्निषेधाच्च शूद्रस्य विद्यायामनधिकार उक्त अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् 'पद्य हवा एतत् श्मशानम् यच्छूद्रः। तस्माच्छूद्रसमीपे नाध्येतव्यमित्यध्ययननिषेधः वेदोच्चारणे जिह्वाच्छेदः, धारणे शरीरभेदः इति।

एतेनार्थात् ज्ञानानुष्ठानयोर्निषेधः। 'न शूद्राय मतिं दद्यात्' द्विजातीनामध्ययनमिज्यादानेत्यादि वचनैश्च वेदाध्ययनाद्यधिकाराभावाद्विद्यानधिकारः स्पष्ट एव। यदि तु कर्मभिर्गुणैश्च ब्राह्मण्यादिकमिष्टं स्यान्न जन्मना तदा वेदाध्ययनतदर्थज्ञानानुष्ठानादिकं कथं निषिध्येत? कर्मणा तत्त्वे तन्निषेधे ज्ञानकर्मानुपपत्तिस्तदनुपपत्तौ च ब्राह्मण्याद्यनुपपत्तिस्तदनुपपत्तौ च कर्मज्ञानानुपपत्तिरिति दुरुद्धरो दोषः स्यात्तस्मात् जन्मनैव ब्राह्मण्यादिकम्, तन्मूलकएवाधिकारभेदः। क्वचित्संदेहे सत्यवदनादिना ब्राह्मणादिस्वभावज्ञानेन तन्निर्धारणे। विहितकर्मरूपं सत्यवदनं तु शूद्रस्यापि वभागन्तु ब्राह्मणस्यैवेति न दोषः।

विदुरधर्मव्याधप्रभृतीनां तु पूर्वसंस्कारविशेषादेव ज्ञानोत्पत्तिः। अन्येषामपि जिज्ञासूनां 'श्रावयेच्चतुरोवर्णान्' इति रीत्या इतिहासपुराणश्रवणे चातुर्वर्ण्यस्याधिकारस्मरणात्। पुराणादिश्रवणेन यथायोग्यं धर्मब्रह्मज्ञानं संभवत्येव। वेदपूर्वकस्तु वाधिकारस्तेषां श्रुतिस्मृतिन्यायविरोधात् इत्योम्।

परमहंसपरिव्राजकाचार्यवदरिकाश्रमज्योतिष्पीठशङ्कराचार्य १०८ स्वामी
श्रीब्रह्मानन्दसरस्वतीभगवत्पादशिष्यानन्तश्रीस्वामी हरिहरानन्दसरस्वती ( श्रीकरपात्रस्वामि ) महाराजकृतौ
चातुर्वर्ण्यसंस्कृतिविमर्शे प्रथमो भागः

समाप्तः

— :o: —